Let us take these twenty-one kinds one by one. पानीयजा i. e. hunting near watering places. Big pits are dug out specially near watering places. In these pits the king and all the ladies of the harem dressed fully in green and wearing a द्विपदी (like the modern Pyjama) conceal themselves in such a manner that the deer do not get any scent of these people while the wind is blowing. All his men too should be dressed in green from top to bottom. The beaters should then scatter gram before the Dīpamṛga (decoying deer) which are specially trained in order to attract wild deer. The trained deer return to the spot followed by the wild deer near the tank. When this wild deer comes near the tank or begins picking gram or fight with the decoying deer the king armed with his bow and arrow should kill the deer by surprise. Immediately his men should rush to the scene and remove the carcass of the deer in order that no remnant of its body and no trace of its blood may remain. When this is done other deer may be similarly attracted to this place of death. This method is better than the one which makes the hunter wander about in the hot sun in search of the game.

The second variety of hunting is called Cārajā i. e. due to wandering of animals in search of food. When a forest-fire is raging, animals living there leave it in search of another which abounds in fruit and corn. They should be allowed to graze in the forest until they become bold enough to eat their food even in the presence of men moving near them. The king may kill them while a-hunting from an underground cellar (if it is day-time) or from pits or from under the shade of a tree (if it is night).

There is another kind of Cārajā Mṛgayā in which wild bears are coaxed into confidence by the hunters who spread gram on their way in such a manner that the line ends near the tent prepared for the king. The same process holds good in the case of the deer also.

Kṣetrajā — This is a kind of hunting in which the deer are killed when they come into a forest abounding in trees or in cultivated lands of peas, wheat, pulses etc. Here also the king should be dressed in green with weapons of green colour.

Mārgajā — The king first ascertains the path by which the deer habitually move. After knowing the route he takes his seat near it in a pit or the branch of a tree and kills them.

Ūṣarā — The deer are habituated to take saltish earth. When they bigin to lick the ground they should be beaten with clubs on the backbone and thus killed.

Dīpamṛgajā — Young, robust and elegant male deer are trained. Bridles with bits made of iron and tin are then applied to them like horses. Female deer are similarly trained. These are called Dīpamṛgas which in the absence of a better word may be translated as decoying deer or deer to serve as a bait. They are so trained that at the slightest sign they come back to their master in spite of temptations of food or a male or female of the species. The king accompanied by such Dīpamṛgas and two hunters should go to the forest.

When a herd of wild deer is traced the information is carried to the king, who should, then, carefully hide himself. The hunters carefully enter the forest, hide themselves behind trees and sometimes behind bullocks. One of them stealthily comes out of the forest, to inform the king leaving no ground for the deer to suspect the existence of men in the forest. He scatters leaves before himself so that the animals may not suspect the presence of men in the forest. Then the king with his bow and five arrows in one hand and a Dīpamṛga in the other should go forward followed by two hunters with Dīpamṛgas in their hands. The informant posted in the middle then should proceed cautiously and inform the person nearest to the herd. On the first man signalling these people to come nearer they should go with their bodies covered with Yavas (grass). If the herd looks at them they should let the Dīpamṛgas go and walk on all fours. The credulous ones among the herd may come towards the Dīpamṛgas either for company or for a fight. When the deer is thus drawn nearer the king should, from the place of hiding, either behind a Dīpamṛga or on a tree discharge arrows at the deer and kill it.

By tying the Dīpamṛgas to a tree also he can have a lot of Shikār. After describing the two methods of attracting the forest deer by means of Baddha (chained or restrained) Dīpamṛgas he now gives the method of attracting them with the help of Mukta (unrestrained) Dīpamṛgas. These unrestrained Dīpamṛgas freely mix with the forest deer. The hunter spreads gram in the forest and makes a sign by snapping the thumb and the middle-finger (छोटिका). On hearing the signal the Dipamrgas return followed by a number of forest deer. These are then killed.

There is another way of attracting the deer by Balivardatirodhāna (lit. hiding behind a bullock) method. Hunters conceal themselves

behind bullocks, move as the bullocks move and allow the unrestrained deer to move with their eyes towards the hunters. These unrestrained deer mix freely with the forest deer. Thus the hunters (keeping themselves behind the bullocks) surround the deer on all sides. Then the king takes his seat along with the ladies among the trees around him. When at the appointed place the hunters bring the decoying deer along with the forest deer, the latter are killed by the king with arrows.

Another interesting method of hunting the forest deer is given here. With a pair of decoying deer one female and the other a castrated male deer the king should go to the forest accompanied by hunters. Under the excitement of sexual passion the forest deer approaches the castrated or the female deer. The hunters walk on all fours and surround the forest deer which like to have communion with the Dīpamṛga, when the hunters suddenly get up and frighten them. The hunters then separate the forest deer and the Dīpamṛga. At this stage the king comes and kills the deer. Though this kind of killing is condemned in the Rāmāyaṇa[1] and Mahābhārata[2], Someśvara recommends it.

Then comes Vitapajā or that arising from the trees. Taking a small tree in his hands and hiding himself behind the leaves the king should lightly move on green lands keeping himself concealed behind other trees. When the distance between the two is easy he can kill the animals.

Then comes the Vadhrajā arising out of the nets with leathern thongs. Nets should be spread and the king should remain at the end on a tree. The hunters, who move like quadruped animals, should suddenly make a thundering noise on one side so that the herd of deer may be forced to run into the leathern thongs of the net. When they are near the king should kill them with arrows.

Then comes Kāṇḍapaṭajā or hunting by means of screens surrounding a tent. Cutting a branch on the south-west side of a big tree, walls should be erected on three sides namely in the front and on the two sides at a distance of two cubits. The wall behind should be five cubits long. On the two sides of the tree branches of trees with green leaves should be piled up so that the walls may be concealed behind these upto the height of the navel. Then curtains from this place should be

1 मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः । यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् । अयोध्याकाण्ड ।

2 Cf. the curse of किन्दमऋषि to पण्डु the father of पाण्डवs ॥

spread over a distance of a Krośa or two miles. A hundred hunters should go to the very end of the curtain on both the sides of the wall. The king should keep his queen and other ladies behind him and he should stand in front of the tree. The hunters then all should make loud noises and beat the bush in order to terrify the deer and other forest animals like tigers, wolves, jackals, bears etc., and make them run from both the sides. They are then killed by the king with his arrows.

Another kind of Kāṇḍapaṭajā hunting is described next. When a herd of deer without fear moves about in the jungle a band of hunters with four white legs like those of bullocks should surround the herd carefully against the direction of the wind in order that the deer may not get the scent and run away. The hunters should so arrange themselves that not a single animal can run away. Then the herd of the deer should be pressed hard and made to come near the king who then should kill them with arrows.

Then comes Vāhajā i. e. due to horses. Mounting a very speedy and trained horse the king should go to the forest and kill the deer with a variety of weapons.

Another kind of hunting is called the Tāḍikā i. e. hunting by means of clapping. When the deer are seen on a spot abounding in green grass and free from dried leaves, the king should take with him some Tāḍas or hunters, experts in timely clapping and go to the place where the deer are found. The Tāḍas should keep their hair dishevelled and by bending the body they should move it up and down in a circle (as in a play called Piṅgā in Marāthi). They should, by making a peculiar sound by mouth, attract the attention of the deer which will then fix their eyes on the Tāḍaka only. Then the king should come from behind and kill them with arrows.

Next follows the Vāyujā i. e. due to wind. On a stormy day when a herd of deer is seen the king should go with some eight or ten hunters in the opposite direction of the wind in order that the herd may not get any scent of them. There he should either mount a tree or a small hillock with his weapons ready. The hunters from behind should create a row in order to drive them from their original place towards the king. One after another they should be killed, except the first or the leader of the herd.

Then follows the Dāminī or the hunting due to restraint. The hunter should with or without a bullock, during the day, chase the deer in such a way that the deer may not get even water or grass. They thus become tired and are unable to run away when the hunter is sighted. Gradually

the hunter comes nearer and nearer. The deer then struck with hunge and thirst is completely prostrated and in consequence easily killed.

Another kind of hunting described by the author is called the Kopajā i. e. due to wrath. When two deer fight for the sake of a female or land, he should keep himself concealed behind a tree aud kill the one defeated in the fight.

Next comes the Kāmajā i. e. due to lust. When the deer are engaged in amorous sports, they become easily forgetful of the security of their person. The king should take this opportunity and kill them outright. This kind of killing forms the subject matter of the many interesting stories in the Epics ( see foot note on page 45 ).

After this comes the Dhvanijā i. e. due to sound. The king should climb a tree full of fruit liked by the deer. Keeping the decoying deer in front he should make an artificial sound like that of a deer. This will make the herd gather round the guide or decoying deer. The king can then kill them with arrows.

Next follows the Madavikārajā i.e. due to madness. Certain drugs mixed with food stuff may be given to the deer of different kinds and to the fish. In consequence they become insane and are easily killed.

The Tuṣārajā or the hunting arising out of dew drops is another interesting kind of hunting described by our author. In moist seasons like the rainy season, spring or autumn when the land remains often wet by frost or dew, the deer find themselves in difficulties and generally take recourse to the thickets, woods, clusters or bushes. The king should go to the hunting ground before daybreak on a trained horse with a blackish armour on his body. Hunters seated on buffaloes or bullocks should go before him to find out the place where a herd of deer is sitting. The king should be informed when the shelter is discovered. Usually at this time the deer are found with their limbs contracted and eyes closed. The king then riding a buffalo goes with a small bow and arrows from behind a hunter and kills them.

Then comes the Pāśajā i. e. hunting with nooses. For this purpose nooses of thread of various kinds are prepared and are placed on a soft piece of grassy land with the corners tied to nails in such a way that they cannot be seen by the deer. Thus spreading the nooses in one place the king should follow the deer after letting a very slow and trained dog loose on the herd. At this the deer run rather slowly. While going through the trap they are caught by the hind legs and become frightened. They can then be beaten by sticks or their heads can be cut off.

Then comes the Jālajā or hunting with nets. This is more or less similar to the above with the difference that here a net is spread instead of nooses.

Then follows the Vyāghrajā or hunting with leopards. A leopard is caught in nets as described above and ropes are tied to its neck on both the sides and it is made to walk through the city. After ten days the rope is removed from one side and a deer with an injured leg is put before it. The leopard is then tempted to catch the deer. The flesh of the deer's lap is applied to the leapard's mouth and body. The leopard still tied with one rope to its neck, attacks the deer speedily and having caught it drinks the blood of its neck. Thereafter the leopard is released by removing the other rope tied to its neck. After three days a male deer is placed before it and the same process is repeated till the leopard is fully trained to kill the deer in this particular fashion. Trained leopards are then carried on bullock-carts or horse-backs to the forest and are let loose on the herd of deer. The leopard then runs with great speed and leaving aside the females it catches only the Kṛṣṇasāra i. e. the spotted antelope. This is known all over India as the famous Cheeta Hunt.

These twenty-one kinds of hunting are described in the Mānasollāsa, though the number mentioned originally is thirty-one.

With the description of hunting the present volume is closed. There remain now five chapters of this Vimśati beginning with Gīta, to be published besides the whole of the 5th Vimśati. These chapters are very extensive, that on Music alone being equal to the first volume, as has been pointed out already.

Difficulties of the editor are enhanced by the fact that the extant MSS. are full of errors. Under the circumstances the original readings of the MSS. had to be supplemented with the editor's own suggestions in brackets except in the first two formes where the incorrect texts are given in the foot notes while the correct readings are incorporated in the body of the book. Beyond this any tampering with the text has been scrupulously avoided. He has taken sufficient care in suggesting correct readings, and it is for this reason that proofs had to be detained often and on for a considerable time. This accounts for the delay in presenting the volume to the public. In spite of scrupulous care some errors have unfortunately crept in, and for this the editor craves the indulgence of scholars. The stanzas have also been numbered incorrectly on some pages.

It is a matter of the deepest regret to us all that our beloved Maharaja Sayaji Rao III Gaekwad should not live to see the completion of the second volume of the Mānasollāsa in the publication of which he used to take a sustained and lively interest. In his demise the world has lost a great patron of Oriental learning. May his soul rest in peace!

Baroda,
27th February 1939

G. K. SHRIGONDEKAR.

# अनुक्रमणिका


| तृतीयविंशतिः | | | पृष्ठम् |
|---|---|---|---|
| मन्दिरमुहूर्तम् | ... | ... | १ |
| भूमिलक्षणम् | ... | ... | २ |
| काष्ठलक्षणम् | ... | ... | २ |
| आयलक्षणम् | ... | ... | ३ |
| मन्दिरमुखनिर्णयः | ... | ... | ३ |
| षोडशगृहलक्षणम् | ... | ... | ४ |
| षोडशगेहवासफलम् | ... | ... | ७ |
| वास्तूपशमनम् | ... | ... | ८ |
| वास्तुपूजाविधानम् | ... | ... | ११ |
| गृहप्रवेशः | ... | .... | ११ |
| राजनिवासगृहवर्णनम् | ... | ... | १२ |
| चित्रकारस्वरूपम् | ... | .... | १३ |
| चित्रभित्तिः | ... | ... | १३ |
| लेखनीलेखनम् | ... | ... | १४ |
| शुद्धवर्णद्रव्याणि | ... | ... | १४ |
| मिश्रवर्णः | ... | ... | १५ |
| चित्रवर्णाः | ... | ... | १६ |
| पक्षसूत्रलक्षणम् | .... | ... | १७ |
| तालक्षणम् | ... | ... | १८ |
| तिर्यङ्ज्ञानलक्षणम् | ... | ... | १९ |
| सामान्यचित्रप्रक्रिया | ... | ... | २२ |
| केशवादिचतुर्विंशतिमूर्तिभेदाः | | .... | ६० |
| अष्टबाहुहरिमूर्तिः | ... | ... | ६१ |
| वामनमूर्तिः | ... | ... | ६१ |
| श्रीराममूर्तिः | ... | ... | ६१ |
| नृवराहमूर्तिः | ... | ... | ६१ |
| नरसिंहमूर्तिः | ... | ... | ६१ |
| त्रिविक्रममूर्तिः | ... | ... | ६२ |
| मत्स्यावतारमूर्तिः | ... | ... | ६२ |
| कूर्मावतारमूर्तिः | ... | ... | ६२ |

| | | | पृष्ठम् |
|---|---|---|---|
| ब्रह्मदेवमूर्तिः | ... | ... | ६२ |
| महादेवमूर्तिः | ... | ... | ६३ |
| स्वच्छन्दभैरवमूर्तिः | ... | ... | ६३ |
| अर्धनारीश्वरमूर्तिः | ... | ... | ६४ |
| उमामहेश्वरमूर्तिः | ... | ... | ६४ |
| हरिहरमूर्तिः | ... | ... | ६५ |
| स्वामिकार्तिकमूर्तिः | ... | ... | ६५ |
| गणेशमूर्तिः | ... | ... | ६६ |
| काली(कात्यायनी)मूर्तिः | | ... | ६६ |
| इन्द्रमूर्तिः | ... | ... | ६७ |
| अग्निमूर्तिः | ... | ... | ६७ |
| यममूर्तिः | ... | ... | ६८ |
| राक्षसेन्द्रमूर्तिः | ... | ... | ६८ |
| वरुणमूर्तिः | ... | ... | ६८ |
| वायुमूर्तिः | ... | ... | ६८ |
| कुबेरमूर्तिः | ... | ... | ६९ |
| ईशानमूर्तिः | ... | ... | ६९ |
| मातृकावर्णनम् | ... | ... | ६९ |
| श्रीमूर्तिलक्षणम् | ... | — | ७० |
| नागमूर्तिः | ... | ... | ७० |
| दैत्यदानवपिशाचवेतालमूर्तिलक्षणानि | | | ७० |
| क्षेत्रपालमूर्तिः | ... | ... | ७१ |
| कामदेवमूर्तिः | ... | ... | ७१ |
| सूर्यमूर्तिः | ... | ... | ७१ |
| चन्द्रमूर्तिः | ... | ... | ७२ |
| भौममूर्तिः | ... | ... | ७२ |
| बुधमूर्तिः | ... | .... | ७२ |
| गुरुशुक्रमूर्ती | | ... | ७२ |
| शनिमूर्तिः | ... | ... | ७३ |

| | पृष्ठम् |
|---|---|
| राहुमूर्तिः ... ... ... | ७३ |
| केतुमूर्तिः ... ... ... | ७३ |
| हयचित्रम् ... ... ... | ७३ |
| गजचित्रम् ... ... ... | ७६ |
| सर्वचित्रप्रकरणम् ... ... | ७८ |
| गृहोपभोगः ... ... ... | ७९ |
| स्नानभोगः ... ... ... | ८१ |
| पादुकाभोगः ... ... | ८३ |
| ताम्बूलभोगः ... ... | ८३ |
| विलेपनभोगः ... ... | ८५ |
| वस्त्रोपभोगः ... ... | ८८ |
| माल्योपभोगः ... ... | ९० |
| भूषोपभोगः ... .... | ९१ |
| आसनोपभोगः ... ... | ९८ |
| चामरभोगः ... .... | ९९ |
| आस्थानभोगः ... ... | १०० |
| पुत्रभोगः ... ... ... | १०७ |
| अन्नभोगः ... ... | ११५ |
| पानीयभोगः ... ... | १३६ |
| पादाभ्यङ्गोपभोगः ... ... | १३८ |
| यानोपभोगः ... ... | १३९ |

| | पृष्ठम् |
|---|---|
| छत्रभोगः ... ... ... | १४१ |
| शय्याभोगः... .... ... | १४२ |
| धूपभोगः ... .... .... | १४४ |
| योषिद्भोगः ... ... | १४५ |
| **चतुर्थविंशतिः** | |
| शस्त्रविद्याविनोदः ... ... | १५५ |
| शास्त्रविनोदः ... ... | १७१ |
| गजवाह्याळीविनोदः ... ... | १८९ |
| तुरगवाह्याळीविनोदः ... .... | २११ |
| अङ्कविनोदः ... ... | २२५ |
| मल्लविनोदः ... ... | २२९ |
| कुक्कुटविनोदः ... ... | २३९ |
| लावकविनोदः ... ... | २५३ |
| मेषविनोदः ... ... ... | २५९ |
| महिषविनोदः ... ... | २६१ |
| पारावतविनोदः ... ... | २६२ |
| सारमेयविनोदः ... ... | २६४ |
| श्येनविनोदः ... ... | २६७ |
| मत्स्यविनोदः ... ... | २७१ |
| मृगयाविनोदः ... .... | २७५ |

श्रीसोमेश्वरभूपतिविरचितः

# मानसोल्लासः ।

## द्वितीयो भागः ।

उपभोगाः प्रवक्ष्यन्ते विस्तरेण मयाऽधुना ।
नाम्ना ये पूर्वमुद्दिष्टा विंशतिस्तु यथाक्रमम् ॥ १ ॥

वैशाखे फाल्गुने मार्गे सहस्ये[1] श्रावणे तथा ।
शुक्लपक्षे गृहान्कुर्यात्सर्वकामफलप्रदान् ॥ २ ॥

उत्तरात्रितयं चित्रा रोहिणी स्वातिरेव च ।
ज्येष्ठा मृगशिरो मूलमश्विनीहस्त एव च ॥ ३ ॥

ऋक्षाण्येतानि शस्यन्ते सर्वदा वास्तुकर्मणि ।
क्रूरग्रहैरदुष्टानि सौख्यदानि भवन्ति हि ॥ ४ ॥

आदित्यं[2] मङ्गलं त्यक्त्वा सर्वे वाराः शुभावहाः ।
गृहकर्मणि शस्यन्ते वास्तुविद्याविशारदैः ॥ ५ ॥

नन्दा एकादशी षष्ठी प्रतिपच्चेति कीर्तिताः ।
पञ्चमी दशमी पर्व पूर्णा एता निरूपिताः ॥ ६ ॥

नन्दाः पूर्णाश्च तिथयो मन्दिरारम्भणे शुभाः ।
नातिक्षीणे[3] निशानाथे गृहारम्भो भवन्ति हि ॥ ७ ॥

---

१ A पुष्ये च. २ A त्य. ३ F ण. ४ A म्मे.

वृषो धनुस्तुला कन्या मिथुनं कलशं[1] तथा।
लग्नान्येतानि शस्तानि गृहप्रासादकर्मणि ॥ ८ ॥

तैतिलं गरजं नागो बवं करणमुत्तमम्।
करणं[2] शरणानां च धान्यधान्यकरं भवेत् ॥ ९ ॥

अतिगण्डं व्यतीपातं परिघं वज्रमेव च।
गण्डं शूलं च विष्कम्भं[3] व्याघातं च विवर्जयेत् ॥ १० ॥

अन्ये सर्वे शुभा योगा वास्तुस्थापनकर्मणि।
यथा नाम तथा तेषां फलसिद्धिरुदाहृता ॥ ११ ॥

माहेन्द्रं रोहिणी चैव सावित्रं मैत्र एव च।
गन्धर्वेऽभिजिते[4] चैतन्मुहूर्ते कारयेद्गृहान् ॥ १२ ॥

चन्द्रार्कादिग्रहाः सर्वे स्वक्षेत्रे शुभदा गृहे।
बलाबलं विचार्यैषां गृहारम्भं तु कारयेत् ॥ १३ ॥

न विद्धा न च नीचस्था न च तीक्ष्णांशुदूषिता[5]ः।

इति मन्दिरमुहूर्तम्।

विप्राणां पाण्डुरा भूमिर्लोहिता क्षत्रजन्मनाम् ॥ १४ ॥

पीता विशां समाख्याता वृषलेषु[6] च मेचका।
रत्निमात्रिकृतं गर्तं[7] पूरयेत्तन्मृदा पुनः ॥ १५ ॥

लाभं[8]मभ्यधिके विन्ध्याद्धीने हानिं[9] समे समम्।

इति भूमिलक्षणम्।

धनिष्ठादीनि सन्त्यज्य पञ्चर्क्षाणि प्रयत्नतः[10] ॥ १६ ॥

शुभे नक्षत्रयोगे च तैरुं[11] छिन्द्याच्छुभावहम्[12]।
सनीडं क्षीरवृक्षं च वायुवह्निविदूषितम् ॥ १७ ॥

---

१ A कुंभं २ A णे ३ A कु ४ A तिश्चेति. ५ A पक्षे ६ A च तीक्ष्णा सुदुःखिताः। ७ A ष्वसिता तथा ८ B D F त्रं ९ A मैं० १० D भो मध्येऽधिके ११ F द्या० १२ F निः १३ D च १४ A ल्लं १५ A हान्।

दन्तिदन्ताहतं चैव विद्युत्पातनिपीडितम् ।
स्वयं शुष्कं च भग्नं च वक्रं देवालयोद्भवम् ॥ १८ ॥

चैत्यवृक्षं[1] शिवक्षेत्रं[2]नदीसङ्गमसम्भवम् ।
तडागकूपमध्यस्थं कण्टकाकुलितं तथा ॥ १९ ॥

नीपं विभीतकं निम्बं श्लेष्मान्तकं[3]महीरुहम् ।
असारांश्छाखिनः सर्वान् वर्जयेद्गृहकर्मणि ॥ २० ॥

एकजात्या द्विजात्या वा त्रिजात्या वा महीरुहाम्[4] ।
कारयेन्मन्दिरं राजा श्रियमिच्छन्महीयसीम् ॥ २१ ॥

इति काष्ठलक्षणम् ।

व्यासेन गुणितं दैर्घ्यमष्टकैश्च विभाजितम् ।
यच्छेषं स भवेदायः प्रोक्तो नामभिरष्टभिः ॥ २२ ॥

एको ध्वजो द्वयं धूमस्त्रिकः सिंहः प्रकीर्तितः[5] ।
चतुर्थः सारमेयस्तु पञ्चमो[6] वृष इष्यते ॥ २३ ॥

षष्ठः[7] खरो विनिर्दिष्टः सप्तमः स गजो भवेत् ।
अष्टमो[8] वायसः प्रोक्तश्चायमायविनिर्णयः[9] ॥ २४ ॥

इति आयलक्षणम् ।

ऐन्द्रीं दिशं[10] समारभ्य प्रदक्षिणविधानतः ।
अष्टासु दिक्षु बोद्धव्याः क्रमेणायाः[11] ध्वजादिकाः ॥ २५ ॥

पश्चिमाशाननः श्लाघ्यो ध्वजः सर्वमुखोऽथवा[12] ।

उत्तराभिमुखः सिंहो वृषः प्राचीमुखः शुभः ॥ २६ ॥

दक्षिणाभिमुखो हस्ती सारमेयोत्तराननः ।
मुखं द्वारं विनिर्दिष्टं मन्दिरस्य विचक्षणैः[13] ॥ २७ ॥

---

१ A वृत्त० A F वेत्र० २ F त्रं ३ F त० ४ F हाः ५ A इ ६ F ता ७ A कं. क्षः ८ B D को F का ९ A ट्टः १० B F को ११ A आयनाम १२ A शां १३ A य

इति मन्दिरमुखनिर्णयः ।

नृपगेहानि वक्ष्यामि स्तम्भसङ्ख्याप्रमाणतः ।
[ चतुष्कालिन्द ]शालाभिश्चतु[भद्रै]र्मनोहरैः ॥ २८ ॥

पृथ्वीजयं गृहं कार्यं दशभागं विचक्षणैः ।
मध्ये स्तम्भशतं तस्य भद्रेऽष्टाविंशतिस्तथा ॥ २९ ॥

चतुर्भद्रेषु च शतं स्तम्भानां द्वादशाधिकम् ।
नव कोणाँ विदिग्देशे स्युः षट्त्रिंशच्चतुर्ष्वपि ॥ ३० ॥

चत्वारो मध्यगाः स्तम्भा यत्र तत्स्याच्चतुष्ककम् ।
तस्माद्बहिरलिन्दं स्याच्छाला स्यात्तदनन्तरम् ॥ ३१ ॥

[ अलिन्दं ] च पुनः शाला क्रमेणैवं प्रवर्धते ।
यावत्कर्तुमतीतं स्याद् गृहं नरपतेः शुभम् ॥ ३२ ॥

यच्चतुष्कगतं क्षेत्रं पञ्चधा तद्विभज्यते ।
तद्भागप्रमितं कार्यं त्रिभिर्भागैरलिन्दकम् ॥ ३३ ॥

सार्धत्रिभागिकाः शालाः कर्तव्याः सुविचक्षणैः ।
इयं स्थितिः समस्तानां गृहाणां प्रतिपादिता ॥ ३४ ॥

नाम्ना तु मुक्तकोणं यत् तत्कार्यं रविभागतः ।
मध्ये स्तम्भशतं सार्द्धं षड्भिर्न्यूनं [ निरूपितम् ] ॥ ३५ ॥

[ चत्वारिंशत्तथा ] स्तम्भा भद्रे भद्रे निरूपिताः ।
शतं षष्टयधिकं ते स्युश्चतुर्भद्रेऽपि सङ्ख्यया ॥ ३६ ॥

एकादश तथा कोणा विदिशं विदिशं प्रति ।
चतुर्दश तथा त्रिंशच्चतसृष्वपि सङ्ख्यया ॥ ३७ ॥

कथ्यते सर्वतोभद्रं मनुभागैर्विभाजितम् ।
मध्यस्तम्भा भवन्त्यस्य षण्णवत्यधिकं शतम् ॥ ३८ ॥

---

१ MSS चतुष्कभेद ( AD दाः ) २ MSS भेदै ( F द० ) ३ D देशभाषा ४ A तु ५ Mss ण ६ F न्त्रं ७ Mss न्दे ८ AF तः ९ F भु १० BD तिमं ११ Mss ताः १२ F क्ता १३ Mss. °णा ये १४ F ना १५ MSS तिपूरिताः ( F °नि० )। १६ MSS चत्वारः संस्थिताः । १७ F ता १८ A ष्ठा १९ F त्यः Mss. भ्य २० E शे २१ MSS चतुःषष्ठिश्च ।

चत्वारिंशच्चतुर्भद्रे स्तम्भा एवं निरूपिताः ।
एवं चतुर्षु भद्रेषु शतं षष्टिस्तथाधिकम् ॥ ३९ ॥

कोणास्तस्य विधातव्यास्त्रयोदशमिता बुधैः ।
समन्ताद्गणिताः कोणा द्विपञ्चाशद्भवन्ति ते ॥ ४० ॥

श्रीवत्समन्तष्टभागं स्याच्चतुःषष्टिः सुमध्यगाः ।
तस्य स्तम्भाः प्रयोक्तव्या भद्रेष्टादशसङ्ख्यया ॥ ४१ ॥

चतुर्ष्वपि च भद्रेषु द्विसप्ततिरुदाहृताः ।
सप्तकोणाः समन्ताच्च द्विगुणाः मनुसङ्ख्यया ॥ ४२ ॥

एवमादीन्यनन्तानि गेहानि धरणीभुजाम् ।
कियन्त्यपि मनोज्ञानि प्रणीतानि यथाक्रमम् ॥ ४३ ॥

चतुःशालं त्रिशालं च द्विशालञ्चैकशालकम् ।
वक्ष्यामि भवनं राज्ञां नामलक्षणसंयुतम् ॥ ४४ ॥

अलिन्दैश्च चतुर्द्वारैश्चतुश्शालमुदाहृतम् ।
सर्वतोभद्रनामेदं नृपाणां शस्यते गृहम् ॥ ४५ ॥

वर्धमानं तथाख्यातं दक्षिणद्वारवर्जितम् ।
स्वस्तिकं तद्भवेन्नाम्ना पूर्वद्वारविवर्जितम् ॥ ४६ ॥

उत्तरद्वारहीनं चेद्रुचकं तद्भवेद्गृहम् ।
सर्वतोभद्रमाद्यं च चतुश्शालमुदाहृतम् ॥ ४७ ॥

शुभप्रदं नरेन्द्राणां विजयारोग्यवर्धनम् ।
नन्द्यावर्तं वर्धमानं स्वस्तिकं रुचकं तथा ॥ ४८ ॥

चत्वारि स्युस्त्रिशालानि गेहानि धरणीभुजाम् ।
नैर्ऋते मुख्यगेहं स्याच्छाले चोत्तरपूर्वगे ॥ ४९ ॥

पूर्वायाश्चोत्तरद्वारमुत्तरायाश्च पूर्वतः ।
कर्तव्ये गर्भगेहस्य द्वारे द्वे तु विचक्षणैः ॥ ५० ॥

---

१ MSS त्रिकम् २ D म्मिता ग० । ३ Mss. गे ४ Mss भेदो त्रि० । ५ F थैं । ६ A सन्तु । ७ Mss त्रिलिङ्गे । F त्रि० । ८ Mss. विजये जय० ९ एतत्तथा । १० Mss हे ११ F D रं० ।

एकं स्यात्पूर्वतो द्वारमन्यदुत्तरतःस्थितम् ।
अङ्गणाद्दक्षिणा शाला हस्तिनी[2] परिकीर्तिता ॥ ५१ ॥

अङ्गणात्पश्चिमा शाला महिषीति निगद्यते ।
इदं द्विशालं सिद्धार्थं सर्वकामफलप्रदम् ॥ ५२ ॥

नृपाणां शस्यते स्थातुं विशेषाद्वित्तवर्धनम् ।
वायव्ये गर्भगेहं स्याच्छाले दक्षिणपूर्वगे ॥ ५३ ॥

द्वारे शालामुखे कार्ये शालाद्वारे च सम्मुखे[3] ।
महिषी त्वङ्गणात्पश्चादुत्तरा गौः प्रकीर्तिता ॥ ५४ ॥

द्विशालं भयदं त्वेतद् यमसूर्यं[4] विनिर्मितम् ॥
ऐशाने प्रथमं वेश्म शाले दक्षिणपश्चिमे ॥ ५५ ॥

अङ्गणात्पूर्वतच्छागी गौ[5]ची चोत्तरतः स्थिता ।
दण्डाख्यं नाम तत्प्रोक्तं वि(द्वि)शालं भयदं नृणाम् ॥ ५६ ॥

वर्जनीयं प्रयत्नेन नृपैरावासकर्मणि ।
आग्नेयं मुख्यवेश्म[6] स्याच्छाले चोत्तरपश्चिमे ॥ ५७ ॥

अङ्गणात्पूर्वगा च्छागी दक्षिणा हस्तिनी मता ।
वाताख्यं नाम तत्प्रोक्तं नृणामुद्वेगकारकम् ॥ ५८ ॥

नृपाणां नैव कर्तव्यं निवासार्थं कथञ्चन ।
द्विशालमेकं सिद्धार्थं प्रशस्तं पृथिवीभुजाम् ॥ ५९ ॥

क्रीडार्थं सन्निवासार्थं भोगार्थं च प्रशस्यते ।
ध्रुवं हीनमलिन्देन पूर्वालिन्दं तु धन्यकम् ॥ ६० ॥

जयं स्याद्दक्षिणालिन्दं पश्चालिन्दं[7] खरं भवेत् ।
दुर्मुखं चोत्तरालिन्दमेकालिन्दं चतुर्गृहम् ॥ ६१ ॥

धन्यं जय[8]श्च शुभदं निन्दिते खरदुर्मुखे ।
पूर्वदक्षिणतोऽलिन्दं नन्दं[9] नाम्ना निगद्यते ॥ ६२ ॥

---

१ D सं । २ F ना० । ३ A न्मु० । ४ Mss धूतसूत्रं । ५ Mss मे ६ Mss गोधी । ७ D ख । ८ F जा । ९ Mss यः १० F, D, ह्रि । ११ Mss श्च १२ Mss क्रान्तं

दक्षिणोत्तरतोऽलिन्दं सुपक्षं परिचक्षते ।
उत्तरालिन्दहीनं यत्सुमुखं परिकीर्तितम् ॥ ६३ ॥

पश्चिमालिन्दतो हीनं धनदं गेहमुच्यते ।
दक्षिणालिन्दहीनं यदाक्रान्तं तदुदाहृतम् ॥ ६४ ॥

पूर्वालिन्दविहीनं यद्विपुलं परिकीर्त्यते ।
सर्वतोऽलिन्दसंयुक्तं विजयं गेहमुत्तमम् ॥ ६५ ॥

एवं षोडश गेहानि कथितानि परिस्फुटम् ।

इति षोडशगृहलक्षणम् ॥

यथा नाम फलं तेषु ज्ञेयं तत्र निवासिनाम् ॥ ६६ ॥

धन्यं तस्मात्प्रकर्तव्यं नृपाणां गेहमुत्तमम् ।
हीनस्तम्भमलिन्दं[1] स्याच्छाला स्तम्भैः समावृता ॥ ६७ ॥

नृपाणां गृहकर्तॄणां क्रम एष निरूपितः ।
अन्यच्चतुष्प्रकारं तदेकशालं गृहं भवेत् ॥ ६८ ॥

प्रधानगेहं स्तम्भैश्च शाला स्तम्भैः समा भवेत् ।
तस्य लक्ष्म प्रवक्ष्यामि शुभाशुभफलोदयम् ॥ ६९ ॥

उत्तरा शस्यते शाला शाला पूर्वा प्रशस्यते ।
दक्षिणा पश्चिमा शाला द्वे शाले परिनिन्दिते ॥ ७० ॥

नृपाणां सुखवासार्थं न कर्तव्ये कदाचन ।
तिष्ठन् गेहेषु शस्तेषु श्रियमाप्नोति पुष्कलाम् ॥ ७१ ॥

आरोग्यं विजयं कीर्तिं सन्तोषं परमाप्नुयात् ।
एवं षोडशगेहानां फलं लक्षणनामकम् ॥ ७२ ॥

सोमेश्वरनृपेणोक्तं वास्तुपद्धतिमार्गतः ।

इति षोडश गेहलक्षणम् ।

---

१ Mss स्दः २ B. D. नृप.

सोमेश्वरनृपप्रोक्तवास्तुपद्धतिमार्गतः।
अन्तर्गृहस्य कोणे स्यादैशाने शालिपिष्टकैः॥ ७३॥

एकाशीतिपदं यत्नान्मण्डलं समकोष्ठकम्।
पूर्वपश्चिमगा रेखा दक्षिणोत्तरगा दश॥ ७४॥

एकाशीतिपदं त्वेवं कर्तव्यं वास्तुमण्डलम्।
तत्र पूज्यान् सुरान् वक्ष्ये पदसङ्ख्याव्यवस्थितान्॥ ७५॥

एकपद्यं द्विपद्यं च त्रिपद्यं नवपद्यकम्।
ईशानकोणादारभ्य प्रादक्षिण्यक्रमेण च॥ ७६॥

पूजनीयाः प्रयत्नेन बाह्याः कोष्ठगताः शुभाः।
शिखी ततश्च पर्जन्यो जयन्तः कुलिशायुधः॥ ७७॥

सूर्यसत्यभृशाकाशा वायुः पूषा तथैव च।
विवस्वानथ पूज्यः स्याद्गृहक्षतयमौ तथा॥ ७८॥

गन्धर्वभृङ्गराजौ च मृगः पितृगणस्तथा।
दौवारिकश्च सुग्रीवः पुष्पदन्तजलाधिपौ॥ ७९॥

असुरश्चाथ शोषश्च पापो रोगाऽहिमुख्यकौ।
भल्लाटसोमनागाः स्युरदितिर्दितिरेव च॥ ८०॥

द्वात्रिंशत्तु बहिः प्रोक्ताश्चत्वारोऽन्तर्व्यवस्थिताः।
आप ईशानकोणे स्यात्सावित्रो वन्हिकोणगः॥ ८१॥

जयो नैर्ऋतकोणस्थो रुद्रो वायव्यकोणगः।
ब्रह्मा नवपदो मध्ये तस्यैवास्ते समीपगः॥ ८२॥

पदमेकं परित्यज्य पूर्वादिदिगवस्थिताः।
अर्यमा पूर्वदिग्भागे सविताग्नेयकोणगः॥ ८३॥

---

१ D. omits this time. २ A कौ। ३ F दशी। ४ D ले। ५ A द्यां। ६ A द्यां। ७ A नवैव। F न चैव। ८ A तुर्ये। ९ F णा। १० F त। ११ धा। १२ Mss स्त १३ F ऋद्रक्षः A दृर्भृश। १४ Mss मास्त १५ A कपि। १६ A शेष। १७ त्वा। १८ A स्तु १९ F क्षो। २० F ग। २१ B. F निर्ऋति। २२ F ग। २३ ईशान। २४ F पा। २५ F ग। २६ F पा. २७ F ता. २८ F ग.

विवस्वान् दक्षिणे भागे नैर्ऋते विबुधाधिपः।
मित्रस्तु पश्चिमे भागे राजयक्ष्मा च मारुते ॥ ८४ ॥

पृथ्वीधरः सौम्यगः स्यादैशाने चापवत्सकः।
अर्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ॥ ८५ ॥

पितामहसमीपस्थाश्चत्वारस्त्रिदशा इमे।
त्रिपाङ्क्ति(दाः)कोणसंस्थाना बहिः कोणस्य पार्श्वगाः ॥ ८६ ॥

पदिका इति विख्याताः शेषा द्विपदिकाः सुराः।
कुण्डं त्रिमेखलं कार्यं मण्डलैशानभागतः ॥ ८७ ॥

हस्तप्रमाणविस्तारं खाते नवकरोन्मितम्।
तत्र होमः प्रकर्तव्यः समिद्भिः क्षीरजातिभिः ॥ ८८ ॥

पालाशीभिः समिद्भिर्वा कुशैर्दूर्वाभिरेव च।
बिल्वैर्वा निम्बबीजैर्वा यथासम्भवमाहृतैः ॥ ८९ ॥

देवतानां पृथक् कुर्याद्धोममष्टोत्तरं शतम्।
अष्टाधिकां विंशतिं वा प्रतिदैवतमाचरेत् ॥ ९० ॥

ततो मण्डलसंस्थाभ्यो देवताभ्यो बलिं हरेत्।
कृशरं शिखिने दद्यात् पर्जन्यायाज्यसंयुतम् ॥ ९१ ॥

ओदनं सोत्पलं दद्याज्जयन्ताय निवेदयेत्।
ध्वजानपूपा पिष्टेन कूर्मरूपं प्रकल्पितम् ॥ ९२ ॥

पैष्टं कुलीशमिन्द्राय पञ्चरत्नानि दीपयेत्।
धूमवर्णवितानं च कुर्यात् सूर्याय कल्पयेत् ॥ ९३ ॥

सत्याय घृतगोधूमं मत्स्यान् दद्याद्भृशाय च।
शष्कुलीरन्तरिक्षाय सक्तून् दद्याच्च वायवे ( तथाग्नये ) ॥ ९४ ॥

---

१ F प। २ mss ता। ३ mss गौ। ४ F शि। ५ B दगाः। F का। ६ F रा। ७ F र्थं। ८ F तं। ९ F मं.। १० F व्यं.। ११ A नीम्बजैर्बीध। १२ mss कां। १३ mss तिर्वा। १४ प्यो पूजां कृत्वा। १५ A कृतान्तं, D कृशराम्। १६ A. B र्षत्यज। १७ A सौ, सा। १८ DF वार। १९ A स्रवर्णविमा। २० A सक्तून। २१ B D सम्पाद्य। २२ F ङ्ग, A द। २३ A स।

पूष्णे लाजाः प्रदातव्याः वित्तपे[1] ( वितथे ) चणकौदनम् ।
गृहक्षताय[2] मध्वन्नं यमाय पललौदनम् ॥ ९५ ॥

गन्धर्वाय सुगन्धाम्बु भृङ्गनयोरेणाजिह्मिकाम्[3] ( का ) ।
मृगाय यावकं देयं पितृभ्यः कृशरस्तथा ॥ ९६ ॥

दौवारिके दन्तकाष्ठं पैष्टं कूष्माण्डबालिं[4] तथा ।
क्षिपेदपूपं सुग्रीवे पुष्पदन्ते तु[5] पायसम् ॥ ९७ ॥

कमलं सकुशस्तम्भं(म्बं) वरुणाय समर्पयेत् ।
असुराय सुरा देया पैष्टं सौवर्णमेव च ॥ ९८ ॥

घृतौदनं च शोषाय यवाः स्युः पापसंज्ञके ।
रोगाय मोदकैः[6]सर्पिः फणिने नागकेसरम् ॥ ९९ ॥

भक्तो[11] मुख्याय[12] दातव्यो[13] भल्लाटाय ततः क्षिपेत्
मुद्गौदनं ततः सोमे पायसं मधुमिश्रितम् ॥ १०० ॥

शालिपिष्टं तु सर्पाय ( शैलाय ) पोलिकामदितेः[14] क्षिपेत् ।
दित्यै तु पूरिकां दद्यात् मरीचेः सकुशौदनम्[15] ॥ १०१ ॥

सवित्रे गुडपूपांश्च जयाय[16] घृतचन्दनम्[17] ।
विश्वसेनाय[18] ( विवस्वते च ) दातव्यं पायसं रक्तचन्दनम्[19] ॥ १०२ ॥

देवाधिपतये दद्यात् तालमिश्रं[20]घृतौदनम् ।
मिश्रा (त्रा) य सघृतं भक्तं रुद्राय गुडपायसम् ॥ १०३ ॥

तिलाक्षतं पञ्चगव्यं दद्यादर्यमणे[21](म्णे)[22]बलिकर्मणि ।
तिलाक्षतं पञ्चगव्यं भक्ष्यभोज्यं पृथग्विधम् ॥ १०४ ॥

आज्यं च दधिसंयुक्तं ब्रह्मणे विनिवेदयेत् ।
सर्वेषां काञ्चनं दद्यात् ब्राह्मणे गां पयस्विनीम् ॥ १०५ ॥

---

१ B विष्णवे F विकृपे । A वित्तपे नचकादनः । २ A हं कृत्वायमभ्वान्तम् । ३ F भु । ४ D य । ५ B कृणाम् A पैष्टकृत्ते, कृष्णं च । ६ D च । ७ All except A सु । ८ Mss शे । ९ A झि । १० A कान्स । ११ A क्षो, क्ष्या । १२ D खा । १३ A व्या । १४ F तै । १५ A चं सकुशोदकम् । १६ A यन्तो । १७ F सृष्ट । १८ B व्वक्. D क्से । १९ वद्घृतम् । २० A तिलमिश्रघृतोदकम्, तालमिष्टं घृतोदनम् । २१ F म्णौ । २२ D लिम् ।

राक्षसानां बलिं दद्यान्मधुमांसौदनादिकम् ।
एवं सम्पूजिता देवाः शान्तिं कुर्वन्ति ते सदा ॥ १०६ ॥

मांसौदनं सरुधिरं हरिद्रौदनमेवच ।
ईशानभागमाश्रित्य वायव्यै(चरक्यै) च निवेदयेत् ॥ १०७ ॥

आग्नेयीं दिशमाश्रित्य स्थितायै मांसखण्डकम् ।
दध्योदनं सरुधिरं विदार्यै विनिवेदयेत् ॥ १०८ ॥

पूतनायै च नैर्ऋत्ये[1] पीतं रक्तं बलिं क्षिपेत् ।
वायव्ये[2] पापराक्षस्यै मत्स्यमांसं सुरासवम् ॥ १०९ ॥

पायसं वा प्रदातव्यं तन्नाम्ना सर्वतः क्रमात् ।
प्रणवादिनमोन्तश्च(श्च) यथापूर्वं बलिर्भवेत् ॥ ११० ॥

ततः सर्वौषधीस्नानं यजमानस्य कारयेत् ।
विप्रांश्च भोजयेद्भक्त्या विदुषो गृहमागतान् ॥ १११ ॥

इति वास्तूपशमनम्

इदं[3] वास्तूपशमनं विरचय्य समाचरेत् ।
प्रासादभवनोद्याने प्रा(नप्रा)रम्भपरिवर्तने ॥ ११२ ॥

पैरवेश्मप्रवेशेच सर्वदोषप्रशान्तये ।
विधाय वास्तुपूजां च गृहं[4] सूत्रेण सर्वतः ॥ ११३ ॥

पावमानेन सूक्तेन रक्षोघ्नेन च वेष्टयेत् ।
मङ्गलं तूर्यघोषेण कुर्याद्ब्राह्मणवाचनम् ॥ ११४ ॥

प्रतिसंवत्सरं[5] यस्तु विधिनाऽनेन पार्थिवः ।
सद्मन्यायतने कुर्यात्स सुखं लभते ध्रुवम् ॥ ११५ ॥

इति वास्तुपूजाविधानम्

उत्तरात्रितयं हस्तो रोहिणी रेवती मृगः ।
पुष्योनुराधा चित्रा च स्वात्यश्विन्यभिजित्तथा ॥ ११६ ॥

---

१ A ज । २ A त्वै । ३ D व्यै । ४ F ति । ५ A प्र । ६ F हे । ७ F रो । ८ A ष्या । ९ Mss न ।

धनिष्ठां[1] वारुणं चेति प्रवेशक्षीणि वेश्मनः ।
सूर्यभूमिसुतौ त्यक्त्वा प्रवेशेऽन्ये[2] शुभावहाः ॥ ११७ ॥

धनुः कुम्भस्तथा कन्या मिथुनं वृषभस्तथा ।
मीनश्चेति शुभाः वौरा[3] राशयो लग्नसंगताः ॥ ११८ ॥

लग्नं चतुर्थं दशमं सप्तमं केन्द्रसंज्ञितम् ।
नवमं पञ्चमं लग्नात् त्रिकोणं परिकीर्तितम् ॥ ११९ ॥

केन्द्रत्रिकोणगाः शस्ताः गुरुशुक्रबुधौ[4] ग्रहाः ।
पापास्त्रिलाभषष्ठस्थाः शुभा वेश्मप्रवेशने ॥ १२० ॥

सुधाकरबलं लब्ध्वा नातिक्षीणे निशाकरे ।
तिथिं रिक्तां परित्यज्य विशेन्मन्दिरमूर्जितम् ॥ १२१ ॥

ब्राह्मणोदीरितैर्मन्त्रैः शोभनैः शङ्खनिःस्वनैः ।
मङ्गलैस्तूर्यनादैश्च विशेद्वेश्म विशांपतिः ॥ १२२ ॥

इति गृहप्रवेशः ।

एकभूमे[5] द्विभूमे वा[6] भूमित्रयसमन्विते ।
भूचतुष्टयसंयुक्ते पञ्चभूमेऽपि वा शुभे ॥ १२३ ॥

षट्भूमे सप्तभूमे वा तथा चैवाष्टभूमिके[7] ।
प्रासादे नवभूमे वा निवसेद्वसुधाधिपः ॥ १२४ ॥

सुधाधवलिते रम्ये वास्तुलक्षणसंयुते ।
जालमार्गकृतोद्योते क्वापि सर्वप्रकाशके ॥ १२५ ॥

क्वापि सन्तमसोपेते मणिदीपप्रकाशिते ।
दन्तिदन्तविनिर्माणमत्तवारणशोभिते ॥ १२६ ॥

सौवर्णस्तम्भरुचिरे चन्दनस्तम्भगन्धिनि ।
रत्नस्तम्भकृताभासे प्रवालस्तम्भरञ्जिते ॥ १२७ ॥

काचकुट्टिमरोचिष्णौ स्फटिकोज्ज्वलकुट्टिमे ।
सुधायाः कुट्टिमोपेते स्फुरद्दरदकुट्टिमे ॥ १२८ ॥

---

१ A ष्ठां । २ A च । ३ A सर्वे । ४ A मं । ५ F ता । ६ D धाः A ध । ७ A तः ८ F त्र । ९ B मेद्वि । १० B मेवा । ११ E की.

स्फटिकोपलविन्यासदर्पणाकारभित्तिके ।
विचित्रचित्रसंयुक्ते प्रमोदकरभित्तिके ॥ १२९ ॥

इति राजनिवासगृहवर्णनम्

प्रगल्भैर्भावकैस्तज्ज्ञैः सूक्ष्मरेखाविशारदैः ।
विधिनिर्माणकुशलैः पत्रलेखनकोविदैः ॥ १३० ॥

वर्णपूरणदक्षैश्च वीरणे च कृतश्रमैः ।
चित्रकैर्लक्ष्येच्चित्रं नानारससमुद्भवम् ॥ १३१ ॥

इति चित्रकारस्वरूपम्

सुधया निर्मितां भित्तिं श्लथक्षतविवर्जिताम् ।
लेपाय चित्रकर्मार्थं लेपद्रव्यं प्रचक्षते ॥ १३२ ॥

महिषीत्वचमादाय नवां तोयेन पाचयेत् ।
नवनीतमिवायाति यावच्चिक्कणतां भृशम् ॥ १३३ ॥

तत्कल्कं चिक्कि(क्क)णीभूतं शलाकोपरि कल्पयेत् ।
यत्नेन शोषयेत्पश्चाद्यावत्काठिन्यमाप्नुयात् ॥ १३४ ॥

वज्रलेपोऽयमाख्यातश्चित्रे सर्वस्य शस्यते ।
तं कृत्वा मृत्तिकापात्रे तोयं क्षिप्त्वा प्रतापयेत् ॥ १३५ ॥

सन्तप्तो द्रवतां याति सर्ववर्णेषु तद्भवः ।
मिश्रणीर्यः प्रमाणेन यथा वर्णो न नश्यति ॥ १३६ ॥

आदाय मृत्तिकां श्वेतां वज्रलेपेन मिश्रयेत् ।
तया लेपं प्रकुर्वीत शुष्कभित्तौ त्रिवारतः ॥ १३७ ॥

शङ्खचूर्णसितापिष्टं वज्रलेपसमन्वितम् ।
आदाय भित्तिकां लिम्पेत् यावत्सा श्लक्ष्णतां व्रजेत् ॥ १३८ ॥

धातुं नीलगिरौ जातं श्वेतं चन्द्रसमप्रभम् ।
नगनाम्नैव विख्यातं शिलायां परिपेषितम् ॥ १३९ ॥

---

१ A पद । २ A वेद B D वेध । ३ Mss except A ची । ४ A ऽथ कृतैः समे । ५ F नव । ६ B. D. F ताम् भजेत् । ७ A द्रवम् । ८ F य । ९ A शुष्के । १० A कालेपे । ११ D स ।

[1]मिश्रितं वज्रलेपेन समादाय च पाणिना।
लिम्पेच्च[2] मृदुयोगेन स्वच्छमच्छं शनैः शनैः॥ १४०॥

इति चित्रभित्तिः।

पश्चाच्चित्रं विचित्रं च तस्यां भित्तौ लिखेद्बुधः।
नानाभावरसैर्युक्तं सुवेषं वर्णकोचितम्॥ १४१॥

कनिष्ठिकापरीणाहां भागद्वयसमायताम्।
घनवेणुसमुद्भूतां तूलिकां परिकल्पयेत्॥ १४२॥

तदग्रे ताम्रजं शङ्कुं[3] यवमात्रं विनिक्षिपेत्।
तावन्मात्रं बहिः कुर्यात्तिन्दूनोर्मरिता बुधैः॥ १४३॥

कज्जलं भक्तसिक्थेन मृदित्वा कन्दिकाकृतिम्।
वर्तिं[4] कृत्वा तया लेख्यं वर्तिका नाम सा भवेत्॥ १४४॥

वत्सकर्णसमुद्भूतरोमाण्यादाय यत्नतः।
तूलिकाग्रे न्यसेत्तानि लाक्षाबन्धनयोगतः॥ १४५॥

लेखनी नाम सा प्रोक्ता सा चैवं त्रिविधा भवेत्।
स्थूला मध्या तथा सूक्ष्मा तया चित्रं विरच्यते॥ १४६॥

स्थूलया लेपनं[5] कार्यं तिर्यगाहितया तया।
अङ्गे[6](ङ्ग)नं[7] मध्यया[8] कुर्यादग्रपार्श्वनिविष्टया[9]॥ १४७॥

सूक्ष्मया च तथा[10] रेखां सूक्ष्मां कुर्वीत कोविदः।
अग्रेण चित्रको[11] धीमान् चित्रविद्याविशारदः॥ १४८॥

इति लेखनीलेखनम्

प्राणि[12] वा यदि वाप्राणि[13] तत्प्रमाणमभीप्सितम्।
चिन्तयेत्तत्प्रमाणं तद्भवानं भित्तौ निवेशयेत्॥ १४९॥

भित्तौ निवेशितस्यास्य घृष्यमाणस्य वर्तसा[14]।
तन्मानेन लिखेल्लेखां सर्वाङ्गेषु विचक्षणः॥ १५०॥

---

१ F omits this and the following three lines २ A म्पयेन्मृ। ३ B D इति वज्रलेपलक्षणम्। ४ F न। ५ A ङ्ग। ६ D मी। ७ D र्कोदि। ८ A वृतिं। ९ D ख। १० A आदानं। ११ A मं। १२ F दग्रेणपा। १३ A यार्श्वं। १४ A या। १५ A कादी। १६ D णी। १७ D णी। १८ A चे।

पूर्वं तिन्दुकया[1] लेख्यं यद्वा वर्तिकया बुधैः ।
आकारमात्रिकां लेखां विना वर्णैर्लिखेत्पुनः ॥ १५१ ॥

आकारजनिकां[2] लेखां तिन्दुवर्तिकनिर्मिताम् ।
लिखेत्तामे[3] लेखन्या गैरिकोद्भूतवर्णया ॥ १५२ ॥

पुरस्ताद्वर्णकैः पश्चात्तत्तद्रूपोचितैः स्फुटम् ।
उज्ज्वलं प्रोन्नतंस्थाने श्यामलं निम्नदेशतः ॥ १५३ ॥

एकवर्णेऽपि तत्कुर्यात्तारतम्यविभेदतः ।
अच्छश्वेदुज्ज्वलो[6] वर्णो घनः श्यामलतां व्रजेत् ॥ १५४ ॥

भिन्नवर्णेषु रूपेषु भिन्नो वर्णः प्रयुज्यते ।
मिश्रवर्णेषु रूपेषु मिश्रो वर्णः प्रयुज्यते ॥ १५५ ॥

श्वेतेषु पूरयेच्छङ्खं[7] शोणेषु दरदं तथा ।
रक्तेष्वलक्तकरसं लोहिते गैरिकं तथा ॥ १५६ ॥

पीतेषु हरितालं स्यात् कृष्णं कज्जलमिष्यते ।
शुद्धा[8] वर्णा इमे प्रोक्ताश्चत्वारश्चित्रसंश्रयाः ॥ १५७ ॥

इति शुद्धवर्णद्रव्याणि

मिश्रवर्णानतो वक्ष्ये वर्णसंयोगसम्भवान् ।
दरदं शङ्खसम्मिश्रं भवेत्कोकनदच्छविं[11] ॥ १५८ ॥

अलक्तं शङ्खसम्मिश्रं रसस्य[12] (ज्ञा-) सदृशं भवेत् ।
गैरिकं शङ्खमिश्रं[13] च धूम्रच्छायं निरूपितम् ॥ १५९ ॥

हरितालं शङ्खयुतं[14] चोरश्च[15] (टा-) सदृशप्रभम् ।
कज्जलं शङ्खसम्मिश्रं धूम्रच्छायं निरूपितम् ॥ १६० ॥

नीली शङ्खेन संयुक्ता कपोतसदृशी भवेत् ।
राजावर्तः स एव स्यादतसीपुष्पसन्निभः ॥ १६१ ॥

---

१ A तिन्दकलेख्यं स्याद् । २ F B न D नितां । ३ A क । ४ A काद्रू । ५ A तं । ६ D र्णोयितं कृ । ७ D च्छः षड्ड । ८ B D F च्छेषं । ९ A द्ध । १० F जायते मधुर । ११ A विः । १२ A वोरस्य । १३ A सम्मिश्रं । १४ F क्तं । १५ A वेराश्च ।

केवलैव हि या नीली भवेदिन्दीवरप्रभा ।
हरितालेन मिश्रा चेज्जायते हरितच्छविः ॥ १६२ ॥

कज्जलं गैरिकोपेतं श्यामवर्णं प्रजायते ।
अलक्तकेन संयुक्तं कज्जलं पाटलं भवेत् ॥ १६३ ॥

अलक्तं नीलिकायुक्तं जम्बूवर्णं भवेत्स्फुटम् ।

इति मिश्रवर्णाः ।

एवं शुद्धाश्च मिश्राश्च वर्णभेदाः प्रकीर्तिताः ॥ १६४ ॥

तत्तद्रूपानुसारेण पूरणीयास्तु चित्रकैः ।
एणसारङ्गशार्दूलशिखितित्तिरिकादिषु ॥ १६५ ॥

भिन्नवर्णेषु सत्त्वेषु पृथग्वर्णः प्रयुज्यते ।
वृक्षपर्वतवस्त्रादिपदार्थेषु यथोचिताः ॥ १६६ ॥

भिन्नाँ वर्णाः प्रयोक्तव्याश्चित्रकैश्चित्रकर्मणि ।
गौरवर्णेषु नीलेषु हरितालं पुरो[3] न्यसेत् ॥ १६७ ॥

गौरेषु गैरिकं पश्चान्नीलीं नीलेषु योजयेत् ।
क्षुरेण तीक्ष्णधारेण रेखा न्यूनाधिकां हरेत् ॥ १६८ ॥

पाण्डुरं बिन्दुजातं यत्तत्सर्वं तेन कारयेत् ।
पूरितं वर्णमात्रं यत्तावन्मात्रं हरेत् सुधीः ॥ १६९ ॥

मृदुघर्षणयोगेन यथा शङ्खो न नश्यति ।
रोमराजि[5] सि(जिमि)तां कुर्याद्रेखां नानाविधामपि ॥ १७० ॥

[6]वीरणैः सूक्ष्मतुण्डाग्रैर्मृदुघर्षणयोगतः ।
शुद्धं सुवर्णमत्यर्थं शिलायां परिपेषितम् ॥ १७१ ॥

कृत्वा कांस्यमये पात्रे गालयेत्तन्मुहुर्मुहुः ।
लि(क्षि)त्वा तोयं तदालोड्य निहिते(तं)तज्जलं मुहुः ॥ १७२ ॥

---

१ A बाण० । २ A त्र० । ३ D न्यसेत् पुनः । ४ A शाखो । ५ B जि । ६ B D ची । ७ F ह्व ।

यावच्छिलारजो याति तावत्कुर्वीत यत्नतः।
घनत्वान्मसृणं हेम न याति सह वारिणा ॥ १७३ ॥

आस्तेऽतिनिर्मलं हेम नालक्ष्यत्वद्विरच्छवि।
तत्कल्कं हेमजं स्वल्पं वज्रलेपेन मेलयेत् ॥ १७४ ॥

मिलितं वज्रलेपेन लेखन्यग्रे निवेशयेत्।
लिखेदाभरणं कापि यत्किञ्चिद्धेमकल्पितम् ॥ १७५ ॥

चित्रे निवेशितं हेम यदा शोषं प्रपद्यते।
वराहदंष्ट्रया तत्तु घट्टयेत्कनकं शनैः ॥ १७६ ॥

यावत्कान्तिं समायाति विद्युच्चकितविग्रहाम्।
सर्वचित्रेषु सामान्यो विधिरेषः प्रकीर्तितः ॥ १७७ ॥

प्रान्ते कज्जलवर्णेन लिखेद्रेखां विचक्षणः।
वस्त्राभरणं पुष्पं मुखरागाधिकं सुधीः ॥ १७८ ॥

अलक्तेन लिखेत्पश्चाच्चित्रं पूर्णं भवेत्ततः।

इति चित्रवर्णः

ऋजुस्यात्प्रथमं स्थानमन्यत्तद्वज्र ( दर्धर्जु ) संज्ञितम् ॥ १७९ ॥

तृतीयं स्थानकं सांचि तुर्यं तद ( त्वर्धा ) क्षिसंज्ञितम्।
पञ्चमं भित्तिकं प्राहुः पंश्चाद्भागगतं च यत् ॥ १८० ॥

पञ्चस्थानानि मुख्यानि कथितानीह संज्ञया।
तेषां तु लक्षणं वक्ष्ये ब्रह्मसूत्रविभेदतः ॥ १८१ ॥

ब्रह्मसूत्राद्बहिः सूत्रे षड्जवा(ट्षड)ङ्गुलमध्यमे।
यत्र स्यादृजुसंस्थानं रूपं साम्मुख्ययोगि तत् ॥ १८२ ॥

अन्तरं ब्रह्मसूत्रस्य पक्षसूत्रस्य चैकतः।
अष्टाङ्गुलं ततोऽन्यत्र चतुरङ्गुलमन्तरम् ॥ १८३ ॥

---

१ D ङ्ग। २ D ह। ३ D वं। ४ A त्रवर्णं। ५ B वर्णा। ६ A सन्मुखं। ७ A ने। ८ A वा। ९ A पार्श्वाङ्गादितम्। १० A त। ११ BF ङ्गा। १२ D तु ऋ, A मृदु। १३ A गिनम्

[1]उक्तमर्द्धं[2]र्जुके स्थाने लम्बसूत्रक्रमो भवेत् ।
अङ्गुलानि दशैकत्र कलामात्रं ततोऽन्यतः ॥ १८४ ॥

अन्तरं ब्रह्मसूत्रस्य पक्षसूत्रद्वयस्य च ।
साचिस्थानं समाख्यातं मूर्द्धसूत्रास्थितिक्रमः ॥ १८५ ॥

एकत्रैकाङ्गुलं यस्मिन्नन्यत्रैकादशाङ्गुलम् ।
मध्यं तू(ध्वार्त्त्वधो)र्द्वाक्षिके स्थाने लम्बसूत्रक्रमो भवेत् ॥ १८६ ॥

पक्षसूत्रद्वयं [3]तिष्ठेद् ब्रह्मसूत्रं न दृश्यते ।
लम्बसूत्रक्रमो ह्येष भित्तिके[4] समुदाहृतः ॥ १८७ ॥

स्थानेषु परिवृत्तेषु लम्बसूत्रक्रमोऽह्ययम् ।
व्यन्तरेषु तदर्द्धेन लम्बसूत्रक्रमो भवेत् ॥ १८८ ॥

केशान्ततः समागत्य भ्रूमध्यान्नासिकाग्रतः ।
चिबुकाद्धृदयान्नाभेश्चरणद्वयमध्यगम् ॥ १८९ ॥

आभ्रूमेर्मस्तकं यावद् ब्रह्मसूत्रमुदाहृतम् ।
अचलं तद्ऋजुस्थाने स्थानेष्वन्येषु तच्चलम् ॥ १९० ॥

पार्श्वयोस्तत्र सूत्रे द्वे षड्दं[5] (ट्षड) ङ्गुलदूरगे[6] ।
कर्णान्ताच्चिबुकाज्जानुमध्यात्तलकवाह्यतः ॥ १९१ ॥

पादप्रदेशिनीमध्याद्भ्रूमिं प्राप्ते उभे अपि ।
पक्षसूत्रे समाख्याते सर्वस्थानेषु निश्चिते[7] ॥ १९२ ॥

इति पक्षसूत्रलक्षणम् ।

तत्र मानं प्रवक्ष्यामि शरीरे नवतालगम् ।
परमाण्वादिभेदेन यथा बोधः प्रजायते ॥ १९३ ॥

परमाणुभिरष्टाभिस्त्रसरेणुर्निगद्यते ।
त्रसरेणुभिरष्टाभिर्बालाग्रमभिधीयते ॥ १९४ ॥

---

१ A अर्धाङ्गुलं क्षिपेन्मध्ये । २ A र्द्धे जु । ३ तिष्ठन् । ४ AF स्तोऽयं A भित्ते । ५ F त्रे । ६ A सूत्रे । ७ D द्वदङ्गुलदूरगे । ८ F च्चु । ९ D हुकः । १० B. D. ना ११ A तम्, श्चलम् ।

बालाग्रैरष्टभिर्लिक्षाः यूका लिक्षाष्टकं भवेत् ।
यूकाष्टकं यवः प्रोक्तो यवाष्टकमथाङ्गुलम् ॥ १९५ ॥

एकाङ्गुलं भवेन्मात्रा द्वे[1] मात्रे गोलकं कला ।
त्रिमात्रमर्द्धा(ध्य)र्द्धकला भागश्च चतुरङ्गुलम् ॥ १९६ ॥

त्रयो भागा वितस्तिः स्याद्वितस्तिस्ताल उच्यते ।
तालस्तु मुखमाख्यातैः[2] व्यवहाराय कोविदैः ॥ १९७ ॥

उत्सेधस्तुभवेद्दैर्घ्यं विस्तारस्तिर्यगीरितः ।
आनाहं(हः) परिधिः स्थौल्यमेवं मानत्रयं भवेत् ॥ १९८ ॥

दैवतं यल्लिखेद्रूपं यावन्मानमभीप्सितम् ।
विभजेद्वदनं तस्य त्रिभिर्भागैर्विचक्षणः ॥ १९९ ॥

केशान्ताद्धनुपर्यन्तं मुखं ताल इति[3] स्मृतम् ।
स्याद्वादशाङ्गुलं वक्त्रं तत्तद्रूपस्य मानतः ॥ २०० ॥

तालमात्रं मुखं तत्र ग्रीवा स्याच्चतुरङ्गुला ।
तालः स्याद्धृदयं यावदानाभेस्ताल इष्यते ॥ २०१ ॥

नाभेरधस्तात्तालस्तु मेढ्रावधिमितो भवेत् ।
तालद्वयं भवेदूरू जानु स्याच्चतुरङ्गुलम् ॥ २०२ ॥

तालद्वयमिता जङ्घा चरणश्चतुरङ्गुलः[4] ।
नव तालमिदं मानं केशान्ताच्चरणावधि ॥ २०३ ॥

केशान्तस्योपरिप्रोक्तं मस्तकं चतुरङ्गुलम् ।
केशान्तान्मौलिरुद्दिष्टः शिष्टैरष्टादशाङ्गुलैः ॥ २०४ ॥

ब्रह्मसूत्रस्य मानेन तालमानं निरूपितम् ।

इति ताललक्षणम् ।

तिर्यक्सूत्रविधिं वक्ष्ये प्रतिसन्धि यथाक्रमम् ॥ २०५ ॥

मस्तके प्रथमं सूत्रं केशान्ते तदनन्तरम् ।
कर्णाग्रं(ग्रात) व्यङ्गुलादूर्ध्वं तत्सूत्रं वेष्टयेच्छिरः ॥ २०६ ॥

---

१ D द्विमात्रा । २ A नं । ३ A मि । ४ F णे च । ५ F लम् ।

ततोऽधस्तपनोदे[1](नोदे)शे द्विमात्रे सूत्रपादपे[3] (तनम्) ।
तँद्याति शङ्खमध्येन कर्णाग्राद्ध्वमङ्गुलात् ॥ २०७ ॥

शिरसः पृष्ठकूर्मस्य प्रोष्ठमङ्गुलतो व्रजेत् ।
वेष्टितं घटते सूत्रं स्थापने वामतः क्रमात् ॥ २०८ ॥

ततोऽङ्गुलं समुत्सृज्य सूत्रपातं प्रकल्पयेत् ।
कँचोत्सङ्गगङ्गुवोपान्तात्[13] कर्णाग्राच्छीर्षकूर्मगम् ॥ २०९ ॥

ततोऽङ्गुलं परित्यज्य समारभ्य कनीनिकाम् ।
अपाङ्गत्विषँपलीमूर्द्धशिरोगतोर्ध्वकं नयेत्[15] ॥ २१० ॥

त्यक्त्वा कलां ततः पूर्तं ( सूत्रं ) नासामध्ये निवेशितम् ।
कपोलोच्चप्रदेशेन नेयोच्छ्रान्त(च्छोत्र)स्य मध्यतः ॥ २११ ॥

ततोऽङ्गुलँद्वये सूत्रं नासाग्रेण कपोलयोः ।
कर्णमूलान्नयेत्पृष्ठं केशोत्पत्तिप्रदेशतः ॥ २१२ ॥

तँतोऽङ्गुलद्वयं सूत्रं नासाग्रेण कपोलयोः ।
ततो द्य(तःसा)र्धाङ्गुलं त्यक्त्वा वक्त्रमध्याद्विनिःसृतम् ॥ २१३ ॥

सूत्रं सृक्कँप्रदेशेन प्रापयेत्तत्कृकाटिकाम् ।
ततश्चार्धाङ्गुलं त्यक्त्वा सूत्रं स्यादधरोष्ठजम् ॥ २१४ ॥

हनुसन्धिविभागेन यावत्पश्चिमकन्धरम् ।
ततोऽङ्गुलद्वयं त्यक्त्वा हन्वग्रे[20] सूत्रमिष्यते ॥ २१५ ॥

कन्धरात्स्कन्धसन्धिं[23] तत् समत्वेन प्रपद्यते ।
ततः कलाद्वये त्यक्ते हिक्कायां [illegible]ः ॥ २१६ ॥

अधस्तात्ककुँदः[23] सूत्रं परावृत्य[23] प्रकल्पयेत् ।
सप्ताङ्गुलं समुत्सृज्य सूत्रं वक्षस्थलोद्भवम् ॥ २१७ ॥

---

१ F नो। २ D शेद्वि। ३ D पा। ४ A दया B D ददा। ५ A श्रकू। ६ F क। ७ D थ। ८ A टि। ९ A त्रं। १० B कण्ठो D भ्रुवोः सः। ११ A न्तां। १२ A कम्। १३ D पं. A प्पि। १४ D धिंकेतुये, १५ B. F यौ के। १६ A याव। १७ A मूलद्वयं। १८ F adds this line। १९ A ज्य। २० A न्वाग्रं। २१ A देशे। २२ A दं। २३ F वर्त्य।

स्तनरोहितमार्गेण कक्षासन्धौ निवेश्यते ।
तदेव सममार्गेण परावृत्तप्रदेशतः ॥ २१८ ॥

मध्ये फलकमानीतं (य) पृष्ठवंशे समाप्यते ।
ततः पञ्चाङ्गुलं त्यक्त्वा क्रमाद्विभ्रमसङ्गमम्(ग)म् ॥ २१९ ॥

नयेच्च सममार्गेण सूत्रं चूचुकयोरधः ।
आरभ्य बृहतीदेशं(शात्) बाहुमध्योर्ध्वसङ्गमम् ॥ २२० ॥

परावृत्यैव तन्नीतं पृष्ठमध्ये समर्पयेत् ।
षडङ्गुलं समुत्सृज्य सूत्रं जठरमध्यगम् ॥ २२१ ॥

बाहुपीनान्तकं नेयं परावृत्य समं हि तत् ।
भागं कलाधिकं त्यक्त्वा सूत्रं नाभिसमुद्धृतम् ॥ २२२ ॥

श्रोणीमार्गसमानीतं कुंकुन्दराशिरो नयेत् ।
भागमेकं ततस्त्यक्त्वा सूत्रं पक्वाशयागतम् ॥ २२३ ॥

नितम्बमध्यादानीतं स्फिजोरूर्ध्वं नियोजयेत् ।
ततः कलाद्वयं त्यक्त्वा सूत्रं काञ्चीपदस्थितम् ॥ २२४ ॥

स्फिजोर्मध्यमदेशेन समं नीत्वा नियोजयेत् ।
त्यक्त्वाङ्गुलानि चत्वारि सूत्रं लिङ्गशिरोगतम् ॥ २२५ ॥

ऊरुमूलात्समानीतं जघनाभोगसङ्गतम् ।
पञ्चाङ्गुलं परित्यज्य लिङ्गाग्रात्सूत्रमुत्थितम् ॥ २२६ ॥

स्फिजोरधः समानीतं वलीमध्ये निवेश्यते ।
ततो भागद्वयं त्यक्त्वा सूत्रं पूर्वं निवेशितम् ॥ २२७ ॥

परित्यज्य ततो भागं मानसूत्रं व्यवस्थितम् ।
ततः कलाद्वये त्यक्त्वा जानुमूर्धनि सङ्गतम् ॥ २२८ ॥

इति सूत्रत्रयं तज्ज्ञः समन्तात् परिवेष्टयेत् ।
गोलकद्वितयं त्यक्त्वा स्थापितं जानुनोरधः ॥ २२९ ॥

---

१ A त्तः F त्ते । २ F न । ३ A भवेच्च । ४ B चुचु । ५ D श । ५ A मध्योर्ध्वं, D स्योर्ध्वं । ६ A समं धृतम् । ७ B भाग । ८ D क । ९ D न्तगम् । १० A लि । ११ A सूच्या A पूर्वो । १२ A निवेशयेत् । १३ A भागमथो D भागमर्थं । १४ D क्ते ।

सूत्रं तु वेष्टयेत्प्राज्ञः समन्तात् सर्वतः समम् ।
तालमेकं ततस्त्यक्त्वा शुक्रबस्तौ निवेशितम् ॥ २३० ॥

सूत्रमावेष्टयेत्प्राज्ञः समचित्रविशारदः ।
ततो दशाङ्गुले त्यक्ते यत्सूत्रं नलकान्तगम् ॥ २३१ ॥

गुल्फमस्तकमानीतं पार्ष्णिमस्तकमानयेत् ।
कलामेकां ततस्त्यक्त्वा सूत्रं गुल्फान्तसङ्गतम् ॥ २३२ ॥

वेष्टयेच्चित्रको धीमान् सर्वं सर्वत्र मानतः ।
ततो भागं परित्यज्य भूमिसूत्रं परित्यजेत् ॥ २३३ ॥

षड्विंशतिविधं सूत्रं तिर्यङ्मानेन निरूपितम् ।

इति तिर्यङ्मानलक्षणम् ।

अतऊर्ध्वं प्रवक्ष्यामि प्रदेशानां विनिर्णयम् ॥ २३४ ॥

आकारश्च तथा दैर्घ्यं स्थौल्यं विस्तारमेव च ।
छत्राकारं भवेच्छीर्षं शिखादेशे समुन्नतम् ॥ २३५ ॥

शिखायाः पूर्वतो भागं किञ्चिन्निम्नं भवेत्तथा ।
शिखायाः पार्श्वनिम्नं यत् कलामात्रं विहाय तत् ॥ २३६ ॥

शिखायाः पश्चिमे भागे प्रोन्नतं जायते मनाक् ।
ततोऽधस्ताद्भवेद्धैर्तैः शृंगा(प्रणा)लसदृशाकृतिः ॥ २३७ ॥

एकाङ्गुलस्तु विस्तारो दैर्घ्यं स्यादङ्गुलद्वयम् ।
कर्णाग्रसन्धौ संलग्नः कर्णपृष्ठेऽङ्गुलान्तरम् ॥ २३८ ॥

ततोऽधोऽङ्गुलातीतस्त्र्यङ्गुलोऽथ करो(चो)द्भवः ।
एकैकाङ्गुलविस्तारः शिरोगर्तस्य पार्श्वयोः ॥ २३९ ॥

इत्येष पश्चिमे भागे कथितः केशसम्भवः ।
केशाः कृष्णाः पिशङ्गा वा जटिलाः कुटिलाः क्वचित् ॥ २४० ॥

---

१ D भाग । २ D मध्यमये । ३ A त्त । ४ B F मं । ५ A नं निरूप्यते । ६ A श । ७ BF नम्रं । ८ DF दा । ९ BD मर्तुः ॥ १० D द्वयं । ११ D रः । १२ A र्द्धाव्य D र्द्धव्य ।

विरच्यन्ते यथाशोभं तत्तद्रूपानुसारतः।
अष्टादशाङ्गुलं पूर्वं पश्चिमार्द्धं तथैव च ॥ २४१ ॥

भवेतां कर्णयोरूर्ध्वं भागौ पूर्वापरौ समौ।
सीमन्ताद्गर्तमध्यान्तं भवेदष्टादशाङ्गुलम् ॥ २४२ ॥

वामदक्षिणयोर्वेष्टयं भवेत्तालैस्तुनिर्मितम्।
एवं भागद्वयोप्युक्तो विस्तारो मस्तकाश्रयः ॥ २४३ ॥

षड्त्रिंशदङ्गुलो ज्ञेयः परीणाहो विचक्षणैः।
भ्रूपृष्ठात्केशपर्यन्तं ललाटं त्र्यङ्गुलं भवेत् ॥ २४४ ॥

भ्रूयुग्ममध्यादारभ्य ततो द्व्यर्धकलामितम्।
भ्रुवोपान्तात्तदेव स्यात्कलाद्वितयसंमितम् ॥ २४५ ॥

आरोपितधनुःप्रख्या भ्रुवोर्लेखा विरच्यते।
मात्रार्द्धकृतविस्तारा क्रमशः परीहीयते ॥ २४६ ॥

प्रान्ते श्लक्ष्णा च तीक्ष्णा सा दैर्घ्ये च त्र्यङ्गुला भवेत्।
त्रियवं रोमदैर्घ्यं च भ्रुवोर्मध्ये विधीयते ॥ २४७ ॥

द्वियवं तु भवेदादौ प्रान्ते स्याद्यवमात्रकम्।
वितर्के हसने कोपे विस्मये मध्यकुञ्चिता ॥ २४८ ॥

जुगुप्सिते सूक्ष्मदृष्टौ भ्रूयुगं कुञ्चितं भवेत्।
केशान्तरेखाविन्यासो द्वितीयेन्दुकलाकृतिः ॥ २४९ ॥

प्रान्तौरु(वु)त्क्षेपनामानौ प्रदेशौ परिकीर्तितौ।
उत्क्षेपाभ्यां समौ कुर्याद्भ्रुवोः प्रान्तौ विचक्षणः ॥ २५० ॥

एवं ललाटमानं तु चतुष्कलमुदाहृतम्।
उत्क्षेपप्रान्तदेशे स्याद्ऋजुरूपाऽलकावली ॥ २५१ ॥

कलामात्रा च सा ज्ञेया स्थापनी (स्थपति) सूत्रकारिभिः।
ततस्तिर्यग् व्रजेद्रेखा मात्राद्वितयसम्मिता ॥ २५२ ॥

१ A त। २ F द्य। ३ A ड्वि। ४ A रि। ५ AF दध्यर्द्ध। ६ D तं। ७ D र्द्धे। ८ B D रः। ९ D. F. च स्याद्दैर्घ्ये। १० F तां चु D न्तावुत्क्ष। ११ A नी। १२ A वोपान्तौ। १३ B. E तच्च। १४ D शः। १५ D स्थ। १६ D वधिः। १७ B संयुता।

निर्गच्छति ततः कूर्चं तद्रेखामात्रया मितम्।
कुर्वन्ने (चैरे) खा भ्रुवोः प्रान्तमध्ये स्यादङ्गुलद्वयम् ॥ २५३ ॥

स एव सङ्खो (शङ्खो) विख्यातः प्रदेशविधिकोविदैः।
पिप्पल्याः कूर्चरेखाया भवेदङ्गुलमन्तरम् ॥ २५४ ॥

एवं ललाटविन्यासः कथितः सोमभूभुजा।
अर्धाङ्गुलं भ्रुवोर्मध्यान्नासामूलं निरूप्यते ॥ २५५ ॥

किञ्चिल्ललाटतो निम्नं तस्य पार्श्वे कनीनिके।
समन्तान्नेत्रयो र्गर्तावक्षिकूपौ च कल्पितौ ॥ २५६ ॥

अँर्धाङ्गुल प्रमाणे (णौ) तौ नेत्रवर्त्मबहिः स्थितौ।
अर्धाङ्गुलप्रमाणेन नेत्रवर्त्मद्वयं भवेत् ॥ २५७ ॥

निमीलनार्धवर्त्मा च ( दूर्ध्ववर्त्म ) भवेदङ्गुलसम्मितम्।
त्रियवं पक्ष्मणां दैर्घ्यं सादेंवा मकृमा ( सान्द्रिमा वक्रिमा) शुभः ॥ २५८ ॥

अर्धाङ्गुलमिते स्यातां नेत्रमूले कनीनिके।
द्व्यङ्गुलं नेत्रयोर्दैर्घ्यं विस्तारः स्यात्तदर्धतः ॥ २५९ ॥

एवं पञ्चयवौ कार्यौ शुक्लभागौ विचक्षणैः।
तन्मध्ये मेचकं कुर्यान्मण्डलं वर्तुलाकृति[६] ॥ २६० ॥

तच्च पञ्चयवं प्रोक्तं तन्मध्ये दृष्टिरिष्यते।
वर्तुला यवमात्रा च पुत्रिका प्रतिविम्बिनी ॥ २६१ ॥

रक्तता प्रान्तयोः शस्ता तीक्ष्णताऽपाङ्ग्योः शुभा।
मध्योन्नतं नेत्रगोलं कर्त्रा कार्यं प्रयत्नतः ॥ २६२ ॥

आकारो नेत्रयोः कार्यो नीलोत्पलदलोपमः।
अपाङ्ग्योरधः कार्यौ कपोलौ द्व्यङ्गुलौ मतौ ॥ २६३ ॥

कर्णपिप्पल(लि)देशान्तौ तिर्यक्सूत्रेण मापितौ।
अपाङ्गपिप्पलीमध्ये पञ्चाङ्गुलमुदाहृतम् ॥ २६४ ॥

---

१ Mss तां। २ A न्ते। ३ Mss ल। ४ B. D. F add this line ५ A सादवा मृकृमा C D दमान् कृता, B दमावकृमा। ६ Mss except F तिः। ७ A म्ब।

तदेव च समं तिर्यङ् मापितं चतुरङ्गुलम् ।
ऊर्ध्वाधोबन्धयोर्मध्ये कर्णयोस्त्र्यङ्गुलं भवेत् ॥ २६५ ॥

सं[1] स्याद्विगोलकायामो नासायाः पुरतः स्थितः ।
तस्य मध्ये भवेद्रोजी[2] प्रणालाकारधारिणी[3] ॥ २६६ ॥

अर्धाङ्गुला भवेद्दैर्घ्ये विस्तारे त्रियवा भवेत् ।
उत्तरोष्ठो भवेत्तस्या अधस्ताद्भागदैर्घ्यकः[4] ॥ २६७ ॥

यवपञ्चकविस्तारः क्रमशः परिहीयते ।
श्मश्रूत्तरोष्ठयोर्मध्ये रेखा किञ्चित्समुत्कला[5] ॥ २६८ ॥

उन्नता यवमात्रा स्याद्दैर्घ्याद्दोष(दोष्ठ)प्रमाणिनी ।
अधरोष्ठे(ष्ठो) भवेत्तस्या अधस्ताद्भागदैर्घ्यवान् ॥ २६९ ॥

ओष्ठयोरुभयोः प्रान्तसंयोगे सृकिणी[6] मते ।
नेत्रज्योतिःसमे[7] कार्ये[8] विकाररहिताकृतौ ॥ २७० ॥

विकारौ[9]द्वर्धते सृक्का तथा सङ्कोचमेति च ।
हसने दन्तनिष्कासे भीतिमर्कट[10] ( भीते तर्के च )–रोदने ॥ २७१ ॥

वर्धते सृकिणे[12]र्द्वन्द्वमेकैकाङ्गुलमायतौ ।
चुम्बने फूत्कृतौ तद्वदाम्रादिफलचूषणे[13] ॥ २७२ ॥

सङ्कुचेत्सृकिणी[14]द्वन्द्वमेकैकाङ्गुलहानितः
गोजिह्वाधरयोर्मध्यं व्यासेन[15] चतुरङ्गुलम् ॥ ॥ २७३ ॥

पार्श्वद्वयं क्रमाद्धीनं त्रिद्व्येकाङ्गुलमानतः ।
दन्ता द्वादश दृश्या स्युः पङ्क्तिद्वयसमाश्रिताः[17] ॥ २७४ ॥

ऊर्ध्वा पञ्चैयवा[18] दृश्यास्तलस्थास्त्रियवास्तथा ।
राजदन्तौ तु मध्यस्थौ ऊ(स्थावू)र्ध्वपंक्तिसमाश्रितौ[19] ॥ २७५ ॥

---

१ A सः । २ A राजा F द्रोजी । ३ D मृ । ४ A. ष्ठे । ५ D. भाक् । ६ F. क्तता ७ A. क्क । ८ A. नेत्रज्योतिःसमः ९ A. यौं १० B. D. F. रे व । ११ F. भीतेच । १२ A. क्क । १३ A. भक्ष F. चूक्ष । १४ A. क्क । १५ D. मूलं । १६ A धे । १७ F. ट्र । १८ A. एक । १९ ट्र ।

तयोःपार्श्वगतौ मध्यौ तत्पार्श्वे पारिभक्षकौ[1]।
तत्पार्श्वगौ कर्तनारव्यौ ततः स्यात्त(ता)न्तु[2] खण्डनौ ॥ २७६ ॥

सुश्लक्ष्णाः कान्तिसम्पन्नाः स्वस्थाः[3] शुभ्रा निरन्तराः।
दशनाः शिल्पिभिः कार्या अँचाया[4] लेखनेपि वा ॥ २७७ ॥

वीटिकाखण्डने द्वारे (हासे)[5] त्रासादङ्कुलचर्वणे।
दर्पणालोकने दृश्या दशनच्छदगूहिताः[6] ॥ २७८ ॥

सृक्कणौ पार्श्वगौ देशौ कर्णौ स्यातां[7] निरस्थिकौ।
तस्या (स्माद्) बहिश्चैलास्थि स्यात्कर्णमूलेन सङ्गतम् ॥ २७९ ॥

क्रमशो हीयते तत्तु यावत् स्याद्धनुमण्डलम्।
सार्द्धाङ्कुलं भवेदूर्ध्वं तिर्यक् स्याच्चतुरङ्कुलम् ॥ २८० ॥

अधरोष्ठतलोद्देशे चिबुकं समुदाहृतम्।
कुब्जकूर्चं भवेत्तस्मिन्निम्ने मात्रापमाणके ॥ २८१ ॥

हनुपृष्ठे भवेत्कूर्चं प्रर्चलास्थिक्रमेण तु।
यवमात्रं प्रकुर्वीत कूर्चं[8] प्रथमसम्भवम् ॥ २८२ ॥

द्वैचष्टवत्सरदेशस्य[9] पुरुषस्य विचक्षणः।
प्रकुर्वीत ततश्चोर्ध्वमधिकं यवमानतः ॥ २८३ ॥

अष्टाङ्गुला भवेद्ग्रीवा विस्तारेण निरूपिता।
द्विगोला[10] सा च दैर्घ्येण परिणाहे द्वितालिका ॥ २८४ ॥

ग्रीवामध्यप्रदेशे तु निगालः परिकीर्तितः।
अधस्तस्य भवेद्धिक्का मात्रामात्रा प्रकीर्तिता[11] ॥ २८५ ॥

हिक्काया हृदये तालस्तालश्च स्तनचूचुके।
कक्षामूले तथा तालस्तालः कक्षधरो भवेत् ॥ २८६ ॥

कन्धरास्कन्धसन्धिः स्याद्धिक्कायाश्चतुरङ्गुलः[12]।
कक्षामूलात्कुक्षिधरो[13] भवेदष्टाङ्गुलायतः[14] ॥ २८७ ॥

---

१ D प। २ P नु। ३ D च्छाः। ४ Other mss आचार्या F आर्वार्या। ५ D F वा। ६ D F हकाः A हिका ७ A. हिः स्थला। ८ A ब। ९ D. चै। १० A रा. । ११ B F ब्यङ्गुली। १२ A ताः। १३ B. F ला A लं। १४ D क्षुक्ष।

हिक्कायाः पार्श्वयोर्लग्ने जत्रुणी[1] भुजमूर्ध्वगे[2] ( मूर्धगे )।
एकादशाङ्गुले प्रोक्ते किञ्चिदुन्नतविग्रहे ॥ २८८ ॥

हिक्कायाः कक्षमूलाच्च स्तनचूचुकबन्धुतः[3]।
मध्ये[4] वक्षःस्थलं प्रोक्तं तालमात्रं[5] समंततः ॥ २८९ ॥

द्वयोश्चूचुकयोर्मध्ये तालमानमुदाहृतम्[6]।
कार्यं चूचुकयोर्वृत्तं मेचकं द्व्यङ्गुलं भवेत् ॥ २९० ॥

चूचुको[7] मण्डलस्यान्तर्यवमात्रो निगद्यते।
उत्सेधाद्विस्तृतेस्तेन[8]द्वत्प्रमाणं परिकीर्तितम् ॥ २९१ ॥

स्त्रीणां तु द्वियवः कार्यश्चूचुकश्चित्रकोविदैः।
प्रोक्त(:)स्तनपरीणाहैः[9] स्तनमष्टादशाङ्गुलम्[10] ॥ २९२ ॥

बृहतीनामतः ख्यातं कक्षमूलस्तनान्तरम्[11]।
षडङ्गुलं च मानेन सूत्रितं सूत्रकोविदैः ॥ २९३ ॥

स्तनद्वितयमध्यस्थः किञ्चिन्निम्नः[12] कलामितः।
प्रदेशे[13](शो) बन्धुरित्युक्तश्चित्रशास्त्रविशारदैः[14] ॥ २९४ ॥

कन्धरास्कन्धसन्धिस्तु बाहुमूर्धनि भागकः।
पूर्वापरे कक्षमूले मू(ता)लेनैकेन सम्मिते ॥ २९५ ॥

अभ्यन्तरे तथैव स्यात् ताल एको निरूपितः।
कक्षमूलपरीणाहस्तदेव(वं)स्याद्वितालकः[15] ॥ २९६ ॥

बाहुशीर्षस्य[16] बाहोश्च सन्धिस्थानं निरूपितम्।
कक्षमूलात्कलाद्वन्द्वं[17] तिर्यक्सूत्रप्रमाणतः ॥ २९७ ॥

बन्धुदेशाद्[18] भवेन्नाभिस्तालेनैकेन[19] मापिता।
नाभिरङ्गुलविस्तारा वर्तुलार्धाङ्गुलावटा[20] ॥ २९८ ॥

---

१ D तृ। २ F र्द्धते। ३ B. F ता। ४ B. D. F. ध्यं। ५ A त्र। ६ A श्विबु। ७ A द्विगुणं। ८ A चिबु। ९ A न्तं पञ्चमात्रा। १० A त। ११ A क्त स्था। १२ A ह। १३ D. लं। १४ D. न्न। १५ A. वे। १६ A. न्ध। १७ B. D. ले। १८ B. D. श्च। १९ F. क्षा। २० B. D. क्ष। २१ B न्ध। २२ A. त्ता। २३ A. द्वय। २४ A लोचय। B. D. ला च या।

बन्धस्य[1] पार्श्वयोस्तिर्यग्विस्तारस्तु द्विभागिकः।
चतुर्यवसमोपेतस्त्वेवं सप्तदशाङ्गुलैः[2]॥ २९९॥

बन्धुदेशे[3]परीणाह एकपञ्चाशदङ्गुलैः[4]।
ततोऽधो[5] मध्यभागस्तु प्रोक्तो मनुमिताङ्गुलः॥ ३००॥

मध्यभागपरीणाहो[6] द्विचत्वारिंशदङ्गुलः।
नाभिदेशस्य विस्तारो भवेच्चन्द्रकलाङ्गुलः॥ ३०१॥

नाभिस्थाने परीणाहो भवेत्तालचतुष्टयम्।
श्रोणीदेशः स विख्यातः कायस्थानपरीक्षकैः॥ ३०२॥

पक्वाशयगते सूत्रे विस्तारोऽष्टादशाङ्गुलः।
पक्वाशयपरीणाहश्चतुष्पञ्चाशदङ्गुलः॥ ३०३॥

स प्रदेशः कटिर्नाम काञ्चीदामविधारकः।
स्त्रीणां चेदधिकः कार्यो भागेनैकेन कर्तृभिः॥ ३०४॥

वस्तिमस्तकसूत्रस्य सप्तपञ्चाशदङ्गुलः।
परीणाहो[9] विधातव्यः सूचीभागेन विस्तृतैः[10]॥ ३०५॥

बस्तेस्थानस्य[12] विस्तारो विंशत्यङ्गुलसम्मितः।
तस्य प्रोक्तः परीणाहः षष्ट्यङ्गुलमितो बुधैः[13]॥ ३०६॥

जठरं वक्षसा युक्तं कार्यं गोमुखसन्निभम्।
स्त्रीणां मध्ये[14] कृशं कार्यं नाहेन[15] त्रिंशदङ्गुलम्॥ ३०७॥

भागेनैकेन तस्याधो लिङ्गमूलं प्रकल्पयेत्।
पञ्चाङ्गुलं लिङ्गदैर्घ्यं मुष्कयोश्चतुरङ्गुलम्॥ ३०८॥

लिङ्गस्य[16] मूलविस्तारः कलामात्रो निगद्यते।
पार्श्वयोरुभयोस्तस्य मुष्कमूलं द्विमात्रिकम्॥ ३०९॥

एवं च लिङ्गमुष्कस्य[17] मूलं स्याच्चतुरङ्गुलम्।
मूलोपान्ते प्रकर्तव्ये द्वे रेखे वंक्षणाश्रिते[18]॥ ३१०॥

---

१ A. बाध। २ A लम् F. ला। ३ A शे। ४ B कं। A। ५ A कःपञ्चदशाङ्गुलः B. कं पञ्चदशाङ्गुलं। ६ B था। ७ D हः। ८ A दशाङ्गुलः D. द्दशाङ्गुलः,। ९ B. D. ञ्च दशा। १० A मो। ११ B. D. तिः। १२. A विस्तिस्तस्य च D. बस्तेश्च स्थान। १३ A ङ। १४ A थ्यं। १५ AF. दे। १६ A मूलस्य। १७ A ल्यस्य। १८ A स्तृ।

विनिर्गते कलामात्रे तयोर्मध्यं वि(द्वि)भागिकम्[1] ।
रेखयोः प्रान्ततो[2] वस्तेर्विस्तारः स्यात् षडङ्गुलः ॥ ३११ ॥

भाग एको लिङ्गदैर्घ्यं मणिरेकाङ्गुलस्ततः ।
षडङ्गुलैः[3] परीणाहो मणिमूलेऽधिको मनाक्[4] ॥ ३१२ ॥

मुष्कयोर्भागिकं दैर्घ्यं तदर्धं बीजसंयुतम् ।
त्वगेव मूलभागः स्यात् तन्निम्नांशा प्रकल्प(ल्प्य)ते[5] ॥ ३१३ ॥

मुष्कौ सबीजकौ वृत्तौ भागद्वयविभागितौ ।
तालमात्रपरीणाहौ कर्तव्यौ शिल्पकोविदैः ॥ ३१४ ॥

अधस्तान्नीतसूत्रस्य लग्ने स्यातां कुकुन्दरे[6] ।
पश्चाद्भागे प्रकर्तव्ये भागद्वयकृतान्तरे ॥ ३१५ ॥

वस्तिमस्तकसूत्रस्य कटिसूत्रस्य चान्तरम् ।
फलकाकृति कर्तव्यं पश्चाद्भागं ( गे ) च शिल्पिभिः ॥ ३१६ ॥

बस्तिमस्तकसूत्राच्च लिङ्गाग्रपरिमाणकैः[7] ।
स्फिजौ चैव विधातव्ये करिकुम्भसहोदरे ॥ ३१७ ॥

स्फिजोरधः परीणाहस्त्रयस्त्रिंशन्मिताङ्गुलः ।
ऊरुमध्यपरीणाहः कार्यः षट्त्रिंशदङ्गुलः[8] ॥ ३१८ ॥

श्रोणी(आणि)देशपरीणाहो भवेत्तालद्वयान्वितः ।
क्रमशो हीयमानौ तावूरू कार्यौ विचक्षणैः ॥ ३१९ ॥

[11]अरोमकौ वलीशून्यौ रम्भास्तम्भकृतोपमौ[9] ।
श्लक्ष्णौ मनोहरौ वृत्तावूरू कार्यौ विचक्षणैः[10] ॥ ३२० ॥

ततस्तु जानुनी कार्ये चतुरङ्गुलमायते ।
अङ्गुलत्रयविस्तारे तत्पार्श्वौ द्विकलौ मतौ ॥ ३२१ ॥

परीणाहो विरच्यः स्यादङ्गुलान्येकविंशतिः ।
पश्चाद्भागे मनाग्निम्ने मध्ये किञ्चित्समुन्नते ॥ ३२२ ॥

---

१ B वितम् D विकम् । २ A योब । ३ F ल । ४ BDF भवेत् । ५ D दिमासा । ६ D येत् । ७ A क । ८ B, F. कैः A. कं । ९ A म । १० A. ड्वि । ११ F omits this stanza. ।

जङ्घामूलपरीणाहो[1] भवेदष्टादशाङ्गुलः।
जङ्घाप्रान्तपरीणाहश्चतुर्दशभिरङ्गुलैः[2]॥ ३२३॥

ततोऽधो गुल्फदेशः स्यान्नाह[3]ः स्यात्षोडशाङ्गुलः।
चतुर्दशाङ्गुलं दैर्घ्यं चरणे गणितं बुधैः॥ ३२४॥

उच्छ्रा[4]यः पार्ष्णिदेशस्य गणितश्चतुरङ्गुलः।
तिर्यक्सूत्रं समं पार्ष्णेरुयङ्गुलं[5] समुदाहृतम्॥ ३२५॥

पार्ष्णिदेशस्य विस्तारो भवेत्पञ्चभिरङ्गुलैः।
भागमात्रा[6]न्तरादूर्ध्वं पार्ष्णितो भागतः पुरः॥ ३२६॥

गुल्फौ द्व्यङ्गुलकौ कार्यौ विस्तारेण समन्ततः।
पादपृष्ठं तु कर्तव्यं प्रोन्नतं गजपृष्ठवत्॥ ३२७॥

तस्याधस्तलदे[7]शस्तु निम्नोऽभ्यन्तरतो भवेत्।
बहिर्भागे समं कार्यं पार्ष्णेर्यावत्कनिष्ठकम्॥ ३२८॥

अङ्गुलं(ष्ठ)मूलदेशे तु तलं कार्यं समुन्नतम्।
पादाग्रतलविस्तारः षडङ्गुल उदाहृतः॥ ३२९॥

पार्ष्णेश्च तलविस्तारः कथितश्चतुरङ्गुलः।
पादपृष्ठस्य चोत्सेधो भागस्त्वर्धाङ्गुलाधिकः॥ ३३०॥

अग्रपादस्य चोत्सेधस्त्र्यङ्गुलः समुदाहृतः॥
अङ्गुष्ठमूलदेशस्य त्र्यङ्गुलः[8]स्यात्समुच्छ्रयः॥ ३३१॥

अङ्गुष्ठस्य समुत्सेधो मात्रास्याद्वियवाधिका।
अङ्गुष्ठदैर्घ्यमुद्दिष्टं[9]मङ्गुलद्व(त्र)यसम्मितम्॥ ३३२॥

अङ्गुष्ठस्य परीणाहो भवेत्पञ्चभिरङ्गुलैः।
द्विपर्वाङ्गुष्ठमुद्दिष्टं प्रान्तपर्वार्धतो मु(न)खः[10]॥ ३३३॥

तर्जनीदैर्घ्यमुद्दिष्टं त्र्यङ्गुलं[11] द्वियवाधिकम्।
अ(त्र्य)ङ्गुलस्तु[12] परीणाहस्तस्याः पर्वत्रयं भवेत्॥ ३३४॥

---

१ A. हौ। २ A. लः। ३ A. ना। ४ B छू। ५ B त्रत। ६ D. F. न। ७ D. पार्ष्णि। ८ A. मु। ९ F. में। १० BD. अ। ११ A. ङ्त्र्य। १२ F. प्रांतं। १३ BD छ्म। १४ A स्य। १५ D. स्य।

मध्यमादैर्घ्यमुद्दिष्टं यवौ द्वाविंशतिर्बुधैः ।
कनिष्ठादैर्घ्यमाख्यातं सप्तभिर्दशभिर्यवैः ॥ ३३५ ॥

परीणाहस्तु तस्याः स्याद्यवानामेकविंशतिः ।
आयामोऽनामिकायाश्च यवा विंशतिरिष्यते ॥ ३३६ ॥

अनामिकापरीणाहः कार्योऽष्ट (ष्टा)दशभिर्यवैः ।
कनिष्ठादैर्घ्यमाख्यातं सप्तभिर्दशभिर्यवैः ॥ ३३७ ॥

कनिष्ठायाः परीणाहो यवाः पञ्चदश स्मृताः ।
पर्वत्रयं तु सर्वासामङ्गुलीनां प्रकीर्तितम् ॥ ३३८ ॥

सर्वासां पादशाखानामग्रपर्वार्धतो नखाः ।
अर्धाङ्गुलं समुत्सेधः सर्वासामग्रतो भवेत् ॥ ३३९ ॥

कन्धरास्कन्धसन्धेस्तु पश्चाद्भागे कुकाटिका ।
कुकाटीदेशतः कक्षामूलमेकादशाङ्गुलम् ॥ ३४० ॥

स्कन्धाभ्यां निर्गतौ ( तौ ) वंशफलकौ (कौ) षट्षडङ्गुलौ ।
तयोर्मध्ये भवेद्वंशः कलामात्रप्रमाणकः ॥ ३४१ ॥

उत्तानकदलीपत्रसन्निभः पृष्ठवंशकः ।
तदेवं पृष्ठभागस्य स्वरूपं परिकीर्तितम् ॥ ३४२ ॥

कक्षायाः कूर्परं यावद्बाहुपर्वेति कथ्यते ।
अष्टादशाङ्गुलं दैर्घ्यमानाहेऽष्टादशाङ्गुलम् ॥ ३४३ ॥

कूर्पराच्चलपर्यन्तं पर्व सप्तदशाङ्गुलम् ।
परीणाहः प्रबाहोस्तु षोडशाङ्गुलसम्मितः ॥ ३४४ ॥

प्रकोष्ठस्य परीणाहश्चतुर्दशभिरङ्गुलैः ।
मणिबन्धपरीणाहः कर्तव्यो द्वादशाङ्गुलः ॥ ३४५ ॥

विस्तारस्त्रिकलो बाहोः कूर्परेऽङ्गुलपञ्चकम् ।
परीणाहस्त्रि(त्रि)भागेन प्रबाहोर्विस्तृतिर्मता ॥ ३४६ ॥

---

१ A. Bद्वै । २ B. व । ३ A द्वै । ४ A मे । ५ B D F तो । ६ B काः D कः । ७ A षड्द । ८ D र्धं । ९ A न्तः B तः । १० A र्धं मानेऽप्य । ११ A राङ्गु । १२ B कः । १३ F विंस्तति ।

प्रकोष्ठे[1] मणिबन्धे च परिणाहस्त्रि(त्रि)भागतः।
एवं भुजस्य विस्तारः परीणाहश्च वर्णितः॥ ३४७॥

सप्ताङ्गुलानि पार्ष्णेः स्युर्मध्यमाङ्गुलमूलतः।
षडङ्गुल(लं)प्रमाणेन[2] ( देशिन्या ) आयामे ( अनामेः ) सार्धपञ्चकम्॥३४८॥

कनिष्ठामूलरेखाया भवेदङ्गुलपञ्चकम्।
इत्यायामस्तले प्रोक्तः पञ्चमात्रा तु[3] विस्तृतिः॥ ३४९॥

अङ्गुल ( ष्ठ ) मूलरेखायास्तर्जन्याश्च तथैव च।
मध्यभागप्रमाणं स्यादङ्गुलत्रयसम्मितम्॥ ३५०॥

कनिष्ठा[4]मूलरेखाया अधस्तादङ्गुलान्तरे।
अनामेः[5] कलया मूलान्मध्यायाः सार्द्धमात्रया॥ ३५१॥

आयुर्लेखा भवेत्सा तु किञ्चिदिक्कां[6] ( द्वक्रा ) प्रशस्यते[7]।
मध्यमातर्जनीमध्यं प्रतिष्ठां[8] सा[9] प्रकल्प्यते[10]॥ ३५२॥

अङ्गुष्ठमूलतर्जन्योस्त्र्यङ्गुलान्तरमध्यगा[11]॥
शक्तिरेखा प्रकल्प्या स्यात्सापि वक्रा[12] मनाग् भवेत्॥ ३५३॥

मध्यमा यत्र[13] रेखाया गोलकं हि ( कद्वि )यवान्तरे।
अनामायाः[14] कनिष्ठायाः सा स्यात्र्यङ्गुलदूरगा॥ ३५४॥

तलमध्ये भवेदन्या रेखा[15] कार्मुकसन्निभा।
सु(पुं)रेखा लेखि(ख)नीया सा सङ्गता शक्तिरेखया॥ ३५५॥

कनिष्ठानां मध्यमानां[16] सन्धिः सङ्कोचकारकः[17]।
आयूरेखा[18] भवेत्तत्र[19] पुरा प्रोक्ता तु या मया॥ ३५६॥

तर्जनीसन्धिदेशे तु शक्तिरेखासमुद्भवः[20]।
अङ्गुष्ठच(त)लसन्धौ[21] तु पुंलेखा[22] सव्यवस्थिता॥ ३५७॥

---

१ A ष्ठ। २ A न। ३ E. F. णो। ४ B D आयामविस्तरः। ५ D स्तु। ६ A ष्ठ। ७ A मे। ८ A प्रथायाः D प्रवायामा। ९ F A दिक्षा। १० A दृश्य। ११ A. वि। १२ F. ष्ट्रां। १३ A सां। १४ A ल्पते F ल्पयेत्। १५ A न्या। १६ A त्र्य। १७ D मा। १८ A चक्रा समा। १९ A यांशकेभागा। २० D योः। २१ B. F. ह्स्वा। २२ B D समध्यानां। २३ F. C. र। २४ A. आयु and आयले। २५ D तत्। २६ D. द्भवा। २७ A बल। २८ D. पुंलिखाम। २९ B मध्यसं।

अङ्गुलत्रितयं सार्धमायामेन कनिष्ठिका ।
अनामा द्विकलायामा यवद्वयसमन्विता ॥ ३५८ ॥

पश्चाङ्गुलायता मध्या तर्जनी चतुरङ्गुला ।
अङ्गुष्ठस्य तथा दैर्घ्यं चतुरङ्गुलसम्मितम् ॥ ३५९ ॥

अङ्गुष्ठस्य परीणाहः कर्तव्यश्चतुरङ्गुलः ॥
तर्जन्यास्तुपरीणाहस्त्र्यङ्गुलः परिकीर्तितः ॥ ३६० ॥

सार्धाध्यर्धकलाप्रोक्ता मध्यमा परिणाहतः ।
अनामा तर्जनीप्रख्या यवयुग्मेन हीयते ॥ ३६१ ॥

अनामिकापरीणाहं त्र्यङ्गुलं परिकीर्तितम् ।
अनामिकापरीणाहाद् द्वियवोना कनिष्ठिका ॥ ३६२ ॥

एवं दैर्घ्यपरीणाहः स्फुटः प्रोक्तः प्रमाणतः ।
अङ्गुष्ठप्रथमं पर्व द्व्यङ्गुलं द्वियवाधिकम् ॥ ३६३ ॥

अग्रपर्व तथा प्रोक्तं द्व्यङ्गुलं द्वियवोनकम् ।
अङ्गुष्ठस्य बहिः पर्व तृतीयं त्र्य(द्य)ङ्गुलं भवेत् ॥ ३६४ ॥

पृष्ठेऽग्रपर्वणश्चोर्ध्वं भवेन्नखसमुद्भवः ।
तर्जन्याः प्रथमं पर्व यवाः पञ्चदश स्मृतम् ॥ ३६५ ॥

चतुर्दश द्वितीयं स्यादेकादश तृतीयकम् ।
त्रीण्यङ्गुलानि सार्धानि मध्याद्यं पर्व पश्चिमम् ॥ ३६६ ॥

ऊर्ध्वपर्वाग्रपृष्ठे तु नखैः कार्यो विचक्षणैः ।
अनामे (:) प्रथमं पर्व यवा दशमितं तथा ॥ ३६७ ॥

अङ्गुलं मध्यपर्व स्यात्तस्याः पृष्ठे तु पर्वणि ।
प्रथमे द्व्यङ्गुलं सार्धं दैर्घ्यं स्यात्पूर्ववन्नखः ॥ ३६८ ॥

निर्लोम प्रोज्ज्वलं कार्यं पाण्यङ्गुलितलं बुधैः ।
अङ्गुल्यग्रे यवाग्रं स्यात्स (दर्वाक् स) जीवःक्रियते नखः ॥ ३६९ ॥

---

१ A. या सार्धं F यं समा। A यं सामा २ A सायामेन F यातेमेन A यातमेन। ३A सिका द्विकलायाता। ४ पद। ५ A. लीयतौ मध्यौ। ६ A. हा। ७ A मिस्त। ८ A म्मं। ९ A वं। १० D. यवोनकम्। ११ D. छाग्र। १२ A वम्। १३ B. D. F. शं। १४ F. न्तृ। १५ A अर्धं। १६ A खे। १७ A कार्ये। १८ A तथाग्निकतं। १९ B. D. त्री। २० B. D. ल। २१ A देया।

ततोऽग्रे जीवहीनं तु नखाग्रं परिकल्पयेत् ।
सजीवो लोहितः किञ्चिन्निर्जीवो मधुरच्छविः ॥ ३७० ॥

यवत्रितयमानेन नखाग्रं परिकल्पयेत् ।
प्रदेशलक्षणं प्रोक्तं स्थानानां लक्ष्यते तथा ॥ ३७१ ॥

पञ्चानाञ्च चतुर्णाञ्च तथाष्टानां यथाक्रमम् ।
ऋजु स्यात्सम्मुखं स्थानमन्यदर्द्धर्जुसंज्ञितम् ॥ ३७२ ॥

तृतीयं स्थानकं साचि तुर्यं द्यर्धाक्षिसंज्ञितम् ।
पञ्चमं भित्तिकं[1] प्राहुर्मज्ञा(स्तज्ञाः)पार्श्वगतं च तत्[2] ॥ ३७३ ॥

पञ्चस्थानानि मुख्यानि कथितानीह संज्ञया ।
ऋज्वादिपदपूर्वं स्यात्पराद्यत्तं चतुर्विधम् ॥ ३७४ ॥

स्थानकानि नवैवं[3] स्युश्चित्रलेखाविधिं प्रति ।
नवस्थानकमध्ये स्युरष्टौ वै[4] ( ष्टाव ) न्तरसंज्ञया ॥ ३७५ ॥

तेषां तु लक्षणं वक्ष्ये ब्रह्मसूत्रविभेदतः ।
पुरतः पूर्वभागः स्यात्परभागस्तु पृष्ठतः ॥ ३७६ ॥

सुप्रमाणो वृद्धिभागो हीनश्चेत् क्षयभागकः ।
चतुष्टयं प्रकाराणां व्यवहाराय दर्शितम् ॥ ३७७ ॥

भूलोकमल्लदेवेन बोधार्थं शिल्पकारिणाम् ।
ब्रह्मसूत्राद्बहिः सूत्रे षड्[5] ( ट्षड ) ङ्गुलमध्यमे ॥ ३७८ ॥

यत्र स्याँमामृजु(त्तदृजु) स्थानं रूपं स्यान्[6] मुखयोगितम् (सांमुख्ययोगि तत्) ।
सम्मुखं स्यादृजुस्थानं परभागोऽत्र नेष्यते ॥ ३७९ ॥

पूर्वभागगतं गात्रं सम्पूर्णं दृश्यते स्फुटम् ।
कर्णौ मात्रामितावत्र शङ्खावङ्गुलसम्मितौ ॥ ३८० ॥

पादौ भागमितौ दृश्यावङ्गुल्यश्च त्रिभागिकाः ।
ऋजुस्थानमिदं प्रोक्तं[7]मवक्राकारधारणात्[8] ॥ ३८१ ॥

---

१ A प्रथ । २ A भक्ति । ३ D थत । ४ A नचैव । ५ D व । ६ A य B अ । ७ D श्यामसृजु B श्यामा । ८ A सामुख । ९ A द । १० B. D. क्तं मेचका । ११ F का ।

अथार्धज्यं(र्जु)प्रवक्ष्यामि स्थानकञ्च क्रमागतम् ।
अन्तरं ब्रह्मसूत्रस्य पक्षसूत्रस्य चैकतः ॥ ३८२ ॥

अष्टाङ्गुलं ततोऽन्यत्र चतुरङ्गुलमन्तरम् ।
उक्तेऽप्यर्धज्युके स्थाने लम्बसूत्रक्रियाक्रमः ॥ ३८३ ॥

इदानीं सम्प्रवक्ष्यामि सार्चिःसूत्रस्य लक्षणम् ।
अपाङ्गात्कर्णपाल्याश्च स्तनस्यान्तरपार्श्वतः ॥ ३८४ ॥

जानुत्रिभागतो गर्ह्ये जङ्घाप्रान्ताद्विनिर्गतम् ।
परभागगते पादे कल्पि(ल्प्य)तेऽङ्गुष्ठमूलतः ॥ ३८५ ॥

स्तनबाह्यप्रदेशाच्च कुचचूचुकतो बहिः ।
जानुतः पञ्चमांशेन बहिर्भागे व्यवस्थितम् ॥ ३८६ ॥

सर्वपादेतु मध्याया अनामायाश्च मध्यगम् ।
स्यातामेवं पक्षपौ(सू)त्रे ब्रह्मसूत्रं तु कथ्यते ॥ ३८७ ॥

ललाटे च भ्रुवोर्मध्ये नासाग्रे बन्धतो बहिः ।
नाभिरन्ध्रं(न्ध्र)बहिःपार्श्वे(र्श्वे)लिङ्गमध्ये समागतम् ॥ ३८८ ॥

परभागगतस्याग्रं मुखे(ङ्गे)र्गुल्फ-)स्योपरि सङ्गतम् ।
ब्रह्मसूत्रप्रकारोऽयं भागैनैकेन संयुतः ॥ ३८९ ॥

कथितोऽथ प्रदेशानां सन्निवेशोऽभिधीयते ।
परभागे प्रदृश्येत कर्णावर्त्तौ यवद्वयम् ॥ ३९० ॥

इतरल्लुप्यते सर्वं तत्पाली दृश्यते मनाक् ।
शङ्खश्चैवाक्षिकूटश्च कूर्चमूलं तथैव च ॥ ३९१ ॥

लुप्यते परभागे तु स्थानकेऽर्धज्युसंज्ञिते ।
पञ्चाङ्गुलं बाहुमूलं परभागे प्रशस्यते ॥ ३९२ ॥

परभागमतश्चापि किञ्चित्तिर्यग् बहिर्भवेत् ।
कर्णावर्तस्य यः प्रान्तः पूर्वभागे स लुप्यते ॥ ३९३ ॥

---

१ D अर्द्धार्जुकं । २ D ची । ३ A मा । ४ A. बाधतो । ५ F. सु । ६ A. गो । ७ D. नेऽर्धर्जुक । ८ D. दृश्य । ९ D. भिः Bभि ।

सार्द्धाङ्गुलं[1] प्रदृश्यं स्याच्छ्रवणे(णं)पूर्वभागतः।
नासिकाग्रं[2] यवाः पञ्च परभागव्यवस्थितम् ॥ ३९४ ॥

यवत्रयं पुटस्तस्य ब्रह्मसूत्रादिति स्थितिः।
नासापुटात्कपोलस्य सार्द्धद्व्यङ्गुलमन्तरम् ॥ ३९५ ॥

परभागौष्ठयुग्मस्य मात्रा सा(स)द्वियवा भवेत्।
हनुश्चैव तथा ग्रीवा परभागेऽङ्गुलद्वयम्[3] ॥ ३९६ ॥

ब्रह्मसूत्रात्परो(रे)भागे[4] ग्रीवा दृश्या षडङ्गुला।
ब्रह्मसूत्रात्परे भागे हिक्का[5] मात्रान्तरा भवेत् ॥ ३९७ ॥

हन्वग्रात्परभागेशमव(समध)स्थादङ्गुले लिखेत्।
बन्धुस्था(स्थं)ब्रह्मसूत्रार्धं (त्रं च) परभाग(गः)स्थितस्ततः ॥ ३९८ ॥

पञ्चाङ्गुले प्रकर्तव्यः[6] पुरःसप्ताङ्गुलान्तरे।
कक्षामूलाद्बहिर्लेखा बाहुमूलसमाश्रिता ॥ ३९९ ॥

अष्टाङ्गुलान्तरा लेख्या चित्रकर्मविशारदैः।
कक्षाद्वितयमध्ये स्यादङ्गुलानां[10] च विंशतिः ॥ ४०० ॥

पञ्चाङ्गुले[11](लं)परा(रे)भागे बाहुमूलं प्रकल्पयेत्।
चूचुकात्परभागे[13]स्था बृहती द्व्यङ्गुले[14] लिखेत् ॥ ४०१ ॥

पूर्वभागं (गे) कलाद्वन्द्वे[15] बहिर्लेखां[16] शरीरगाम्।
विस्तारे परभागस्थश्च( च )तुर्दशयवस्ततः ॥ ४०२ ॥

आयतोऽयं बुधैः कार्यो वृत्त(त्तः)पूर्वकलामितः।
पार्श्वसूत्रे तु संलग्ना मध्यभागगता बुधैः ॥ ४०३ ॥

लेखनीया बहिर्लेखा पूर्वभागसमाश्रिताँ[17]।
ता(सा)निर्गता तथा श्रोणी सार्धपञ्चाङ्गुला पराँ[18] ॥ ४०४ ॥

पूर्वभागे तथा श्रोणी भवेद्दशभिरङ्गुलैः।
ब्रह्मसूत्रात्तथा काञ्ची परभागे षडङ्गुला ॥ ४०५ ॥

---

१ A. ल। २ A. यां। ३ A. यव। ४ D. भे. A. गो। ५ A. गो। ६ D. F. द्वि B. द्वि। ७ B. F. हिक्का। ८ F. बा D. बन्ध। ९ A. न कर्तव्ये B न कर्तव्यं। १० D. F. तु। ११ A. ले। १२ A. चिबु। १३ A गस्यादबू। १४ A लं। १५ F न्द्वं। १६ F ख्यं। १७ A, ताः। १८ B रे।

एकादशाङ्गुला पूर्वे[1] भागे लेख्या विचक्षणैः ।
मेढ्रमूलं परे भागे मात्रार्धं भागयुग्मकम् ॥ ४०६ ॥

दशाङ्गुलं पूर्वभागे लेखनीयं विशारदैः ।
लिङ्गमूलात्परे भागे वङ्क्षणं[2] सार्धमङ्गुलम् ॥ ४०७ ॥

अङ्गुलद्वितयं सार्द्धं पूर्वभागे तु[3] वङ्क्षणः ।
वङ्क्षणात्परभागस्थं[4] मूरुशीर्षं बहिःस्थितम् ॥ ४०८ ॥

अष्टाङ्गुलं परे भागे पूर्वतन्तु ( स्तु ) दशाङ्गुलम् ।
परस्थमूरुमूलं तु कुर्यादङ्गुलगूहितम् ॥ ४०९ ॥

पूर्वस्थितोरुमूलेन चित्रलेखनकोविदैः[5] ।
जानुमण्डलतो बाह्यं कलामात्रं प्रदृश्यते ॥ ४१० ॥

परभागे परे पादे पूर्वभागे कलाद्वयम् ।
पूर्वस्याङ्गेरिदं मानं विपरीतं प्रदृश्यते ॥ ४११ ॥

इतरत्सर्वमृजुवत्परंजङ्घागतं भवेत् ।
पूर्वभागेऽङ्गुष्ठमूलं परपार्ष्णिसमं लिखेत् ॥ ४१२ ॥

नखाग्रे[6] परपादस्य भूमिसूत्रं विधीयते ।
पार्ष्णेः प्रदेशिनी(नीं)यावत्पाददैर्घ्यं य(न)वाङ्गुलम्[7] ॥ ४१३ ॥

परार्धाङ्गुष्ठतश्चोर्ध्वमङ्गुलं[8] परिकल्पयेत् ।
प्रदेशिन्या समारभ्य कनिष्ठां यावदङ्गुलिः ॥ ४१४ ॥

यवद्वयं[9] विनाग्राः स्युरङ्गुल्यः क्रमविस्तृताः ।
भूमिसूत्रादधोऽङ्गुल्योऽङ्गुष्ठं(च)परिकल्पयेत् ॥ ४१५ ॥

कनिष्ठाग्रं तथा कार्यं भूमिसूत्रंसमं[10] यथा[11] ।
अर्धजुकमितिस्थानं क्रमशो लक्षणान्वितम् ॥ ४१६ ॥

साम्प्रतं क्रमशः प्राप्तं साचिस्थानं निगद्यते ।
अङ्गुलानि दशैकत्र कलामात्रं[12] ततोऽन्यतः ॥ ४१७ ॥

---

१ A र्वं । २ A वृषणं । ३ A तु वृषणम् । ४ A वृषणात् । ५ A स्तु । ६ F. खे । ७ A. रा । ८ A गा । ९ A मार्ष्टि । १० B. D. नेत्राग्रे परि । ११ A लः । १२ A लतश्चार्धे अ । १३ A य । १४ A गुल्फम । १५ A त्रं । १६ A. तथा । १७ D. त्रां ।

अन्तरं ब्रह्मसूत्रस्य पक्षसूत्रद्वयस्य च ।
साचिस्थाने[1] समाख्यातं[2] ऊर्ध्वसूत्रास्थितिक्रमः ॥ ४१८ ॥

इदानीं लक्ष्यतेऽस्माभिः साचिरूपविनिर्णयः ।
ललाटाल्लोचनप्रान्तात्कपोलस्कन्धदेशतः ॥ ४१९ ॥

एकाङ्गुलात्स्तनस्यान्तर्नाभेः[3]सार्धाङ्गुलाद्बहिः ।
वङ्क्षणान्मणिदेशाच्च बहिर्व्यक्तं[4] विनिर्गतम् ॥ ४२० ॥

परपादाङ्गुष्ठमूले पार्श्वसूत्रं विधीयते ।
सीमन्ताच्च भ्रुवोर्मध्यान्नासारन्ध्रस्य मध्यतः ॥ ४२१ ॥

अङ्गुलाद्वा[5]ग्रतः पश्चान्नाभिरन्ध्रस्य मध्यतः ।
मेहनस्य बहिर्भागाज्जानुमण्डलपूर्वतः[6] ॥ ४२२ ॥

नलकस्य तथा प्रान्ताद् ब्रह्मसूत्रं न्यसेत् क्रमात् ।
मस्तकस्य तथा पृष्ठात्कर्णोपान्ताच्चथैव च ॥ ४२३ ॥

कन्धरास्कन्धसन्धेश्च स्तनचूचुकमण्डलात् ।
अङ्गुलात्पूर्वतश्चैव मध्यभागेन सङ्गतम् ॥ ४२४ ॥

कलामात्रं परित्यज्य काञ्चीदेशस्य मध्यतः ।
मणिबन्धगतं[7] तद्वत्पूर्वपादस्य पार्ष्णितः ॥ ४२५ ॥

अन्यपार्श्वगतं सूत्रं क्रमेणैव निरूपितम् ।
ब्रह्मसूत्राद्बहिर्लेखा केशान्ते परभागिका ॥ ४२६ ॥

लिख्यते तु कलामात्रां[8] मस्तकं[9] सार्धमङ्गुलम् ।
भाग एकः प्रदृश्यः स्यादुत्सेधः पूर्वभागिकः ॥ ४२७ ॥

उत्सेधाच्च कलामानाद्बहिर्लेखा शिरःस्थिता[10] ।
उत्सेधे[11]प्रान्ततो रेखा भागद्वयकृतान्तरा[12] ॥ ४२८ ॥

ततः शरासनाकारा(रा) कर्णावर्ताग्रगामिनी ।
लिख्यते शिरसो लेखा भागद्वयकृतान्तरा ॥ ४२९ ॥

---

१ A. न । २ D. नं सू। ३ A भि। ४ A. वृषणादा F. वंक्षणादा। ५ A. र्धांधं। ६ D. वत्। ७ A द्वि। ८ A ते। ९ D र्ष्णि। १० D नान्। ११ A कः। १२ D ताः। १३ A धः प्रा। १४ A गाः।

शङ्खप्रदेशे केशान्ता लिख्यते सा विचक्षणैः।
केशान्ते परभागस्य ब्रह्मसूत्रस्य चान्तरम् ॥ ४३० ॥
कलामात्रं विनिर्दिष्टं भ्रूलेखाऽर्धयवाधिका।
भ्रूलेखा द्यङ्गुला दृश्या नासामूलं चतुर्यवम् ॥ ४३१ ॥
कनिनी लुप्यते तत्र श्वेतभागश्च दृश्यते।
दृश्यते त्रियवं ज्योतिरवशिष्टं विलुप्यते ॥ ४३२ ॥
ब्रह्मसूत्राच्च नेत्रीयमेवं साधाङ्गुलान्तरम्।
नासामूलाद्वर्त्मरेखा वक्रा कार्या विचक्षणैः ॥ ४३३ ॥
ब्रह्मसूत्राद्वर्त्मरेखाप्रान्तो रुद्रयवैर्मितः।
यवद्वयं प्रलुप्येत पूर्वभागस्य चक्षुषः ॥ ४३४ ॥
करवीर(:)शि(सि)तो भागः इतरत् दृश्यते स्फुटम्।
ब्रह्मसूत्रस्य नेत्रस्य सार्धमङ्गुलमन्तरम् ॥ ४३५ ॥

अक्षिकूटश्च शङ्खश्च कपोलो गण्डमण्डलम्।
पिप्पली कर्णपाली च कर्णमूली प्रदृश्यते ॥ ४३६ ॥
कर्णगर्ते त्रिभागान्ते दृश्यते पूर्वभागतः।
नासामध्यं ब्रह्मसूत्राच्चतुर्यवमुदीरितम् ॥ ४३७ ॥
परभागे कपोलस्था बहिर्लेखा चतुर्यवी।
परभागस्थनेत्रस्य बुधैर्ब्रह्मकपोलतः ॥ ४३८ ॥
ऊर्ध्वं विनिर्गतं कार्यं परिमाणाद्यवद्वयम्।
नासाग्रं परभागस्थं ब्रह्मसूत्रेऽङ्गुलं भवेत् ॥ ४३९ ॥
ब्रह्मसूत्रात्परे भागे घोणापुटोऽङ्गुलं भवेत्।
दृश्यतेऽथ यवो गोजी तदग्रेऽर्धाधिको यवः ॥ ४४० ॥
उत्तरोष्ठः प्रकर्तव्यस्तत्समोऽप्यधरो भवेत्।
हनुचक्रबहिर्लेखा तत्समा परिकल्पयेत् ॥ ४४१ ॥

ब्रह्मसूत्रात्परे भागे स्यातामोष्ठौ तथा हनुः।
चतुर्यवमितादृश्याः पूर्वभागे यव(था)र्जुके ॥ ४४२ ॥

---

१ A. शदे। २ D. नी। ३ D त्रार्ध। ४ A. च। ५ A. द्ध। ६ D. ति। ७ A. रं। ८ B. D. शङ्खश्च कूटश्च। ९ A त्रिभागोन F कर्णेगर्तेत्रिभोगेने B D कर्णगर्तेत्रिभिर्भागो। १० A त्रं च। ११ D. विंधा। १२ A. धत्र। १३ A. रो। १४ A गो। १५ B. D. F. द्धुं। १६ A. ष्व। १७ D. म।

हनुमण्डलतश्चाधो गलवृद्धिश्चतुर्यवा ।
ब्रह्मसूत्रात्परे भागे ग्रीवा लेख्या कलान्तरा ॥ ४४३ ॥

कन्धरास्कन्धसन्धेश्च[1] गलवृद्धेस्[2]तथान्तरम्[3] ।
मात्रामात्रं प्रकुर्वीत हिक्का भागेन कल्प(ल्प्य)ते[4] ॥ ४४४ ॥

ब्रह्मसूत्रात्परे भागे कक्षामूलं तु भागतः ।
कक्षामूलाद्बहिः कार्यं[5] बाहुरेखाऽङ्गुलत्रयम् ॥ ४४५ ॥

ब्रह्मसूत्रात्परे भागे कला[6] स्यात्कुचचूचुकम् ।
ऊर्ध्वभागः[7] प्रदृश्येत बाहुरेखा ततो बहिः ॥ ४४६ ॥

अङ्गुलत्रितयोद्देशे करणीया विचक्षणैः ।
ब्रह्मसूत्रात्परे भागे मध्यदेश(ः)कलामितः ॥ ४४७ ॥

ततो बहिर्बाहुरेखा व्यङ्गुला लिख्यते बुधैः ।
ब्रह्मसूत्रात्परे भागे[8] भागः स्याद्द्वियवाधिकः ॥ ४४८ ॥

ततो भवेद्बाहुरेखा व्यङ्गुला कथिता शुभा ।
ब्रह्मसूत्रात्परे काञ्चीस्थानं पञ्चाङ्गुलायुतम् ॥ ४४९ ॥

ततो भवेद्बाहुरेखा व्यङ्गुला द्वियवाधिका ।
ब्रह्मसूत्रात्परे भागे बस्तिमस्तकपार्श्वगम् ॥ ४५० ॥

पञ्चाङ्गुलं प्रकर्तव्यं यवार्धाधिकतो बुधैः[9] ।
सार्धद्व्यङ्गुलतः कार्या बाहुरेखा ततो बहिः ॥ ४५१ ॥

ब्रह्मसूत्रात्परे भागे[10] बस्तिमस्तकपार्श्वगम् ।
पञ्चाङ्गुलं मेढ्रमूलं चतुर्यवसमन्वितम् ॥ ४५२ ॥

पञ्चाङ्गुले ब्रह्मसूत्राद् बस्तिपार्श्वं परं भवेत् ।
ब्रह्मसूत्रात्परे भागे मेढ्रमूलं चतुर्यवम् ॥ ४५३ ॥

तस्माद्[11]रुशिरःसन्धिर्भवेत्पञ्चाङ्गुलो[12]न्वितः ।
ऊरू परे ब्रह्मसूत्रात्करणीयः(यौ) षडङ्गुले ॥ ४५४ ॥

---

१ D. न्धेः च A न्धिश्च । २ A. द्धि । ३ F. चतुर्यवा । ४ D. येत् । ५ F र्यं A. र्यो । ६ B D. तत्र । ७ A. अर्ध । ८ B. F. गे । ९ B D कुक्षौ । १० F धः । ११ This stanza is found only in B and D । १२ D रू । १३ D लं त ।

मणिबन्धगता रेखा द्यङ्गुले द्वियवाधिके ।
अङ्गुष्ठपार्श्वगा रेखा ब्रह्मसूत्राद्दशाङ्गुले ॥ ४५४ ॥

ततोऽधस्तात्प्रदृश्येत पताकाकारकं तलम् ।
कनिष्ठा गुप्यते तत्र रेखया सक्थिमध्यया ॥ ४५५ ॥

पञ्चाङ्गुलं ब्रह्मसूत्रात्सक्थिमध्यं प्रकीर्तितम् ।
विप्रसूत्रात्परे भागे सक्थिमध्यं षडङ्गुलम् ॥ ४५६ ॥

ब्रह्मसूत्राद्भवेदंशभागेनैकेन कल्पिता ।
जानुशीर्षकलामानं जानुनोऽधस्ततोऽङ्गुले ॥ ४५७ ॥

शङ्खबस्तौ ब्रह्मसूत्रं तलं त्यक्त्वा प्रगच्छति ।
यवत्रयादङ्गुलान्तं पादपृष्ठे च तिष्ठते ॥ ४५८ ॥

परभागे गते पादे मध्यमाक्रम्य गच्छति ।
पूर्वपादस्य पृष्ठे तु परपादस्य कोविदैः ॥ ४५९ ॥

भूमिरेखा प्रकर्तव्या पार्ष्णिस्तस्य विलुप्यते ।
नेत्रमात्रामितं दैर्घ्यं परपादे प्रकल्प(ल्य)ते ॥ ४६० ॥

अर्धजुकाकृतिः कार्यः पादश्चित्रविशारदैः ।
परपादस्य कूर्चायाः पूर्वपादतलस्य च ॥ ४६१ ॥

मध्ये व्योम प्रदृश्येत मात्रया मात्रितं स्फुटम् ।
एकमङ्गुलमुत्सृज्य ब्रह्मसूत्रस्य प(पू)र्वतः ॥ ४६२ ॥

ग्रीवा द्विभागिका लेख्या चित्रकर्मविशारदैः ।
पूर्वभागे प्रकुर्वीत कक्षामूलं च तालतः ॥ ४६३ ॥

कक्षामूलात्ततो बाहुर्भवेत्तिर्यग् विभागिकः ।
ब्रह्मसूत्रात्कलामात्रे हृदयं पुरतः स्थितम् ॥ ४६४ ॥

हृदयाच्चूचुकं कार्यं गोलकत्रयदूरगम् ।
स्तनोत्सेधकं तु लिख्यते वृत्तमायतम् ॥ ४६५ ॥

---

१ A लुप्य । २ B. D. त्या । ३ B D. धातु । ४ B D. कं । ५ D. य । ६ F. या । ७ A क्रमा । ८ B F मक्रम । ९ F तत्र । १० D. क्रमायि । ११ A काः । १२ A तः । १३ D द्वि ।

मात्रामितं तु विस्तारे[1] दैर्घ्यं गोलकमादिशेत् ।
स्तनमण्डलतः कार्या बृहती चतुरङ्गुला ॥ ४६६ ॥

ततः सप्ताङ्गुला लेख्या बाहुलेखा विचक्षणैः ।
बाहोरभ्यन्तरे रेखा निर्गत्य परिगच्छति ॥ ४६७ ॥

मध्यभागं परित्यज्य जघने[3] सङ्गता भवेत् ।
मध्यस्य चाङ्गरेखाया भवेत्त्र्यङ्गुलमन्तरम् ॥ ४६८ ॥

श्रोणेश्चैं भुजरेखाया अन्तरं भाग इष्यते ।
ब्रह्मसूत्राद्भवेच्छ्रोणी पूर्वभागे दशाङ्गुलम् ॥ ४६९ ॥

एकादशाङ्गुलैः[6] काञ्चीगुणदेशः प्रकल्प (ल्प्य) ते ।
पूर्वभागे प्रकोष्ठः स्यात् सूत्रादेकादशाङ्गुलं ॥ ४७० ॥

नितम्बो गुँप्यते तत्र प्रकोष्ठेन निगूहितः ।
बहिर्भागे प्रदृश्यं स्यात्स्फिक्कुँटं मणिबन्धतः ॥ ४७१ ॥

अर्धाङ्गुलप्रमाणेन पञ्चमीचन्द्रसन्निभम् ।
सूत्रात्तु मेहनं कुर्यात्कलामात्रेण कोविदः ॥ ४७२ ॥

मेहँनाद् द्व्यङ्गुले श्रोणिः श्रोणेरष्टाङ्गुले भुजः ।
पताकासन्निभः कार्यो दृश्यः पृष्ठकरो बुधैः ॥ ४७३ ॥

कनिष्ठानखतो लेख्या सक्थिरेखा बहिर्गता ।
सूत्रतो द्व्यङ्गुलं कार्यमूरुमूलं विचक्षणैः ॥ ४७४ ॥

पुरोदेशस्थितः सूत्रादीणिदेशस्तु भागतः ।
श्रोणिदेशाद्बहिर्लेखा भवेदष्टाङ्गुलैर्मिता ॥ ४७५ ॥

जानुकूँकाटिका लेख्या ब्रह्मसूत्रात्षडङ्गुला ।
पराङ्गिजानुसन्धौ तु पूर्वजानु व्यवस्थितम् ॥ ४७६ ॥

द्व्यङ्गुलं तत्प्रमाणेन लेखनीयं समासतः ।
जानुचक्राद्बहिर्लेखा लेखनीया षडङ्गुले[17] ॥ ४७७ ॥

---

१ D रो। २ D कर्ण। ३ A ना। ४ B द्वय D द। ५ B. F. जानुज। ६ A लं। ७ B. लुा८ A. D. कूं। ९ A. भः। १० A. महता। ११ D. शक्ति। १२ D. स्पा। १३ D. णी। १४ A. तैश्च क्रिया, चकृतका D तः कुकाटिका। १५ D वौ। १६ A लं।

सार्धपैश्चाङ्गुलं तत्र जङ्घामध्यं प्रकीर्तितम् ।
अर्धाक्षि[2] वक्ष्यते स्थानं लक्ष्यलक्षणसंयुतम् ॥ ४७८ ॥

एकत्रैकाङ्गुलं यस्मिन्नन्यत्रैकादशाङ्गुलम् ।
मध्ये[3]ऽर्धाक्षि[4]कं स्थानं लम्बसूत्रक्रमो भवेत् ॥ ४७९ ॥

केशान्तान्नासिकाग्राच्च कक्षामूलाच्च नाभितः ।
ऊरुमध्यात्पार्श्वसूत्रं[5] मूले[6]ऽङ्गुष्ठस्य संस्थितम् ॥ ४८० ॥

सीमन्ततो भ्रुवोर्मध्याद्ब्रह्मसूत्रं विनिर्गतम्[7] ।
गोपयेदग्रतः कक्षामूले[8] देशा(शो)थ मात्रया ॥ ४८१ ॥

अङ्गुलं[9] नाभितस्त्यक्त्वा लिङ्गःपार्श्वविषाणि[10](णिदेश)तः ।
अङ्गुष्ठोपान्तदेशाच्च पूर्वमध्याङ्गुलीं[11] व्रजेत् ॥ ४८२ ॥

अन्यपार्श्वगतं सूत्रं मूर्धपृष्ठाद्विनिर्गतम्[12] ।
कन्धरास्कन्धसन्धेश्च[13] मध्यदेशेन सङ्गतम् ॥ ४८३ ॥

मणिबन्धात्तर्जनीतः पूर्वपादस्य पार्ष्णितः ।
क्रमेणैवं प्रकुर्वीत सूत्रत्रयमितीरितम् ॥ ४८४ ॥

ब्रह्मसूत्रात्परे भागे केशान्तश्चार्धगोलकः[14] ।
अङ्गुलं च तथा दृश्या भ्रूलेखा[15] यवतोधिका ॥ ४८५ ॥

ततः सूत्रात्परे भागे ब्रह्मसूत्रश्च ( नेत्रदेशश्च ? ) षड्यवैः[16] ।
ततश्च निर्गतं वर्त्म प्रौढ्व(ऊर्ध्व)भागे यवद्वयम्[17] ॥ ४८६ ॥

नासामूलस्थितात्सूत्रान्नेत्राग्रं[18] परभागिकम्[19] ।
दृश्यते षड्यवं तत्र त्रियवं कृष्णमण्डलम् ॥ ४८७ ॥

त्रियवैः[20] ( वः ) श्वेतभागः स्याल्लुप्यते करकस्तथा[21] ।
नासामध्यात्तथा दृश्यं कपोलं त्रियवं[22] स्फुटम् ॥ ४८८ ॥

---

१ F D र्द्धं । २ A भि । ३ A ध्यं, र्द्धर्क्षियव । ४ A कस्थाने । ५ A B त्र । ६ A स्मृता B सृतः । ७ B D F र्मि । ८ A B F गोहेपीहंत्वतःकक्ष्या A गोपयेत्त्वग्रतः, मोहेहेन्त्वग्रतः । ९ A लं । १० A ले, नं । ११ D श्वाद् A र्श्व । १२ A ली । १३ ऊर्ध्वं । १४ A न्धि । १५ A र्द्धमालकाः । १६ F भू । १७ F वा । १८ A. B. D. तत्र । १९ A न्तेवाग्रं B प्रागग्र । २० A का । २१ D यः । २२ A यत्र करकः । २३ D. F. वः ।

नासामध्यं ब्रह्मसूत्राच्चतुर्यवमुदाहृतम् ।
नासाग्रं ब्रह्मसूत्राच्च दृश्यं स्यादङ्गुलं परे ॥ ४८९ ॥

तस्मात्सूत्रात्परे भागे दृश्य ( श्यः ) कक्षधरोऽङ्गुलम् ।
ब्रह्मसूत्रात्परे भागे कक्षामूलं तु मात्रया ॥ ४९० ॥

कक्षामूलाद्बाहुमूलं मात्रामात्रं प्रदृश्यते ।
अन्यः प्रलुप्यते बाहुर्जठरेण तलावधिः ॥ ४९१ ॥

ब्रह्मसूत्रात्कुचावर्तो भवेदङ्गुलतो बहिः ।
अर्धचन्द्राकृतिर्दृश्यः स एवाङ्गुलसम्मितः ॥ ४९२ ॥

ब्रह्मसूत्रात्परे भागे नाभिरङ्गुलमात्रिका ।
ततो बहिः प्रदृश्येत जठरं चैकमङ्गुलम् ॥ ४९३ ॥

ब्रह्मसूत्रात्परः काञ्चीगुणदेशोऽङ्गुलत्रयम् ।
ब्रह्मसूत्राद् बस्तिशिरः पार्श्वे स्याच्चतुरङ्गुलम् ॥ ४९४ ॥

ब्रह्मसूत्रान्मुष्कमूलं दृश्यते तच्चतुर्यवम् ।
मुष्को न दृश्यते तत्र लिङ्गेन परिगूहितः ॥ ४९५ ॥

ब्रह्मसूत्रादूरुमूलं भवेद्भागेन सङ्गतम् ।
लिङ्गस्याग्रे भवेदूरुभागः स्यात्त्रियवाधिकः ॥ ४९६ ॥

ब्रह्मसूत्रादूरुमध्यं भवेदध्यर्धगोलकम् ।
सक्थिदेशाद्बहिर्दृश्य(श्यो)ऽङ्गुष्ठश्चापि तर्जनी ॥ ४९७ ॥

ब्रह्मसूत्रात्परे देशे परपादस्त्रिभागतः ।
दृश्यते साचितं(वत्)तद्वदङ्गुल्योऽपि तदर्धिकः(काः) ॥ ४९८ ॥

पूर्वार्द्धे गुल्फशीर्षाच्च पराह्णे (र्द्धे) नखमध्यतः ।
भवेद्भूमिगतं सूत्रं परपादस्य लेखने ॥ ४९९ ॥

पराङ्घ्रिब्रह्मसूत्राच्च पूर्वभागे प्रदृश्यते ।
सप्ताङ्गुलकृतायामः शेषं पूर्वेण लिप्यते ॥ ५०० ॥

---

१ D तु। २ A ज। ३ A धि। ४ A द्व। ५ D श्वे A B श्वेः। ६ A F दध्यर्धगोलकम्। ७ D ग्रं। ८ A शक्ति। ९ A F वि। १० D त्या। ११ A ह्ने। १२ F स्य।

ऊरुश्च परपादस्य जङ्घावर्धे(र्ते) न लुप्यते[2]।
अक्षि(भि)पार्ष्णिश्च निखिलौ पूर्वपादेन दर्शितौ ॥ ५०१ ॥

वितस्तिः पूर्वपादस्य दैर्घ्यमत्र[3] निरूप्यते।
साचिवल्लिख्यते तज्ज्ञैरङ्गुष्ठो[4] लुप्यते मनाक् ॥ ५०२ ॥

ब्रह्मसूत्रात्परे भागे शीर्षमेकादशाङ्गुलम्।
उत्सेधस्य तथाचोर्ध्वं शीर्षं स्यात्सार्धमङ्गुलम् ॥ ५०३ ॥

उत्सेधस्य तथापाङ्गे मस्तकं त्र्यङ्गुलं भवेत्।
तत्प्रदेशाच्छिरःपृष्ठं लेख्यं सप्तभिरङ्गुलैः ॥ ५०४ ॥

शङ्खस्थाने समे चोर्ध्वं निम्नं किञ्चिच्छिरो भवेत्।
ततः शिरोगता लेखा धन्वाकारा प्रलिख्यते[5] ॥ ५०५ ॥

ब्रह्मसूत्रात्परे भागे तालं(लु)स्यादङ्गुलत्रयम्।
भ्रूलेखा यवमाना तु तत्प्रमाणा[6] विलिख्यते ॥ ५०६ ॥

नासामूलं ब्रह्मसूत्रादर्धमात्रं पुरःस्थितम्।
कनिनी द्वियवा दृश्या करवीरो न दृश्यते ॥ ५०७ ॥

द्वियवः श्वेतभागश्च दृश्यते तदनन्तरम्।
दृश्यते त्रियवं तत्र लोचनं[7] कृत(कृष्ण)मण्डलम् ॥ ५०८ ॥

श्वेतापाङ्गे(तभागो)ऽपाङ्गस्थः समग्रं परिदृश्यते।
समग्रो दृश्यते कर्णो यवद्वितयवर्जितः ॥ ५०९ ॥

कर्णावर्ताद्बहिः शीर्षपृष्ठं दृश्यं ततोऽङ्गुलम्।
कर्णपालीबहिर्देशे पृष्ठकेशान्तको[8] मनाक् ॥ ५१० ॥

अर्धाङ्गुलप्रमाणेन दृश्यते चित्रलेखने[9]।
शङ्खकाग[10]ल(ङ्खः कपोलो )गण्डश्च दृश्यते पूर्णमण्ड[11]लैः[12] ॥ ५११ ॥

ब्रह्मसूत्रात्परेभागे भवेन्नासापुटोऽङ्गुलम्।
अर्धं प्रदृश्यते गोजेरोष्ठो[13]र्धं तु यवाधिकम् ॥ ५१२ ॥

---

१ A दैर्घ्यमत्रनिरूप्यते। २ B D F ति। ३ D मङ्घें। ४ D ष्ठौ। ५ D शीर्षमेकादशाङ्गुलम्। ६ A ले। ७ A ना। ८ A णं। ९ A. ने कुच। १० F. का। ११ A नैः। १२. A कापोलगण्डस्य D काद्दोलगण्डश्च। १३ D र्वं। १४ A लात्। १५ D. शेषा।

ब्रह्मसूत्रात्पुरोभागे हनुग्रीवस्य सङ्गमः।
लिख्यते [1]व्यङ्गु(ङ्गुस्त) ज्जैर्ग्रीवा तत्र द्विभागिका ॥ ५१३ ॥

ब्रह्मसूत्रात्परे भागे द्विक्का सार्धत्रिभागिका।
ब्रह्मसूत्रात्परे भागे [6]सार्धसप्तदशाङ्गुलम् ॥ ५१४ ॥

तिर्यङ्मानेन बोद्धव्यं बाहुमूलं विचक्षणैः।
ततो विनिर्गतं कार्यं बाहुशीर्षं द्विमात्रिकम् ॥ ५१५ ॥

ब्रह्मसूत्रात्परे भागे कुक्षिमूलं च सङ्गतम्।
कक्षामूलाद्बाहुरेखा बाह्यां भागद्वयं भवेत् ॥ ५१६ ॥

ब्रह्मसूत्रात्परे भागे व्यङ्गुलं समुदाहृतम्।
बाहोराभ्यन्तरा ( री ) रेखा विधृतां स्याद्दशाङ्गुलौ ॥ ५१७ ॥

सप्ताङ्गुलं बाहुमध्यं तिर्यक्सूत्रेण [33]कल्पयेत्।
बृहतीदेशमुत्सृज्य बाहोराभ्यन्तरी [32]शुभा ॥ ५१८ ॥

रेखा लेख्या तथा तज्ज्ञैर्जघने सङ्गता यथा।
कुक्षेश्च बाहुरेखाया अन्तरं व्यङ्गुलं भवेत् ॥ ५१९ ॥

कूर्परस्य तथा श्रोणेर्व्योम चाङ्गुलमिष्यते।
कूर्परस्थानविस्तारः पञ्चाङ्गुलमुदीरितः ॥ ५२० ॥

नाभिस्थब्रह्मसूत्रस्य श्रोणेर्मध्यं निगद्यते।
अङ्गुलैर्मनुसङ्ख्याकैस्तिर्यग्विस्तारकल्पनम् [13] ॥ ५२१ ॥

पक्षाश्रयब्रह्मसूत्रं [14]भुजयोः कल्प ( ल्प्य ) [15]मन्तरम्।
चतुर्दशाङ्गुलं [16]प्राज्ञैः प्रबाहुः पञ्चमात्रिकः ॥ ५२२ ॥

बस्तिशीर्षगति (त) ब्रह्मसूत्रस्य च भुजस्य च।
अन्तरं तालमात्रं स्यात्प्रकोष्ठात्पञ्चमात्रिकम् ॥ ५२३ ॥

बस्तिस्थं [17]ब्रह्मसूत्रस्य प्रश्नं [18] ( प्र ) कोष्ठस्य चान्तरम् [19]।
दशाङ्गुलं सार्धमात्रं [20] भागः स्यात्प्रप्रकोष्ठकः [21] ॥ ५२४ ॥

---

१ A परे। २ A. न्ते। ३ A लः। ४ A त्रि। ५ A भागि। ६ A भागत्रयभवेन्मुखम्। ७ A ह्म। ८ D द्भवेदङ्गि। ९ A तः। १० A लम्। ११ A D कल्पितम्। १२ F रा। १३ D कल्पितम्। १४ A त्रमु। १५ A नान्तरम्। १६ A लैः। १७ A स्थंत्र। १८ A श्र। १९ F रे। २० D त्र। २१ D त्य।

ब्रह्मसूत्रपुरोभागे लिङ्गं द्व्यङ्गुलसम्मितम् ।
मुष्कमूलं भवेन्मात्रा बाहुरष्टाङ्गुलं[1] ततः ॥ ५२५ ॥

चतुरङ्गुलमुद्दिष्टो मणिबन्धो विचक्षणैः ।
पताकेवं[2] करः कार्यः ऊरुलग्नतलो बुधैः ॥ ५२६ ॥

मणिबन्धाद्धृदिर्देशे स्फिक्कूटं[3] द्व्यङ्गुलं भवेत् ।
ऊरुस्तस्मादधस्तालो रेखया करबाह्यया ॥ ५२७ ॥

करबाह्यगता रेखा सङ्गता सँस्थिरेखया ।
अँ (आ) णिदेशस्य विस्तारो भागद्वयमुदाहृतः ॥ ५२८ ॥

जानुसन्धिप्रमाणं तु सप्ताङ्गुलमुदाहृतम् ।
जानुचक्रस्य विस्तारः साधमङ्गुलमिष्यते ॥ ५२९ ॥

इन्द्रवँस्तेस्तु विस्तारो वितस्तेरर्धमिष्यते ।
नँलसन्धेश्च विस्तारः कथितश्चतुरङ्गुलः ॥ ५३० ॥

ततो विनिर्गता कार्या वृत्ता पार्ष्णि द्वि(द्वि)मात्रिका ।
यवद्वितयहीना सा कर्तव्या सुविचक्षणैः ॥ ५३१ ॥

कनिष्ठानामिकामध्यात्ता(स्ता)सामूर्ध्वं प्रदेशिनी ।
अङ्गुष्ठ ऊर्ध्वतस्तासां कर्तव्योऽसौ क्रमेण तु ॥ ५३२ ॥

एवं द्व्यर्धाक्षिकं स्थानं विस्तारेण निरूपितम् ।
ऊर्ध्वरूपं प्रवक्ष्यामि भित्तिकं स्थानक(कं) स्फुटम् ॥ ५३३ ॥

पक्षसूत्रद्वयं तिष्ठेद्ब्रह्मसूत्रं न दृश्यते ।
लम्बसूत्रक्रमो ह्येष भित्तिके समुदाहृतः ॥ ५३४ ॥

अलीके नासिकामध्ये चूचुके सेन्द्रमूर्धनि ।
अङ्गुष्ठगुल्फमूले च पक्षसूत्रं निवेश्यते ॥ ५३५ ॥

तेनैव मिलितं कार्यं मध्यसूत्रं विचक्षणैः ।
नान्यत्रं दृश्यते क्वापि ब्रह्मसूत्रं ततः स्मृतम् ॥ ५३६ ॥

---

१ A ला। २ A B च। ३ A कू। ४ A शशि। ५ B D पा A F म्, श्रो। ६ A ब। ७ A त। ८ D. B. त्वा। ९ F. त्सं।

ऊर्ध्वपृष्ठे[1] तथा स्कन्धे कूर्परे पार्ष्ण्युपान्ततः।
इतरत्पक्षसूत्रं[2] तु[3] क्रमेणैवं विधीयते ॥ ५३७ ॥

ब्रह्मसूत्रात्परे(पुरो)भागे केशान्तस्त्रियवान्तरः।
नासामूलस्य सूत्रस्य(त्तु) यवद्वितयमन्तरम् ॥ ५३८ ॥

यवमानान्तरा गोजी निम्ना सा परिकल्प (ल्प्य) ते।
आस्यमध्यगता[4] रेखा सूत्रान्त (त्तु) द्वियवान्तरम् ॥ ५३९ ॥

अन्तरं ब्रह्मसूत्रस्य चिबुकस्यैकमङ्गुलम्।
हनुचक्रं ततो लेख्यं सूत्रात्पञ्चयवान्तरम् ॥ ५४० ॥

द्व्यङ्गुलं हनुचक्रं स्याद्ग्रीवासन्धिस्तु मात्रया।
हिक्का[5] भागान्तरा कार्या ब्रह्मसूत्रानुसारतः ॥ ५४१ ॥

घटिते ब्रह्मसूत्रेण स्तना (न) रोहितचूचुके।
मूलमग्रं च लिङ्गस्य भवेत्सूत्रेण घट्टितम् ॥ ५४२ ॥

ऊरुदेशं[6] तथा जानुं जंङ्घा (ङ्घां) सन्त्यज्य गच्छति।
अङ्गुष्ठद्वयमूलं (ले) च सूत्रं तद्घटितं भवेत् ॥ ५४३ ॥

अन्यपक्षस्थिते सूत्रे[7] मूर्धपृष्ठं तु घट्टितम्।
सार्धाङ्गुलान्तरं कार्यं मस्तकाग्रं विचक्षणैः ॥ ५४४ ॥

सार्धाङ्गुलान्तरस्तद्वत्[8] केशान्तः पश्चिमो भवेत्।
स्कन्धदेशः प्रकर्तव्यः पक्षसूत्रेण घट्टितः ॥ ५४५ ॥

पक्षसूत्रस्य कूर्चस्य मध्यं द्व्यङ्गुलसम्मितम्।
लम्बसूत्रगतश्चैवं निम्नभागः प्रकीर्तितः ॥ ५४६ ॥

अधिकं सूत्रतो यत्तु तदिदानीं निरूप्यते।
नासाग्रमण्डलं कार्यं ब्रह्मसूत्राद्विनिर्गतम् ॥ ५४७ ॥

कूर्परस्य[9] (श्च) तथा तेन पक्षसूत्रेण घट्टितः।
पार्ष्णिप्रान्तप्रदेशस्य (श्च) कार्यः सूत्रेण चोदितः[10] ॥ ५४८ ॥

---

१ A पूर्व। २ A सू। ३ D. च। ४ D अ। ५ F दि। ६ D शगतंजानु, A शे ७। A नुं। ८ A स्य। ९ D F तं। १० D F त्रं। ११ A रं १२ F Takes these two lines after पक्षसूत्रेण घट्टितः। १३ F यो।

मात्रया मात्रिकं कार्यमधिकं स्तनरोहितम् ।
वाधो[1][2] निम्नः प्रदेशः स्यादधिको दशभिर्यवैः ॥ ५४९ ॥

सूत्रान्मध्यप्रदेशस्तु निर्गतोऽर्धार्धगोलकम् ।
जठरं तस्य वाधे[3][4]स्थमधिकं यवयुग्मतः ॥ ५५० ॥

नाभिरन्ध्रप्रदेशः स्यादधिको द्व्यर्धगोलकम् ।
पक्वाशयस्तस्य गुप्तेर्भवेद्भागेन निर्गतः ॥ ५५१ ॥

काञ्चीसूत्रप्रदेशस्तु भवेद्[5]यङ्गुलतोधिकः ।
बस्तिशीर्षप्रदेशस्तु भवेदङ्गुलतोऽधिकः ॥ ५५२ ॥

अधिका द्यङ्गुला(ः)कार्या(ः)सूत्रादङ्गुष्ठको(का)बुधैः ।
यवयुग्माधिके कार्ये प्रदेशिन्यौ[10] च लेखने ॥ ५५३ ॥

अन्यस्य पक्षसूत्रस्य[11] फलं[12] गोलकाधिकम् ।
कलया बाहुमूलं[13] स्यात्फलकं द्व्यङ्गुलं[14] ततः ॥ ५५४ ॥

भुजमध्यप्रदेशस्तु पञ्चा(श्च)दशयवाधिकः ।
अर्धाङ्गुलाधिकं कार्यं फलकं सुविचक्षणैः ॥ ५५५ ॥

यव(वं)मानक्रमाद्धीना[15] रेखा बाह्वोस्तु बाह्यगा ।
यावत्कूर्परकस्थानं तत्र सूत्रेण घट्टिता ॥ ५५६ ॥

कूर्पराच्चिर्गता काञ्ची जघनं[16] स्फिक्[17]कं(क्त)टं तथा ।
काञ्ची द्यङ्गुलतः कार्या व्यङ्गुलं बस्तिमस्तकम् ॥ ५५७ ॥

बस्तिसूत्रप्रदेशः स्याच्चतुर्भिर्निर्यतोऽङ्गुलैः[18] ।
स्फिजोर्मण्डलभागस्तु क्रमशो यवहीनकः ॥ ५५८ ॥

स्फिजोर्बन्ध[19]प्रदेशस्तु सूत्रादङ्गुलतो[20]ऽधिकः ।
ऊरोर्बाह्यगता रेखा क्रमशः परिहीयते ॥ ५५९ ॥

घट्टिता जानुसन्धौ तु जंघा स्यादङ्गुलाधिका ।
अधिको निर्गतः कूर्चः कथितः सूत्रयुग्मके ॥ ५६० ॥

---

१ A वी । २ A ध्र । ३ A द । ४ A ध्र । ५ A कम् । ६ F स्तुध्रेन । ७ A चुलें F बुलें । ८ A द । ९ D ञ्चं । १० A न्ये । ११ A सूत्रपक्षस्य । १२ B. D. F. फलञ्च । १३ A लः । १४ A लान्तकः । १५ D त्रि । १६ B न्य । १७ A क्रटिं । १८ A स्तिर्य । १९ A बन्धु । २० A को ।

आकारलक्षणं वक्ष्ये प्रमाणेन यथाक्रमम् ।
अर्धमङ्गं प्रदृश्यं स्याद्भित्तिके तन्न दृश्यते ॥ ५६१ ॥

ललाटार्धं भ्रुवोर्लेखा लोचनं श्रवणं तथा ।
नासापुटस्तथा सा(चा)र्धं बाहुरेकस्तथा पुनः ॥ ५६२ ॥

स्फिक्[1]क्(क्त)टं सक्थि जङ्घा च दृश्यते पदयुग्मकम्[2] ।
एतदेव प्रदृश्यं स्यादन्यद्भित्तिगतं भवेत् ॥ ५६३ ॥

भाग[3]एको ललाटस्य भ्रूलेखा त्र्यङ्गुला तथा ।
शङ्खप्रदेशकस्तिर्यगङ्गुलत्रयसम्मितम्(तः) ॥ ५६४ ॥

अङ्गुलं कूर्चमूलं स्यान्मात्रामात्रं ततः परम् ।
कथितः पूर्ववत् कर्णः समग्रैः[4] परिलिख्यते ॥ ५६५ ॥

कनिनी लुप्यते नेत्रे करवीरो न दृश्यते ।
पुरतः श्वेतभागोऽपि लुप्यते तत्र भित्तिके ॥ ५६६ ॥

कृष्णमण्डलकस्यार्धं लुप्यते चित्रलेखने ।
दृश्यं सार्धयवद्वन्द्वं मेचके मण्डलेऽर्धतः ॥ ५६७ ॥

अपाङ्गःश्वेतभागोऽत्र दृश्यते यवपञ्चकैः[5] ।
कपोलो[6] गण्डदेशश्च सम्पूर्णः परिदृश्यते ॥ ५६८ ॥

नासिकार्धं प्रदृश्येत गोजिकार्धं तथैव च ।
कलामात्रे प्रदृश्येते[7] दशनच्छदने उभे[8] ॥ ५६९ ॥

हनुमण्डलमर्धं च कलामात्रं प्रदृश्यते ।
ग्रीवा चाष्टाङ्गुला लेख्या चित्रकर्मणि भित्तिके ॥ ५७० ॥

बाहुमूलद्वयस्योर्ध्वं हिक्कासूत्रस्य चोपरि ।
रेखा चापाकृतिर्लेख्या प्रदेशे भुजशीर्षके ॥ ५७१ ॥

हिक्कायामन्व[9](मंस)देशस्य विस्तारस्तालमात्रकः ।
बाहुर्यथोदितः पूर्वं[10] तथैव परिलिख्यते ॥ ५७२ ॥

---

१ B क्क । २ द्वं । ३ A मे । ४ D ग्रं । ५ A श्वे । ६ D कम् । ७ D ले । ८ A वें । ९ A त । १० B. F. शु । ११ B. मंश, मङ्ग D अंश । १२ A वैस्त B वैत ।

पताकासन्निवेशेन लिख्यते करपल्लवः।
चतुर्दशाङ्गुलं मध्यं भुजस्य जठरस्य च ॥ ५७३ ॥

दृश्यते केवलं लिङ्गं मुष्कमूलं च दृश्यते।
ऊरु जा(जौ)नु च जङ्घा च लिख्यते ख्यातमानतः॥ ५७४ ॥

चतुर्दशाङ्गुलं दैर्घ्यं पादयोः परिलिख्यते।
षडङ्गुलस्तु विस्तारः पूर्वपादस्तु(स्य) लिख्यते ॥ ५७५ ॥

पूर्वपादस्य पृष्ठे तु द्व्यङ्गुलो[1] दृश्यते परम्(रः)।
अङ्गुष्ठो दृश्यते तत्र तत्परा च प्रदेशिनी ॥ ५७६ ॥

इतरा नैव दृश्यन्ते परभागाङ्घ्रिसंश्रिताः।
एवं लक्षणमुद्दिष्टं भित्तिकस्य यथाक्रमम् ॥ ५७७ ॥

ऋज्वर्धर्जुकेसाचीनां द्यर्धाक्षे भित्तिकस्य च।
सूत्रतो लक्षणं प्रोक्तं समयं(ग्रं) सोमभूभुजा ॥ ५७८ ॥

चतुष्प्रकारभित्तीनां वृत्तीनां वच्मि लक्षणम्।
सूत्रतो मानतश्चापि प्रदेशानां विनिर्णयात् ॥ ५७९ ॥

ऋजुकेऽर्धर्जुके साचीस्थाने द्यर्धाक्षिसंज्ञके।
पक्षसूत्रे तथा प्रोक्ते परावुत्तिष्ठते त(तस्त)था ॥ ५८० ॥

शिखाकृकाटिकामध्या(त्) पृष्ठवंशा(त्)स्फिगैन्तरात्[3]।
निर्गत्य पार्ष्णिमध्ये तु ब्रह्मसूत्रं प्रतिष्ठितम् ॥ ५८१ ॥

तिर्यक्कर्णागतं(तात्) सूत्रा[4](त्) शिरश्चन्द्रार्धसन्निभम्।
षडङ्गुलस्तदुत्सेध आयामस्तु दशाङ्गुलः॥ ५८२ ॥

तस्मात्सूत्रादधोभागे प्रदेशः केशसंयुतः।
षडङ्गुलं तस्य दैर्घ्यं विस्तारस्तु दशाङ्गुलः॥ ५८३ ॥

कर्णमूलप्रदेशे तु विस्तारः स्याद्विर(द्य)ङ्गुलः[5]।
शिरोगतप्रदेशे तु विस्तारस्तु षडङ्गुलः॥ ५८४ ॥

अधस्तात्कर्णरन्ध्रस्य विस्तारो द्व्यङ्गुलो मतः।
कर्णौ सार्धाङ्गुलौ दृश्यौ पाल्यौ चाङ्गुलसम्मिते ॥ ५८५ ॥

---

१ D ले। २ A जुंसा। ३ D ज। ४ A कार्णाग्रगां B काणाग्रगां। ५ D त्रं।

[1]चलास्थिहनुविस्तारः सूत्रप्रोक्त ( क्तो ) दशाङ्गुलः ।
ग्रीवा चाष्टाङ्गुला तिर्यग्विस्तारेण निगद्यते ॥ ५८६ ॥

पार्श्वतो ब्रह्मसूत्रस्य कक्षामूले[2] तु नालिके[3] ।
कक्षामूलात्ततो बाह्यबाहोर्लेखा षडङ्गुला ॥ ५८७ ॥

ऋजुवत्सर्वमङ्गस्य अनेनान्यैन्निरूपितम् ।
प्रदृश्येत तले तस्मिन् करपल्लवसंस्थिते ॥ ५८८ ॥

गुदस्थानात्[4] स्फिजो रेखा[5] द्वितीया चन्द्रसन्निभा ।
पक्षसूत्रावधि प्रोक्ते(क्ता) स्फिग्मध्ये बन्धदेशतः ॥ ५८९ ॥

मुष्कौ वृत्ताङ्गुलौ दृश्यौ तदधो लिङ्गमङ्गुलम् ।
ऊर्वोरभ्यन्तरं तत्र भवेदङ्गुलसम्मितम् ॥ ५९० ॥

ऊर्वोर्मध्यप्रदेशे तु भवेद्गोलकमन्तरम् ।
श्रोणिदेशे तथा प्रोक्तमन्तरं चतुरङ्गुलम् ॥ ५९१ ॥

यावत्पार्ष्णिप्रदेशः स्यात्तावदावृ(दीद)क्षमन्तरम् ।
भूमिसूत्रे तथा पार्ष्णिः कर्तव्ये(व्यः) सुविचक्षणैः ॥ ५९२ ॥

भूमिसूत्रात्ततो ह्यूर्ध्वं कनिष्ठे सप्तमात्रिके ।
अर्धाङ्गुलाधिके तस्मिन्ननामे मध्यमे क्रमात् ॥ ५९३ ॥

गुल्फं(ल्फ)देशाद्भवेद्दृश्ये न दृश्या च प्रदेशिनी ।
अङ्गुष्ठे(ष्ठो)ऽपि न दृश्येत जङ्घायाः(ङ्घया) परिगूहितः ॥ ५९४ ॥

ऋजुवृत्तिरिति ख्याता सूत्रमानानुसारतः ।
चित्रकाणां प्रबोधार्थं चित्रं सोममहीभुजा ॥ ५९५ ॥

वृत्तिरर्धर्जुकेदानीं कथ्यते लक्ष्मलक्ष्यते(तः) ।
पक्षसूत्रे प्रकर्तव्ये यथैवार्धर्जुके तथा ॥ ५९६ ॥

चतुरङ्गुलमेकत्र भागद्वितयमन्यतः ।
अर्धर्जुके यथा सूत्रं तद्वत्तद्वृत्तिके भवेत् ॥ ५९७ ॥

---

१ A. ब । २ B. लं । ३ B D. तः । ४ D त्येनि । ५ A न्B ना । ६ D लेखे ।

ऋजुके मस्तके सूत्रं तद्वद्दृश्यं प्रकल्पयेत् ।
विस्तार इच्छया चैव चूचूभागेति(पि)तद्विदम् ? ॥ ५९८ ॥

ब्रह्मसूत्रात्परे भागे कर्णपाली च दृश्यते ।
पूर्वभागे युतः कर्ण ऋजुवृत्तौ यथा तथा ॥ ५९९ ॥

केशान्तमध्यगात्सूत्रात्परि(रे) भागे त्रिमात्रिकः ।
चलास्थिहनुविस्तारः पूर्वाङ्गे प्राङ्गुलो भवेत् ॥ ६०० ॥

ब्रह्मसूत्रात्परे भागे ग्रीवा गोलकसम्मिता ।
षडङ्गुला भवेत्पूर्वे विस्तारेण निरूपिता ॥ ६०१ ॥

ब्रह्मसूत्रात्परे भागे कक्षामूलं दशाङ्गुलम् ।
तालमानं भवेत्पूर्वे कक्षामूलं तु निश्चितम् ॥ ६०२ ॥

कक्षामूलात्परे भागे रेखा बाहोस्तु बाह्यगा ।
षडङ्गुला भवेत्तिर्यग् विस्तारेण प्रमाणतः ॥ ६०३ ॥

पुरस्तात्कक्षमूलात्तु रेखा बाह्या तु बाह्यगा[1] ।
सप्तमात्रा भवेत्तिर्यग् विस्तारेण सुनिश्चिता ॥ ६०४ ॥

ब्रह्मसूत्रात्परे भागे पूर्ववद्धीयते क्रमात् ।
श्रोणी काञ्चीप्रदेशश्च वस्तिदेशस्तथैव च ॥ ६०५ ॥

ब्रह्मसूत्रात्परे भागे स्फिग्रेखा नवेचन्द्रवत्[2] ।
पूर्वभागस्फिजा लुप्तं लेखार्धं परभागिकम् ॥ ६०६ ॥

ब्रह्मसूत्रात्परे भागे सक्थि दृश्यं दशाङ्गुलम् ।
पूर्वभागप्रदेशः(गे प्रदृश्यः)स्यात्क(दू)रुदेशस्तु मात्रिकैः[3] ॥ ६०७ ॥

परे तु मध्यदेशस्तु परभागे द्विभागिकः ।
पूर्वभागे[4] प्रदृश्यः(श्यं)स्यात्सार्धमङ्गुलकं स्फुटम् ॥ ६०८ ॥

पराङ्गे[5][6] ब्रह्मसूत्रस्य पुरोभागः प्रदृश्यते ।
अर्धाङ्गुलप्रमाणेन यावत्तलकसङ्गमः ॥ ६०९ ॥

समग्रं दृश्यते सक्थि पूर्वपादस्य सङ्गतम् ।
अधस्ताद्[7]रुमध्यस्य व्योम जानुव्यवस्थितम् ॥ ६१० ॥

---

१ D या । २ B. D ख । ३ A का । ४ B. F ग । ५ B. F देशः । ६ राघ्रे । ७ A दृशु ।

क्रमशो वर्धमानं तु यावत्सार्धाङ्गुलावधि ।
जङ्घयोरन्तरं[1] तद्वत्सार्धमङ्गुलमिष्यते ॥ ६११ ॥

इन्द्रबस्तिप्रदेशे तु किञ्चिदूनं प्रकल्पयेत्[2] ।
लुप्यते परपादेऽस्मिन्नङ्गुष्ठः पादशाखिकः[3] ॥ ६१२ ॥

अधस्ताद्भूमिसूत्रस्य पार्ष्णिः पूर्वपदाश्रिता ।
यवप्रमाणिका[4] दृश्या वृत्तत्वाच्चित्रकर्मणि ॥ ६१३ ॥

अङ्गुष्ठमूलदेशस्य नव(ख)सन्धेर्यदन्तरम् ।
तत्कलामात्रकं कार्यं चित्रकर्मविशारदैः ॥ ६१४ ॥

भूमिसूत्रात्तथाचोर्ध्वं[5] कनिष्ठा कलया स्मृता ।
सर्वाङ्गुल्यस्तथाऽङ्गुष्ठो दृश्यन्ते पूर्वपादगाः ॥ ६१५ ॥

भूमिसूत्रं परित्यज्य पराङ्घ्रेः[6] पार्ष्णिमण्डलम् ।
अङ्गुलेन विधातव्यो भित्तिचित्रे ह्ययं क्रमः ॥ ६१६ ॥

एवमर्धर्जुका वृत्तिः समग्रा परिकीर्तिता ।
क्षयवृद्धिप्रदेशैस्तु सूत्रं[7] मानात्सुनिश्चितम् ॥ ६१७ ॥

साचिस्थानगता वृत्तिरिदानीं परिकीर्त्यते ।
सूत्रत्रितयभेदेन पूर्वापरविभागतः ॥ ६१८ ॥

एतासां विगतं[8] स्थाने पक्षसूत्रं विधीयते ।
तद्वत्तद्वृत्तिके कार्यं सूत्रत्रितयपातनम् ॥ ६१९ ॥

ब्रह्मसूत्रात्परे भागे केशान्तश्चाङ्गुलद्वये ।
दशाङ्गुलं[9] शिरःपृष्ठं पूर्वभागे विधीयते ॥ ६२० ॥

परे[10] भागे प्रदृश्यं स्याद्भ्रूयुगं मात्रया मितम् ।
भ्रूपुच्छाच्चैव कर्णाग्रं भागेनैकेन कल्प(ल्प्य)ते ॥ ६२१ ॥

सार्धमङ्गुलमुद्दिष्टा तिर्यक्कर्णस्य विस्तृतिः ।
ततो बहिः प्रदृश्यं स्यात्कर्णपृष्ठं चतुर्यवम् ॥ ६२२ ॥

---

१ D रे। २ A ते। ३ A काः। ४ D ण। ५ D वा। ६ A र्ध्वं। ७ A ङ्घ्रेः। ८ D श। ९ A सूत्र। १० D च गते। ११ B. F ले। १२ D. F र।

मात्रामात्रौ प्रकर्तव्या कर्णपाली विचक्षणैः ।
कर्णावर्तात्पुरोभागे सार्धसप्ताङ्गुलं शिरः ॥ ६२३ ॥

पालीदेशात्समारभ्य कुकाटी षड्भिरङ्गुलैः ।
तिर्यङ्मानेन कर्तव्या चित्रकर्मणि कोविदैः ॥ ६२४ ॥

ब्रह्मसूत्रात्परे भागे दृश्या या सार्धमङ्गुलम् ।
यवमात्रमधोवर्त्म पक्षसूत्रात्प्रहीयते ॥ ६२५ ॥

ललाटं च कपोलश्च पक्षसूत्रेण घट्टितम् ।
ब्रह्मसूत्रात्परे भागे कपोले(लो) द्व्यङ्गुले ततः ॥ ६२६ ॥

ब्रह्मसूत्रात्परे भागे पालिसंन्धिस्तु गोलकः ।
ईषद्वक्रा प्रकर्तव्या गण्डलेखा विचक्षणैः ॥ ६२७ ॥

गण्डप्रान्तस्य हन्वाश्च सन्धिःस्यात्पक्षसूत्रतः ।
अङ्गुलान्तरतः कार्यो यवेनैकेन वाधिकः ॥ ६२८ ॥

अङ्गुलेन हनुः कार्या ब्रह्मसूत्रात्परे स्थिता ।
कन्धरा पृष्ठभागस्था हनुश्चापि निरूपिता ॥ ६२९ ॥

दशाङ्गुलं तथा तिर्यग् विस्तारेण परिस्फुटम् ।
गलवृद्धेर्हनुः प्रान्ताद्यवमानेन लम्बते ॥ ६३० ॥

ग्रीवाया गलवृद्धेश्च सन्धिः सार्धाङ्गुलो भवेत् ।
अष्टाङ्गुला भवेद्ग्रीवा ब्रह्मसूत्रपुरःस्थिता ॥ ६३१ ॥

सार्धमङ्गुलकं त्यक्त्वा ब्रह्मसूत्रं व्यवस्थिता ।
ब्रह्मसूत्रात्परे भागे वाध्रेः सप्ताङ्गुलो भवेत् ॥ ६३२ ॥

कक्षामूलं परे भागे मात्रया समवस्थितम् ।
कक्षामूलद्वयस्योक्तमन्तरं मनुमात्रया ॥ ६३३ ॥

बाहुमूलगता रेखा बाह्या पञ्चभिरङ्गुलैः ।
ब्रह्मसूत्र(त्रं) परस्थेनं बाहुना परिलोपितम् ॥ ६३४ ॥

---

१ F त्र । २ D क् । ३ B लं । ४ B. F. ल । ५ A क्षि । ६ A ना... निरूपिता A F हनुखानिनि । ७ A वान्ध्रः, चान्ध्रः F वांध्रं, । ८ A लं । ९ A स्थाने ।

जठरं श्रोणिदेशश्च सक्थ्यूर्ध्वं न च दृश्यते।
तद्बाहुदेशमध्यस्तु रचनीयः षडङ्गुलः ॥ ६३५ ॥

बाहुदेशस्य मध्यस्याप्यन्तरं स्याद्दशाङ्गुलम्।
इतरस्य तथा बाहोर्मध्यदेशस्य मध्यगः ( गम् ) ॥ ६३६ ॥

अङ्गुलं दृश्यते व्योम यावच्छ्रोणितटं भवेत्।
प्रकोष्ठकूर्परस्य मध्यस्याप्यन्तरं स्याद्दशाङ्गुलम् ॥ ६३७ ॥

प्रकोष्ठस्तस्य बाहोश्च काञ्चीदेशेन गूहितः।
अधोभागे(गो) न दृश्येत प्रकोष्ठस्य करावधेः ॥ ६३८ ॥

दृश्या(श्य)बाह्यन्तरच्छा(स्था)या रेखायाः श्रोणिमध्यतः।
अन्तरं रचनीयं स्याद्दिक्सङ्ख्यैरङ्गुलैः स्फुटम् ॥ ६३९ ॥

काञ्चीसूत्रप्रदेशस्य दृश्यबाहोर्यदन्तरम्।
गदितं रविमात्राभिश्चित्रशास्त्रानुसारतः ॥ ६४० ॥

बस्तिमस्तकदेशस्य दृश्या(श्य)बाहोर्यदन्तरम्।
तिथिमात्राभिरुद्दिष्टं तिर्यक्सूत्रं(त्र) प्रमाणतः ॥ ६४१ ॥

दृश्यस्य मणिबन्धस्य गुदस्य च यदन्तरम्।
दशाङ्गुलं विधेयं तच्चित्रव्यापारकोविदैः ॥ ६४२ ॥

पूर्ववच्च स्फिजोर्लेखा कर्तव्या सुविचक्षणैः।
कलामात्रं तथा लुप्ता स्फिजोर्लेखा परंस्थिता ॥ ६४३ ॥

त्रिभागलोपितं सक्थि पूर्वसक्थ्युपरिस्थितम्।
समग्रो दृश्यते चाङ्घ्रिः पुरोभागसमाश्रितः ॥ ६४४ ॥

ऊरुमूलं तथा जानु जङ्घाकाण्डं तथैव च।
त्रिभिर्भागैः प्रदृश्येत पराङ्घ्रिसमवस्थितम् ॥ ६४५ ॥

पूर्वाङ्घ्रिकूर्चदेशस्य पराङ्घ्रेर्नखसन्धितः।
समग्रं दृश्यते बाह्यमङ्गुलार्धं विचक्षणैः ॥ ६४६ ॥

---

१ A च्छा। २ A व। ३ F स्त। ४ B. F ब्य। ५ A स्तस्य। ६ A या B य। ७ A श्यं ८ A रै। ९ A ले। १० B क्थिपरिस्थितम्।

एकादशाङ्गुलं दैर्घ्यं पूर्वपादस्य कल्प्यते ।
घटिता भूमिसूत्रेण पार्ष्णिस्तस्मिन् परिस्फुटम् ॥ ६४७ ॥

सार्धमङ्गुलमुत्सृज्य लिख्यते[1] तु कनिष्ठिका ।
अङ्गुल्यश्च तथाङ्गुष्ठो लिख्यन्ते[2] पूर्ववत्स्फुटम् ॥ ६४८ ॥

प्रदेशिनी तथाऽङ्गुष्ठो[3] मध्यमाग्रं तथैव च ।
दृश्यते परपादस्य पूर्वेणान्यत्प्रलुप्यते ॥ ६४९ ॥

परपादगता पार्ष्णिः समग्रा[4] दृश्यते पुनः ।
भूमिसूत्रात्परित्यज्य मानतः सार्धमङ्गुलम् ॥ ६५० ॥

ईदृक्साचिगता वृत्तिः कथिता लक्षणान्विता ।
तिर्यक्सूत्रप्रदेशेन लम्बसूत्रक्रमेण च ॥ ६५१ ॥

द्व्यर्धाक्षिवर्तप्रकर्तव्यं तथा च लम्बसूत्रकम् ।
ब्रह्मसूत्रात्परे भागे रुद्रमात्राभिरीरितम् ॥ ६५२ ॥

ब्रह्मसूत्रात्परे भागे तालमङ्गुलतो भवेत् ।
पुरोभागे ललाटं तु सार्धमङ्गुलतो भवेत् ॥ ६५३ ॥

कलामात्रा प्रदृश्या स्याद्भ्रुवोर्लेखा सुनिश्चितम् ।
अङ्गुलं तु परे भागे पुरोभागे तथाङ्गुलम् ॥ ६५४ ॥

भ्रूंपुच्छतः कर्णमूलं पञ्चाङ्गुलमुदीरितम् ।
कलामात्रो भवेत्कर्णस्तिर्यङ्मानेन निश्चितम् ॥ ६५५ ॥

अर्धपाली परा दृश्या पुरस्था मात्रया मिता ।
पालीदेशात्[5]कृकाटी स्याद्भागेनैकेन[6] कल्पिता ॥ ६५६ ॥

ब्रह्मसूत्रात्परेभागे नेत्रवर्त्म चतुर्यवम् ।
अर्धाङ्गुलं परित्यज्य पक्षसूत्रं प्रतिष्ठितम् ॥ ६५७ ॥

पक्षसूत्रे तु संलग्नं पक्ष्म[7] कार्यं[8] विचक्षणैः ।
ब्रह्मसूत्रात्परे भागे दृश्यते कृष्णमण्डलम् ॥ ६५८ ॥

---

१ A ले। २ F ख। ३ A ले। ४ F ग्रां। ५ A यां। ६ D ग्रो। ७ D तत्। ८ F लम्ब। ९ A यद्भू F यद्भू। १० D शङ्क। ११ A क्ष। १२ D. F यैं।

यवद्वयप्रमाणेन श्वेतभागच( श्च )तुर्यवम् ।
ब्रह्मसूत्रात्परे भागे बुध( भ्र )वर्त्म चतुर्यवम् ॥ ६५९ ॥

[1]परे[2] भागे प्रदृश्यःस्यात्कपोलश्च चतुर्यवः ।
[3]अर्धमात्रात्कपोलात्तु नासामध्यं प्रकल्प्यते ॥ ६६० ॥

पक्षसूत्राद्विनिष्क्रान्तं नासाग्रं तु चतुर्यवम् ।
ओष्ठौ(ष्ठौ) तत्र प्रकर्तव्यौ तिर्यगङ्गुलविस्तृतौ ॥ ६६१ ॥

घटितौ पक्ष[4]सूत्रेण प्रकर्तव्यौ विचक्षणैः ।
ब्रह्मसूत्रात्परे भागे चिबुकं द्वियवं भवेत् ॥ ६६२ ॥

घटितं ब्रह्मसूत्रेण हनुचक्रं प्रकल्प[5]येत् ।
हनुचक्रात्तथा ग्रीवा भागेनार्धेन कल्प(ल्प्य)ते ॥ ६६३ ॥

ग्रीवायाश्चैव विस्तारो भागद्वितयसम्मितः ।
ग्रीवायाश्च बहिर्दृश्यः स्कन्धदेशस्तथाङ्गुलम् ॥ ६६४ ॥

ब्रह्मसूत्रात्परे[6] भागे[7] बाहुमूलं त्रिमात्रकम् ।
पञ्चमात्रं पुरोभागे कक्षामूलं विधीयते ॥ ६६५ ॥

द्विकक्षामूलयोर्मध्ये भवेदेकादशाङ्गुलम् ।
उक्तादन्यः पुरो बाहुः कक्षामूलानु(त्तु)भागतः ॥ ६६६ ॥

कूर्परस्यान्तरी रेखा श्रोणिदेशे निग[8]द्यते ।
तस्याश्च मध्यरेखाया अन्तरं संव्यवस्थितम् ॥ ६६७ ॥

चापाकारं प्रकर्तव्यं तत्सार्धाङ्गुलविस्तृतिः( ति ) ।
बाहोस्तस्य बहिर्लेखा बस्तिशीर्षेण घट्टिता ॥ ६६८ ॥

परपादस्फिजा गूढः प्रकोष्ठो नैव दृश्यते ।
पूर्वेण पक्षसूत्रेण पृष्ठपार्श्वं सुघट्टितम् ॥ ६६९ ॥

तेनैव घटि[10]तौ रेखा स्फिजोरन्तरवर्तिनी ।
बस्तिशीर्षगतं सूत्रं गुदराजे[11]र्द्विगोलकम् ॥ ६७० ॥

---

१ F omits this line. २ A B र। ३ A ऊध्व। ४ A अ। ५ A क्षि। ६ A ल्पते। ७ A रो ८ F गो। ९ D न घट्यते। १० D ट्टि। ११ B जौ।

स्फिङ्मण्डलगता रेखा बाह्या पञ्चाङ्गुला भवेत् ।
यवतो वर्धते यावत् कल्पितं नाभिसूत्रकम् ॥ ६७१ ॥

कूर्परस्य तथा नाभेरन्तरं सार्धगोलकम् ।
भुजं विना शिरोदेशान्निर्गतं जठरं बहिः ॥ ६७२ ॥

हीयते च ततश्चाधो मणिबन्धावधि क्रमात् ।
बस्तिसूत्रप्रदेशे तु यवषट्कमुदाहृतम् ॥ ६७३ ॥

ततो वंक्षणदेशः स्यादङ्गुलं परिकल्पितम्(तः) ।
ऊरुमूलं ततः कुर्यात्करादङ्गुलतो बहिः ॥ ६७४ ॥

कनिष्ठाङ्गुलिसंलग्ना सक्थिरेखा विरेच्यते ।
तर्जनी दृश्यते चार्धमङ्गुलाग्रेण सङ्गता ॥ ६७५ ॥

तिर्यक्तलस्य विस्तारो(रं) भागेनैकेन कल्पयेत् ।
पूर्वभागस्फिजोर्ले(ले)खा किञ्चिद्वक्रा प्रकल्प(ल्प्य)ते ॥ ६७६ ॥

गुदात्सार्धाङ्गुला सा तु प्रदृश्या चित्रकर्मणि ।
समग्रो दृश्यते चाङ्घ्रिः पूर्वभागसमाश्रितः ॥ ६७७ ॥

त्रयोदशाङ्गुलायामं पदं तस्य प्रदृश्यते ।
परभागस्थितं सक्थि सार्धभागं प्रदृश्यते ॥ ६७८ ॥

जानुभागो हि भागेन जङ्घामूलं च भागतः ।
ईन्द्रबस्तिप्रदेशस्य दृश्यं स्यादङ्गुलत्रयम् ॥ ६७९ ॥

कूर्चिकां च ततः पार्ष्णिः प्रत्येकं त्र्यङ्गुलं मतम् ।
पूर्वपादगता पार्ष्णिर्भूमिसूत्रेण घट्टिता ॥ ६८० ॥

भूमिसूत्रं परित्यज्य कनिष्ठा मात्रया भवेत् ।
भूमिसूत्रं परित्यज्य परपार्ष्णिर्विधीयते ॥ ६८१ ॥

सार्धगोलकमानेन चित्रकर्मविशारदैः ।
पूर्वाङ्घ्रिपृष्ठदेशे च परपादः प्रदृश्यते ॥ ६८२ ॥

---

१ वृष १ । २ P वि । ३ D क्क । ४ D ग्रा । ५ D ता । ६ B. D वस्ति । ७ D गः । ८ B. D ईदृक् । ९ F ता । १० B. F मतो । ११ D दे ग । १२ D शं ।

पञ्चाङ्गुलकृतायामैः शिल्पिभिः परिकल्पितैः।
पूर्वाङ्गुष्ठनखादूर्ध्वं कल्प्यन्ते च प्रदेशिनी ॥ ६८३ ॥

अङ्गुलान्तरिता कार्या पराङ्गुष्ठेन गृहिता।
तर्जनी मध्यमानाम( मा ) कनिष्ठा च क्रमादिमाः ॥ ६८४ ॥

उपर्युपरि तिष्ठन्त्यः कल्प(ल्प्य)न्ते चार्धरूपतः।
एवं द्यर्धक्रमा वृत्तिर्विस्तारेण निरूपिता ॥ ६८५ ॥

लम्बसूत्रं पुरस्कृत्य तिर्यक्सूत्रानुसारतः।

इति सामान्यचित्रप्रक्रिया

स्थानकानाञ्च वृत्तीनां यत्प्रमाणं निरूपितम् ॥ ६८६ ॥

तदन्तरप्रमाणेन व्यन्तराणि भवन्ति हि।
नवभेदप्रभिन्नानां स्थानकानां विनिर्णयः ॥ ६८७ ॥

आयुधानां विपर्यासाच्चतुर्ष्वपि च बाहुषु।
जगन्नाथस्य वक्ष्यन्ते चतुर्विंशतिमूर्तयः ॥ ६८८ ॥

प्रादक्षिण्येन बोद्धव्या चतुर्विंशतिमूर्तयः।
अधोहस्तक्रमेणादौ यथैवाक्षरसंज्ञया ॥ ६८९ ॥

अवशिष्टमधोबाहोश्चतुर्थं नामवाचकम्।
प्राधान्यं व्यञ्जनेष्वेव दीर्घानुस्वारयोर्बहिः ॥ ६९० ॥

छन्दसः पूरणार्थाय क्वचिदाद्यं प्रलुप्यते।
पशचंके शपंगाना गाचशंमा चगापगो ॥ ६९१ ॥

गोपशंवि चशंपाम पागचात्रि शचागवा।
पंचांगश्री गचंपाह शपचाप पशागदा ॥ ६९२ ॥

गशापाशं(सं) गशाचंवा चशगाप्र चगाशनि।
चंपाशंपु पगाचा(शा)धो चंपागोतृ गपाचतुः ( चु ) ॥ ६९३ ॥

पाचशंजं शगाचोपे शोचपाह शगापकुं।
चतुर्बाहुयुताः सर्वाः मूर्तयः परिकीर्तिताः ॥ ६९४ ॥

इति केशवादिचतुर्विंशतिमूर्तिभेदाः।

---

१ D मा। २ D ता। ३ D ल्प। ४ A द्यर्धात्क्रमा वृत्तिः। ५ A वोड०। ६ A चं। ७ B. F. व। ८ F वोशो। ९ A क्ष।

अष्टबाहोर्हरेर्मूर्तेरायुधानि वदाम्यहम् ।
नन्दकश्च गदा बाण(:) पद्म(बं)दक्षिणबाहुषु ॥ ६९५ ॥

शङ्खो धनुस्तथा चक्रं खेटकं वामबाहुषु ।
त्रिविक्रमो नृसिंहश्च दशतालौ प्रकीर्तितौ ॥ ६९६ ॥

वामनः सप्ततालस्तु विप्रमूर्तिर्हरिश्छविः ।
कृष्णाजिनोपवीती स्याच्छत्री धृतकमण्डलुः ॥ ६९७ ॥

कुण्डली शिखया युक्तः कुब्जाकारो मनोहरः ।
श्रीरामश्च वराहश्च दशतालावुदाहृतौ ॥ ६९८ ॥

रामस्तु द्विभुजो लेख्यः शरचापधरो विभुः ।
नृवराहं प्रवक्ष्यामि सूकरास्येन शोभितम् ॥ ६९९ ॥

गदापद्मधरं धात्रीं दंष्ट्राग्रेण समुद्धृताम् ।
बिभ्राणं कूर्परे वामे विस्मयोत्फुल्ललोचनाम् ॥ ७०० ॥

नीलोत्पलधरां देवीमुपरिष्टात्प्रकल्पते(येत्) ।
दक्षिणं कटिसंस्थं च बाहुं तस्याः प्रकल्पयेत् ॥ ७०१ ॥

कूर्मपृष्ठे पदं चैकमन्यन्नागेन्द्रमूर्धनि ।
अथवा सूकराकारं महाकायं क्वचिल्लिखेत् ॥ ७०२ ॥

तीक्ष्णदंष्ट्राग्रघोणास्यं स्तब्धकर्णोर्ध्वरोमकम् ।
नरसिंहाकृतिं वक्ष्ये रौद्रसिंहमुखेक्षण(णा)म् ॥ ७०३ ॥

भुजाष्टकसमायुक्तं(क्तां)स्तैक्ष्ण्य पानसयत्प्रभुम् (पीतसटाप्रभाम् ) ।
हिरण्यकशिपुं दैत्यं दारयन्तीं नखाङ्कुरैः ॥ ७०४ ॥

ऊर्वोरुपरि विन्यस्य खड्गखेटकधारिणीम् ।
तस्यान्त्रमालां निष्कृष्य बाहुयुग्मेन बिभ्रतीम् ॥ ७०५ ॥

आकारं पुरुषस्यैव धारयन्तीं मनोहराम् ।
अधःस्थिताभ्यां बाहुभ्यां धा(दा)रयन्तीं प्रकल्पयेत् ॥ ७०६ ॥

---

१ A ह । २ A लु । ३ D न । ४ D तज्जपीनसयत्प्रभम् । ५ A न्तं F न्ती । ६ A र्णं F र्णी । ७ F न्ती ।

ऊर्ध्वस्थिताभ्यां बाहुभ्यामान्त्रमालां तु बिभ्रतीम् ।
मध्यस्थिताभ्यां बाहुभ्यां दक्षिणे चक्रपङ्कजे ॥ ७०७ ॥

कौमोदकीं तथा शङ्खं बाहुभ्यामभिवामतः ।
नीलोत्पलदलच्छायां किंवा चम्पकसप्रभाम् ॥ ७०८ ॥

तप्तकाञ्चनसङ्काशां बालार्कसदृशीं लिखेत् ।
आसीनं द्विभुजं देवं प्रसन्नवदनेक्षणम् ॥ ७०९ ॥

श्वेतस्फटिकसङ्काशं चतुर्बाहुमथापि वा ।
आजानुलम्बिनौ बाहू कर्तव्यौ तत्र दक्षिणौ[1] ॥ ७१० ॥

समीपे कल्पयेच्चक्रं वामे शङ्खं समीपतः ।
ऊर्ध्वस्थिताभ्यां बाहुभ्यां दक्षिणं(णे) पञ्चकं(पङ्कजं)न्यसेत् ॥ ७११ ॥

वामे[2] बाहौ गदा रम्यां लिखेच्चित्रविशारदः ।
तथा त्रिविक्रमं वक्ष्ये वामपादेन मेदिनीम् ॥ ७१२ ॥

आक्रामन्तं द्वितीयेन साकल्येन नभस्तलम् ।
ऊर्ध्वपादसमीपस्थं वामनं दीनलोचनम् ॥ ७१३ ॥

आलिखेत समीपस्थं बालिं शृ(भृ)ङ्गारधारिणम् ।
तस्य बन्धं प्रकुर्वन्ति(र्वन्तं) गगनान्तं प्रकल्पयेत् ॥ ७१४ ॥

मत्स्यावतारिणं देवं मत्स्याकारं प्रकल्पयेत् ।
कूर्मावतारिणं देवं कमठाकृतिमालिखेत् ॥ ७१५ ॥

लिखेच्चतुर्मुखं देवं चतुर्बाहुं शुभेक्षणम् ।
रक्तकुण्डलसंयुक्तं लम्बकूर्चोपवीतिनम् ॥ ७१६ ॥

कृष्णाजिनधरं देवं शुक्लाम्बरविराजितम् ।
दक्षिणं वरदं हस्तं तथान्यं[3] स्तु(स्रु)वधारिणम् ॥ ७१७ ॥

कमण्डलुधरं वामं तथान्यं संयुतं स्रुच(स्रुचा) ।
बिभ्राणं चतुरो वेदान् पुरतश्चास्य विन्यसेत् ॥ ७१८ ॥

---

१ F णे । २ A म । ३ D न्यसूत्र B न्यं सूत्र । ४ A देवं । ५ B. D. स्तथा । ६ F पु ।

वामे पार्श्वे तु सावित्रीं दक्षिणे तु सरस्वतीम् ।
आज्यस्थालीं पुरोभागे महर्षींश्च[1] समन्ततः ॥ ७१९ ॥

हंसारूढं लिखेत्कापि[2] क्वचिच्च कमलासनम् ।
स्रष्टारं सर्वलोकानां ब्रह्माणं परिकल्पयेत् ॥ ७२० ॥

महादेवं प्रवक्ष्यामि यथा लेख्यः स भित्तिषु ।
मुक्ताकर्पूरश्मिसङ्काशस्तप्तस्वर्णनिभोऽपि वा ॥ ७२१ ॥

उन्नतांसो महाबाहुः कमलायतलोचनः ।
द्वीपिचर्मपरीधानो वृत्तजङ्घोरुमण्डलः ॥ ७२२ ॥

केयूरहारसम्पन्नः कटिसूत्रत्रयान्वितः[3] ।
नवेन्दुकलिकाक्रान्तजटाजूटविराजितः ॥ ७२३ ॥

इन्दुसू(शू)लत्रिनेत्रे(त्रै)णनागाभरणभूषितः ।
द्यष्टवर्षदेशीयो नीलकण्ठो मनोहरः ॥ ७२४ ॥

कुण्डली पीनगण्डः स्यादष्टभिर्बाहुभिर्युतः ।
दशभिर्बाहुभिर्वाथ भुजैः षोडशभिः क्वचित् ॥ ७२५ ॥

अष्टादशभुजः क्वापि चतुर्बाहुरथापि वा ।
तेषु शस्त्राणि वक्ष्यामि भुजेषु च यथाक्रमम् ॥ ७२६ ॥

अक्षमालामसिं शक्तिं दण्डं शूलं च दक्षिणे ।
खट्वाङ्गं भुजगं चैव कपालं खेटकं तथा ॥ ७२७ ॥

वरदं च तथा हस्तं वामभागे निवेशयेत् ।
गजासुरवधे नाट्ये बाहुभिर्दशभिर्युतः ॥ ७२८ ॥

पुरत्रयस्य दहने भुजैःषोडशभिर्युतः ।
बाणश्चक्रं गदा चैव दक्षिणेष्वधिकं भवेत् ॥ ७२९ ॥

धनुश्चैव तथा घण्टा शङ्खो वामेऽधिकं भवेत् ।
दश पूर्वं भुजाः प्रोक्ताः षोडशैवं निरूपिताः ॥ ७३० ॥

स्वच्छन्दभैरवाकारे[4] बाहवोऽष्टौ[5] दश स्मृताः ।
डमरुं च तथा शङ्खु[6]मधिकं तत्र कल्पयेत् ॥ ७३१ ॥

---

१ B र्षीभिः । २ A त्का । ३ A त । ४ A स । ५ D रैः । ६ A ष्ट । ७ B F माधिके A ङ्ख्य ।

त्रिशूलं डमरुं चैव वरदं चाक्षिमालिकाम् ।
चतुर्बाहोर्महेशस्य शान्तमूर्तेः समालिखेत् ॥ ७३२ ॥

अन्यास्तु दशहस्तस्य भवेयुर्हेतयः क्रमात् ।
अष्टबाहोर्महेशस्य न स्यातां खड्गखेटकौ ॥ ७३३ ॥

अर्धनारीश्वरो देवः कथ्यते लक्षणान्वितः ।
दक्षिणं पुरुषाकारं वामं योषिन्मयं वपुः ॥ ७३४ ॥

त्रिशूलं दक्षिणे हस्ते वामहस्ते च दर्पणम् ।
उत्पलं वा प्रकुर्वीत केयूरवलयान्वितम् ॥ ७३५ ॥

दक्षिणे श्रवणे नागं वामे कर्णे तु कुण्डलम् ।
जटाभारो दक्षिणे स्यादर्ध(थ)चन्द्रार्धभूषितः ॥ ७३६ ॥

कुन्तलैः[2] कबरीभारं वामभागे तु विन्यसेत् ।
ललाटे लोचनस्यार्धं तिलकार्धं प्रकल्पयेत् ॥ ७३७ ॥

विशालं दक्षिणं[3] वक्षो वामं[4] पीनपयोधरम् ।
द्वीपिचर्मपरीधानं कटिसूत्रत्रयान्वितम् ॥ ७३८ ॥

देवस्य दक्षिणं पादं पद्मस्योपरि कल्पयेत् ।
तस्योर्ध्वं[5] च तथा वामं नूपुरालङ्कृतं लिखेत् ॥ ७३९ ॥

नरनारीमयं देवमेवं चित्रे प्रकल्पयेत् ।
उमामहेश्वरस्यापि स्वरूपं वर्ण्यतेऽधुना ॥ ७४० ॥

द्विभुजं वा चतुर्बाहुं जटामण्डलमण्डितम् ।
त्रिनेत्रं पार्वतीस्कन्धविन्यस्तैककरं कुचे ॥ ७४१ ॥

करं द्वितीयं सव्ये[6] तु शूलमुत्पलकं लिखेत् ।
वामं पद्मासनं पादं दक्षिणं किञ्चिदञ्चितम् ॥ ७४२ ॥

एवमर्धेन्दुसंस्थाने निविष्टं शङ्करं लिखेत् ।
वामोरुवर्तिनीं देवीं हरवक्त्रावलोकिनीम् ॥ ७४३ ॥

स्पृशन्तीं देवदेवस्य वामांसं लीलया लिखेत् ।
दक्षिणैः करजैः स्कन्धं स्पृशन्तीं कुक्षिमेव वा ॥ ७४४ ॥

---

१ B. F. ण्ड। २ A लात्। ३ F णे। ४ D मे। ५ A स्यार्धं ६ D वं सर्वदा। ७ A ले B त्वे।

उत्पलं वामहस्तेन दर्पणं वापि बिभ्रतीम् ।
जयां च विजयां पार्श्वे गणेशं षण्मुखं लिखेत् ॥ ७४५ ॥

उमामहेश्वरस्यैवं स्वरूपं परिकीर्त्तितम् ।
देवं हरिहरं वक्ष्ये सर्वपातकनाशनम् ॥ ७४६ ॥

दक्षिणे शङ्करस्यार्धमर्धं विष्णोश्च वामतः ।
बालेन्दुभूषितः कार्यो जटाभारस्तु दक्षिणे ॥ ७४७ ॥

नानारत्नमयं दिव्यं किरीटं वामभागतः ।
दक्षिणं सर्पराजेन भूषितं कर्णमालिखेत् ॥ ७४८ ॥

मकराकारकं दिव्यं कुण्डलं वामकर्णतः ।
वरदो दक्षिणो हस्तो द्वितीयः शूलभृत्तथा ॥ ७४९ ॥

कर्तव्यौ वामभागे तु शङ्खचक्रधरौ करौ ।
दक्षिणं वसनं कार्यं द्वीपिचर्ममयं शुभम् ॥ ७५० ॥

पीताम्बरमयं भव्यं जघनं सव्यमालिखेत् ।
वामः पादः प्रकर्तव्यो नानारत्नविभूषितः ॥ ७५१ ॥

दक्षिणाङ्घ्रिः प्रकर्तव्यो भुजगेन्द्रेण वेष्टितः ।
सुधांशुधवलः कार्यः शिवभागो विचक्षणैः ॥ ७५२ ॥

अतसीपुष्पसङ्काशो विष्णुभागो विरच्यते ।
विलिखेत् षण्मुखं देवं मयूरवरवाहनम् ॥ ७५३ ॥

तरुणादित्यसङ्काशं बालाभरणभूषितम् ।
स्थानीये खेटके वापि कुमारो लिख्यते यदा ॥ ७५४ ॥

भुजान्द्वादश कुर्वीत खेटके चतुरो भुजान् ।
ग्रामे वने द्विबाहुः स्याल्लेखनीयो विचक्षणैः ॥ ७५५ ॥

वक्त्रैः षड्भिरुपेतो वा मुखेनैकेन वा युतः ।
दक्षिणं निम्नगं पाणिं वरदं वाऽभयं लिखेत् ॥ ७५६ ॥

---

१ A दि । २ A द्विबाहुःस्याल्लेख्यः । ३ F ग्रामे द्विबाहुर्लेख्यःस्यात् । ४ A शुभ्र ।

शक्तिं पाशमसिं बाणं शूलं चेत्युत्तरोत्तरम् ।
पताकां कार्मुकं कुर्यात्खेटकं मुष्टिबन्धनम् ॥ ७५७ ॥

प्रसृतां तर्जनीं पाणौ ताम्रचूडं च[1] वामतः ।
अभयो[2] वैरदो[3] वैको द्वितीयः खड्गभृत्करः ॥ ७५८ ॥

दक्षिणे[4] वामतः शक्ति(:) पाशो वा कुक्कुटोऽपि वा ।
द्विभुजस्य कुमारस्य कर(रे)शक्तिर्विधीयते ॥ ७५९ ॥

दक्षिणे वामतः कार्यस्ताम्रचूडधरः करः ।

इति स्वामिकार्तिकलक्षणम् ।

विनायकस्य वक्ष्यामि मूर्तिं चित्रोपयोगिनीम् ॥ ७६० ॥

गजवक्त्रां त्रिनेत्रां तां चतुर्बाहुं[5] महोदराम् ।
भग्नैकदन्तसंयुक्तां स्तब्धकर्णां समालिखेत् ॥ ७६१ ॥

नागोपवीतिनीं[6] पुष्टां[7] पीनस्कन्धाङ्घ्रिपाणिकाम् ।
भग्नदन्तधरञ्चैकमन्यमुत्पलसंयुतम्[8] ॥ ७६२ ॥

दक्षिणे विलिखेद्वामौ सकुठारसलड्डुकौ ।
पार्श्वे सिद्धिकबुद्धिभ्यामधस्तादाखुनान्वित( ता )म् ॥ ७६३ ॥

आसीन( ना )मुत्तमे पीठे सिन्दूरारुणविग्रह(हा)म् ।

इति गणेशमूर्तिः ।

वक्ष्ये कात्यायनीं देवीं शिवनारायणात्मिकाम् ॥ ७६४ ॥

बाहुभिर्दशभिर्युक्तां जटामुकुटमण्डिताम् ।
लोचनत्रयसंयुक्तामर्धेन्दुकृतशेखराम् ॥ ७६५ ॥

अतसीपुष्पसच्छायामिन्दीवरदलेक्षणाम् ।
पीनोन्नतकुचाभोगां तनुमध्येन शोभिताम् ॥ ७६६ ॥

त्रिभङ्गि[10]स्थानसंस्थानां महिषासुरमर्दिनीम्[11] ।
त्रिशूलं दक्षिणे खड्गं चक्रं शक्तिं[12] वरं तथा ॥ ७६७ ॥

---

१ B D तमग्रतः । २ A उ । ३ A वैरदो चैको । ४ A णो । ५ D हु । ६ D नं । ७ D ष्टं । ८ D कम् । ९ A ता । १० A ङ्गी । ११ F र्दं । १२ D क्तिधरं ।

अधिज्यकार्मुकं वामे पाशमङ्कुशखेटकम् ।
घण्टां वा परशुं वापि धारयन्तीं समालिखेत् ॥ ७६८ ॥

अधस्तान्महिषं तस्याश्छिन्नग्रीवं समालिखेत् ।
छिन्नस्थानं (न) समुत्पन्नं खड्गखेटकधारिणम् ॥ ७६९ ॥

हृदि शूलेन निर्भिन्नं रुधिरारुणविग्रहम् ।
प्रबद्धं नागपाशेन भ्रुकुटीभीषणेक्षणम् ॥ ७७० ॥

नाभेरूर्ध्वं विनिष्क्रान्तं दारुणं पुरुषं लिखेत् ।
दक्षिणं चरणं देव्याः सिंहपृष्ठे प्रतिष्ठितम् ॥ ७७१ ॥

उत्तुङ्गमञ्चितं वामं महिषस्योपरिस्थितम् ।

इति काली ( कात्यायनी ) मूर्तिः ॥

सुरराजं प्रवक्ष्येऽहमैरावणसमाश्रितम् ॥ ७७२ ॥

किरीटकुण्डलधरं भुजद्वयसमन्वितम् ।
कुलिशं दक्षिणे पाणौ वामहस्ते तथोत्पलम् ॥ ७७३ ॥

दिव्यरत्नविभूषाढ्यं दिव्यचीनांशुकैर्युतम् ।
छत्रचामरधारिण्यः स्त्रियः पार्श्वे च कल्पयेत् ॥ ७७४ ॥

सिंहासनस्थमथवा लिखेद्गन्धर्वसंयुतम् ।
इन्द्राणीं वामतस्तस्य लिखेदुत्पलधारिणीम् ॥ ७७५ ॥

दिव्यशृङ्गारसंयुक्तामिन्द्रवक्त्रावलोकिनीम् ।

इति इन्द्रमूर्तिः ॥

वन्हेः स्वरूपं वक्ष्यामि शुद्धकाञ्चनसप्रभम् ॥ ७७६ ॥

अर्धचन्द्रासनगतं रक्तवस्त्रविराजितम् ।
लोहितं च प्रकुर्वीत बालार्कसमतेजसम् ॥ ७७७ ॥

युक्तं यज्ञोपवीतेन लम्बकूर्चेन शोभितम् ।
मेषपृष्ठस्थितं देवं भुजद्वयसमन्वितम् ॥ ७७८ ॥

---

१ A धृ? । २ A ष्यं D ज्यं । ३ D दानवं । ४ D दारुणं । ५ D F प्यौ । ६ D F यौ । ७ D चा । ८ D नव । ९ D चोंप । १० F दि ।

दक्षिणे त्वक्षसूत्रं स्यात्करे वामे कमण्डलुम् ( लुः )।
स्वाहादेवी तु तत्पार्श्वे कुङ्कुमेन विलेपिता ॥ ७७९ ॥

[1]अरुणैरम्बरैर्भव्या लेख्या माणिक्यभूषिता।
कुण्डस्थो वा प्रकर्तव्यो हव्यवाहो विचक्षणैः ॥ ७८० ॥

ज्वालाभिः सप्तभिः शीर्षै[2] शोभमानो महाद्युतिः।

इति अग्निमूर्तिः।

पितृराजं प्रवक्ष्यामि नीलाञ्जनसमच्छविम् ॥ ७८१ ॥

दण्डपार्श्वधरं दोर्भ्यां प्रदीप्ताग्निविलोचनम्[3]।
महामहिषमारूढं सिंहासनमथापि वा ॥ ७८२ ॥

मृत्युना चित्रगुप्तेन पार्श्वयोरुपशोभितम्।
करालैः किङ्करैश्चैव सुरासुरगणैस्तथा ॥ ७८३ ॥

धार्मिकैः पापिभिश्चैव सेव्यमानं निरन्तरम्।

इति यममूर्तिः।

राक्षसेन्द्रं प्रवक्ष्यामि निर्ऋतं ( तिं ) नैर्ऋतैः[4] ( तीं ) स्थितम् ॥ ७८४ ॥

नरयानसमारूढं रक्षोभिर्बहुभिर्वृतम्।
कालमेष ( घ ) समाभासं खड्गखेटकधारिणम् ॥ ७८५ ॥

पीतवस्त्रपरीधानं स्वर्णभूषणभूषितम्।

इति राक्षसेन्द्रमूर्तिः।

जलेशं वर्णयिष्यामि कुन्दशङ्खेन्दुसप्रभम् ॥ ७८६ ॥

पाशपङ्कजहस्तं च मकरस्योपरिस्थितम्।
शुक्लाम्बरपरीधानं दिव्यरत्नकिरीटिनम् ॥ ७८७ ॥

पृथुवक्षस्थलन्यस्ततारहारविभूषितम्।

इति वरुणमूर्तिः

समीरणं प्रवक्ष्यामि धूम्रं हरिणवाहनम् ॥ ७८८ ॥

---

१ D अरुणारुणसङ्काशा। २ A वैः। ३ B D त्रि। ४ B नि।

चित्राम्बरधरं देवं चित्ररत्नविभूषितम् ।
वरदं दक्षिणं हस्तं वामं युक्तं पताकया ॥ ७८९ ॥

बिभ्राणं कुण्डलोपेतं किरीटवरधारिणम् ।

इति वायुमूर्तिः

हरामित्रं प्रवक्ष्यामि दिव्यहारविभूषितम् ॥ ७९० ॥

किरीटकुण्डलयुतं श्वेताम्बरविराजितम् ।
नरयुक्तविमानस्थं गदापाणिं वरप्रदम् ॥ ७९१ ॥

महोदरं महाबाहुं गौरवर्णं मनोहरम् ।
अष्टाभिर्निधिभिर्युक्तं द्रविणव्यग्रपाणिभिः ॥ ७९२ ॥

समन्ताद्वह्निकैर्युक्तं चित्रकर्मणि लेखयेत् ।

इति कुबेरमूर्तिः ।

ईशानं सम्प्रवक्ष्यामि शरदभ्रसमप्रभम् ॥ ७९३ ॥

शुभ्रं वृषभमारूढं बालेन्दुकृतशेखरम् ।
जयमङ्गलभूषाढ्यं लोचनत्रयभूषितम् ॥ ७९४ ॥

त्रिशूलपाणिं वरदं व्याघ्रचर्माम्बरावृतम् ।
फणिकुण्डलभूषाढ्यं नागयज्ञोपवीतिनम् ॥ ७९५ ॥

लिखेदेवंविधं देवं चित्रके चित्रकोविदः ।

इति ईशानमूर्तिः

मातृणां लक्षणं वक्ष्ये ब्रह्माणी वैष्णवी तथा ॥ ७९६ ॥

माहेश्वरी च कौमारी वाराही वासवी तथा ।
सप्तमी नारसिंही च तत्तद्रूपायुधैः समाः ॥ ७९७ ॥

तत्तद्वाहनसंयुक्ताः कर्तव्या मातरो बुधैः ।
वीरेश्वरो विधातव्यो मातृणामग्रतस्तथा ॥ ७९८ ॥

---

१ A मंवि । २ A रव ।

वीणात्रिशूलहस्तश्च वृषारूढो जटाधरः।

इति मातृकावर्णनम्

श्रियं देवीं प्रवक्ष्यामि नवयौवनशालिनीम् ॥ ७९९ ॥

सुलोचनां चारुवक्त्रां गौराङ्गीमरुणाधराम्।
सीमन्तं बिभ्रतीं शीर्षे मणिकुण्डलधारिणीम् ॥ ८०० ॥

श्रीफलं दक्षिणे पाणौ वामे पद्मं तु बिभ्रतीम्।
श्वेतपद्मासनासीनां श्वेतवस्त्रविभूषिताम् ॥ ८०१ ॥

कञ्चुकाबद्धगात्रीं[1] च मुक्ताहारविभूषिताम्।
चामरैर्वीज्यमानां च योषिद्भ्यां पार्श्वयोर्द्वयोः ॥ ८०२ ॥

सामगैस्तोष्यमानां ( णां ) च भृङ्गारसलिलोत्करैः।

इति श्रीमूर्तिलक्षणम्।

नागानां वक्ष्यते रूपं नाभेरूर्ध्वं नराकृतिः ॥ ८०३ ॥

सर्पाकारमधोभागे मस्तके[2] योगमण्डलम्।
एका फणा त्रयो वापि पञ्च वा सप्त वा नव ॥ ८०४ ॥

द्विजिह्वास्ते विधातव्याः खड्गचर्मधरौ करौ।

इति नागमूर्तिः।

किरीटि[3]कुण्डलोपेता वक्त्रं[4]दंष्ट्रा भयानका ॥ ८०५ ॥

नानाशस्त्रधराः कार्याः दैत्याः सुरगणद्विषः।
दानवा विकृताकारा भ्रुकुटीकुटिलाननाः ॥ ८०६ ॥

किरीटेन च कुब्जेन मण्डिताः शस्त्रपाणयः।
दंष्ट्राकरालवदना भ्रुकुटीकुटिलेक्षणाः ॥ ८०७ ॥

नानारूपा महाकाया नानाशस्त्रधरास्तथा।
कुटिलाः[5] कृष्णमेघाभाः स्थूलबाहुमहोदराः ॥ ८०८ ॥

उत्फुल्ला नासिका कार्या लेखने चित्रकोविदैः।
अत्यर्थं कृशकायास्ते चर्मास्थिस्नायुविग्रहाः ॥ ८०९ ॥

ह्रस्वकीर्णशिरोजाः स्युः पिशाचाश्चित्रकर्मणि।
ईदृक्षा एव वेताला दीर्घदेहाः कृशोदराः ॥ ८१० ॥

१ D त्रां। २ A कं। ३ A दि। ४ A क्रा। ५ D तुंदि।

कपिलैर्मूर्धजैर्युक्ता लेखनीया मनीषिभिः ।
इति दैत्यदानवपिशाचवेतालमूर्तयः ।

क्षेत्रपालो विधातव्यो दिग्वासा झण्टिभूषितः ॥ ८११ ॥

कृत्तिकां डमरूं बिभ्रद्दक्षिणे तु करद्वये ।
वामे शूलं कपालं च मुण्डमालोपवीतिकाम् ॥ ८१२ ॥

करोटीनिकरोदारमालाग्रथितशेखरः ।
इति क्षेत्रपालमूर्तिः ।

वक्ष्ये मनसिजं देवमिक्षुचापधरं तथा ॥ ८१३ ॥

पञ्चपुष्पमयान्बाणान् बिभ्राणं दक्षिणे करे ।
हरितं लोहितं वापि दिव्याभरणभूषितम् ॥ ८१४ ॥

किञ्चित्कुटिलसंस्थानं पुष्पमालाभिचारितम् ।
पीतं वस्त्रं वसानं च वसन्तेन समन्वितम् ॥ ८१५ ॥

नानाकुसुमभूषेण कङ्केलीपत्रवाससा ।
दाडिमीकर्णपूरेण कण्ठे बकुलमालिनी ( नम् ) ॥ ८१६ ॥

चम्पकैः स्वर्णसङ्काशैः कृतशेखरमालिना ( नम् ) ।
पार्श्वे चाश्वमुखः कार्यो मकरध्वजधारकः ॥ ८१७ ॥

प्रीतिर्दक्षिणभागेऽस्य भाजनोपस्करान्विता ।
वामभागे रतिः कार्या रन्तुकामा निरन्तरम् ॥ ८१८ ॥

शय्या तु सारसैर्युक्ता वापिका नन्दनं वनम् ।
इति कामदेवमूर्तिः ।

रक्तवर्णो महातेजा द्विबाहुः पद्मभूद्रविः ॥ ८१९ ॥

सप्तभिस्तुरगैर्युक्ते सप्तरज्जुसमन्विते ।
एकचक्रे रथे तिष्ठन्पद्माक्रान्तसरोरुहः ॥ ८२० ॥

माणिक्यकुण्डलोदारः पद्मरागकिरीटकः ।
रक्ताम्बरधरो रम्यः सुव्यक्ताङ्गो मनोहरः ॥ ८२१ ॥

---

१ A रुण्टि B कु D कुल । २ D कम् । ३ D टिनी । ४ D लोदृग् । ५ B D सदा । ६ D ना । ७ A पद्मं । ८ B लया । ९ A वामे । १० F म्य ।

पादौ तस्य प्रकर्तव्यौ सुमहत्तेजसा वृतौ ।
अनूरुः सारथिः कार्यः प्रतीहारौ च पार्श्वयोः ॥ ८२२ ॥

दण्डपिङ्गलनामानौ खड्गखेटकधारिणौ ।
धाता च लेखनीहस्तो जगत्कर्मविलेखकः ॥ ८२३ ॥

कार्यो भानुसमीपस्थश्चित्रकर्मविशारदैः ।

इति सूर्यमूर्तिः ।

चन्द्रश्चित्रे विधातव्यः श्वेतः श्वेताम्बरावृतः ॥ ८२४ ॥

दशश्वेताश्वसंयुक्तमारूढः स्यन्दनं शुभम् ।
द्विभुजो दक्षिणे पाणौ गदां बिभ्रत्पृषोदरीम् ॥ ८२५ ॥

वामस्तु वरदो हस्तः शशाङ्कस्य निरूप्यते ।

इति चन्द्रमूर्तिः ।

धरापुत्रस्य वक्ष्यामि लक्षणं चित्रकर्मणि ॥ ८२६ ॥

चतुर्भुजो मेषगमश्चाङ्गारसदृशद्युतिः ।
दक्षिणं त्वूर्द्धगं[3] हस्तं वरदं परिकल्पयेत् ॥ ८२७ ॥

ऊर्ध्व(र्ध्व)शक्तिसमायुक्तं वामौ शूलगदाधरौ ।

इति भौममूर्तिः ।

सिंहारूढं बुधं वक्ष्ये कर्णिकारसमप्रभम् ॥ ८२८ ॥

पीतमाल्याम्बरधरं स्वर्णभूषाविभूषितम् ।
वरदं खड्गसंयुक्तं खेटकेन समन्वितम् ॥ ८२९ ॥

गदया च समायुक्तं बिभ्राणं दोश्चतुष्टयम् ।

इति बुधमूर्तिः ।

पीतो देवगुरुर्लेख्यः शुभ्रश्च भृगुनन्दनः ॥ ८३० ॥

चतुर्भिर्बाहुभिर्युक्तश्चित्रकर्मविशारदैः ।
वरदौ साक्षसूत्रौ च कमण्डलुधरौ तथा ॥ ८३१ ॥

---

१ A भानुः । २ B दक्षिणाधोहस्तं ...। ३ A तूर्ध्वगं।

दण्डिनौ च तथा बाहू बिभ्राणौ[1] परिकल्पयेत् ।
इति गुरुशुक्रमूर्तिः(र्ती) ।
सौरिं नीलसमाभासं गृध्रारूढं चतुर्भुजम् ॥ ८३२ ॥
वरदं बाणसंयुक्तं चापशूलधरं लिखेत् ।
इति शनिमूर्तिः ।
सिंहासनगतं राहुं करालवदनं लिखेत् ॥ ८३३ ॥
वरदं खड्गसंयुक्तं खेटशूलधरं क्रमात् ।
इति राहुमूर्तिः ।
धूम्रादिबाहवः सर्वे वरदाश्च गदाधराः ॥ ८३४ ॥
गृध्रपृष्ठसमारूढा लेखनीयास्तु केतवः ।
इति केतुमूर्तिः ।
ग्रहाः किरीटिनः कार्या नवतालप्रमाणतः ॥ ८३५ ॥
रत्नकुण्डलकेयूरहाराभरणभूषिताः ।
चित्रकर्मोपयोगार्थं हयलक्ष्म प्रवक्ष्यते ॥ ८३६ ॥
आयामाच्च तथोत्सेधाद्विस्तारात्परिणाहतः ।
मुखं तालत्रयं प्रोक्तमायामेन प्रमाणितम् ॥ ८३७ ॥
तन्मध्यवर्तिनो वक्ष्ये प्रदेशान्मात्रया मितान् ।
वर्तुलं मस्तकं कार्यं षडङ्गुलमितं बुधैः ॥ ८३८ ॥
अङ्गुलं कर्णमूलान्तदु(मु)त्सेधेन व्यवस्थितम् ।
कर्णमूलात्तथा कर्णौ कार्यावष्टाङ्गुलाहि(य)तौ ॥ ८३९ ॥
नागवल्लीदलप्रख्यौ चतुरङ्गुलविस्तृतौ ।
कर्णमूलस्य नेत्रस्य मध्यं कार्यं नवाङ्गुलम् ॥ ८४० ॥
नेत्रस्य भागे दैर्घ्यं स्यात्सार्धद्व्यङ्गुलविस्तृतम्[3] ।
भ्रुवौ द्व्यङ्गुलविस्तारे[4] दैर्घ्येण तु षडङ्गुले ॥ ८४१ ॥
भ्रुवोर्मध्यप्रदेशस्तु द्वादशाङ्गुलसम्मितः ।
षडङ्गुलं भवेद्भालं केशान्ते मध्यदेशतः ॥ ८४२ ॥

१ F णो । २ D स्त । ३ A तौ । ४ F लि ।

अष्टाङ्गुलं ततश्चाधो द्वादशाङ्गुलविस्तृतम् ।
एकस्तालो भवेदैर्घ्यं ललाटस्य प्रमाणतः ॥ ८४३ ॥

नयनाद्गण्डविस्तारः षोडशाङ्गुलसम्मितैः ।
नासावंशश्च(स्य) दैर्घ्यं स्याच्चतुरङ्गुलसम्मितम् ॥ ८४४ ॥

विस्तारस्त्र्यङ्गुलः प्रोक्तो नासिका चतुरङ्गुला ।
नासापुटस्य विस्तारो द्व्यङ्गुलः परिकीर्तितः ॥ ८४५ ॥

पुटयोरन्तरं प्रोक्तं मूर्द्धभागे षडङ्गुलम् ।
एको भागस्त्वधोभागे तत्र रेखात्रयं भवेत् ॥ ८४६ ॥

तस्याधः प्रोथदेशः स्याच्चतुरङ्गुलमायतः ।
चतुरङ्गुलविस्तारः पीनत्वं चतुरङ्गुलम् ॥ ८४७ ॥

मुखराजे(:) पुटस्यापि मध्यं स्याच्चतुरङ्गुलम् ।
मुखरेखाबहिर्भागे हनुः स्याच्चतुरङ्गुला ॥ ८४८ ॥

चिबुकं तत्र कर्तव्यं पञ्चाङ्गुलमितं बुधैः ।
प्रोथश्च (थाच्च) सूक्ष्मपर्यन्तमास्यरेखा स्वराङ्गुला ॥ ८४९ ॥

मस्तकात्कीकशाखां ( खं ) वा चतुस्तालमितं भवेत् ।
स्यात्केशदेशविस्तारः शीर्षदेशेऽङ्गुलत्रयम् ॥ ८५० ॥

एको भागो भवेन्मध्यं प्रान्ते ( न्तो ) मध्यमितो भवेत् ।
कृतकेसरकः स्कन्धः कर्तव्यः कीकसावधिं ॥ ८५१ ॥

कीकसायाँ तथा कार्याः केसरा दैर्घ्यशालिनः ।
मस्तके च तथा केशाँ द्वादशाङ्गुलदैर्घ्यकाः ॥ ८५२ ॥

तरङ्गिता घनाः स्निग्धाः श्लक्ष्णाः कार्या मनोहराः ।
निगालाद्वित्सपर्यन्तं ग्रीवानलकदीर्घता ॥ ८५३ ॥

तालद्वितयमाख्याता तद्विस्तारोऽङ्गुलत्रयम् ।
स्कन्धमूलपरीणाहः षड्वालाश्चाङ्गुलद्वयम् ॥ ८५४ ॥

---

१ D विस्तृतः । २ F २ । ३ A मुखं राजे । ४ A D F का B कीकशाखान्तं । ५ F मम्रा । ६ D षिः । ७ A खांस्त F पां । ८ A सा । ९ A दैर्घ्यं । १० D शाः द्वौ A शाद्वौ । ११ D र्घिं । १२ A कृष्णाः । १३ B D लद्वय ।

स्कन्धमध्यपरीणाहश्चतुष्पञ्चाशदङ्गुलः।
ग्रीवासन्धिपरीणाहस्त्रितालश्च नवाङ्गुलः॥ ८५५॥

वक्ष्ये(क्षो)देशस्य विस्तारो द्वादशाङ्गुलसम्मितः।
अष्टादशाङ्गुलं दैर्घ्यं वक्षोदेशस्य कल्पितम्॥ ८५६॥

कक्षाकीकसयोर्मध्यं द्विचत्वारिंशदङ्गुलम्।
बाहुदैर्घ्यं भवेत्तत्र प्रोक्तं पञ्चदशाङ्गुलम्॥ ८५७॥

बाहुमूलपरीणाहस्त्रिंशदङ्गुलसम्मितम् (तः)।
बाहुमध्यपरीणाहो वितस्तिद्वयवेष्टनः॥ ८५८॥

बाहुप्रान्तपरीणाहो भवेदष्टादशाङ्गुलः।
जङ्घायाश्च परीणाहो द्वादशाङ्गुलसम्मितः॥ ८५९॥

पलिहस्तस्य दैर्घ्यं तु षडङ्गुलमुदीरितम्।
पलिहस्तपरीणाहो भवेदष्टादशाङ्गुलः॥ ८६०॥

कुष्टिकाया भवेद्दैर्घ्यं षडङ्गुलमुदीरितम्।
कुष्टिकायाः परीणाहो द्वादशाङ्गुलसम्मितः॥ ८६१॥

खुरदैर्घ्यं समुद्दिष्टं षडङ्गुलमितं बुधैः।
भवेत्खुरपरीणाहो विंशत्यङ्गुलसम्मितः॥ ८६२॥

पृष्ठप्रदेशे दैर्घ्यं च चतुस्तालमुदाहृतम्।
कक्षादेशपरीणाहः सप्ततालो दशाङ्गुलः॥ ८६३॥

मध्यभागपरीणाहः शताङ्गुलमितो भवेत्।
रन्ध्रस्थाने परीणाहः सप्ततालो दशाङ्गुलः॥ ८६४॥

रन्ध्रोपरन्ध्रयोर्मध्यं विंशत्यङ्गुलमायतम्।
त्रिकस्थानस्य विस्तारो द्विगुणैः षोडशाङ्गुलैः॥ ८६५॥

जघनस्य तु विस्तारः षट्चत्वारिंशदङ्गुलः।
पुच्छमूलं भवेद्भागो नाहेन द्वादशाङ्गुलम्॥ ८६६॥

---

१ A मन्तरम्। २ B श्चङ्गुलः स च। ३ B D ली। ४ A ख। ५ A श्च। ६ D णः।

वर्तिकादैर्घ्यमाख्यातं विंशत्यङ्गुलसम्मितम् ।
तत्र बालाः प्रकर्तव्याश्चमरीपुच्छसन्निभाः ॥ ८६७ ॥

दैर्घ्यं जनन्यै[1](न)रोहाद्वा द्वाविंशत्यङ्गुलं[2] भवेत् ? ।
वक्त्र( क्र )सक्थिगतं दैर्घ्यं षट्त्रिंश[3]दङ्गुलैर्मितम् ॥ ८६८ ॥

मूले तस्य परीणाहः स्याच्चत्वारिंशदङ्गुलैः[4] ।
सक्थिमध्यस्य नाहः स्यादेकोनत्रिंशदङ्गुलः ॥ ८६९ ॥

सक्थिप्रान्तपरीणाहस्तालद्वितयसन्निभः ।
नवाङ्गुलायता स्थूला(रा) नाहेन त्रिंशदङ्गुला ॥ ८७० ॥

उपरन्ध्रान्तमारभ्य[5] कोशस्थानं तु तालतः ।
भागार्यं[6]तो भवेत्कोशो मुष्कावष्टाङ्गुलायतौ ॥ ८७१ ॥

स्थूरयोर्बुध्नभागस्थे जङ्घे च पलिहस्तकैः[7] ।
कुर्ष्टुके[8] च खुरद्वन्द्वं लेखा[9](ख्यं)पौरस्त्यपादवत् ॥ ८७२ ॥

स्कन्धौ[10] मुखं च मध्यं च कृशं कार्यं प्रमाणतः ।
वडवाया महद्वक्षो जघनं च सु[11]विस्तृतम् ॥ ८७३ ॥

एतल्लक्षणमुद्दिष्टं वाजिनां सोमभूभुजा ।

इति हयचित्रम् ।

गजस्य वक्ष्यते लक्ष्म सूत्रमानानुसारतः ॥ ८७४ ॥

गजस्य लक्षणं वक्ष्ये प्रमाणेन प्रमाणितम् ।
चित्रकर्मोपयोगार्थं विचित्रं[12] चित्रवेदिनाम् ॥ ८७५ ॥

केशान्ततः समारभ्य यावत्स्यात्प्रतिमानकम् ।
मुखं तत्कथितं तज्ज्ञैर्गजानां चित्रवेदिभिः ॥ ८७६ ॥

ऊर्ध्वं केशान्ततः शीर्षं यावत्कुम्भसमुद्भवः ।
शीर्षस्योपरि कुम्भौ द्वौ कर्तव्यौ कुचसन्निभौ ॥ ८७७ ॥

---

१ A जनीरोह B जनैर्निरोहाद्वा F जनैरोह । २ A लो । ३ A त्रि । ४ A लम् । ५ A भ्याकाश । ६ A याता । ७ D लाया बु । ८ F ष्टा । ९ F कै । १० A छे केचित् । ११ D खं B F खां । १२ D F न्धो । १३ A स । १४ B D ज्ञानार्थं B विस्तृतम् ।

वायुकुम्भस्य शीर्षस्य सन्धेरापतिमानतः ।
पिप्पलीदन्तवेष्टाभ्यां वेष्टितं मुखमीरितम् ॥ ८७८ ॥
त्रिधा विभज्य त्रितालं त्रीन्भागान् परिकल्पयेत् ।
त्रिधा विभज्य तद्वक्रं त्रितालं परिकल्पयेत् ॥ ८७९ ॥
ऋजूनि लम्बप(सू)त्राणि विधेयानि त्रयोदश ।
एकवालविभिन्नानि चित्रकर्मविशारदैः ॥ ८८० ॥
तत्तत्प्रमाणकान्येव तिर्यक्सूत्राणि कारयेत् ।
एकादशैव तानि स्युः करिणां चित्रकर्मणि ॥ ८८१ ॥
विंशं शैतं समुद्दिष्टाः कोष्ठास्तत्सूत्रमध्यगाः ।
तत्र सूत्रेषु वक्ष्यामि प्रदेशान्नागसम्भवान् ॥ ८८२ ॥
लम्बसूत्रं बहिष्ठं यत्तच्छिष्टं प्रतिमानके ।
निदाने वायुकुम्भाग्रे दन्तमूले द्वितीयकम् ॥ ८८३ ॥
बिन्दुमध्ये मदच्छिद्रं(द्रे) सक्कदेशे तृतीयकम् ।
कण्ठे च पिप्पलीदेशे कुम्भप्रान्ते तुरीयकम् ॥ ८८४ ॥
आसने कर्णमध्ये च पुरोनखरपश्चिमे ।
अंशेन कर्णपूरेण (च) नखरं (रे) पश्चिमे तथा ॥ ८८५ ॥
द्वितीये नखरे लग्नं कार्यं सूत्रं तु पञ्चमम् ।
अंशे(से)कर्णदलस्याग्रे पश्चान्नग(ख)रपश्चिमे ॥ ८८६ ॥
सूत्रं षष्ठं प्रकुर्वीत सूत्रन्यासविशारदः ।
मध्यदेशे प्रयुञ्जीत लम्बसूत्रचतुष्टयम् ॥ ८८७ ॥
सूत्राणां दशकं त्वेवं कथितं सूत्रवेदिभिः ।
पेचके चापराङ्घ्रि(ङ्घ्रे)श्च पै(पा)श्चात्यनखमध्यगः(गम्) ॥ ८८८ ॥
एकादशं भवेत्सूत्रं द्वादशं जघने स्मृतम् ।
त्रयोदशं बहिष्ठं तु पुच्छमूले सुघट्टितम् ॥ ८८९ ॥
लम्बसूत्रक्रमो ह्येष कुञ्जरस्य निरूपितः ।
तिर्यक्सूत्राणि वक्ष्यामि सङ्क्रान्तानि प्रदेशतः ॥ ८९० ॥

---

१ A युं B F र्यु । २ F त । ३ F वं । ४ B D स्ता । ५ F विंशतं B D शच्छ । ६ D हिः पृष्ठं तत् । ७ A म । ८ D ध्य । ९ D adds this line । १० B आसने । ११ D तृतीय । १२ D सूत्रे । १३ D शैः । १४ D श्चिमं ख । १५ A मो । १६ A पञ्च । १७ D वा । १८ A ङ्घ्रस्य । १९ A पाद्या-त्यनकगा D पश्चात्पा ।

मस्तके वंशपृष्ठे च सूत्रमूर्ध्वं प्रकल्पयेत् ।
वायुकुम्भस्य शीर्षस्य सन्धौ पिप्पलिदेशतः ॥ ८९१ ॥

पेचके च विधातव्यं सूत्रमेतद्द्वितीयकम् ।
वायुकुम्भस्य मध्ये च नेत्रकर्णदलाग्रतः ॥ ८९२ ॥

पेचकस्याप्यधोभागे सूत्रं कार्यं तृतीयकम् ।
मुखमध्ये सृक्कदेशे पुच्छमस्तकसङ्गतम् ॥ ८९३ ॥

चतुर्थं कल्पयेत्सूत्रं चित्रकल्पेन[1] कोविदः ।
प्रतिमानात्मवेष्टाच्च कण्ठाच्च गुदसङ्गतम् ॥ ८९४ ॥

पञ्चमं रचयेत्सूत्रं तिर्यक्सूत्रं[2]विशारदः ।
दन्ताग्रात्वत्सदेशाच्च कक्षाभागात्समागतम्[3] ॥ ८९५ ॥

षष्ठं सूत्रं विधातव्यं चित्रलेखनकोविदैः[4] ।
पञ्चतालं भवेद्गात्रं जठरं पञ्चतालकम् ॥ ८९६ ॥

चतुस्तालं तथा प्रोक्तमपरं चित्रवेदिभिः ।
मुख्यं च (खस्य) त्रिगुणं दैर्घ्यं कर्णात्पुच्छावधि स्थितम् ॥ ८९७ ॥

जठरेण समं गात्रं तालहीनं ततोऽपरम् ।
एतल्लक्षणमुद्दिष्टं सूत्रमानानुसारतः[5] ॥ ८९८ ॥

अनेनैव प्रमाणेन लेखनीया गजाकृतिः ।

इति गजचित्रम् ।

असङ्ख्यातानि सत्त्वानि शक्यन्ते नैव भाषितुम् ॥ ८९९ ॥

तत्तद्रूपानुसारेण लेखनीयानि कोविदैः[6] ।
सादृश्यं लिख्यते यत्तु दर्पणे प्रतिबिम्बवत् ॥ ९०० ॥

तच्चित्रं विद्धमित्याहुर्विश्वकर्मादयो बुधाः ।
आकस्मिकं लिखामीति यदनुद्दिश्य लिख्यते ॥ ९०१ ॥

---

१ D कल्पन B कर्मणि। २ A त्रं। ३ A तः। ४ A दः। ५ A गम्। ६ D चित्रके। ७ A अमुकं वि ।

आकारमात्रसंम्पन्ने[1] तदविद्धमितिस्मृतम् ।
शृङ्गारादिरसो यत्र दर्शनादेव गम्यते ॥ ९०२ ॥

भावचित्रं तदाख्यातं चित्तकौतुककारकम् ।
सदुज्ज्वैर्वर्णकैर्लेख्यं धूलिचित्रं विदुर्बुधाः ॥ ९०३ ॥

सुप्रमाणं तथा विद्धमविद्धं भावचित्रकम् ।
रसधूलिगतं प्रोक्तं मानसोल्लासपुस्तके ॥ ९०४ ॥

निर्मितं चित्रलक्ष्मेदं चित्तितोदनहारकम् ।
भूलोकमल्लदेवेन चित्रविद्याविरञ्चिना ॥ ९०५ ॥

इति सर्वचित्रप्रकरणम् ।

चित्रं लक्षणसंयुक्तं लेखयित्वा महीपतिः ।
प्रासादे रुचिरे तुङ्गे सौवर्णकलशान्विते ॥ ९०६ ॥

नानावर्णविचित्राङ्गैंरचनापरिशोधितैना ।
चित्रवस्त्रैंसमाकीर्णवितानेनोपरिक्षिते ॥ ९०७ ॥

विशाले स्तम्भविन्यस्तपट्टिकाधारधारिते ।
वरदारुसमाकीर्णे[9] वेणुकाग्रैंविनिर्मिते ॥ ९०८ ॥

गुञ्जापुञ्जसुसंछन्ने[11] मृत्तिकाश्लक्ष्णभित्तिके ।
धा(ध)राकुट्टिमशोभाढ्ये गोमयालेपपावित[12] ॥ ९०९ ॥

पञ्चवर्णवितानाढ्ये मध्यपद्मविभूषिते ।
[13]तिष्ठेद्विवाससंयुक्तो भुवनाश्रयसंज्ञिनि ॥ ९१० ॥

ईशानकोणभागे तु सर्वलक्षणसंयुतम् ।
दक्षिणे मुखशोलाङ्के[15] देवतारूपचित्रितम् ॥ ९११ ॥

स्नानगेहं तु तत्पार्श्वे कर्तव्यं वेदिकायुतम् ।
होमशाला तदभ्याशे वन्हिकुण्डविमण्डिता ॥ ९१२ ॥

धूमनिर्गमनोपायकृतजालपरिष्करा ।
कृत्वैवं देवतागारं तत्र सम्पूजयेद्धरिम् ॥ ९१३ ॥

---

१ A कं सत्त्वे । २ A वित । ३ F त्रं । ४ B विद्यां विरच्यता । ५ A ङ्गं । ६ A शोभिता B शोभिना । F शोधता । ७ F ख । ८ D शोभि । ९ A र्णं । १० A कम्रा । ११ A संच्छि D विच्छि । १२ D चिते । १३ B तिष्ठते सः समायुक्तो । १४ F प । १५ D शोभा । १६ A तैरु । १७ F मस्य ।

हरिद्रादलसञ्छन्ने वालमूलकभित्तिके ।
मरुकैर्दमनैर्बद्धे[1] सिकतामयभूतले ॥ ९१४ ॥

सेचितो[2] ( ते ) गन्धतोयैश्च मण्डपे सुमनोरमे ।
कान्ताभिर्वीज्यमानस्तु ग्रीष्मे मध्यं दिनं नयेत् ॥ ९१५ ॥

प्रासादस्योर्ध्व[3]भूभागप्राङ्गणे सुमनोहरे ।
सुधाकरसुधाश्यो[4]( श्वो )तसौ[5]चिते शशिवारिणा ॥ ९१६ ॥

पुष्पप्रकर[6]शोभाढ्ये मृदुगन्धवहे सुखे ।
सुखसंलापयोग्याभिः प्रेयसीभिः समन्वितः ॥ ९१७ ॥

गीतज्ञैर्वाद्यनिपुणैस्तद्गुणज्ञानकोविदैः ।
विदग्धैर्वाक्यचतुरैः परिहासविनोदिभिः ॥ ९१८ ॥

साहित्यरसभावज्ञैः कथाकथनकोविदैः ।
प्रसादपात्रैश्चयुतो निशार्धं गमयेन्नृपः ॥ ९१९ ॥

ततो विसृज्य तान्सर्वान्सुखशालामथावसेत्[7] ।
प्रियया सह सम्प्रीत्या निशाशेषं नयेत्सुखी ॥ ९२० ॥

वसन्ते च तथा ग्रीष्मे एवंविधगृहोषितः ।
शीतलान्सुखसंस्पर्शान्भोगान् सेवेत भूपतिः ॥ ९२१ ॥

नीरन्ध्रके निवाते च शीतसी[8]करवर्जिते ।
हर्म्ये चतुष्किकायां वा वर्षासु निव[9]सेन्नृपः ॥ ९२२ ॥

गवाक्षैः शोभिते हर्म्ये रम्ये सर्वप्रकाशके ।
निवातभूगृहे भव्ये हर्म्ये वा शीतवर्जिते ॥ ९२३ ॥

तिरस्करिण्या पिहिते कपा[10]टेन निगूहिते ।
वराङ्गनापीवरोद्वृत्तस्तनस्तबकमध्यगः ॥ ९२४ ॥

हेमन्ते शिशिरे राजा निवसेच्छीतवर्जितः ।
एवं दिव्येषु गेहेषु निवसेद्यत्र भूपतिः ॥ ९२५ ॥

---

१ A द्ध। २ B F सेवि D सर्व। ३ A स्यार्ध। ४ B द्योत D श्वे। ५ D सिं। ६ A का। ७ D विशेत्। ८ A सी। ९ D निविशेन्नृ। १० B पं D पेरणे।

ऋतुकालविभागेषु गृहभोगः प्रकीर्त्तितः।
एवं गृहोपभोगोऽयं कथितः सोमभूभुजा ॥ ९२६ ॥

इति गृहोपभोगः ॥ १ ॥

अथ स्नानोपभोगोऽयं कथ्यते सुमनोहरः।
स्वगृहाभ्यन्तरेशानकोणे स्नानगृहं न्यसेत् ॥ ९२७ ॥

काञ्चनस्तम्भरुचिरं स्फुटत्स्फटिकवेदिकम्।
काचकुट्टिमशोभाढ्यं दरदाक्लृप्तभित्तिकम् ॥ ९२८ ॥

चीनपट्टवितानेन चित्रेण परिशोभितम्।
वरुणस्य वितानेन स्पर्धमानं स्वतेजसा ॥ ९२९ ॥

तत्र स्थित्वा महीपालः स्नानभोगमथाचरेत्।
केतकीबहलामोदैर्जातीपरिमलोत्करैः ॥ ९३० ॥

पुन्नागचम्पकोद्दामगन्धसंवासितैस्तिलैः।
यन्त्रसम्पीडितैस्तैलं गृहीत्वाऽभ्यङ्गमाचरेत् ॥ ९३१ ॥

केतकीगर्भपत्राभनखरैस्तरुणीजनैः।
सुकुमारकरस्पर्शहर्षोत्कर्षकरैर्वृतः ॥ ९३२ ॥

औषधीगन्धसंसिद्धैः स्तुत्यैर्दोषापहैः शुभैः।
तैलैरभ्यज्य गात्राणि मल्लैः संवाहवेदिभिः ॥ ९३३ ॥

मृदुहस्ततलैः स्वैरं मर्दनं च समाचरेत्।
कोष्ठं पटोलकं मुस्तां ग्रन्थिपर्णं निशाद्वयम् ॥ ९३४ ॥

पालकं तगरं मांसं ( सी ) वाजिगन्धा च पुष्करम्।
एषां मूलानि संगृह्य छायाशुष्काणि कारयेत् ॥ ९३५ ॥

निम्बस्य राजवृक्षस्य तुलस्याश्चार्जकस्य च।
पत्राण्येषां समाहृत्य प्रागुक्तैः सह लेपयेत् ॥ ९३६ ॥

एलाजातीसर्षपाश्च तिलाः कुस्तुम्बुराण्यपि।
बाकुची चक्रमर्दश्च बीजान्येषां समाहरेत् ॥ ९३७ ॥

---

१ D लि। २ F क्ष। ३ A ट्टि। ४ A पत्रगर्भा। ५ B च। ६ B D स्य F ष्व। ७ B द्द। ८ B का। ९ B क्ता। १० B ह्व। ११ D ख। १२ B प्रकारये।

लवङ्गं पद्मकं लोध्रं श्रीखण्डं सुरदारु च ।
अगरुं सरलं चैव काष्ठान्येतानि निक्षिपेत् ॥ ९३८ ॥

नागकेसरपुन्नागकान्ता(न्त)कुङ्कुमचम्पकम् ।
पुष्पाण्येतानि संगृह्य तेषां मध्ये विनिक्षिपेत् ॥ ९३९ ॥

गुग्गुलुं सैन्धवं चैव बोलं सर्जरसन्तथा ।
द्रव्याण्येतानि सम्पेष्य पयसा काञ्जिकेन वा ॥ ९४० ॥

अभ्यक्तगात्रो नृपतिरुद्वर्तनमथाचरेत् ।
अधुना स्नेहनिर्वृत्या(त्यै) सुगन्धा कथ्यते खली ॥ ९४१ ॥

आरनालसुसंसिद्धगोधूमश्लक्ष्णचूर्णकैः ।
मदनस्य च मूलेन चूर्णितेन विमिश्रिता ॥ ९४२ ॥

स्नेहापनयने योज्या पिशुनेनोत्तमा खली ।
नानातीर्थाहृतैस्तोयैर्विमलैर्मलहारिभिः ॥ ९४३ ॥

सुगन्धवासनायुक्तैः सुखोष्णैः स्पर्शसौख्यदैः ।
एभिरापूरितैः पात्रैः लोहकूर्परगादिभिः ॥ ९४४ ॥

कलशैः काञ्चनोत्पन्नैः कान्तैः कान्ताकरोत्थितैः ।
शातकुम्भमयैः कुम्भैः राजद्भिरपि राजतैः ॥ ९४५ ॥

करिकुम्भयुगप्रख्यपयोधरविडम्बिभिः ।
चन्द्रकान्तिमुखाभासाः परिपूर्णपयोधराः ॥ ९४६ ॥

स्वलावण्यतरङ्गिण्यः प्रत्यक्षा जलदेवताः ।
मेघकान्ता इव श्यामाः कान्ताः कनकविद्युतः ॥ ९४७ ॥

अभिषेकाम्बुधारोत्थस्फुरत्स्तनितविभ्रमाः ।
इतस्ततः पर्यटन्त्यः समाः सौम्या वरस्त्रियः ॥ ९४८ ॥

स्नपनं नृपतेः कुर्युस्तन्मुखाहितदृष्टयः ।
सुगन्धामलकैः श्लक्ष्णैरनुलिप्य शिरोरुहान् ॥ ९४९ ॥

---

१ B पद्मं । २ F लं । ३ A लः । ४ A सस्त A कज्जलसः । ५ F मा । ६ A सूत्र । ७ F व । ८ BD पेष्या । ९ F खु । १० D F ज्झि । ११ A जि । १२ BD सक्त ।

तान्यप्यपनयेयुस्ताः सुखोष्णैः सलिलैः पुनः।
वङ्गचोलकलिङ्गनन्द्रमलयक्षेत्रजातयाँ ॥ ९५० ॥

धूपवासितयात्यर्थं कृताँलेपं हरिद्रया।
ईषच्छीतेन तोयेन रागिण्योँ रागहेतवः ॥ ९५१ ॥

स्नपयेयुर्महीपालं स्नानभोग इतीरितः।
निर्वर्त्यैवं नृपः स्नानं परीधायाङ्गमार्जनम् ॥ ९५२ ॥

सितं सुधौतं वसनं घृतमार्द्रं परित्यजेत्।
भूलोकमल्लदेवेन स्नानभोग उदाहृतः ॥ ९५३ ॥

इति स्नानविधिः ( भोगः ) ॥ २ ॥

इदानीं पादुकाभोगः कथ्यते ललिँतक्रमः।
श्रीपर्णीदारुघटिते हरिचन्दननिर्मिते ॥ ९५४ ॥

गिरिमल्लीसमुद्भूते स्यन्दँनद्रुमकल्पिते।
मयूरपिच्छगुञ्जादि(भिः) समन्तात्परिशोभिते ॥ ९५५ ॥

चर्मणा निर्मिते वापि नानावर्णसुरञ्जिते।
गजदन्तसमुद्भूते सुवर्णरचनान्विते ॥ ९५६ ॥

विचित्रे सुदृढे श्लक्ष्णे शिञ्जाने सुमनोहरे।
लघुच्छत्रकृताँधारे सुस्पर्शे पादुके समे ॥ ९५७ ॥

अध्यास्ते यन्महीपालः पादुकाभोग इष्यते।
ईरितः पादुकाभोगः सोमेश्वरमहीभुजा ॥ ९५८ ॥

इति पादुकाभोगः ॥ ३ ॥

इदानीमुत्तमो भोगस्ताम्बूलस्य निगद्यते।
स्नानगेहाँदथागम्य प्रविश्यँ सुखमन्दिरम् ॥ ९५९ ॥

ताम्बूलभोगमन्विच्छंस्ताम्बूलस्याधिकारिणम्।
समाहूय महीपालस्ताम्बूलास्वादनं चरेत् ॥ ९६० ॥

---

१ D तम। २ F य। ३ A त। ४ A ष्यौ। ५ A F निर्व्वैवं। ६ A लिखि। ७ F स्पंदन। ८ F था A पा। ९ F शंपा। १० A भोगा। ११ A दुपा। १२ D शेत।

नैलवर्तिपुरोद्भूतांस्तथेश्वरपुरोद्भवान्।
काण्डिकापुरजान्वापि क्रमुकौघान् सुपाकिनः॥ ९६१॥

भङ्गे पाटलसङ्काशान् कषायमधुरान्वरान्।
फालान् कृत्वोष्णतोयेन प्रक्षाल्याशोष्य घर्षितान्॥ ९६२॥

कस्तूरिकल्कसंयुक्तान् छायाशुष्कान् मनोहरान्।
तरुणानि सवल्कानि कथितानि प्रयत्नतः॥ ९६३॥

वनवासप्रभूतानि क्रमुकस्य फलानि च।
कृत्वा त्वचा वियुक्तानि छायायां शोषितानि च॥ ९६४॥

चतुर्भागनियुक्तानि ताम्बूलार्थं समाहरेत्।
वनवासे राष्ट्रराजे सम्भूतानि वराणि च॥ ९६५॥

कर्पूरवल्लीजातानि नागवेल्युद्भवानि च।
उषितानि समं वल्या वत्सरं वैरकेषु च॥ ९६६॥

दानि(नादे)योदकसिद्धानि पाण्डुराणि गुरूण्यपि।
पर्णानि प्रान्तकृत्तानि द्विपञ्चाशन्मितानि च॥ ९६७॥

बहिस्थकृष्णपर्णानि विडैके विदि(हि)तानि च।
शैलोदकसमुद्भूतशिलापाकसमुद्भवम्॥ ९६८॥

मुक्ताशुक्तिभवं चूर्णं वीटकेषु निधापितम्।
अपक्वमुज्ज्वलं स्वच्छं कर्पूरस्फटिकोपमम्॥ ९६९॥

मलयाचलभृङ्गोत्थलतानिर्याससम्भवम्।
तलिनं शकलाकारं चन्द्रकान्तसमप्रभम्॥ ९७०॥

सहकारसमानेन सौरभेण समन्वितम्।
ईशावासाभिधानं च कर्पूरं सहजं वरम्॥ ९७१॥

समानीय महीपालस्ताम्बूलार्थं प्रकल्पयेत्।
कस्तूरी चूर्णकं श्लक्ष्णं घनसारस्य चूर्णकम्॥ ९७२॥

---

१ F मे D न B D एलाचूर्ण। २ D पू। ३ D त्था। ४ A ङ्गे। ५ D लि। ६ D क। ७ D फालीं F हालिं। ८ D F रमान्। ९ F नि। १० D छायया। ११ D लि। १२ A वे। १३ B D च F चकेषु। १४ D F ना। १५ B D F क्ता। १६ D वा। १७ D वि। १८ B D लि।

मिश्रयित्वा समं कृत्वा ताम्बूलार्थं नियोजयेत् ।
कस्तूरीशशिकङ्कोलजातीफलसुचूर्णकम् ॥ ९७३ ॥

श्लक्ष्णं करम्बकं हृद्यं नानापरिमलोत्कटम् ।
खदिरकाथचूर्णं[1]तु कस्तूरीक्षोदमिश्रितम् ॥ ९७४ ॥

श्रीखण्ड[2]कल्कसंयुक्तं कर्पूररजसान्वितम् ।
मेलयित्वा समैर्भागैर्गुटि[3]का कल्पिता शुभा ॥ ९७५ ॥

त्रिदोषशमनी कण्ठ्या दन्तानां च बलावहा ।
अन्यत्खदिरसारस्य चूर्णं कोष्टाम्लसंयुतम् ॥ ९७६ ॥

जातीफलस्य चूर्णेन मिश्रितं मुखरञ्जनम् ।
जम्बीरबीजपूरस्य कलिकाभिः समन्वितम् ॥ ९७७ ॥

कर्पूरपूर्वं खादेच्च तदनु क्रमुकान्वितम् ।
इत्थं विविधयोगेन ताम्बूलं पृथिवीक्षिता ॥ ९७८ ॥

यत्स्वाद्यते स ताम्बूलभोगश्चतुरवर्णितः ।
ताम्बूलभोगः कथितः श्रीसोमेश्वरभूभुजा ॥ ९७९ ॥

इति ताम्बूलभोगः ॥ ४ ॥

विलेपनोपभोगोऽयं कथ्यते भोगिनां प्रियः ।
अच्छं विलेपनं रम्यमङ्गसौख्यप्रदायकम् ॥ ९८० ॥

ततः समाचरेद्रूपैः[4] कान्ताकरमनोहरम् ।
चन्दनागरुकर्पूरकस्तूरीकुङ्कुमान्वितम् ॥ ९८१ ॥

सुरभीकेसरोन्मिश्रग्रन्थिपर्णसमायुतम् ।
जातीपूगफलोपेतं सुश्लक्ष्णं भूरि धूपितम् ॥ ९८२ ॥

वसन्ते लेपनं कुर्याद्यक्षकर्दममुत्तमम् ।
कक्षाभागे कर्णसन्धौ नाभौ [5]वंक्षणयोरपि ॥ ९८३ ॥

स्वेदगन्धविनाशार्थं सान्ध्याख्यं लेपमाचरेत् ।
चन्दनस्य तरोर्मूलं ग्रन्थिकोटक(र)कर्पूरम् ॥ ९८४ ॥

---

१ A रब । २ F ण्डं । ३ A लि । ४ F षः । ५ F त । ६ A व । ७ A चि । ८ B साध्या । ९ B D F ख ।

गन्धोत्कटं हिमस्पर्शं वरिष्ठं तन्निरूपितम् ।
यच्छेदाद्रक्ततां धत्ते घर्षे पीतत्वमेव च ॥ ९८५ ॥

शोषे शुभ्रत्वमायाति स्वादे तिक्तरसं भवेत् ।
पुन्नागकेसरैर्युक्तं श्रीखण्डं शशिना युतम् ॥ ९८६ ॥

केतकीमल्लिकोन्मिश्रपाटलीगन्धवासितम् ।
शशाङ्ककरसङ्काशं हिमडिण्डीरपाण्डुरम् ॥ ॥ ९८७ ॥

निदाघे शीतलं लेपं नृपः कुर्यात्सदुज्ज्वलम् ।
श्रीखण्डं तादृशं भव्यं निघृष्टं पेषितं पुनः ॥ ९८८ ॥

मसृणं लेपयेद्गात्रं स्वच्छमच्छं विलेपनम् ।
काश्मीरदेशसम्भूतं हरिचन्दनकेसरम् ॥ ९८९ ॥

लोहितं तत्समादाय पेषण्या श्लक्ष्णपेषितम् ।
कटुतैलसमायुक्तं लाक्षारागसमप्रभम् ॥ ९९० ॥

तादृशं कुङ्कुमं श्रेष्ठं लेपनार्थं महीभृताम् ।
कुङ्कुमं लघुसम्मिश्रं घनसारसुधूपितम् ॥ ९९१ ॥

कुर्वीत लेपनं रम्यं वर्षाकाले नरेश्वरः ।
मदतारुण्यसम्पन्नमृगनाभिसमुद्भवा ॥ ९९२ ॥

गोलकाकारसंस्थाना किञ्चित्कुङ्कुमपिञ्जरा ।
मृदिता चिक्कणीभूता द्विगुणेव विलोक्यते ॥ ९९३ ॥

दग्धा याति न भस्मत्वं लसत्सिमिसिमास्वना ।
स्वादे तिक्ता कटुर्वाऽपि तुलने लघुतां गता ॥ ९९४ ॥

तादृग्विधा वरिष्ठा या कस्तूरी सा नृपोचिता ।
एवंविधां समानीय कस्तूरीं दिव्यसौरभाम् ॥ ९९५ ॥

पेषण्या पेषयित्वा तां तोयमिश्रां विलेपयेत् ।
गन्धि(न्ध)मार्जारबीजानि समाहृत्य विनिक्षिपेत् ॥ ९९६ ॥

---

१ A तन्निरूप्यते । २ D च्छिद्रा । ३ B D पा । ४ A रस । ५ A म । ६ A धा ७ A नाय्या । ८ A री । ९ A भा ।

उष्णतैले समुद्धृत्य कटुतैलेन लेपयेत् ।
विकीर्य च निशाचूर्णं छायायां च विशोषयेत् ॥ ९९७ ॥

एवं सांचिनुयाद्भूरि क्वाथयेत्संचितान्यपि ।
श्रीवृक्षाम्रकजम्बूनां तुलसीबीजपूरयोः ॥ ९९८ ॥

पल्लवैः क्वथितैस्तोयैर्बीजानि क्षालयेत् पुनः ।
प्रक्षाल्य शोषयेत्तज्ज्ञस्ततः कुर्याच्च खण्डशः ॥ ९९९ ॥

निक्षिप्य वारिमध्ये च बीजपूरफलत्वचः ।
क्वथयेन्मोचयेत्पश्चात्ततः स्नेहोऽपि निःसरेत् ॥ १००० ॥

तोयोपरिस्थितं स्नेहं शुक्त्या काञ्चनजातया ।
आहरेच्च प्रयत्नेन यद्वा बीजानि तापयेत् ॥ १ ॥

पेषण्यां पीडयित्वा च स्नेहं निःसारयेद्बुधः ।
निःसारितं ततः स्नेहं सितया धूपयेत्पुनः ॥ २ ॥

पश्चाच्च लघुकर्पूरैर्वारं वारं च धूपयेत् ।
पुंल्लिङ्गं नाम तं प्राहुर्दिव्यगन्धं मनोहरम् ॥ ३ ॥

नृपाणां लेपने शस्तं हेमन्तशिशिरादिषु ।
चन्दनं बहुसौरभ्यं मिलितं पद्मकेसरैः ॥ ४ ॥

उत्पलाभासितं लेपे शरत्काले प्रशस्यते ।
नवकेसरसम्भूतं कुङ्कुमं कायरञ्जनम् ॥ ५ ॥

सुगन्धितैलसंयुक्तं शीतकालेऽनुलेपनम् ।
वस्त्रभूषानुसारेण शृङ्गाराङ्गविलेपनम् ॥ ६ ॥

ललाटे बाहुशिखरे कण्ठे वक्षस्यथोदरे ।
नानागन्धसमोपेतं नानावर्णसमन्वितम् ॥ ७ ॥

विलेपनोपभोगाय क्रियते यद्विलेपनम् ।
विलेपनोपभोगोऽयं वर्णितः सोमभूभुजा ॥ ८ ॥

इति विलेपनभोगः ॥ ९ ॥

१ F द्भू। २ D क्वा। ३ A ततः। ४ A क्वा। ५ D पिष्ट। ६ D श्रि।

वस्त्राङ्गउ(णामु)पभोगोऽयमधुना परिकीर्त्यते[1]।
अश्विनी वस्त्रदा प्रोक्ता रोहिणी धनवर्धिनी ॥ ९ ॥

पुनर्वसौ(स्वोः) वसुप्राप्तिः पुष्ये सौख्यं प्रवर्तते।
उत्तरायां यशोलाभो हस्ते सिद्धिस्तु कर्मणाम् ॥ १०१० ॥

चित्रायां शुभसम्प्राप्तिः स्वात्यां सौभाग्यसम्पदः।
विशाखायां जनप्रीतिर्मैत्रे मित्रसमागमः ॥ ११ ॥

तुष्टिः स्यादुत्तराषाढे धनिष्ठा धान्यपूरणी।
उत्तरायां शुभप्राप्ती रेवती रत्नवृद्धिकृत् ॥ १२ ॥

एवमृक्षगणः प्रोक्तो नवीनाम्बरधारणे।
बुधे धनागमं विद्यात्प्रजावृद्धिर्भवेद्गुरौ ॥ १३ ॥

आयुः प्रवर्धते शुक्रे नूतने वस्त्रधारणे।
गृहोत्सवे विवाहे च परभूपालसङ्गमे ॥ १४ ॥

उत्सवेषु च सर्वेषु गीतनृत्यविनोदने।
दानकर्मणि यज्ञे च तथा युद्धमहोत्सवे ॥ १५ ॥

जये नवाम्बरं धार्यं न दुष्यति कदाचन।
कृतानुलेपो राजेन्द्रो वस्त्रभाण्डाधिकारिणम् ॥ १६ ॥

आनेतुमादिशेद्वस्त्राण्युत्तमानि बहूनि च।
पोद्दालपुरजातानि चीरपल्लीभवानि च ॥ १७ ॥

नागपत्तनजातानि चोलदेशोद्भवानि च।
अल्लिकार्कुलजातानि सिंहलद्वीपजानि च ॥ १८ ॥

अणिलावाडजातानि मूलस्थानोद्भवानि च।
तोण्डीदेशसमुत्थानि पञ्चपट्टणजानि च ॥ १९ ॥

भिन्नजाता(ती)नि दिव्यानि महाचीनभवानि च।
कलिङ्गदेशजातानि वङ्गदेशभवानि च ॥ १०२० ॥

---

१ D वर्ण्यं। २ A भा। ३ A वं क। ४ D वि। ५ F ज्ञा। ६ A णः। ७ F दा। ८ D F कर। ९ F वेगा A वेङ्गा।

वसनानि विचित्राणि पट्टसूत्रमयानि च ।
कार्पासक्षौमसूत्राणि रोमभिर्निर्मितानि च ॥ २१ ॥

श्वेतानि रक्तवर्णानि पीतानि हरितानि च ।
नीलानि च तथा प्रान्ते पल्लवेषु सितानि च ॥ २२ ॥

एतद्व्यत्ययभिन्नानि सितलेखामयानि च ।
नानावर्णसुरेखाणि पञ्चवर्णोज्ज्वलानि च ॥ २३ ॥

चक्ररेखासुरम्याणि रेखात्रययुतानि च ।
उत्तरीया चे(रावर)रेखाणि मध्य(ध्ये)सूक्ष्मसुरेखैया ॥ २४ ॥

अङ्गुल्यायतरेखाणि सूक्ष्मरेखाणि मध्यतः ।
अङ्गुलीद्वयरेखाणि वृत्तरेखाणि कुत्रचित् ॥ २५ ॥

चतुष्कोणसुरेखानि क्वचिद्बिन्दुयुतानि च ।
सुश्लक्ष्णानि सुरम्याणि घनानि विरलानि च ॥ २६ ॥

लघूनि बहुमूल्यानि गुरूणि च दृढानि च ।
प्रक्षालेऽधिकरङ्गानि रञ्जितानि च यन्त्रकैः ॥ २७ ॥

तन्तुबन्धसुरक्तानि नानावर्णकृतानि च ।
मञ्जिष्ठारागरक्तानि लाक्षाद्रवयुतानि च ॥ २८ ॥

कौसुम्भरसलिप्तानि सिन्दूरारुणितानि च ।
हरिद्रारागमिश्राणि नीलीरागोत्कटानि च ॥ २९ ॥

अभयारसकृष्णानि निशानीलीमयानि च ।
शुकपिच्छसवर्णानि केकिकण्ठच्छवीनि च ॥ १०३० ॥

पिच्छाकपिच्छवर्णानि हंसकुन्दनिभानि च ।
चीरघट्टकास(पट्टक-शे)लाकप्रच्छदा(दो)पाङ्गिकानि च ॥ ३१ ॥

पट्टिका च पटीपट्टं पट्टाश्च विविधाः शुभाः ।
अङ्गिका च तथोष्णीषकैपि(कोशि)का विविधाकृतिः ॥ ३२ ॥

प्रावारा विविधाकारा दर्शिता वस्त्रधारिभिः ।
विचित्रवर्णवस्त्राणि पट्टसूत्रमयानि च ॥ ३३ ॥

---

१ D च । २ F वेषाणि । ३ F रक्ष । ४ D कोसम्भ F कोसुम्भ A कौसुम्ब । ५ A ब । ६ D के ।

वसन्ते बिभृयाद्राजा क्षौमकार्पासकानि च ।
सुश्लक्ष्णानि मनोज्ञानि सूक्ष्माणि विरलानि च ॥ ३४ ॥

निदाघे धारयेद्राजा सितानि विविधानि च ।
रोमजानि सुसूक्ष्माणि श्लक्ष्णानि विविधानि च ॥ ३५ ॥

माञ्जिष्ठानि च[1] रक्तानि प्रावृट्काले विधारयेत् ।
पाटलान्यभिरामाणि धूम्राणि मधुराणि च ॥ ३६ ॥

शरत्कालेऽतिसूक्ष्माणि वसनानि विधारयेत् ।
कौसुम्भानि[2] सुभव्यानि लाक्षिकानि घनानि च ॥ ३७ ॥

अङ्किकाश्च पटीजातीः[3] शीतकाले भव( जे )न्नृपः ।
ऋतूनामनुसारेण शृङ्गारस्यानुसारतः ॥ ३८ ॥

शीतवाते प्रयाणे च पाँपद्धौ[4] वारिखेलने ।
सूक्ष्माणि बहुमूल्यानि वर्णाढ्यानि वराणि च ॥ ३९ ॥

नानाद्वीपसमुत्थानि शृङ्गारे धारयेन्नृपः ।
एवं यद्बिभृयाद्वस्त्रं वस्त्रभोगः प्रकीर्तितः ॥ १०४० ॥

वस्त्रभोगोऽयमाख्यातः सोमेश्वरमहीभुजा ।

इति वस्त्रोपभोगः ॥ ६ ॥

अधुना कथ्यते सम्यङ् माल्यभोगो मनोहरः ॥ ४१ ॥

वस्त्रप्रसाधनं कृत्वा ततो माल्यं विधारयेत् ।
चम्पकं मल्लिकायुक्तं चम्पकान्युत्पलैः[5] सह ॥ ४२ ॥

चम्पकं सुरभीयुक्तं चम्पकं पाटलान्वितम् ।
मल्लिका पाटलायुक्ता मल्लिका सुरभीयुता ॥ ४३ ॥

मल्लिका बकुलैर्मिश्रा मल्लिकोत्पलसंयुता ।
मालती मल्लिकोपेता मालती पाटलान्विता ॥ ४४ ॥

मालती बकुलोपेता मालती सुरभीयुता ।
करवीरेण संयुक्तं शतपत्रं मनोहरम् ॥ ४५ ॥

१ D विचित्राणि । २ D स । ३ D F ता । ४ A चाऽप ? । ५ A वा ।

शतपत्रं समरुकं शतपत्रं सपाटलम् ।
मालती मल्लिका यूथी वर्णपुष्पेण संयुता ॥ ४६ ॥

ईरुवैती[1] तथा यूथा(थी) नेवाली च तथा मता ।
बिभर्ति माल्यं शिरसा नृपतिः स्वानुसारतः ॥ ४७ ॥

स्वेपके[2](स्वकेशे)षु च कुल्यां[3](कण्ठे)च माल्यभोगः प्रकीर्तितः[4] ।
इति माल्योपभोगः ॥ ७ ॥

एवं विधार्य माल्यानि भूषणान्यथ भूपतिः ॥ ४८ ॥

रत्नहेममयान्यङ्गैर्बिभृयात्सप्रभाणि[5] च ।
यन्त्रसंघट्टितानीव[6] सुवृत्तान्युज्ज्वलानि च ॥ ४९ ॥

नवनीरसुकान्तानि मौक्तिकानि वराणि च ।
शुक्तिगर्भसमुक्तानि कुम्भिकुम्भोद्भवानि च ॥ १०५० ॥

वंशरन्ध्रप्रभूतानि मेघधारांभवानि[7] च ।
सिंहलद्वीपजातानि रत्नाकरभवानि च ॥ ५१ ॥

दाडिमीबीजकान्तानि शक्रगोपनिभानि च ।
रक्तपद्मसरागाणि[8] बालसूर्यप्रभाणि च ॥ ५२ ॥

माणिक्यान्यतिरम्याणि[9] स्थूलानि विविधानि च ।
अतसीपुष्पसङ्काशं हरिकान्त(न्ति)समप्रभम् ॥ ५३ ॥

हरकण्ठसमच्छायमिन्द्रनीलं प्रभायुतम् ।
रोहिणाद्रिसमुद्भूत(तं)तृणग्राहि[10] मनोहरम् ॥ ५४ ॥

मसृणं चातिशोभाढ्यमिन्द्रनीलं सुपीवरम्[11] ।
इन्द्रायुधान्तग(र्ग)भेण हरितेन समप्रभम् ॥ ५५ ॥

कीरपक्षसदृक्षाभं[12] गरुडोद्गारसम्भवम् ।
श्लक्ष्णं मरकतं कान्तं नलिका(ना)भं दलोपमम् ॥ ५६ ॥

विषघ्नं दुर्लभं रत्नं बहुमूल्यं मनोहरम् ।
सितं ब्राह्मणजातीयं रक्तं क्षत्रियजातिकम् ॥ ५७ ॥

---

१ D कुरव । २ CDF ह । ३ C खो D खोम्प । ४ F स । ५ F त्सु । ६ F टि । ७ D र । ८ D गात्राणि । ९ D रागाणि । १० A तृ । ११ A लि । १२ A सवृक्षाभं समक्षाभं । १३ E द्भा ।

वैश्यजातीयकं पीतं कृष्णं वृषलजातिकम् ।
षट्कोणसिद्धं दीप्तं च फलकेषु समं लघु ॥ ५८ ॥

वैराकरभवं वज्रं विप्रजातीयमुत्तमम् ।
एतानि रत्नमुख्यानि कथितानीह लक्ष्मतः ॥ ५९ ॥

गोमूत्रवर्णं निर्णीतं रक्तं गोमेदकं भवेत् ।
ईषत् कृष्णं सिताभं च वैडूर्यकमुदाहृतम् ॥ १०६० ॥

ईषत्पीतं च वज्राभं पुष्परागं प्रचक्षते ।
पक्वबिम्बफलाभासं शुकचञ्चुसमप्रभम् ॥ ६१ ॥

काकतुन्डीसमच्छायं प्रवालमभिधायते ।
तपनस्यँ करस्पर्शादुद्विरत्यनलं हि यः ॥ ६२ ॥

सूर्यकान्तं विजानीयात्स्फटिकं रत्नमुत्तमम् ।
अमृतांशुकरस्पर्शाद्यः स्रवत्यमृतोदकम् ॥ ६३ ॥

दुर्लभं तन्महारत्नं चन्द्रकान्तं विदुर्बुधाः ।
श्वेताभ्रकसमं वर्णे हिमाद्रिशिखरोद्भवम् ॥ ६४ ॥

निर्मलं च प्रभायुक्तं स्फटिकं परिकीर्तितम् ।
सर्वेषामेव रत्नानां लक्षणं समुदाहृतम् ॥ ६५ ॥

निजवर्णसमुत्कर्षात्कान्तिमत्त्वान्महार्घता ।
स्थूलमुक्ताफलैः कार्या कण्ठे त्वेकावली वरा ॥ ६६ ॥

मध्यमुक्ताफलैः कुर्यात्त्रिसरं सुविचक्षणः ।
तथा पञ्चसरं कुर्यान्नवसप्तसरं तथा ॥ ६७ ॥

उपान्ते नीलमाणिक्यमिश्रितं सुमनोहरम् ।
काञ्चनीभिर्मृणालीभिः पङ्क्तिस्थाभिः सुशोभितान् ॥ ६८ ॥

क्रमशो हीयमानाश्च सरान्कुर्यान्मनोहँरान् ।
गुच्छीकृतमृणाला(ली)भिर्हारे सर्वान्सरान् समान् ॥ ६९ ॥

---

१ D क्ष्यते। २ D स्यातप। ३। F रमान्। ४ D ष्ठी। ५ F सिहरि।

नीलमाणिक्यसंयुक्तान्पूर्वं त(र्व)त्परिकल्पयेत् ।
नीलैर्मु(यु)क्तास्तथामुक्ता मध्ये सिद्धैन्तिकायुताः ॥ १०७० ॥

नीललेम्बणिकाः ख्याता हरिन्माणिक्यजास्तथा ।
नीलमाणिक्यसंयुक्ता मुक्ताः पूर्वक्रमेण च ॥ ७१ ॥

कृतो वर्णसरो नाम दर्शनीयो मनोहरः ।
एंत एव सरो(रा)हीना मृणालीभिः सुसंहताः ॥ ७२ ॥

आनाभिलम्बिता भूषा ब्रह्मसूत्रमितीरिता ।
सुवर्णोपरिविन्यस्तरत्नराँजिसमन्वितम् ॥ ७३ ॥

हरिन्माणिक्यनीलेन बृहता नायकेन च ।
मध्यदेशनिंविष्टेन मणिना परिशोभितम् ॥ ७४ ॥

पदकं रुचिरं रम्यं वक्षःस्थलविभूषणम् ।
नानारत्नविचित्रं च मध्यनायकसंयुतम् ॥ ७५ ॥

सरलै(कै)र्लम्बितं रम्यं पदकं बन्धुरं विदुः ।
सिंहरत्न(वक्त्र)समाकाँरं नानारत्नविचिंत्रितम् ॥ ७६ ॥

सूसकैर्लम्बनैर्युक्तं केयूरं बाहुभूषणम् ।
सुवर्णमणिविन्यस्तमुक्ताजालकमङ्गदम् ॥ ७७ ॥

पेंचकापिच्छसंयुक्तं बाहुसन्धिविभूषणम् ।
सुवर्णोपरिविन्यस्तनानारत्नविराजितम् ॥ ७८ ॥

हस्तस्य कटकं रम्यं स्वप्रभापरिशोभितम् ।
वज्रद्वितयमध्यस्थं हरिन्माणिक्यनीलकम् ॥ ७९ ॥

द्विहीरकमितिख्यातमङ्गुलीयकमुत्तमम् ।
अरंकोणनिविष्टैश्च पविभिः परिशोभितम् ॥ १०८० ॥

मध्ये रत्नसमायुक्तमात्रे(मन्त)वज्रमितीरितम् ।
वृत्ताकारैर्निविष्टैश्च कुलिशैरपि वेष्टितम् ॥ ८१ ॥

---

१ C D F ध्रुंतु । २ C F त । ३ D अत एव सरा । ४ A जाति । ५ D F विनि । ६ A सीढ़ । ७ D भासं । ८ D पं । ९ D रे । १० D ष्ठ्र । ११ D मत्रे ।

मध्ये च मणिना युक्तं रविमण्डलमीरितम् ।
ऋज्वायतचतुष्कोणक्रमोन्नतनिवेशिभिः ॥ ८२ ॥

वज्रैर्मध्यगमाणिक्यैर्नेन्द्रावर्ताङ्गुलीयकम् ।
माणिक्येन सुरङ्गेण मौक्तिकेन सुशोभिना ॥ ८३ ॥

प्रवालेनाभिरम्येण तथा मरकतेन च ।
पुष्परागेण वज्रेण नीलेन परिशोभिना ॥ ८४ ॥

गोमेदकेन रत्नेन वैडूर्येण विनिर्मितम् ।
रत्नैर्नवग्रहच्छायैर्नवाभिः परिकल्पितम् ॥ ८५ ॥

नवग्रहमितिख्यातमङ्गुलीयकमुत्तमम् ।
अङ्गुलीवेष्टकं वज्रैर्वेष्टितं[1] वज्रवेष्टकम्[2] ॥ ८६ ॥

अन्यै रत्नैश्च यच्चैवं तद्वद्वेष्टकमुच्यते ।
हीरयोरुभयोर्मध्ये कीलितं हीरमुत्तमम् ॥ ८७ ॥

त्रिहीरकमिति ख्यातमङ्गुलीयकमुत्तमम् ।
यत्तु नागफणाकारं बा(ब)हुरत्नविभूषितम् ॥ ८८ ॥

अङ्गुलीवलये(यं) वज्रैर्वेष्टिते(तं) शक्तिमुद्रिका ।
अन्यैश्च विविधै रत्नैः सन्निवेशविशेषतः ॥ ८९ ॥

नानारूपाभिधानैश्च कल्पिता मुद्रिकाः(:)शुभाः[3] ।
केवलैर्मौक्तिकैरेव तुं(व)लये तु निशेविता(वेशितैः) ॥ १०९० ॥

मुक्ताताडकसंज्ञं तत्कर्णभूषणमुत्तमम् ।
वलयद्वयविन्यस्तमुक्ताफलविराजितम् ॥ ९१ ॥

मध्ये नीलेन संयुक्तं द्विराजित(क)मुदाहृतम् ।
एवं त्रिराजिकं प्रोक्तं पूर्णमध्यं[4] च मौक्तिकैः ॥ ९२ ॥

तत्पूर्णमध्यमाख्यातं मुक्ताफलविभूषणम् ।
मौक्तिकानि बहिः पंक्तौ तदत (त्न) र्णलकं ततः ॥ ९३ ॥

---

१ F वज्रतं । २ D ष्टि । ३ F लैव । ४ F पवि । ५ D ताः । ६ A भा । ७ A ळ । ८ A D डु । ९ D र्णं ।

वज्राणि च ततोऽप्यन्तर्वज्रगर्भमितीरितम्[1] ।
एवं बहिस्थमुक्तं यन्मध्यवज्रैश्च पूरितम् ॥ ९४ ॥

मध्ये माणिक्यसंयुक्तं भुवि मण्डनमुच्यते ।
नीलैर्मरकतैश्चैव माणिक्यैश्च करम्बितम् ॥ ९५ ॥

यद्रूपं(पै)रचितैर्मै(तं म)ध्ये तत्तत्संज्ञकमुच्यते ।
सोपानक्रमविन्यस्तवज्रपङ्क्तिविराजितम् ॥ ९६ ॥

षडष्टनेमिभिः कान्तं कुण्डलं तत्प्रचक्षते ।
शोधितेन सुवर्णेन सुचिरेणातिकान्तिना ॥ ९७ ॥

शृङ्खला विविधाः कार्या स्ताटङ्कटकानि[2] च ।
स्त्रीपुंसयोः समानानि भूषणान्यत्र विस्तरात् ॥ ९८ ॥

कथितान्यथ वक्ष्यामि स्त्रीणां पुंसां पृथक् पृथक् ।
अश्वत्थपत्रसङ्काशं सुवर्णेन विमिश्रितम् ॥ ९९ ॥

माणिक्यवज्रखचितमायतैर्मौक्तिकैर्युतम् ।
तत्र मुक्ताफलैः पार्श्वे सूसकाभ्यां विराजितम् ॥ ११०० ॥

ताभ्यां बहिर्मरालाभं नानारत्नैः प्रकल्पयेत् ।
तदूर्ध्वं वज्रमाणिक्यमौक्तिकैः कृतबन्धनम् ॥ १ ॥

तादिदं हंसतिलकं योषित्सीमन्तभूषणम् ।
कनत्काञ्चनपट्टेन[3] पिनद्धं वलयाकृतिः(ति) ॥ २ ॥

मुक्ताजालं[4] तदूर्ध्वं च कृतं[5] तद् दण्डकं भवेत् ।
क्रमशो वर्धमानं तच्चूडामण्डनमुत्तमम् ॥ ३ ॥

केतकीदलसङ्काशं कनत्काञ्चनकल्पितम् ।
दण्डकस्योर्ध्वभागस्य भूषणं तदुदाहृतम् ॥ ४ ॥

सौवर्णकल्पितं पद्मं नानारत्नविराजितम् ।
चूडिकापरभागस्य भूषणं परिकीर्तितम् ॥ ५ ॥

---

१ A भिंतमी । २ A ड । ३D क्रण । ४ A लस्त । ५ mss कृतं तं D कृतदण्डकसंभवेत् । ६A डा ।

सौवर्णकुसुमैः[1] कृतं मुक्तासरसमन्वितम् ।
बृहन्माणिक्यनीलैश्च[2] लम्बनं चूडिभूषणम् ॥ ६ ॥

पिचुमन्दफलाकारैर्मौक्तिकैर्नीलकैः[3] कृतम् ।
माणिक्यैर्गरुडैहीरैर्मुकुलं कर्णभूषणम् ॥ ७ ॥

तस्या बहिश्च संलग्ना लम्बनी नीलनिर्मिता ।
नवभिर्दशभिर्वापि स्थूलमुक्ताफलैः कृता ॥ ८ ॥

कण्ठप्रमाणरचिता सरिका गलभूषणम् ।
ततो बहिश्च संलग्ना वज्रसङ्कलका शुभा ॥ ९ ॥

सिंहवक्त्रसमाकारौ स्वर्णरत्नविनिर्मितौ ।
मुक्तासूसंकसंयुक्तौ नीलमाणिक्यलम्बनौ ॥ १११० ॥

कञ्चुके कीलितौ कार्यौ भुजभूषणकौ वरौ ।
नामतो बाहुवलयौ पुंसि यावङ्गदाभिधौ ॥ ११ ॥

काञ्चनीभिः शलाकाभिः सुसूक्ष्माभिर्विनिर्मितौ ।
मणिबन्धमिताद्यूर्ध्वं वलयैर्वेधितैः क्रमात् ॥ १२ ॥

प्रादेशमात्रकं दैर्घ्यं विस्तारे बाहुवेष्टनम् ।
द्विधा विभज्य कर्तव्यं ग्रथितं कीलकेन तु ॥ १३ ॥

अनेनैव प्रकारेण वज्रमाणिक्यमौक्तिकैः ।
चूडकं मण्डनं स्त्रीणां प्रकोष्ठस्य विभूषणम् ॥ १४ ॥

अनेनैव प्रकारेण तदर्धेन विनिर्मितम् ।
अर्धचूडमिति ख्यातं स्त्रीणां प्रियतमं सदा ॥ १५ ॥

चतुरङ्गुलविस्तारं जघनाभोगवेष्टितम् ।
सौवर्णरत्नरचितं सूत्रं(स)कैर्लम्बनैर्युतम् ॥ १६ ॥

हेमघर्घरघण्टाभिर्निर्मितं रवसंयुतम् ।
काञ्चीदामेति विख्यातं कटिभूषणमुत्तमम् ॥ १७ ॥

---

१ D F णैः । २ F ना । ३ C F लि । ४ A क्तासु । ५ A शक । ६ D मणिक । ७ F ज । ८ D म्बि । ९ A ना । १० A पूर्वं । ११ A त्रि । १२ A द्वि । १३ A च । १४ D न्थि । १५ A दं । १६ A त ।

हस्तचूडकवज्रस्य जङ्घाकाण्डप्रमाणकौ।
नानारत्नैश्च खचितौ विख्यातौ पादचूडकौ ॥ १८ ॥

सुवर्णरचितौ कार्यौ त्रिभागे कृतखण्डनौ।
सन्धिदेशे[1] सुसंश्लिष्टौ कीलकेन च कीलितौ ॥ १९ ॥

चतुरस्रौ षडस्रौ वा तथाष्टास्रौ च कारयेत्।
सौवर्णैर्बुद्बुदै रम्यैः पङ्क्तिस्थैर्वा विराजितौ ॥ ११२० ॥

श्लक्ष्णौ वा कान्तिसंयुक्तौ नादवन्तावथापि वा।
रत्नैर्वा विविधैर्युक्तौ कटकौ पादभूषणौ ॥ २१ ॥

त्रिपञ्चशृङ्खलाक्लृप्तौ नानारत्नशतैः कृतौ।
कीलकाहिर्व[2](त)संधी तौ पादपादा(ला)वितीरितौ ॥ २२ ॥

किङ्किण्यः स्वर्णरचिता गुणगुम्फितविग्रहाः।
नादवत्यः[3] सुरम्यास्ताः पादघर्घरिकाभिधाः ॥ २३ ॥

ईदृग्रूपसमाकारा नानारत्नैर्विनिर्मिताः।
ध्वनिहीनाः सुशोभाढ्याः राढकाः परिकीर्तिताः ॥ २४ ॥

आयताश्च सुवक्राश्च कटकाकारनिर्मिताः।
अन्दुका इति विख्याता योषितां पादभूषणम् ॥ २५ ॥

पादतर्जनिमानेन कनत्काञ्चननिर्मिता।
स्थूलाश्च ध्वनिसंयुक्ता यमला मुद्रिका वरा ॥ २६ ॥

शिखरैः शोभितं यत्तु शेखरं तद्विदुर्बुधाः।
मुकुलाभं भवेद्यस्तु मुकुलं तत्प्रकीर्तितम् ॥ २७ ॥

केवलं सरकैर्यत्तच्छिँरोवेष्टनमुच्यते[4]।
एवं विरचितं रत्नै राज्ञां मस्तकभूषणम् ॥ २८ ॥

दलकं हेमरचितं व्याघ्रपुच्छं(च्छ) विनिर्मितम्।
मुक्तामाणिक्यखचितं पुरुषाणां विभूषणम् ॥ २९ ॥

शुचिना भूषणं धार्यं दिव्यरत्नविनिर्मितम्।
रत्नाधिदेवतास्तुष्टा यच्छन्ति महतीं श्रियम् ॥ ११३० ॥

---

१ A शस्तु। २ F क्र। ३ F चहि A वहि। ४ D F न्त्यः। ५ A च। ६ A सै। ७ F च्छ।

यथारुचि यथाशोभं प्रेयस्याश्चित्तसम्मतम् ।
धत्ते यद्भूषणं राजा भूषाभोगः प्रकीर्तितः ॥ ३१ ॥

भूषाभोगोऽयमाख्यातः सोमेश्वरमहीभुजा ।
इति भूषोपभोगः ॥ ८ ॥

सम्प्रत्यासनभोगश्च कथ्यते राजवल्लभः ॥ ३२ ॥

चम्पकाम्रमधूकानां पनसौदुम्बरस्य च ।
पीठानि सुविशालानि चतुष्पदयुतानि च ॥ ३३ ॥

आयतं चतुरस्रं च काश्चनेनोपशोभितम् ।
श्लक्ष्णं मनोहरं पीठं मङ्गलासनमुत्तमम् ॥ ३४ ॥

श्रीपर्णीरचितं रम्यं हस्तमात्रायु(य)तं शुभम् ।
अरत्निविस्तृतं पीठं पवित्रासनमुच्यते ॥ ३५ ॥

शाकदारुमयं भव्यं दृढं श्लक्ष्णं सुविस्तृतम् ।
चतुःपादयुतं पीठं मज्जनासनमीरितम् ॥ ३६ ॥

इष्टकानिर्मितं पीठं पृष्ठाधारेण संयुतम् ।
सुधाकुट्टिमशोभाढ्यं मज्जने पीठमीरितम् ॥ ३७ ॥

कार्पासपूरितं वृत्तं छागीपट्टावगुण्ठितम् ।
हंसपिच्छभृतं वापि गदि(दि)कारव्यं सुखासनम् ॥ ३८ ॥

छागचर्ममयं रक्तमूर्णागर्भं सुविस्तृतम् ।
नानावर्णविचित्रं तदासनं पट्टगद्दिका ॥ ३९ ॥

तस्योपरि च विन्यस्तं हंसपिच्छैः सुपूरितम् ।
सितपट्टोपिनद्धं च श्वेतप्रच्छदसंयुतम् ॥ ११४० ॥

सङ्गीतकप्रसङ्गे च गजवाजिविनोदने ।
सर्वदा सुखसंवासे भूशय्यासनमुत्तमम् ॥ ४१ ॥

पञ्चाभिः सप्तभिर्वापि नवभिर्लोहजैः पदैः ।
लोहपट्टकृताधारैर्लोहजालकमूर्धनि ॥ ४२ ॥

---

१ A फ। २ D विचि। ३ F ष्टि। ४ D ष्ट। ५ F र्जे। ६ F पादा। ७ D पूर्णे। ८ F सपूर्णि।
९ F व।

छटि(दि)कापट्टगर्भस्थं कार्पासेन विमिश्रितम् ।
लोहासनमिदं प्रोक्तमुपरिष्टात्सुकीलितम् ॥ ४३ ॥

शाकदारुविनिर्माणं दन्तिदन्तसुचित्रितम् ।
नानावर्णशताकारं मृत्वैकफल(पृष्ठैकफल)संयुतम् ॥ ४४ ॥

चतुष्पादकृताधारं सार्धहस्तं सुविस्तृतम् ।
ईषत्समुन्नतं राज्ञां पृष्ठाधारासनं स्मृतम् ॥ ४५ ॥

रुचिरेण सुवर्णेन निर्मितं तत्र रञ्जितम् ।
अष्टाभिः स्फाटिकैः सिंहैर्मूर्धभिः सुविधारितम् ॥ ४६ ॥

अधः काञ्चनविन्यस्तरत्नवोदित्रयान्वितम् ।
आस्थानमण्डनं राज्ञां सिंहासनमिदं परम् ॥ ४७ ॥

पूतासनं देवकार्ये सुखार्थां(य)मङ्गलासनम् ।
स्वैरमन्यानि पीठानि सैंहमास्थानमण्डपे ॥ ४८ ॥

एतानि पीठान्यध्यास्ते राजा विभवभूषितः ।
यदासनोपभोगोऽयमभिज्ञैः परिभाषितैः ॥ ४९ ॥

सम्प्र(सम्म)त्यासनभोगश्च कथितं(तः) लक्षणान्वितम्(तः) ।
एवमासनभोगश्च कथितः सोमभूभुजा ॥ ११५० ॥

इत्यासनोपभोगः ॥ ९ ॥

चारुचामरभोगोऽयं कथ्यतेऽमरवल्लभः ।
आस्थानमण्डपे रम्ये विशाले सुखशीतले ॥ ५१ ॥

विन्यस्तरत्नशोभाढ्ये हेमस्तम्भविभूषिते ।
चित्रभित्तिमनोरम्ये नानावर्णवितानके ॥ ५२ ॥

सुधाकुट्टिमके दिव्ये सिंहपीठे भवेन्नृपः ।
शरच्छशाङ्कसङ्काशैर्यशःपुञ्जनिभैः सितैः ॥ ५३ ॥

मण्डितैर्हेमदण्डैश्च रत्नकान्तिविचित्रितैः ।
मयूरपिच्छसम्भूतैश्चमरीपुच्छसम्भवैः ॥ ५४ ॥

---

१ A लक्षम् । २ F Omits this line । ३ A D शेषा । ४ D या । ५ A तत् । ६ F Omits this line । ७ D नानावर्णवितानके । ८ D F वसे ।

चामरैर्हस्तविन्यस्तैर्वीजयन्ति वराङ्गनाः।
सहस्राक्षमुखाभासैर्बर्हिबर्हविनिर्मितैः॥ ५५॥

कूर्चकैर्वीजयन्तीह श्यामलाः कुन्तलाङ्गनाः।
वालकव्यजनै रम्यैः सौरभ्येण मनोहरैः॥ ५६॥

वीजयन्ति महीपालं कामिन्यः कामदेवताः।
चन्द्रमण्डलसङ्काशैर्नानापट्टविनिर्मितैः॥ ५७॥

वीजयन्ति धरानाथं वीजनैर्मृगलोचनाः।
तालपत्रसमुद्भूतै रत्नकालंकृतैः शुभैः॥ ५८॥

वीजनैश्चतुरस्रैश्च वीजयन्ति सुमध्यमाः।
शोभार्थं विभवार्थं च स्वेदापनयनाय च॥ ५९॥

चामरैर्वीजनं यत्तु स भोगश्चामराभिधः।
एवं चामरभोगोऽयं भाषितः सोमभूभुजा॥ ११६०॥

इति चामरभोगः॥ १०॥

अधुनाऽऽस्थानभोगोऽयं कथ्यते जनवल्लभः।
चामरैर्व्यजनैरेवं वीज्यमानो महीपतिः॥ ६१॥

आस्थानमण्डपन्यस्तवरसिंहासनस्थितः।
समाहूय प्रतीहारं सर्वाह्वानं समादिशेत्॥ ६२॥

ततो दौवारिकाहूता विशन्ति नृपमन्दिरम्।
पट्टीपिनद्धदोलान्तःस्थिताः शुद्धान्तयोषितः॥ ६३॥

विचित्रछत्रसञ्छन्नछायाश्चामरवीजिताः।
सौविदल्लकरैश्छन्दवेत्रदण्डनिवारणैः॥ ६४॥

अपसर्पापसर्पेति गच्छ गच्छेति तर्जनैः।
सुदूरोत्सारिताशेषमार्गस्थजनवर्जिताः॥ ६५॥

प्रविशेयुर्नृपस्थानं सर्वाभरणभूषिताः।
नानारत्नमयैर्दिव्यैश्चूडाँमण्डनदण्डकैः॥ ६६॥

---

१ A यच्छया। २ F भेण। ३ D ह्रि। ४ D F अत्र। ५ A चित्र। ६ A रो। ७ F डी।

सीमन्तस्यान्तरे हंसैतिलकेन विराजिताः ।
मुक्तामरकताकीर्णैर्नीलमाणिक्यलम्बनैः ॥ ६७ ॥

कर्णावतंसमुकुलैः कुण्डलैर्मणिमण्डितैः ।
अलकाभरणैः पुष्पैः कनत्काञ्चननिर्मितैः ॥ ६८ ॥

कण्ठभूषणकैर्दिव्यैर्मुक्तामाणिक्यसम्भवैः ।
पदकैरत्नशोभाढ्यैर्दिव्यरत्नयुतैः सरैः ॥ ६९ ॥

हारैर्मुक्तामयैः शुभ्रैः स्तनस्थलविभूषणैः ।
विचित्ररत्नरचितैरङ्गदैर्बाहुभूषणैः ॥ ११७० ॥

साचिभूषणकैर्दिव्यैश्चूडाकैरत्नराजितैः ।
कटकै रत्नरचितैर्नानारत्नाङ्गुलीयकैः ॥ ७१ ॥

रत्नकाञ्चीकलापैश्च जङ्घाभूषणचूडकैः ।
नूपुरैः पादकटकैर्दिव्यरत्नविभूषितैः ॥ ७२ ॥

पादैः(दैः)पदकराजीभिः किङ्किणीजालकैरपि ।
अङ्गिशाखाविभूषाभिः क्वणन्तीभिः पदे पदे ॥ ७३ ॥

मुद्रिकाभिर्विचित्राभिर्भूषिता नृपयोषितः ।
दिव्यवस्त्रपरीधानाः पदकञ्चुकशोभिताः ॥ ७४ ॥

क्षौमकार्पासकैर्युक्ता गन्धमाल्यविभूषिताः ।
श्रीखण्डक्षोदशुभ्राङ्ग्यः कुङ्कुमद्रवरञ्जिताः ॥ ७५ ॥

सान्द्रकस्तूरिकापत्रवल्लीभिः समलङ्कृताः ।
तिलकैर्विविधैर्भव्यैर्नानावर्णैर्मनोहरैः ॥ ७६ ॥

मनोरमारमण्यस्तास्तरुण्यः सुखभूमयः ।
यथायोग्यं यथास्थानं यथाप्रेम यथासनम् ॥ ७७ ॥

समन्तान्नृपमावेक्ष्य निविष्टाः पर्य्युपासते ।
काश्चित्तुरङ्गमारूढाः काश्चिदश्वतरीस्थिताः ॥ ७८ ॥

---

१ F स । २ A हन्त । ३ A र्णै, र्णै? । ४ A र्णैर्मुख्यै । ५ A च्ची F वि । ६ A र । ७ C F दे । ८ D कागल । ९ D युक्तैः । १० A मं ।

काश्चिच्चरणसञ्चाराश्चालयन्त्यो मनो नृणाम् ।
काश्चित्कनकभूषाढ्याः काश्चिद्रत्नविभूषिताः ॥ ७९ ॥

काश्चिन्मुक्तामयैर्हारैर्मण्डितस्तनमण्डलाः ।
काश्चिच्छङ्खमयैः श्लक्ष्णैर्नानारूपविनिर्मितैः ॥ ११८० ॥

मणिभिर्भूषिताः काश्चिन्नयनानन्दचन्द्रिकाः ।
काश्चित्सुरक्तवस्त्रैश्च रञ्जयन्त्यो मनो नृणाम् ॥ ८१ ॥

हरितैर्वसनैः काश्चिद्धरन्त्यो हृदयं नृणाम् ।
नीलाम्बरधरैः काश्चिन्निगिरन्त्यो दृशो नृणाम् ॥ ८२ ॥

मल्लिकामालिकाः काश्चित्काश्चिच्चम्पकमालिकाः ।
मालतीमालिकाः काश्चित्काश्चिदुत्पलमालिकाः ॥ ८३ ॥

काश्चिदुत्पलमालाभिर्भूषिताश्चोत्पलेक्षणाः ।
काश्चित्सुरभिमालाभिर्भ्राजिता भ्रमराकुलाः ॥ ८४ ॥

काश्चित्कुण्ड(न्त)लकामिन्यः कुटिलीकृतकुण्ड(त)लाः ।
काश्चिद्वविडकामिन्यः प्रकाशितपयोधराः ॥ ८५ ॥

काश्चिल्ललाटलटभाः सिन्दूरारुणमस्तकाः ।
महाराष्ट्रस्त्रियः काश्चिल्लम्बकोपक(ल)भूषिताः ॥ ८६ ॥

आन्ध्रनार्यो वराः काश्चिदपसव्योत्तरीयकाः ।
गुर्जर्यो वनिताः काश्चिदापाणिकृतकञ्चुकाः ॥ ८७ ॥

अम्भोजलेपनाः काश्चित्काश्चिच्चन्द्रसमाननाः ।
काश्चित्प्रहासवदनाः काश्चिद्रम्यमुखश्रियः ॥ ८८ ॥

सुनीलमूर्धजाः काश्चित्काश्चिच्चन्द्रार्धभालिकाः ।
सुशोभश्रवणाः काश्चित्काश्चित्स्वच्छकपोलकाः ॥ ८९ ॥

भ्रूभङ्गविभ्रमाः काश्चित्काश्चिद्दीर्घविलोचनाः ।
रम्यनासापुटाः काश्चित्काश्चिद्दाडिमदन्तिकाः ॥ ११९० ॥

---

१ D चाराश्च । २ F च सं । ३ D द्वर्णक । ४ A कुण्डली D कटिसूत्रविराजिताः । ५ D नय । ६ A मसा । ७ F टीः ।

पक्वबिम्बाधराः काश्चित्काश्चित्कम्बुशिरोधराः ।
वृत्तबाहुलताः काश्चित्काश्चित्कोमलपाणयः ॥ ९१ ॥

केतकीनखराः काश्चित्काश्चित्पीनपयोधराः ।
कृशोदर्यस्तथा काश्चित्काश्चित्स्थूलनितम्बकाः ॥ ९२ ॥

रम्भोरुयुगला काश्चित्काश्चिज्जङ्घामनोहराः ।
मृदुपादतलाः काश्चित्काश्चिच्चञ्चन्नखत्विषः ॥ ९३ ॥

खड्गश्यामाङ्गनाः काश्चित्काश्चित्स्वर्णसमप्रभाः ।
वंशश्यामाः स्त्रियः काश्चित्काश्चिच्चम्पकसत्विषः ॥ ९४ ॥

यूनां हृदयहारिण्यो गौरश्यामाश्च काश्चन ।
चित्तवृत्तिहरा नॄणां कङ्कुश्यामाश्च काश्चन ॥ ९५ ॥

काश्चिदुत्पलवर्णेन समत्वेनाभिवर्णिताः ।
काश्चिद्भ्रमरपक्षाभाः स्निग्धकान्तिमनोहराः ॥ ९६ ॥

काश्चिन्मरालगामिन्यः काश्चिन्मृगविलोचनाः ।
कलकण्ठरवाः काश्चित्काश्चित्सर्वगुणान्विताः ॥ ९७ ॥

अबला योषितः काश्चित् काश्चिन्मुग्धा वरस्त्रियः ।
मध्ये मनोहराः काश्चित्काश्चित्प्रौढविचक्षणाः ॥ ९८ ॥

आस्थानभूषणाः सर्वाः समागत्य नृपालयम् ।
प्रवेश्योभयपार्श्वे च पृष्ठभागे च संस्थिताः ॥ ९९ ॥

उपान्तभ्रमराक्रान्तकेतकीपत्रसन्निभैः ।
कटाक्षैर्वीक्ष्य राजानं हर्षयन्तिं मुहुर्मुहुः ॥ १२०० ॥

कान्तदन्तविनिर्मुक्तचन्द्रिकामृतनिर्भ(र्झ)रैः ।
सिञ्चन्त्य इव भूपालं हसितेन वराङ्गनाः ॥ १ ॥

प्रतिरूपगुणाकारैरलङ्कारैरलङ्कृताः ।
कुमारा विनयोपेताः प्रणम्य जनकं नृपम् ॥ २ ॥

आसनेषु च यथोद्दिष्टं यथार्हं पृथिवीभुजाँ ।
उपविष्टाः पुरोभागे नातिदूरे मनस्विनः ॥ ३ ॥

---

१ F त्त। २ A क। ३ A ताः। ४ A काश्चित्। ५ A न्ती। ६ F न्ति। ७ A वन्नृ। ८ D र्नं। ९ D र्द्दं। १० A जाम्।

पुरोधाः शुभ्रवसनो रत्नकुण्डलमण्डितः।
कुमाराभ्यास(श)देशे च निवसेत शुभासने ॥ ४ ॥

अमात्यमन्त्रिसचिवौ द्वितीयाङ्गवि(नि)योजितौ[1]।
निविशेयुर्यथास्थानं[2] नृपादिष्टासने क्रमात् ॥ ५ ॥

मण्डलाधीश्वराः शूराः सामन्तामात्यका अपि।
वामदक्षिणपङ्क्तिस्थाः[3] पुरोभागे महीभुजः ॥ ६ ॥

संविशेयुर्यथास्थानमासनेषु नृपाज्ञया।
देशाधिकारिणः केचित्केचिद्ग्रामाधिकारिणः ॥ ७ ॥

धर्माधिकारिणः केचित्केचिदर्थाधिकारिणः।
कामाधिकारिणः केचित्केचित्कोशाधिकारिणः ॥ ८ ॥

बलाधिकारिणः केचित्केचिद्दुर्गाधिकारिणः।
वस्त्राधिकारिणः केचित्केचिद्भूषाधिकारिणः ॥ ९ ॥

निष्काधिकारिणः केचित्केचिद्वर्णाधिकारिणः।
तुलाधिकारिणः केचित्केचिन्मुद्राधिकारिणः ॥ १२१० ॥

मूल्याधिकारिणः केचित्केचिदर्घाधिकारिणः।
दूताधिकारिणः केचित्केचिद्दुष्टाधिकारिणः ॥ ११ ॥

तीर्थाधिकारिणः केचित्केचिन्नावाधिकारिणः।
मार्गाधिकारिणः केचित्केचिद्वाराधिकारिणः ॥ १२ ॥

भाराधिकारिणः केचित्केचिद्वीपाधिकारिणः।
द्वास्थाधिकारिणः केचित्केचिन्मल्लाधिकारिणः ॥ १३ ॥

अङ्गाधिकारिणः केचित्केचिद्योधाधिकारिणः।
देवाधिकारिणः केचित्केचिच्छास्त्राधिकारिणः ॥ १४ ॥

दानाधिकारिणः केचित्केचिद्दण्डाधिकारिणः।
गजाधिकारिणः केचित्केचिदश्वाधिकारिणः ॥ १५ ॥

---

१ D वान्। २ F तान्। ३ C F मा। ४ D मध्य। ५ A C F द्वर्णा। F omits these two lines। ७ D कृ। ८ C D add these two lines.

रथाधिकारिणः केचित्केचित्प्राणाधिकारिणः ।
शस्त्राधिकारिणः केचित्केचिच्चापाधिकारिणः ॥ १६ ॥

मृगाधिकारिणः केचित्केचित्पक्षाधिकारिणः ।
स्नानाधिकारिणः केचित्केचित्सूदाधिकारिणः ॥ १७ ॥

तोयाधिकारिणः केचित्केचिच्छत्राधिकारिणः ।
दीपाधिकारिणः केचित्केचित्तैलाधिकारिणः ॥ १८ ॥

गवाधिकारिणः केचित्केचिद्धासाधिकारिणः ।
क्षीराधिकारिणः केचित्केचित्कर्माधिकारिणः ॥ १९ ॥

शय्याधिकारिणः केचित्केचित्कान्ताधिकारिणः ।
पुत्राधिकारिणः केचित्केचिद्विद्याधिकारिणः ॥ १२२० ॥

वाद्याधिकारिणः केचित्केचिद्वेणाधिकारिणः ।
नृत्ताधिकारिणः केचित्केचिच्चित्राधिकारिणः ॥ २१ ॥

पर्णाधिकारिणः केचित्केचित्खन्यधिकारिणः[1] ।
शुल्काधिकारिणः केचित्केचिद्धान्याधिकारिणः ॥ २२ ॥

सुधाधिकारिणः केचित्केचिद्वस्त्राधिकारिणः ।
अश्माधिकारिणः केचित्केचिन्मुद्राधिकारिणः ॥ २३ ॥

पटीपट्टाङ्गिकाश्चित्रा[2] दीर्घबाहुविनिर्मिताः ।
धारयन्तः सुखोष्णीषं हेमाभरणभूषिताः ॥ २४ ॥

निविशेयुर्यथास्थानं भक्तिनम्रा नृपेश्वरे ।
कृताञ्जलिपुटाः सर्वे मुखालोकनतत्पराः ॥ २५ ॥

ताम्बूलधारिणो भक्ता विश्वस्ताः खड्गधारिणः ।
राज्ञः समीपे तिष्ठेयुः सावधाना जितेन्द्रियाः ॥ २६ ॥

कवयो गणकाश्चैव वादिनो वाग्मिनस्तथा ।
पाठकाः कथका भट्टाः सूतमागधबन्दिनः ॥ २७ ॥

वाग्गेयकाराश्चतुरा[3] गाथ(य)का वांशिका अपि ।
वैणिका वाद्यकाराश्च नर्तकाश्चारणा नटाः ॥ २८ ॥

१ A त्स्वन्या । २ F ङ्ग । ३ D चतुराः । ४ A काश्च च ।

वैतालिकाश्चाटुकाराः प्रहासचतुरा[1] नराः।
अङ्गमल्ला[2]श्च योधाश्च तथान्ये विविधा नराः॥ २९॥

विचित्रवस्त्रैः सौवर्णै[3]र्भूषणैर्भूषिता[4] नराः।
दिव्यपट्टांशुकोष्णीषभ्रा[5]जिता भव्यमूर्तयः॥ १२३०॥

शौर्योदार्यै[6]स्तथा युक्ता नृपचित्तानुरञ्ज[7]काः।
वारं वारं समन्तात्ते जय जीवेतिवादिनः॥ ३१॥

उपासीरन्नृपश्रेष्ठं सेवाधर्मविशारदाः।
तच्चित्तवेदिनः सर्वे विनयानतमस्तकाः॥ ३२॥

आस्थानमण्डपान्तस्थैः सर्वैः सेवागतैर्नृपम्।
वीक्ष्यमाणै[8]र्नरै[9]र्भव्य(व्यं) नव(वं)चन्द्रमिवोदितम्॥ ३३॥

नानादेशाधिपान्भूपान्स्वात्मरक्षार्थमागतान्।
प्रवेशय प्रतीहारेत्यादिशेत्पृथिवीपतिः॥ ३४॥

प्रवेशितान् प्रतीहारैः प्रणतान् दण्डवद्भुवि।
सप्रसादमिति ब्रूयादुत्तिष्ठत निषीदत॥ ३५॥

नृपाणामासनं योग्यं दापयेन्मानपूर्वकम्।
आसनेषूपविष्टानां दृष्ट्या सन्तोषमावहेत्॥ ३६॥

वचनेन महाप्रीतिं जनयित्वा गतक्र[10]मान्।
दिव्यैर्वस्त्रैः पटीपट्टै[11]र्विचित्रैः स्वर्णभूषणैः॥ ३७॥

सुरत्नाभरणैर्भव्यैर्वाजिभिर्वरवारणैः।
ग्रामैः पुरैस्तथा देशैस्तोषयेत्तार्थिवान्नृपः॥ ३८॥

विसर्जयेच्च तान सर्वान्बहुमानपुरःसरम्[12]।
आवासेषु सुरम्[13]येषु स्थापयेत्पृथिवीपतिः॥ ३९॥

कांश्चित्प्रसन्नया दृष्ट्या कांश्चिन्मधुरभाषितैः[14]।
कांश्चित्प्रभूतदानेन कांश्चिन्मानेन[15] हर्षयेत्॥ १२४०॥

---

१ D राननाः। २ F क्षीव। ३ C F षणा। ४ A व। ५ C F वस्त्रां। ६ D रा। ७ F रंजिताः। ८ A प्रां। ९ D जि। १० A ग। ११ F येन।

कुमारान्मन्त्रिणोऽमात्यान्सचिवान्मण्डलाधिपान् ।
सुभटान्सेवकान्दक्षान्सर्वानप्यधिकारिणः ॥ ४१ ॥

विद्याप्रसादपात्राणि हास्यपात्राणि कानि च ।
तोषयित्वा यथायोग्यं सर्वांस्तान्निजमन्दिरम् ॥ ४२ ॥

पुरन्दरनिभो राजा प्रविशेत्केलिकेतनम् ।
क्रीडेते स्त्रीजनैः सार्धं तोषयेत्ताश्च पूर्ववत् ॥ ४३ ॥

करोत्यास्थानमित्थं यः पार्थिवः प्रथितोन्नतिः ।
आस्थानभोग इत्येष कथितः सोमभूभुजा ॥ ४४ ॥

इत्यास्थानभोगः ॥ १० ॥

पुत्राणामुपभोगोऽयं सद्यः संपरिकीर्त्यते ।
ऋतुकालमनुल्लङ्घ्य पुत्रार्थी सङ्गमाचरेत् ॥ ४५ ॥

सवर्णासु विशेषेण सतां धर्ममनुस्मरन् ।
रजोदिनात्समारभ्य यावत्षोडशवासरान् ॥ ४६ ॥

ऋतुस्तावद्भवेत्स्त्रीणां प्रजापतिविनिर्मितः ।
तिथिं द्वितीयां यत्नेन चतुर्थीं च विवर्जयेत् ॥ ४७ ॥

पुष्टा भार्याभ्रुयात्कन्यां तस्मात्कुर्वीत तां कृशाम् ।
रक्ताधिक्याद्भवेत्कन्या शुक्राधिक्ये भवेत्सुतः ॥ ४८ ॥

तस्माच्छुक्रविशुद्ध्यर्थं वृष्यं भुञ्जीत भोजनम् ।
जाते गर्भे भवेत्स्त्रीणां पाण्डुरं गण्डमण्डलम् ॥ ४९ ॥

कुचयोश्चूचुकं कृष्णं जठरं किञ्चिदुन्नतम् ।
तृतीये मासि सम्प्राप्ते कुर्यात्पुंसवनं नृपः ॥ १२५० ॥

श्रवणे मृगशीर्षे च हस्ते पुष्ये पुनर्वसौ ।
मूले पुंसंज्ञिते धिष्ण्ये वारेर्का(र्काङ्ग)रबृहस्पतेः ॥ ५१ ॥

माषद्वितयमध्यस्थं यवं घृतसमन्वितम् ।
प्राशयेन्नृपतिः पत्नीं वेदमन्त्रमुदीरयेत् ॥ ५२ ॥

---

१ A स । २ A क्ष ।

एतत्पुंसवनं ख्यातं गर्भस्थः[1] पुरुषो भवेत् ।
अष्टमे मासि षष्ठे वा धिष्ण्यैः पुन्नामभिर्नृपः ॥ ५३ ॥

सीमन्तोन्नयनं कुर्यादष्टमङ्गलसंज्ञितम् ।
उदुम्बरफलैः क्लृप्तं[2] कुर्यात्कण्ठविभूषणम् ॥ ५४ ॥

शललीपुच्छसम्भूतकण्टकाग्रेण मूर्धनि ।
सीमन्तोन्नयनं कुर्याद्भार्यायाः पृथिवीपतिः ॥ ५५ ॥

वैणिकैर्वादयद्भिश्च सोमराग(गं)मनोहरम् ।
उच्चारयेत्सुविप्रेषु साममन्त्रान्शुभाक्षरान् ॥ ५६ ॥

पटहादिभिरन्यैश्च तूर्यपञ्चमहास्वनैः ।
अष्टमङ्गलनामानं कुर्यादुत्सवमूर्जितम् ॥ ५७ ॥

तोषयेद्द्विजमुख्यांश्च गोभूस्वर्णाम्बरादिभिः ।
सम्पूर्णे नवमे मासि जाते पुत्रे मनोहरे ॥ ५८ ॥

जातकर्म प्रकुर्वीत[3] स्वगृह्योक्तेन कर्मणा ।
सौवर्णमुद्रिकालिप्ते प्राशयेन्मधुसर्पिषी ॥ ५९ ॥

बालकं च ततो मातुः पाययेच्च पयोधरम् ।
तत्राभ्युदयिकं श्राद्धं हेम्ना कुर्वीत भूपतिः ॥ १२६० ॥

प्रातःसन्ध्यासु सायाह्ने रात्रावपि शुभावहम् ।
दिवसाद्वादशादूर्ध्वमुत्तरात्रितये मृगे ॥ ६१ ॥

चित्रानुराधाहस्तेषु श्रवणादित्रयेऽपि च ।
अश्विन्यां रोहिणीस्वात्यो रेवत्यां पुष्यमूलयोः ॥ ६२ ॥

शुभे वारे तिथौ लग्ने पुत्रराश्यनुरूपतः ।
विख्यातं राजवंश्यानां नाम कुर्यान्महीपतिः ॥ ६३ ॥

सिंहं मल्लं तथा बाहुं पालं वर्म पराक्रमम् ।
सेनं चन्द्रं तथा दिव्यसत्त्वं[3] केसरिणं रथम्[4] ॥ ६४ ॥

अनीकं च पदं[5] प्रान्ते कुर्यान्नाम्नो[6] यथारुचि ।
षष्ठे मासि शिशोः कार्यमन्नप्राशनमुत्तमम् ॥ ६५ ॥

---

१ A स्थं । २ F प्रसूयते । ३ A त्वके । ४ F D तथा । ५ D दप्रा । ६ D मय ।

रेवतीरोहिणीहस्तपुष्यश्रवणयुग्मकैः ।
उत्तरात्रितयेनापि वारे चेन्दोर्बृहस्पतेः ॥ ६६ ॥

बुधभार्गवयोश्चैव शस्ते लग्ने शुभे तिथौ ।
बालकानां स्वकीयानामव्यक्तं शृणुयाद्वचः ॥ ६७ ॥

अर्धार्धभाषितं तेषां गालिदानं मनोहरम् ।
जानुच मणं पश्येत्स्खलितं च पदक्रमम् ॥ ६८ ॥

मातृहस्तावलम्बेन ललितं गमनं शनैः ।
फलप्रदर्शनाद्बालमानीतं मातुरङ्कतः ॥ ६९ ॥

अङ्कमारोपयेद्बालमुरस्कन्धतलं तथा ।
रक्षामन्त्राक्षरैः पत्रैर्लक्षया परिवेष्टितैः ॥ १२७० ॥

शार्दूलनखसंयुक्तं प्रवालाङ्कुरशोभितम् ।
कपर्दकेन चित्रेण शङ्खेन च विराजितम् ॥ ७१ ॥

अजरामरसम्भिश्रं बिभ्राणं कण्ठसूत्रकम् ।
पञ्चलोहसुकृतैश्च वलयैर्भूषिताङ्घ्रिकम् ॥ ७२ ॥

पादयोः कटिदेशे च हेमघर्घरिकायुतम् ।
स्वर्णकुण्डलिकाः प्रान्त(काप्रोत) कर्णपालीविराजितम् ॥ ७३ ॥

अश्वत्थपत्रसङ्काशं(श) मूर्धभूषाङ्कितालकम् ।
मातरं पितरं दृष्ट्वा धावमानमितस्ततः ॥ ७४ ॥

कुमारं सुकुमाराङ्गमालिङ्गेदवनीपतिः ।
कर्णं[2] कूर्चं[3] च कर्षन्तं त(व)र्षन्तं[4] हर्षमात्मनि ॥ ७५ ॥

चुम्बन्तं वदनं भूपः परिष्वज्य सुखीभवेत् ।
योगीन्द्रमिव सानन्दं दिग्वस्त्रमपरिग्रहम् ॥ ७६ ॥

जटिलं भूतिभूषाढ्यं गङ्गाधरमिवात्मजम् ।
विष्णुरुद्रसमाभासं नरकत्राणकारणम्[5] ॥ ७७ ॥

पुत्रं गात्रात्समुत्पन्नमीक्षन्ते पुण्यभागिनः ।
एकद्वित्सरस्यान्ते कारयेत्कर्णवेधनम् ॥ ७८ ॥

---

१ D श्र । २ D र्णौ । ३ D र्चौ । ४ D कर्षतं । ५ A सेनं । ६ A कट । ७ A क ।

पुनर्वसुधनिष्ठायां रेवत्यां श्रवणे मृगे ।
उत्तरात्रितये हस्ते चित्रायां मैत्रपुष्ययोः ॥ ७९ ॥

अश्विन्यां शोभने वारे तिथौ लग्ने च शोभने ।
वत्सरद्वितयादूर्ध्वं चूडा कार्या यथाकुलम् ॥ १२८० ॥

अश्विनीरेवतीमूलज्येष्ठासु श्रवणत्रये ।
हस्तत्रये च पुष्ये च तथैवादितिदैवते ॥ ८१ ॥

शस्ते वारे शुभे लग्ने तिथौ च शुभशंसिनि ।
अन्नप्राशनधिष्ण्येषु ध्रुवनक्षत्रवर्जिते ॥ ८२ ॥

भौमे सौम्ये गुरौ शुक्रे कुर्यान्मौञ्जीनिबन्धनम् ।
वर्षे गर्भाष्टमे वापि गर्भैकादशकेऽपि वा ॥ ८३ ॥

व्रतबन्धं प्रकुर्वीत क्षत्रियस्य यथोचितम् ।
आर्द्रायां श्रवणे स्वात्यां चित्रायां हस्तमूलयोः ॥ ८४ ॥

पूर्वात्रये च रेवत्यामाश्लेषायां पुनर्वसौ ।
मृगशीर्षे धनिष्ठायामश्विनीपुष्ययोरपि ॥ ८५ ॥

वारे बुधे गुरौ शुक्रे विद्यारम्भं च कारयेत् ।
वेदमध्यापयेत्पुत्रं(त्रान्) शस्त्रविद्यां च शिक्षयेत् ॥ ८६ ॥

गजाश्वरोहणे तज्ज्ञं(ज्ञान्) रथयाने विशारदम् (दान्)।
शस्त्रशास्त्रकृताभ्यासान् गजारोहे सुशिक्षितान् ॥ ८७ ॥

अश्ववाहसुनिष्णातान्सद्विद्यैस्तान्परीक्षयेत् ।
एकैकं क्रमशः पुत्रं परीक्षेत विचक्षणः ॥ ८८ ॥

पाटवं च बलं प्रज्ञां कलाकौशलमेव च ।
श्रुतौ तर्के तथा धर्मे काव्ये व्याकरणेऽपि च ॥ ८९ ॥

धनुर्वेदे भूमिबले स्वरशास्त्रे कलास्वपि ।
दृढघाते दूरपाते लघुसन्धानमोक्षणे ॥ १२९० ॥

---

१ F omits these two linse । २ A सौ । ३ D मि । ४ A णा । ५ A त्रान्। ६ D शा । ७ A ज्ञान्? । ८ D न । ९ A दान्? । १० D प्रवीणान् सर्वकर्मसु । ११ A बाहु ।

विचित्रव्यधने लक्ष्ये चापविद्यां परीक्षयेत् ।
दूरे दृढं चले लक्ष्यं लाघवं बाणमोक्षणे ॥ ९१ ॥

विद्योत्कर्षं परीक्षेत बल(लं)कोदण्डकर्षणे ।
गात्रेषु सौष्ठवं पादसञ्चारे लाघवं तथा ॥ ९२ ॥

हस्ते निष्ठुरतां दृष्टौ शौर्यं स्थैर्यं च चेतसि ।
वितस्तित्रिचतुःपञ्चभेदाः ख्याताऽसिधेनुषु ॥ ९३ ॥

खड्गं कुन्तं गदां शक्तिं चक्रं शूलपरश्वधे ।
परप्रयुक्तघातेषु वञ्चनात्प्रौढिरिष्यते ॥ ९४ ॥

क्षुरिकायां तथा लघ्व्यां बन्धचातुर्यमीक्षते ।
परस्य बाहुसंरोधौ (धो) वीक्ष्यन्ते (ते) पाणिपाद(त)तः ॥ ९५ ॥

एवमस्त्रप्रकर्षं तु कुमाराणां मनस्विनाम् ।
कृतास्त्राणां परीक्षेत तज्ज्ञैः सह महीपतिः ॥ ९६ ॥

गजाश्वारोहणे तेषां प्राविण्यं पृथिवीश्वरः ।
कुमाराणां परीक्षेत लक्ष्यलक्षणकोविदः ॥ ९७ ॥

तेषामुत्कर्षमन्विच्छेत्स्वस्मादप्यवनीपतिः ।
गुणाधिकतराः पुत्राः प्राप्यन्ते सुकृताधिकैः ॥ ९८ ॥

विनीताः श्रुतसम्पन्नाः शास्त्रेषु च कृतश्रमाः ।
गजाश्वारोहणे दक्षा लभ्यन्ते सुकृतैः सुताः ॥ ९९ ॥

धर्मज्ञाः शुचयो धीराः पितृशुश्रूषणे रताः ।
रूपौदार्यगुणोपेता दृश्यन्ते सुकृतैः सुताः ॥ १३०० ॥

एवं गुणाधिकान् पुत्रान् दृष्ट्वा रोमाञ्चकञ्चुकः ।
आलिङ्ग्य मूर्ध्न्युपाघ्राय चाशीर्भिरभिनन्दयेत् ॥ १ ॥

पुत्राणां दर्शनं चन्द्रदर्शनादपि सौख्यदम् ।
पुत्रगात्रपरिष्वङ्गश्चन्दनादपि शीतलः ॥ २ ॥

---

१ D दं। २ D ढमी। ३ A ध्यां। ४ D श्व। ५ F णै। ६ D लक्षणं लक्ष्य। ७ D श्व। ८ F तुः।

इति ब्रुवन् महीपालो वाग्भिरानन्द्य पुत्रकान्।
गजाश्वरत्नभूषाभिस्तोषयित्वा सुखी भवेत् ॥ ३ ॥

उपाध्यायेषु सर्वेषु ग्रामपट्टनखेटकम्।
वस्त्राणि काञ्चनं भूमिं मानपूर्वकमर्पयेत् ॥ ४ ॥

सम्प्राप्तयौवनान्पुत्रान्कृतगोदानमङ्गलान्।
समावर्तनसम्पन्नान्कामभोगसुखोचितान् ॥ ५ ॥

रूपलावण्यवर्णाढ्यौ[1] लक्षणैः समलङ्कृतौ[2]।
महाकुलसमुत्पन्नौः[3] समजातिनिरूपितौः[4] ॥ ६ ॥

विवाहविधिना राजा रत्नभूषणभूषितान्।
कुमारान्प्रापयेत्कन्यां (न्या) धर्मार्थं सुखमन्दिरम्[5] ॥ ७ ॥

पापा(पां)स्त्रिषष्ठुलाभस्था(स्थां)स्त्यक्त्वां[6] मङ्गलमष्टमम्।
शुक्लपक्षे तिथौ शस्ते शोभनग्रहवासरे ॥ ८ ॥

कुर्याद्विवाहं भूपालः पुत्रस्यामित्रकर्शिनः[7]।
शोभने सुविशाले च मध्यवेदीविराजिते ॥ ९ ॥

पटीपट्टवितानेन स्तम्भैः पट्टांवगुण्ठितैः[8]।
तोरणालङ्कृतद्वारे गोमयालिप्तभूमिके ॥ १३१० ॥

पुष्पप्रकरशोभाढ्ये मण्डपे सुमनोहरे।
कृत्वा नान्दीमुखं श्राद्धं संपूज्य कुलदेवताः ॥ ११

पुण्याहवाचनं कृत्वा मुहूर्ते गणकोदिते।
मधुपर्केण सम्मान्यं सितवस्त्रैर्विभूषितम् ॥ १२ ॥

मुद्रिकालङ्कृतं पुत्रं वेदीमारोपयेच्छनैः।
तण्डुलैः कारयेत्पुञ्जौ पूर्वापरसमौस्थितौ[9] ॥ १३ ॥

सितं दुकूलं तन्मध्ये कल्पयेद्यवधायकम्।
पुत्रं प्राचीमुखं कृत्वा तण्डुलोपरिवर्तिनम् ॥ १४ ॥

---

१ D ब्यं ल। २ D तान्। ३ D न्नान्। ४ D तान्। ५ F स्वामि। ६ C रं। ७ A क्त। ८ A नेम्र। ९ D र्षणः। १० F दा। ११ D म।

पश्चिमाशामुखीं कन्यां पुञ्जस्योपरिवर्तिनीम् ।
उभाभ्यां करयोर्दत्वा तण्डुलान् जीरकादिकान् ॥ १५ ॥

जाते लग्ने तु मध्यस्थं पटमुत्सारयेत्ततः ।
हस्तस्थांस्तण्डुलान्कन्याकुमारौ क्षिपतौ मिथः ॥ १६ ॥

परस्परमुखाम्भोजविनिवेशितलोचनौ ।
कन्याया दक्षिणं पाणिं कुमारकरमध्यगम् ॥ १७ ॥

कृत्वा कन्यापिता कन्यां धारापूर्वं समर्पयेत् ।
कुमारं च तथा कन्यां वेष्टयेत् पञ्चतन्तुभिः ॥ १८ ॥

प्रादक्षिण्यात्पञ्चवारान् कृतं सूत्रं समाचरेत् ।
निष्कासितं प्रयत्नेन उभाभ्यां पादयोरधः ॥ १९ ॥

कुङ्कुमेन समालिप्य कङ्कणं तद्विधीयते ।
अनेनैव प्रकारेण कन्यायाः कङ्कणं न्यसेत् ॥ १३२० ॥

ततो होमं प्रकुर्वीत यथोक्तविधिना द्विजः ।
कनिष्ठामङ्गुलीं धृत्वा पत्युः पत्नी व्रजेदनु ॥ २१ ॥

प्रदक्षिणक्रमेणैव कृते होमे यथाविधि ।
वारत्रयं भ्रमित्वा तु सप्ततण्डुलपुञ्जकान् ॥ २२ ॥

आक्रमेत्पदविन्यासैस्ततः पट्टासने विशेत् ।
वामे पार्श्वे विधातव्या पत्युः पत्नी शुभानना ॥ २३ ॥

ततो वस्त्राणि रम्याणि रत्नानि भूषणानि च ।
गजाश्वमहिषीर्गाश्च दासीदासान्धनं बहु ॥ २४ ॥

दद्यात्पुत्राय तत्पत्न्यै विवाहोत्सवमङ्गले ।
विप्रांश्च तोषयेत्तत्र वस्त्रकाञ्चनभूषणैः ॥ २५ ॥

यथार्हं तोषयेदन्यान्वस्त्रैः स्वर्णैश्च भूषणैः ।
वादित्राणां महानादैः शोभनैः शङ्खनिःस्वनैः ॥ २६ ॥

---

१ A न्यक्षवारान्कृत । २ A ले । ३-D कृ । ४ A पूंज । ५ Aका । ६ Aरत्नानि काञ्चनं । ७A त्वे ।

गीतैर्मङ्गलवाक्यैश्च वेदमन्त्रैः शुभार्थकैः ।
बन्दिभिः पठ्यमानैश्च जयमालाशुभाक्षरैः ॥ २७ ॥

पूरयेद्व्योम सर्वत्र दिशश्च विदिशस्तथा ।
तोषयेदन्नपानैश्च ताम्बूलैरितरान्जनान् ॥ २८ ॥

हर्षयेदासवैर्मद्यैः कान्तावृन्दं मनोहरम् ।
गोकुलं घासदानैश्च परितोषं नयेन्नृपः ॥ २९ ॥

एवं निरन्तरं कार्यं विवाहेऽह्नां चतुष्टयम् ।
चतुर्थे वासरे रात्रौ कुर्याच्छृङ्गारमूर्जितम् ॥ १३३० ॥

वरवध्वोर्यथाशोभं लोकलोचनहारकम् ।
आहूय करिणां वृन्दं हेमघण्टानिनादितम् ॥ ३१ ॥

कर्णचामरशोभाढ्यं सिन्दूरारुणमस्तकम् ।
पुष्पकैः शोभितं दान्तं महामालाभियोजितम् ॥ ३२ ॥

आरोहार्थं कुमारस्य तत्सेवकजनस्य च ।
उद्दीप्य हस्तदीपांश्च शतशोऽथ सहस्रशः ॥ ३३ ॥

तारालोकमिवातन्वन् मेदिन्यां मेदिनीपतिः ।
कुमारं कृतशृङ्गारं तद्वधूं कृतमण्डनाम् ॥ ३४ ॥

आरोप्य करिणीं यत्नान्मुक्तापुष्पकधारिणीम् ।
आरोपयेद्देशवेश्याः कान्तावृन्दमनिन्दितम् ॥ ३५ ॥

इन्दुवक्त्रसलावण्यमिन्दीवरदलेक्षणम् ।
ततः पञ्चमहाशब्दैर्वाद्यमानैर्व्रजेद्वरः ॥ ३६ ॥

पुरवीथ्यां पुरन्ध्रीभिः पूजितः पुरवासिनाम् ।
वरयात्रां विनिर्वर्त्य समागत्य नृपालयम् ॥ ३७ ॥

अवतीर्य वशापृष्ठात्प्रणमेज्जनकं निजम् ।
एवं विवाहिताः पुत्राः रमन्ते रमणीयुताः ॥ ३८ ॥

ISA Archive Digitized by eGangotri

लभन्ते च प्रजाः श्रेष्ठा रूपशीलगुणान्विताः।
तेषां पुत्रांश्च कन्याश्च स्वाङ्कमारोप्य लालयन् ॥ ३९ ॥

निर्भरानन्दसन्दोहः पुत्रभोगमवाप्नुयात्।
एवं शिशूंल्लालयित्वा शिक्षयित्वा विवाह्य च ॥ १३४० ॥

तत्प्रजाः पालयेद्यत्तु पुत्रभोगः प्रकीर्तितः।
कथितः पुत्रभोगोऽयं सोमेश्वरमहीभुजा ॥ ४१ ॥

इति पुत्रभोगः ॥ १२ ॥

अन्नभोगोऽयमधुना द्वयोरन्यो निगद्यते।
बान्धवान्मण्डपाधीशान्सामन्तान् मान्यकान् भटान् ॥ ४२ ॥

आश्रितान् सुहृदो भृत्यान् गीतवाद्यविशारदान्।
आहूय स्वोचिते स्थाने निर्वि(वे)श्याग्रे तु भोजयेत् ॥ ४३ ॥

पुत्रैः पौत्रैः प्रपौत्रैश्च सह भुञ्जीत पार्थिवः।
भोज्यं भक्ष्यं तथा पेयं लेह्यं चोष्यं तथैव च ॥ ४४ ॥

इति पञ्चविधं हृद्यं पथ्यं भुञ्जीत भूपतिः।
रक्तशालिर्महाशालिर्गन्धशालिः कलिङ्गकः ॥ ४५ ॥

मुण्डशालिः स्थूलशालिः सूक्ष्मशालिः सषष्टिकः।
रक्तत्वय(त्वाद्र)क्तशालिः स्यान्महाशालिर्महाकृतिः ॥ ४६ ॥

सुगन्धिर्गन्धशालिः स्यात्कलिङ्गोत्थः कालिङ्गकः।
शूकशून्यो मुण्डशालिः स्थूलशालिस्तदाकृतिः ॥ ४७ ॥

सौक्ष्म्यात्तु सूक्ष्मशालिः स्याद्द्विमासः षष्टिकः स्मृतः।
एतान् शालीन् पृथक् सर्वान्मुसलैर्विंतुषीकृतान् ॥ ४८ ॥

निक्षिप्य तण्डुलान् पट्टे विसृजेत्कणकांस्ततः।
पाषाणमृत्तिकाशालीतृणपर्णं तुषं तथा ॥ ४९ ॥

यत्नाद्विकृष्यापनयेदासीभिस्तण्डुलँस्थितान्।
अखण्डान् शोधितानेव क्षालितान् बहुशोँ जलैः ॥ १३५० ॥

१ C D श्रीमत्सोम। २ C ल्य। ३ D omits these two lines। ४ A लां F लान्। ५ D वास्तथा।

तण्डुलान् कुन्दसङ्काशांस्तोयान्तर्धारितांश्चिरम् ।
स्थाल्यां ताम्रकृतायां वा मृज्जातायामथापि वा ॥ ५१ ॥

तण्डुलत्रिगुणं तोयं निक्षिपेच्च पिधापयेत् ।
वाससा शशिशुभ्रेण धौतेन च घनेन च ॥ ५२ ॥

चुल्यां निधाय निर्धूमे वन्हौ तत् क्राथयेज्जलम् ।
सुतप्ते बुद्बुदोपेते स्वल्पबाष्पसमन्विते ॥ ५३ ॥

तण्डुलानावपेत्स्थाल्यां[2] दर्व्या च परिघट्टयेत् ।
सिक्थं[3] विमर्द्य वीक्षेत वारं वारं विचक्षणः ॥ ५४ ॥

मृदु(दू)भूते च तत्सिक्ते[4] (क्थे) किञ्चिद्वा कणगर्भिते ।
तत्र दुग्धं घृतं वापि निक्षिप्योत्तारयेत्ततः ॥ ५५ ॥

स्थाल्यास्ये पिटकं दत्वा मण्डं तं स्रावयेद्रुणः(णी) ।
ईषदुद्ध(र्व)रितं मण्डमूष्मणा परिशोषयेत् ॥ ५६ ॥

एवं भक्तं सुपक्वं यद्राजयोग्यं तदुत्तमम् ।
राजमुद्गास्तथा पीता निर्ष्या(ष्पा)वाश्वणका अपि ॥ ५७ ॥

कृष्णाढक्यस्तथा माषा मसूरा राजमाषकाः ।
सूपकर्मणि सप्तैते नियोज्याः सूपकारकैः ॥ ५८ ॥

दलिताऽदलिताश्चैते पचनीया यथारुचि ।
चणका राजमाषाश्च मसूरा राजमुद्गकाः ॥ ५९ ॥

घरट्टैर्दलिताः[10] कार्याः[11] पाकार्थं हि विचक्षणैः ।
किञ्चिद्भ्रष्टास्तथाढक्यो यन्त्रावर्तैर्द्विधाकृताः[12] ॥ १३६० ॥

विदली च कृताः सम्यक् शूर्पकैर्विततुषीकृताः ।
स्थाल्यां शीतोदकं क्षिप्त्वा विदलैः सममानतः ॥ ६१ ॥

आवपेद्विदलान्पश्चाच्चुल्यामारोपयेत्ततः ।
मृद्वग्निपच्यमानेऽन्तर्हिङ्गुतोयं विनिक्षिपेत्[13] ॥ ६२ ॥

---

१ A तयं । २ A ल्याइ । ३ A क्तं च्छं । ४ D मृध्य । ५ D ख्ते । ६ D र्कं । ७ D मण्डमास्रावये
दुणः । ८ F स्या A ष्पो । ९ D माष । १० A ट्टैः । ११ F लिः । १२ D र्तें । १३ D omits these
two lines ।

वर्णार्थं रजनीचूर्णमीषत्तत्र नियोजयेत् ।
मुहुर्मुहुर्क्षिपेत्तोयं यावत्पाकस्य पूर्णता ॥ ६३ ॥

सुश्लक्ष्णं सैन्धवं कृत्वा विंशत्यंशेन निक्षिपेत् ।
वर्णतः स्वादुता (स्वादतः) गन्धान्मार्दवाल्लाघवादपि ॥ ६४ ॥

एवं विदलपाकस्य सम्यक्सिद्धिरुदाहृता ।
निष्पावा मेचकाढक्यो हिङ्गुना परिवर्जिताः ॥ ६५ ॥

अभिन्नाः पूर्ववत् पाक्या (च्या) हरिद्राचूर्णकं विना ।
मसूरमाषपाकेषु हिङ्गुतोयं विनिक्षिपेत् ॥ ६६ ॥

इतरः पूर्ववत् कार्यः पाकः पाकविचक्षणैः ।
प्रक्षालितान्वरान्मुद्गान् समतोये विनिक्षिपेत् ॥ ६७ ॥

चुल्यां मुद्गग्निना पाकः कर्तव्यः सूपकारकैः ।
पच्यमानेषु मुद्गेषु हिङ्गुवारि विनिक्षिपेत् ॥ ६८ ॥

आर्द्रकस्य च खण्डानि सूक्ष्माणि च विनिक्षिपेत् ।
वार्ताकं पाटितं तैलं भृ (लभृ)ष्टं तत्र विनिक्षिपेत् ॥ ६९ ॥

तैलभृष्टा मृदूभूताः क्षिपेद्वा बिसचक्रिकाः ।
बीजानि वा प्रियालस्य क्षिप्त्वा दर्व्या विवर्तयेत् ॥ १३७० ॥

पुनः पुनः क्षिपेत्तोयं स्तोकं स्तोकं विचक्षणः ।
केचिदिच्छन्ति रुच्यर्थं मेषमांसस्य खण्डकान् ॥ ७१ ॥

वृक्कान्वापि द्विधा भिन्नान्मेदसः शकलानि वा ।
मुहुः सूपे सुनिष्पन्ने चूर्णितं मरिचं क्षिपेत् ॥ ७२ ॥

उत्तार्य नागरं चूर्णं क्षिप्त्वा दर्व्या विघट्टयेत् ।
श्यामाककङ्गुनीवारगन्धशालिसुतण्डुलैः ॥ ७३ ॥

सरवेष्टिक(त)सेर्वाकैर्दिवसैर्लघुविस्तृतैः ।
चिरप्रसूतमहिषीपयसा पायसं पचेत् ॥ ७४ ॥

---

१ A रा। रि। रे। २ D तान्नौ। ३ D जकानि। ४ A का। ५ A घ। ६ D डु। ७ D रा। ८ A का। ९ D प। १० A D सा C सां।

पायसं लेहने योग्यं स्वादुगन्धं मनोहरम् ।
गोधूमाः क्षालिता शुभ्राः शोषिता रविरश्मिभिः ॥ ७५ ॥

घरट्टैश्चूर्णिताः श्लक्ष्णाश्चालन्या वितुषीकृताः ।
गोधूमचूर्णकं श्लक्ष्णं किंचित्घृतविमिश्रितम् ॥ ७६ ॥

लवणेन च संयुक्तं क्षीरनीरेण पिण्डितम् ।
सुमहत्यां काष्ठपात्र्यां करास्फालैर्विमर्दयेत् ॥ ७७ ॥

मर्दितं चिक्कणीभूतं गोलकान्परिकल्पयेत् ।
स्नेहाभ्यक्तैः करतलैः शालिचूर्णैर्विरूक्षितान् ॥ ७८ ॥

प्रसारयेत्गोलकांस्तान् करसञ्चारवर्तनैः ।
विस्तृता मण्डकाः श्लक्ष्णाः सितपट्टसमप्रभाः ॥ ७९ ॥

प्रयत्नान्निक्षिपेत्तज्ज्ञस्तप्तखर्परमस्तके ।
पक्वांश्चापनयेच्छीघ्रं यावत्काण्यं न जायते ॥ १३८० ॥

चतस्रश्च चतस्रश्च घटिता मण्डका वराः ।
गोलान्प्रसारितान्पाणावङ्गारेषु विनिक्षिपेत् ॥ ८१ ॥

अङ्गारपोलिकाः शस्ताः किञ्चित्कृष्णत्वमागताः ।
गोलकान्पिष्टकालिप्तान् पेषण्या तान्प्रसारयेत् ॥ ८२ ॥

सुतप्ततापनिक्षिप्तानीषत्पक्वान्विवर्तयेत् ।
कर्परेपि पचेदेवं पोलिकानामयं क्रमः ॥ ८३ ॥

तैलपूर्णकटाहे तु सुतप्ते सोहलां पचेत् ।
उत्तानपाकसंसिद्धाः कठिनाः सोहला मताः ॥ ८४ ॥

तैलमग्नाः पीतवर्णा मृद्व्यः (द्यः) पाहलिकाः स्मृताः ।
तनुप्रसारितांन्गोलान्ताप्यां स्नेहेन पाचितान् ॥ ८५ ॥

उपर्युपरि निक्षिप्ता(:) पत्रिका विपचेत्सुधीः ।
गोधूमचूर्णादुद्धृत्य शूर्पेणाभ्याहतान् कणान् ॥ ८६ ॥

---

१ F पीडि D पिण्डकम् । २ यन्त्र्यां । ३ D ट्टि । ४ D ख । ५ A लो । ६ A सि । ७ D द्य । ८ A तागौ । ९ D लां ता । १० A प्यान् । ११ A सद्वि ।

दुग्धाक्तान् घृतपक्वांश्च सितया च विमिश्रितान्।
एलामरिचचूर्णेन युक्तान्कौसारसंज्ञितान्॥ ८७॥

गोलकेन समावेष्ट्य तैलेनोदुम्बरान्पचेत्।
उत्काथ्य विदलान् पिष्ट्वा चणकप्रभृतीन् शुभान्॥ ८८॥

हिङ्गुसैन्धवसंयुक्तान् शर्करापरिमिश्रितान्।
मरिचैलाविचूर्णेन युक्तान्गोलकवेष्टितान्॥ ८९॥

किञ्चित्प्रसारिते तैले पूरिका विपचेच्छुभाः।
एवं ताप्यां पचेदन्याः पूरिकाश्च विचक्षणः॥ १३९०॥

हरिमन्थस्य विदलं हिङ्गुजीरकमिश्रितम्।
लवणेन च संयुक्तमार्द्रकेण समन्वितम्॥ ९१॥

वेष्टयित्वा गोलकेन वेष्टिका खर्परे पचेत्।
विदलं चणकस्यैवं पूर्वसंभारसंस्कृतम्॥ ९२॥

ताप्यां तैले(ल) विलिप्तायां धोसकान्विपचेद्बुधः।
माषस्य राजमाषस्य वट्टाणस्य च धोसकान्॥ ९३॥

अनेनैव प्रकारेण विपचेत्पाकतत्त्ववित्।
वट्टाणकस्य विदलं विदलं चणकस्य च॥ ९४॥

चूर्णितं वारिणा सार्धं सर्पिषा परिभावितम्।
सैन्धवेन च संयुक्तं कण्डुना परिघट्टितम्॥ ९५॥

निष्पावचूर्णसंयुक्तं पेषण्यां च प्रसारितम्।
कटाहे तैलसंपूर्णे कटकर्णान्प्रपाचयेत्॥ ९६॥

यावद्बुद्बुदसंकाशा भवन्ति कनकत्विषः।
माषस्य विदलाँन् क्लिन्नान्निस्तुषान्हस्तलोडनैः॥ ९७॥

ततः सम्पेष्य पेषण्यां सम्भारेण विमिश्रितान्।
स्थाल्यां विमर्द्य बहुशः स्थापयेत्तदहस्ततः॥ ९८॥

आम्लीभूतं माषपिष्टं वाटिकासु विनिक्षिपेत्।
वस्त्रगर्भाभिरन्याभिः पिधाय परिपाचयेत्॥ ९९॥

अवतार्यात्र मरिचं चूर्णितं विकिरेदनु।
घृताक्तांश्च हिङ्गुसर्पिर्भ्यां जीरकेण च धूपयेत्॥ १४००॥

---

१ D क्तास। २ F कृती D कृता। ३ A sपि। ४ D व। ५ A संस्का। ६ A लं। ७ A ला क्ति। ८ A पि। ९ D ततः। १० A क्तः।

सुशीता धवलाः(:) श्लक्ष्णा एता इडरिका वराः ।
तस्यैव माषपिष्टस्य गोलकान्विस्तृतान्घनान् ॥ १ ॥

पञ्चभिः सप्तभिर्वापि छिद्रैश्च परिशोभितान् ।
तप्ततैले पचेद्यावल्लौहित्यं तेषु जायते ॥ २ ॥

घारिकासंज्ञया ख्याता भक्ष्येषु सुमनोहराः ।
निश्छिद्रा घारिका(काः)पक्का मथिते शर्करायुते ॥ ३ ॥

एलामरिचसंयुक्ते निक्षिप्ता वटि(ट)काभिधाः ।
त एव वटकाः क्षिप्ताः काञ्जिके काञ्जिकाभिधाः ॥ ४ ॥

यत्र यत्र द्रवद्रव्ये तन्नाम्ना वटकास्तु ते ।
आरनालेन सान्द्रेण दध्ना सुमथितेन च ॥ ५ ॥

सैन्धवार्द्रकधान्याकजीरकं च विमिश्रयेत् ।
मरिचानि द्विधा कृत्वा क्षिपेत्तत्र तु पाकवित् ॥ ६ ॥

दर्व्या विघट्टयन्सर्वं पचेद्यावद्घनीभवेत् ।
उत्तार्य वटकान्क्षिप्त्वा विकिरेन्मारिचं रजः ॥ ७ ॥

हिङ्गुना धूपयेत्सम्यग् वटकास्ते मनोभिधाः ।
दुग्धमुत्काथ्य तन्मध्ये तक्रमम्लं विनिक्षिपेत् ॥ ८ ॥

हित्वा तोयं घनीभूतं वस्त्रबद्धं पृथक्कृतम् ।
शालितण्डुलपिष्टेन मिश्रितं परिपेषितम् ॥ ९ ॥

नानाकारैः सुघटितं सर्पिषा परिपाचितम् ।
पक्वशर्करया सिक्तमेलाचूर्णेन वासितम् ॥ १४१० ॥

क्षीरप्रकारनामेदं भक्ष्यं मृष्टं मनोहरम् ।
शर्करां वारिसंयुक्तां ताम्रपात्रे विपाचयेत् ॥ ११ ॥

---

१ D लः । २ D न्दु । ३ A स । ४ D त्ततै । ५ A ल्लो । ६ D विनि । ७ D ण्टि । ८ A तिघट्टयेत्स । ९ A जं । १० A ना । ११ D रयापि च ।

अर्धपाके क्षिपेद्दुग्धं तक्रं वापि यथारुचि।
तेन मुञ्चेन्मलं सा तु शर्करा कथिता सती॥ १२॥

निर्मलेन च वस्त्रेण गालयेत्तां मुहुर्मुहुः।
मृदौ पाके द्रुता पेया मध्यमे मधुसन्निभा॥ १३॥

खरे तु काठिना भक्ष्या साधिके शर्करा भवेत्।
खरपाके सुसिद्धायाः सितायाः दृढसम्पुटे॥ १४॥

नानारूपाणि कुर्वीत खण्डपाकविशारदः।
शोधितायां सितायां तु क्षीरं संमिश्रयेत्समम्॥ १५॥

खरपाकावधिर्यावत्तावत्तत्क्वाथयेत्पुनः।
उत्तार्य नागरं तीक्ष्णमेलाकर्पूरकेसरैः॥ १६॥

निक्षिप्य गोलकाः कार्या नाम्ना वर्षोलकास्तुते।
वराहपललं स्निग्धं मृष्टं सारङ्गजं पलम्॥ १७॥

हरिणस्यामिषं पथ्यं रूक्षं मांसं शशोद्भवम्।
आविकं तरसं रुच्यं लघुक्रव्यमृ(म)जोद्भवम्॥ १८॥

मत्स्यमांसं भवेद्वृष्यं शाकुनं लघु कीर्तितम्।
रुरुसम्वरसंभूतं पुष्टं चेदुच्यमीरितम्॥ १९॥

मांसान्यन्यानि बल्यानि रसनाप्रीतिदानि च।
कृशस्य व्याधियुक्तस्य जराजर्जरितस्य च॥ १४२०॥

शावकस्य च शुष्कस्य विषसन्दूषितस्य च।
वारिणा निहतस्यापि श्रमशोषमृतस्य च॥ २१॥

क्लिन्नस्य पूतिगन्धस्य मांसानि परिवर्जयेत्।
पृष्ठवंशस्य पार्श्वस्थं बहिरन्तश्च संस्थितम्॥ २२॥

जघनस्य घनं पिण्डं पुच्छमूलसमुद्भवम्।
क्रोडदेशोद्भवं चैव कक्षाभागस्य पूरकम्॥ २३॥

पार्श्वयोः संस्थितं चैव कुक्षिसन्धिविलेपकम्।
आस्यं(अंस)पूर्वांशसंभूतं मुकुलं हृदयोद्भवम्॥ २४॥

---

१ A ह। २ D द्धाः स्युः। ३ D त। ४ A पच्च। ५ A टैः। ६ F क। ७ A ष्ट। ८ A फ। ९ घुक्रव। १० D जा। ११ D म्यू। १२ D न्धि। १४ A अंश।

कालखण्डं तथा वृक्को गुदान्त्रं च तथान्त्रिकम्[1]।
अक्षिणी रसनाकर्णावूधो वृषणकर्णकम्[2] ॥ २५ ॥
पशु(शु)कायां स(सु)संलग्नं वपामष्टिस्क(म्मास्तिष्क)मर्ज[3][4](माज)कम्।
पादाः शृङ्गखुरास्त्वक् च श्रेष्ठमेतत्पलं मतम् ॥ २६ ॥
एतेषु मांसवर्गेषु केषाञ्चित्किंचिदुत्तमम्।
वराहं सितवस्त्रेण प्रच्छाद्योत्फुल्लवारिणा ॥ २७ ॥
गण्डकेन[5] सदण्डेन तावत्सिञ्चेन्मुहुर्मुहुः।
यावत्तज्जातरोमाणि प्रोन्मूल्यन्ते सुखं करैः ॥ २८ ॥
पश्चात्कर्त्रिकया रोमाण्युद्धृष्टाण्यपसारयेत्।
अथवा कर्दमालिप्तं दहेत्तं तृणवह्निना ॥ २९ ॥
सुखोत्पाट्यानि रोमाणि पूर्ववच्चापसारयेत्।
आजानुसन्धिमूलाङ्घ्रि तूर्णैः प्रच्छाद्य तं दहेत् ॥ १४३० ॥
कठिनत्वमुपायातं क्षालयेन्निर्मलैर्जलैः।
पाण्डुरं बिससङ्काशं समं संस्थापितं कटे[10] ॥ ३१ ॥
आमूर्धं प्रस्थापयति[11] कर्त्रिकापरिपाटितम्[12]।
सारीफलकरेखाभ्यां[13] चित्तं[14] (वच्च त) स्यायामसुण्ठिकाम्[15] (शुण्ठकान्) ॥३२॥
चतुरस्रीकृतान्खण्डान्शूलप्रोतान्मतापयेत्[16]।
अङ्गारेषु प्रभूतेषु घृतबिन्दुस्रवावधि ॥ ३३ ॥
पश्चान्मरिचचूर्णेन विकिरेत्सैन्धवं[17] ततः।
अथवाम्लपरिस्विन्नान्[18] पूर्ववत्परिकल्पयेत् ॥ ३४ ॥
अथवा दारितान्कृत्वा त्वक्शेषान्लवणान्वितान्।
भृज्येत[20](ज्जे)दङ्गारपुञ्जेषु[21] शुण्ठकानमृतोपमान् ॥ ३५ ॥
स्विन्नानां शुण्ठकानां च मेदोभागं[22] प्रगृह्य च।
ताडपत्रसमाकाराः कृत्वा चक्रिकाः[23] शुभाः ॥ ३६ ॥
मथिते शर्करायुक्ते दधन्येलाविमिश्रिते।
कर्पूरवासिते तत्र रुच्याश्चक्रिकाः[23] क्षिपेत् ॥ ३७ ॥

---

१ A त्र। २ A द्वौ, यू, बूधौ। ३ D मृ। ४ A मर्जु। ५D र्यै। ६ D गुरुणा A ण्डवौ। ७ D तप्त। ८ A भूशङ्घ्रि। ९ A हरेत्। १० D ठे। ११ D न्ति। १२ D र्तयां। १३ D च। १४ A त। १५D ष्ठ। १६ F पात। १७ A वेन च। १८ D F तान् परितः स्वि। १९ A न्नान्। २० D जे। २१ F मोदा। २२ क। २३ A क।

मांसमेदोमयान्शुण्ठान् पूर्ववच्छकलीकृतान्।
मथिते राजिकायुक्ते मातुलिङ्गकेसरे ॥ ३८ ॥

धूपिते हिङ्गुना सम्यक् दध्नि चक्कलिकाः क्षिपेत्।
घृते वा चक्कलीं भृष्ट्वा किरेदेला सशर्कराम् ॥ ३९ ॥

अथवा मातुलुङ्गस्य सुपक्वस्य च केसरैः।
सूक्ष्मैरार्द्रकखण्डैश्च केसराभैर्(म्लै)र्मनोहरैः ॥ १४४० ॥

चूर्णितं मरिचं राजिसैन्धवैर्मिश्रयेत्ततः।
हिङ्गुना धूपिताः साम्ला हृद्याश्चक्कलिका वराः ॥ ४१ ॥

दध्ना विमिश्रयेच्छ्रीं किंवा दाडिमसारकम्।
अथवामलकं पिष्टं मेलयेद्वाम्लवेतसम् ॥ ४२ ॥

रसं वा मातुलिङ्गस्य रसं दन्तशठस्य च।
मिश्रयेद्वा रसानेतान्द्वित्रान्वाऽपि यथारुचि ॥ ४३ ॥

गन्धार्थं धान्यकं हिङ्गु जीरकं तत्र निक्षिपेत्।
हरिद्रां चैव वर्णार्थं सुसूक्ष्मं च तथार्द्रकम् ॥ ४४ ॥

रुच्यर्थं विश्वमरिचं सैन्धवं च विनिक्षिपेत्।
गालयेत्सितवस्त्रेण किंचित्तैलं विमिश्रयेत् ॥ ४५ ॥

मृदः स्थाल्यां विनिक्षिप्य दर्वीघट्टनपूर्वकम्।
प्रलेहकं मृदावग्नौ पचेत्पाकविशारदः ॥ ४६ ॥

प्रक्षिप्य शुण्ठकांस्तत्र मृदु कुर्याच्च पाकतः।
भावितांश्च रसैः सर्वैः सिद्धानुत्तारयेद्बुधैः ॥ ४७ ॥

धूपयेद्धिङ्गुना वापि नखधूपेन वा पुनः।
धूपेन जीरकस्यापि शशिधूपेन कोविदः ॥ ४८ ॥

चणकस्य समान्खण्डान्कल्पयित्वा विचक्षणः।
निशाजीरकतीक्ष्णाद्यैः शुण्ठीधान्यकहिङ्गुभिः ॥ ४९ ॥

---

१ D पमा। २ D च क्क। ३ A वा क। ४ A लै। ५ C D चाजा। ६ A श्च ताः। ७ D चक्क। ८ D कैः। ९ A प्रहेलकं। १० F तु। ११ D त्ततः। १२ A ष्टि।

चूर्णितैर्मेलयित्वा तांस्तप्ततैलें[1] विनिक्षिपेत् ।
समानार्द्रकखण्डांश्च चणकान्हरितानपि ॥ १४५० ॥

श्लक्ष्णमांसैः क्षिपेत्कोलं निष्पावांन्कोमलानपि ।
पलाण्डुशकलान्वाऽपि लशुनं वाऽपि निक्षिपेत् ॥ ५१ ॥

एवं पूर्वोदितं मृदः प्रयुञ्जीत यथारुचि ।
शोषितेऽम्लरसे पश्चात्सिद्धमुत्तार्य धूपयेत् ॥ ५२ ॥

बदराकारकान्खण्डान् पूर्ववच्चूर्णमिश्रितान् ।
आर्द्रकांस्तत्प्रमाणांश्च पक्वतैले विपाचयेत् ॥ ५३ ॥

वार्ताकशकलांश्चैव मूलकस्य च खण्डकान् ।
पलाण्डार्द्रकसम्भूतान्मुद्रा(द्गा)ङ्कुरविनिर्मितान् ॥ ५४ ॥

वटकान्निक्षिपेत्तत्र मेषकस्य च चूर्णकम् ।
कासमर्देन संयुक्तं पलान्यन्यानि कानिचित् ॥ ५५ ॥

सुसिद्धं वासयेद्धूपैर्नानारसविमिश्रितम् ।
नानाद्रव्यसमेता सा कवचन्दी भवेच्छुभा ॥ ५६ ॥

स्थूलामलकसङ्घशान् शुद्धमांसस्य खण्डकान् ।
क्काथयेद्राजिकातोयैर्नागरार्द्रकसंयुतैः ॥ ५७ ॥

आँ(स्था)पयेत्तज्जलं [10]यौटे(पात्रे)रिक्तैर(क्तेवा)म्लैर्विपाचयेत् ।
तत्समाञ्शुण्ठकान्क्षिप्त्वा सैन्धवं तत्र योजयेत् ॥ ५८ ॥

मेथाँकचूर्णकं तत्र धान्याकस्य च पूलिकाम् ।
निक्षिप्योत्तारयेत्सूदो घृते(तं) वान्यत्र तापयेत् ॥ ५९ ॥

सुतप्ते च घृते पश्चाल्लशुनं हिङ्गुना सह ।
प्रक्षिप्य संस्कृतं मांसं तस्यां स्थाल्यां प्रवेशयेत् ॥ १४६० ॥

पिहितं च ततः कुर्यात्किञ्चित्कालं प्रतीक्ष्य च ।
उत्तारयेत्ततः सिद्धं [13]पुँयलाँख्यामिदं वरम् ॥ ६१ ॥

---

१ D तैलेन । २ A कात्कोव । ३ A ण्ड । ४ A ला । ५ A एलाद्वा । ६ F न्सु । ७ D क्तः । ८ C व । ९ D समोपेता । १०D क्वा थ । ११ D पे । १२ D वा A बा । १३ A युँ । १४ F ख्या C ख ।

पृष्ठवंशसमुद्भूतं शुद्धं मांसं प्रगृह्यते ।
घनसारप्रमाणानि कृत्वा खण्डानि मूलकैः ॥ ६२ ॥

विध्वा तु बहुशस्तानि बहुरन्ध्राणि कारयेत् ।
हिङ्ग्वार्द्रकरसैर्युक्तं सैन्धवेन च पेषयेत् ॥ ६३ ॥

शूलप्रोतानि कृत्वा तान्यङ्गारेषु प्रतापयेत् ।
घृतेन सिञ्चेत्पाकज्ञैर्वा(ज्ञोवा)रंवारं विवर्तयेत् ॥ ६४ ॥

सिद्धेषु मारिचं चूर्णं विकिरेत्सैन्धवान्वितम् ।
नाम्ना भडित्रकं रुच्यं लघु पथ्यं मनोहरम् ॥ ६५ ॥

अनेनैव प्रकारेण जर्जरीकृत्य खण्डकान् ।
स्थाल्यामम्लेन संयोज्य पाचयेद्धिङ्गुनासह ॥ ६६ ॥

आर्द्रकस्य रसेनापि धान्यकस्य रसेन च ।
जीरकस्य च चूर्णेन मेथ(था)कस्य च मिश्रयेत् ॥ ६७ ॥

शोषयित्वा द्रवं सर्वं घृतेन परिव(भ)र्जयेत् ।
क्षिपेच्च मरिचं भृष्टे सूदो हण्डभडित्रके ॥ ६८ ॥

मेषस्य कन्धरां छित्वा स्थाल्यां रक्तं विधारितम् ।
मर्दयेत्करशाखाभिर्निक्षिप्य लवणं मनाक् ॥ ६९ ॥

मृद्यमाने तु रुधिरे सिराजालैर्विनिःसृते ।
अपनीय तथा शुद्धं कीलालं पिहितं न्यसेत् ॥ १४७० ॥

क्रोडदेशात्समारभ्य कर्त्रिकाग्रेण पाटिताम् ।
त्वचं विभज्य गात्रेभ्यो हरेद्बाह्यान्तरास्थिताम् ॥ ७१ ॥

पूर्वोद्दिष्टप्रदेशेषु स्थितं मांसमथाहरेत् ।
स्नायुग्रन्थिविनिर्मुक्तं खण्डशः परिकल्पयेत् ॥ ७२ ॥

पूगीफलप्रमाणानि कृत्वा खण्डानि पूर्ववत् ।
संस्कुर्यात्पूर्ववच्चूर्णैरम्लैश्च परिपाचयेत् ॥ ७३ ॥

---

१ A करपूर । २ D पू । ३ D सिच्चयेत्पाकं । ४ A ज्ञोवा ? । ५ A द्रव्यं । ६ A त । ७ A मृ । ८ A ण्ड । ९ A न्य । १० ले । ११ D ष्ट ।

स्तोकावशेषपाकेस्मिन्न्यस्तं रक्तं विनिक्षिपेत् ।
पूर्णे पाके समुत्तार्य धूपयेद्धिङ्गुजीरकैः ॥ ७४ ॥

कर्पूरचूर्णकं तस्मिन् एलाचूर्णेन संयुतम् ।
विकिरेन्मरिचैर्युक्तं कृष्णपाकमिदं वरम् ॥ ७५ ॥

अङ्गारभृष्टकं मांसं शुद्धे पट्टे निधापयेत् ।
कर्च(र्त)यो तिलशः कृत्वा मातुलिङ्गस्य केसरैः ॥ ७६ ॥

आर्द्रकैः केसरालै(म्लै)श्च गृञ्जनैस्तत्प्रमाणकैः ।
जीरकैर्मरिचैः पिष्टैर्हिङ्गुसैन्धवचूर्णकैः ॥ ७७ ॥

मिश्रयित्वा तु तन्मांसं हिङ्गुधूपेन वासयेत् ।
आमं मांसं च पेषण्यां हिङ्गुतोयेन सेचितम् ॥ ७८ ॥

लवणेन च चूर्णेन सँहितं पेषयेद्बुधः ।
पिष्टवच्चिक्कणं कृत्वा गोलकानि प्रकल्पयेत् ॥ ७९ ॥

चूर्णीकृतं तु यन्मासं गोलकैस्तद्विवेष्टयेत् ।
चूर्णगर्भांश्च वटकान्प्रक्षिपेदाणके शुभे ॥ १४८० ॥

ख्यातास्ते मांसवटका रुच्या दृश्या मनोहराः ।
त एव वटकास्तैले पक्वाः स्युर्भूषिकाँभिधाः ॥ ८१ ॥

तदेव चूर्णितं मांसं कणिकापरिवेष्टितम् ।
अङ्गारेषु तथा भृष्टं कोशलीति निगद्यते ॥ ८२ ॥

वार्ताकं वृन्तदेशस्य समीपे कृतरन्ध्रकम् ।
निष्कासितेषु बीजेषु तेनँ मांसेन पूरितम् ॥ ८३ ॥

तैलेन पाचितं किञ्चिदाणके परिपाचयेत् ।
पूरभट्टाँकसंज्ञं तत्स्वादुना परिपाचयेत् ॥ ८४ ॥

कोशातकीफलेऽप्येवं मूलकस्य च कन्दके ।
पूरिते चूर्णमांसेन तत्तन्नाम्ना तु कथ्यते ॥ ८५ ॥

---

१ A र्णं । २ A भ । ३ A सिञ्चि । ४ A सेचितं । ५ A ता । ६ D ऐण । ७ F भ्रट्टाक D ष्टा ।

आमं मांसं सुपिष्टं तु केसरादिविमिश्रितम्[1] ।
वटकीकृत्य तैलेन तप्तेन परिपाचयेत् ॥ ८६ ॥

आणके च[2] क्षिपेत्तज्जस्तापयेद्वा विभावसौ ।
नाम्ना[3] वट्टिमकं तत्तु त्रिः (त्रि) प्रकारमुदीरितम् ॥ ८७ ॥

अन्त्राणि[4] खण्डशः कृत्वा कालखण्डं तथा कृतम् ।
वारिप्रक्षालितं कृत्वा खण्डितान्[5]ः (तान्) समरूपतः ॥ ८८ ॥

मेदसः शकलास्तद्वन्मांसखण्डांस्तथैव च ।
राजिकाकल्कदिग्धांस्तांस्तोयमिश्रान्विपाचयेत् ॥ ८९ ॥

आर्द्रकस्य रसं स्तोकं अम्लमल्पं विमिश्रयेत् ।
प्रमाणाल्लवणं क्षिप्त्वा हिङ्गुतोयं च मेलयेत् ॥ १४९० ॥

किञ्चिच्छेषं द्रवं तत्तु समुत्तार्य विधूपयेत् ।
पञ्चवर्णीति विख्याता नानारूपरसावहा ॥ ९१ ॥

अन्त्राणि जलधौतानि शूलयष्ट्यां विवेष्टयेत्[6] ।
तापयेच्च तथाऽङ्गारैर्यावत्कठिनतां ययुः ॥ ९२ ॥

पश्चाद्विचूर्णितं श्लक्ष्णं सैन्धवं तेषु योजयेत् ।
अन्त्रशुण्ठकमाख्यातं चर्वणे मर्मरारवम् ॥ ९३ ॥

पूर्ववच्छोषिते रक्ते बीजपूरस्य केसरम् ।
रसमार्द्रकसंभूतं रसं दन्तशठस्य च ॥ ९४ ॥

जीरकं हिङ्गुमरिचं धान्यकं सैन्धवं क्षिपेत् ।
मेदसः श्लक्ष्णखण्डानि क्षिप्त्वा सर्वं विलोडयेत् ॥ ९५ ॥

अन्त्रं प्रक्षालितं यत्नाच्चेन रक्तेन पूरितम्[7] ।
पेटकाकृतियुक्तासु कम्रासु परिवेष्टयेत्[8] ॥ ९६ ॥

कम्रामुखानि बध्नीयात् केवलैरन्त्रकैस्तथा ।
तैरेव रज्जुसङ्काशैर्गृहीत्वोपरि तापयेत्[9] ॥ ९७ ॥

---

१ D निर्मि । २ D चाक्षि । ३ D सास्ना पटकम् । ४ A आ । ५ D ता । ६ A पाच ।
७ A जि । ८ A प । ९ A कैःसमा D कैस्ततः । १० A स ।

अङ्गनरैः किंशुकाकारैर्यावत्काठिन्यमाप्नुयुः।
मण्डलीयं समाख्याता राजवृक्षफलोपमा[1] ॥ ९८ ॥

पश्चाङ्गःपट्टवेद्वेष्ट्य वर्त्तिबद्धोज्ज्वला वपा।
अङ्गुलद्वयमानेन खण्डांस्तस्याः प्रकल्पयेत् ॥ ९९ ॥

खण्डानि कालखण्डस्य तत्प्रमाणानि चान्तरा।
शूलप्रोतानि कृत्वा तान्यङ्गारेषु प्रतापयेत् ॥ १५०० ॥

सैन्धवं विकिरेत्तत्र सुश्लक्ष्णं मरिचान्वितम्।
वर्णशुण्ठकनामेदं वर्णितं सोमभूभुजा ॥ १ ॥

अङ्गारेषु तथा भृष्ट्वा कालखण्डं विकृत्य च।
पूगीफलप्रमाणेन खण्डान्कृत्वा विचक्षणः ॥ २ ॥

तैलेनाभ्यज्य तान्सर्वान्मरिचाजाजिसैन्धवैः।
चूर्णितैर्विकिरेत्पश्चाद्विङ्गधूपेन धूपयेत् ॥ ३ ॥

अनेन विधिना भृष्ट्वा[2] राजिकाकल्पलेपितं[3]म्(तान्)।
कालखण्डान्प्रकुर्वीत दध्ना राजिकयाऽथवा ॥ ४ ॥

भृष्टस्य कालखण्डस्य कृत्वा चंक(क्क)लिकाः शुभाः।
कर्षैरर्मातुलिङ्गस्य सैन्धवाद्यैश्च मिश्रयेत् ॥ ५ ॥

समेदस्कौ[4] द्विधा भक्तौ कृत्वा लवणमिश्रितौ।
आम्लकैर्भावयित्वा तौ[5] तैलेन परिपाचयेत् ॥ ६ ॥

क्रोडदेशोद्भवं मांसमंस्था[6] सह विखण्डितम्।
अंसकीकससंयुक्तं पार्श्वकुल्या समन्वितम् ॥ ७ ॥

मृद्भाण्डे स्थाल्य(ल)वक्त्रे तन्निक्षिप्य बहलोदके।
हिङ्गुना चार्द्रकेणापि सैन्धवेन च संयुतम् ॥ ८ ॥

क्वाथयेत्सुचिरं कालं यावत्तन्मार्दवं भजेत्।
उत्कॉथितमिदं सूपं[7] ख्यातं शास्त्रविशारदैः ॥ ९ ॥

---

१ A मा: । २ D ब्येद्या च । ३ C ष्टा । ४ D ताः C ताम् । ५ D त्र F च । ६ A कस । ७ D कौ । ८ D तु । ९ C सन्ना A सस्त्वा । १० A त्काथित । ११ D ख्यातं सूपशास्त्रविशारदैः ।

विशेस्तस्य च मेषस्य जठरं पाटयेदनु ।
आन्तरं सर्वमुत्सार्य बध्नीयादपराङ्घ्रिकौ ॥ १५१० ॥

शिरश्च रज्वा दृढया ज्वालायां परितापयेत् ।
यावद्रोमाणि गच्छन्ति यावत्कृष्णत्वमेति च ॥ ११ ॥

ततः प्रक्षाल्य तोयेन शेषं क्रोडवदाचरेत् ।
अन्येषां श्वापदानां च शेषं मेषवदाचरेत् ॥ १२ ॥

समेदस्कानि मांसानि कृत्वा दीर्घाणि कर्तनैः ।
हिङ्गुतोयेन संसिच्य लवणेन विलोडयेत् ॥ १३ ॥

छायायां तानि खण्डानि वास्तु(यु)ना परिशोषयेत् ।
एकद्वित्रिदिनान्तेषु भृष्टान्यङ्गारपुञ्जके ॥ १४ ॥

स्थूलीकृतानि यावच्च स्वादुरुच्यानि यन्नृणाम् ।
उपष(ख)ण्डकनामानि सर्वशाकोत्तमानि च ॥ १५ ॥

हरिणस्य तथा खण्डान् चक्कलीपरिकल्पितान् ।
सम्भारसहितान्माज्यलवणेन विमिश्रितान् ॥ १६ ॥

शोषितानपि चात्यर्थमग्निना परिभर्जितान् ।
हृद्यान्यथा(पथ्या)न्सुगन्धांश्च कल्पयेदुपखण्डकान् ॥ १७ ॥

रुरुशम्बरसारङ्गच्छागस्य नलकं पृथु ।
अग्नौ भृष्ट्वा शिलाघातैः स्फोटयित्वा प्रयत्नतः ॥ १८ ॥

मज्जानं तु ततो हृत्वा लवणाम्लेन हिङ्गुना ।
मरिचाजाजिचूर्णेन पचेत्स्थाल्यां विचक्षणः ॥ १९ ॥

यस्य कस्यापि मेषादेः शिरो भृष्ट्वा विभिद्य च ।
आददीत च मस्तिष्कं काञ्जिकेन विपाचयेत् ॥ १५२० ॥

आणके तैलमध्ये वा यथारुचि पुनः पचेत् ।
चूर्णैः संयोज्य तत्पश्चाद्धिङ्गुधूपेन धूपयेत् ॥ २१ ॥

पक्षिणामपि सर्वेषां पिच्छानुत्सार्य सर्वतः ।
चञ्चुपादं पृथक्कृत्वा पाटयित्वा ततो(थो)दरम् ॥ २२ ॥

---

१ D चित्तलस्य । २ A खातृ । ३ A ञ्चा । ४ F पथा । ५ A स्के ।

निष्कृष्यान्त्रादिकं सर्वं पूर्ववत्परिपाचयेत् ।
यथा सूकरमेषाणां क्रियाः प्रोक्ता विपाचने ॥ २३ ॥

सशल्कानां च मत्स्यानां शल्कं स्फे(स्फो)ट्यं प्रयत्नतः ।
स्थूलाश्चेत्खण्डशः कार्या लघवश्चेत्सरूपतः ॥ २४ ॥

मत्स्यानां छेदयेत्शीर्षं पुच्छं तेषां च पक्षिणाम् ।
विपाट्य जठरं तस्मादन्त्रकाण्यपसारयेत् ॥ २५ ॥

कह्लाकरोष्ट बडिशा दग्धा खवल चाचुकैः? ।
पाठीनैश्च तथैतेषां पृथक् कृत्वा शिरः पचेत्? ॥ २६ ॥

मत्स्यानां घर्षणं कार्यं तैलेन लवणेन च ।
यावत्पिच्छलतां याति मत्स्यगन्धश्च नश्यति ॥ २७ ॥

क्षालयेदुदकैः पश्चाद्धरिद्राकल्कमिश्रितैः ।
वस्त्रे बध्वा निपीडयैतान् स्रावयेत्सङ्गतं जलम् ॥ २८ ॥

क्षिपेत्पूर्वप्रसिद्धेषु प्रपक्वेष्वाणकेषु तान् ।
स्वल्पे काले गते सूदः स्थालीमुत्तार्य धूपयेत् ॥ २९ ॥

मत्स्यखण्डानि धौतानि चिञ्चाम्लेन विपाचयेत् ।
ततो गोधूमचूर्णं तु विकिरेत्तेषु सर्वतः ॥ १५३० ॥

तप्ततैले क्षिपेत्तानि पिङ्गान्युत्तारयेत्ततः ।
एलामरिचचूर्णेन सैन्धवेन च भावयेत् ॥ ३१ ॥

आणके वा तथा तैले वह्नौ वा धूमवर्जिते ।
पूर्वोक्तविधिना मत्स्यान् यथारुचि विपाचयेत् ॥ ३२ ॥

मत्स्यांश्च खण्डशः कृत्वा चतुरङ्गुलसम्मितान् ।
लवणेन समायुक्तान् कुम्भेषु परिपूरयेत् ॥ ३३ ॥

खारखण्डा इति ख्याताश्चिरकालं वसन्ति ते ।
भोजनावसरे सूदो वह्निना परिभर्जयेत् ॥ ३४ ॥

मत्स्याण्डकोशावादाय वन्हिना परिभर्जयेत् ।
दृढीभूते(तौ) ततः पश्चात् खण्डशः परिकल्पयेत् ॥ ३५ ॥

---

१ A ह्या । २ A ष्या । ३ A दा । ४ D कन्दं करोष्ट बिडिशाः । ५ A ठा । ६ C F खी । ७ D र्त्स ।

विपच्य तप्ततैले तान्येलामरिचकादिभिः।
विकीर्य सैन्धवेनापि हिङ्गुना परिधूपयेत् ॥ ३६ ॥

कच्छपान् वह्निना भृष्ट्वा पादांश्छल्कांश्च मोचयेत्।
शिरश्चैव पृथक्कृत्वा पक्वरम्भाफलोपमान् ॥ ३७ ॥

अम्लकैश्च विपच्याथ तैलेनाज्येन वा पुनः।
पाचयेच्च सुसिद्धांस्तान् चूर्णकैरवचूर्णयेत् ॥ ३८ ॥

आणके वा पचेत्तज्ज्ञो निर्धूमे वा हुताशने।
नन्द्यावर्ता इति ख्याता मृदुरुच्या मनोहराः ॥ ३९ ॥

कर्कटांस्तु लघून्स्थूलान् हस्तपादवियोजितान्।
रूक्षे ताम्रमये पात्रे सुतप्ते तान्वि(भ)वर्जयेत् ॥ १५४० ॥

स्फोटिते खर्परे तांस्तु मृदौ भाण्डे विनिक्षिपेत्।
विपचेल्लवणाम्लैश्च पुनः सर्पिषि पाचयेत् ॥ ४१ ॥

जीरकं लवणं तीक्ष्णं चूर्णितं तेषु निक्षिपेत्।
वृष्यौ बलकरा हृद्या मृष्टास्ते घृतकर्कटाः ॥ ४२ ॥

मूख(ष)काः क्षेत्रसंभूता नदीकूलेषु संस्थिताः।
स्थूलाः श्यामास्तथा पुष्टा जात्या ते मयिगाः स्मृताः ॥ ४३ ॥

प्रतप्ते सलिले तांस्तु निक्षिपेत्पुच्छधारणात्।
उद्धृत्य तस्मात्सलिलाद्रोमाण्युत्पाटयेत्ततः ॥ ४४ ॥

विभेद्य जठरं तेषां स्फोटयेदन्त्रकाणि तु।
सम्भारसहितैरम्लैः पचेच्च लवणान्वितैः ॥ ४५ ॥

शूलप्रोतांस्ततः कृत्वा तानङ्गारैः प्रतापयेत्।
यावद्धहिस्त्वचस्तेषां शोषमायान्ति तापनात् ॥ ४६ ॥

सुपक्वेषु तथा तेषु मूख(ष)केषु किरेदनु।
लवणं मरिचं शुण्ठी जीरकं च विचूर्णितम् ॥ ४७ ॥

फलशाकं पत्रशाकं कन्दशाकं च मूलकम्।
पुष्पशाकं शिम्बिशाकं पक्वापक्वविभेदतः ॥ ४८ ॥

---

१ A रेव। २ A दौ। ३ D तेषु वि। ४ A ष्पा। ५ D णः। ६ A खं।

कल्पयेद्विविधैः शाकैर्मांसवत् पाककोविदः।
वटकान् पर्पटान् हृद्यानङ्गारैः परिभर्जयेत् ॥ ४९ ॥

आम्राम्रातकजम्बूश्च बीजपूराग्निमन्थकैः।
भल्लातागस्त्यकर्कोपासद्राक्षाभृङ्गकसल्लकैः ॥ ५० ॥

पुनर्नवा मरी तीक्ष्णा अंतसी सुरसाद्वयम्।
मरुकं तालपर्णी च भिण्डुकी मुण्डिका तथा ॥ ५१ ॥

ब्राह्मी चैवाम्लपत्री च कोकिलाक्षी कुसुम्भकम्।
अञ्जनं पद्मकोशश्च शेटकं च तथापरं ॥ ५२ ॥

सङ्गृह्य पल्लवानेषामम्ल(म्लि)काम्लेन मिश्रयेत्।
जम्बीराम्लेन दध्ना वा लवणेन च संयुतान् ॥ ५३ ॥

श्रीफलं केतकं चिञ्चा मेषशृङ्गी सुगन्धिजम्।
कुटजं मरिचं पथ्या विषमुष्टिकशिम्बिजम् ॥ ५४ ॥

एलारामठनीवारमेथिकापर्पटं तथा।
अगस्त्यं नन्दनं राजमातुलिङ्गकपाटालि ॥ ५५ ॥

कटं मटं कर्कटं च करीरं टेण्टुकं तथा।
वेत्रकारीफलं चैव लवणाम्भसि निक्षिपेत् ॥ ५६ ॥

चूतमाम्रातकं धात्री कुंहिरी कर्कटी तथा।
कूष्माण्डं त्रपुसं द्राक्षा कर्कटी बृहतीद्वयम् ॥ ५७ ॥

कोशातकीबीजपूरं निष्पावं करमर्दकम्।
जम्बीरबिम्बवार्ताककर्मरं लवणाम्भसि ॥ ५८ ॥

अथवा राजिकाचूर्णे सतैले लवणान्विते।
प्रक्षाल्य वृन्तसहितं फलं चूतादिकं न्यसेत् ॥ ५९ ॥

कारवेल्लं सपनसं कदलीफलमेव च।
सतैले राजिकाचूर्णे निक्षिपेल्लवणान्विते ॥ १५६० ॥

---

१ A खै। २ A क। ३ D ऋ। ४ D F C ण्डि। ५ D म्मालिका। ६ D लिः। ७ D कू गी। ८ A ति। ९ A वन्दरं। १० C ते F तं।

वंशाङ्कुरं लघुं चक्रीं शतावर्यास्तथैव च ।
पातालटेण्डुकानां च प्ररोहान्क्षालितान्मृदून् ॥ ६१ ॥

सलिले लवणोपेते तैले वाऽपि सराजिके ।
लवणेन समायुक्ते प्रक्षिपेदङ्कुरानिमान् ॥ ६२ ॥

मागिणीमार्द्रकं पृष्ठुं कचोरं वनमागिणीम् ।
कर्पूरमागिणीमूलं तथैवाम्लहरिद्रका ॥ ६३ ॥

सूरणं मधुशिग्रुं च तथा शैबलकन्दकम् ।
एतानि पूर्ववत्कृत्वा तैले वापि विनिक्षिपेत् ॥ ६४ ॥

गव्यं वा माहिषं वाऽपि क्षीरं नीरविवर्जितम् ।
पचेत्स्थाल्यां मृदावथौ दर्वीघट्टनसंयुतम् ॥ ६५ ॥

अर्धावशेषं कुर्वीत त्रिभागेनावशेषितम् ।
षड्भागशेषितं वाऽपि कुर्यादष्टावशेषिकम् ॥ ६६ ॥

अर्धावशिष्टं पाने स्यात्त्रिभागं लेह्यकं भवेत् ।
षड्भागं पिण्डतामेति शर्करा स्यादथाष्टमे ॥ ६७ ॥

अर्धावशेषिते दुग्धे तक्रमीषद् विनिक्षिपेत् ।
नवस्थाल्यां न्यसेत्तत्तु निवाते स्थापयेच्च ताम् ॥ ६८ ॥

शर्करामिश्रितं वापि फलैर्वापि विमिश्रयेत् ।
यामषट्कोषितं क्षीरमम्लतां घनतां भजेत् ॥ ६९ ॥

दधीति नाम प्राप्नोति पथ्यं मृष्टं मनोहरम् ।
हीनकाले तथा पथ्यं चिरकालेऽम्लता बहु ॥ १५७० ॥

मन्थानेन मथित्वा तन्नवनीतमथो हरेत् ।
निर्जलं मथितं प्रोक्तमुदस्वित्यां(श्विच्च) जलार्धकम् ॥ ७१ ॥

पादाम्बु तक्रमुद्दिष्टं धूपितं हिङ्गुजीरकैः ।
आर्द्रकेण समायुक्तमेलासैन्धवचूर्णितम् ॥ ७२ ॥

---

१ D व । २ D तालं A तलं आर्द्रा । ३ A ण्ड । ४ F ये । ५ D रो । ६ D वष्ट । ७ A आर्दा । ८ A ष । ९ A आर्दा । १० A ष्ट । ११ A आर्दा । १२ D तन्तु । १३ D तम् । १४ F क । १५ D द्ध । १६ A त्यार्द्रे । १७ A र्द्धि ।

मथितं शर्करायुक्तमेलाचूर्णविमिश्रितम् ।
कर्पूरधूपितं नाम्ना मज्जिकेत्यभिधीयते ॥ ७३ ॥

निष्पीड्य दधि वस्त्रेण स्रावयेत्तद्भुतं जलम् ।
शर्करैलासमायुक्ता सूदैः शिखरिणी मता ॥ ७४ ॥

स्राविते यद्धृतं तोयं जीरकार्द्रकसैन्धवैः ।
संयुक्तं हिङ्गुधूपेन धूपितं मस्तु कीर्तितम् ॥ ७५ ॥

नवनीतं नवं धौतं[1] नीरलेशविवर्जितम् ।
तापयेदग्निना सम्यक् मृदुना[2] घृतभाण्डके ॥ ७६ ॥

पाके संपूर्णतां याते क्षिपेद्धोधूमबीजकम् ।
क्षिपेत्ताम्बूलपत्रं च पश्चादुत्तारयेद्धृतम् ॥ ७७ ॥

तण्डुलक्षालितं तोयं चिञ्चाम्लेन विमिश्रितम् ।
ईषत्तक्रेण संयुक्तं सितया सह योजितम् ॥ ७८ ॥

एलाचूर्णसमायुक्तमार्द्रकस्य रसेन च ।
धूपितं हिङ्गुना सम्यक् व्यञ्जनं परिकीर्तितम् ॥ ७९ ॥

सौवीरनिर्मलं साम्लं लवणेन च संयुतम् ।
हिङ्गुना जीरकेणापि धूपितं धूपकाङ्किकम् ॥ १५८० ॥

शङ्कुद्वयं समास्थाप्य[3] वस्त्रीयादुज्ज्वलाम्बरम् ।
प्रसार्य ष(य)ष्टिभिः किञ्चित्क्षीरमम्लेन भेदितम्[4] ॥ ८१ ॥

सितया च समायुक्तमेलाचूर्णविमिश्रितम् ।
क्षिपेत्प्रसारिते वस्त्रे स्रावयेत्पेषयेत्समम् ॥ ८२ ॥

पुनः पुनः क्षिपेत्तत्र यावन्निर्मलतां व्रजेत् ।
पक्वचिञ्चाफलं भृष्टं वर्णार्थं तत्र निक्षिपेत् ॥ ८३ ॥

यस्य कस्य फलस्यापि रसेन परिमिश्रयेत्[5] ।
तत्तन्नामसमाख्यातं पानकं पेयमुत्तमम्[6] ॥ ८४ ॥

सौवर्णे राजते पात्रे रीतिर्यन्त्रविधारिते ।
भोजयेन्मण्डलेशादीन्यथायोग्यप्रदेशतः ॥ ८५ ॥

१ D आवपे । २ A त । ३ A मधु । ४ A य । ५ A तः । ६ D F श्रितम् । ७ D पान । ८ F वंल ।

विशाले काञ्चने पात्रे स्वर्णकच्चोलसंयुते ।
लोहगङ्गालकैर्युक्ते रुक्मपिंगालकैर्युते ॥ ८६ ॥

मर्मशुक्तिसमोपेते कनकस्थालसंयुते ।
जलप्रक्षालिते सम्यक् सितवस्त्रप्रमार्जिते ॥ ८७ ॥

वर्धयेत्पूर्वकथितमन्नपक्वान्नपानकम् ।
ऊरुनाभिप्रदेशान्तं सञ्छाद्य सितवाससा ॥ ८८ ॥

गद्दिकायां समासीनः पूर्वाशासम्मुखो नृपः ।
अन्नं मुद्गसमोपेतं भुञ्जीतोष्णं घृतप्लुतम् ॥ ८९ ॥

प्राचीमुखस्तु भुञ्जान आयुश्च लभते बहु ।
यशश्च लभतेऽत्यर्थमश्नन्दक्षिणदिङ्मुखः ॥ १५९० ॥

श्रियं तु लभते पुष्टां भुञ्जानः पश्चिमाननः ।
सत्यवाक्यफलं प्राप्नोत्यश्नन् धनददिङ्मुखः ॥ ९१ ॥

श्लक्ष्णमांससमायुक्तं विदलैर्वा विमिश्रितम् ।
लेहैश्च विविधैर्हृद्यैर्लेपितं वा तथोदनम् ॥ ९२ ॥

मांसप्रकारकैर्मृष्टैरम्लमिश्रैश्च पल्लवैः ।
नानाविधैस्तथा शाकैः फलपत्रसमुद्भवैः ॥ ९३ ॥

वटकैः पर्पटैर्हृद्यैः खारखण्डोपखण्डकैः ।
यथारुचि यथासात्म्यं सुखं भुञ्जीत भूपतिः ॥ ९४ ॥

पक्वान्नं पायसं मध्ये शर्कराघृतमिश्रितम् ।
ततः फलानि भुञ्जीत मधुराम्लरसानि च ॥ ९५ ॥

पिबेच्च पानकं हृद्यं लिह्याच्छिखरिणीमपि ।
चूषेत माज्जिकां पश्चाद्दधि चाद्याऽत्ततो घनम् ॥ ९६ ॥

ततस्तक्रान्नमश्नीयात् सैन्धवेन च संयुतम् ।
क्षीरं वाऽपि पिबेत्पश्चात् पिबेद्वा काञ्जिकं वरम् ॥ ९७ ॥

---

१ A C F म्बो । २ भुम । ३ A सङ्गते । ४ D क्षेण । ५ A न्न F म्ल । ६ A न्न । ७ हैर्वि । ८ A ष्वेप । ९ A वा । १० A न्त । ११ A वरी ।

मांसमम्लेन भुञ्जीत दुग्धं वा शर्करायुतम्[1]।
लवणेन तथा चाम्लं क्षारं कटुकषायकैः ॥ ९८ ॥

वसन्ते कटु चाश्नीयाद्ग्रीष्मे मधुरशीतलम्।
वर्षासु च तथा क्षारं मधुरं शरदि स्मृतम् ॥ ९९ ॥

हेमन्ते स्निग्धमुष्णं च शिशिरेऽप्युष्णमम्लकम्।
एवं भुञ्जीत यद्भूपो अन्नभोगः स कथ्यते ॥ १६०० ॥

अन्नभोगः समाख्यातः सोमेश्वरमहीभुजा।

॥ इत्यन्नभोगः ॥ १३ ॥

हृद्यः पानीयभोगोऽयमिदानीमभिधीयते ॥ १ ॥

मध्ये मध्ये पिबेद्वारि स्तोकं स्तोकं सुशीतलम्।
भोजनस्य च रुच्यर्थं पाकार्थमशनस्य च ॥ २ ॥

पिपासायां च जातायां स्वेच्छया पीयते जलम्।
नियमो नात्र कालस्य तृषावेगो न धार्यते ॥ ३ ॥

असवः प्राणिनामापो जीवितं यत्तदाश्रितम्।
मूर्च्छिता अपि जीवन्ति यतस्तोयेन सिञ्चिताः ॥ ४ ॥

दिव्य(व्या)न्तरिक्षं नादेयं नैर्झरं सारसं जलम्।
भौमं चौण्डं च ताडाकमौद्भिदं नवमं स्मृतम् ॥ ५ ॥

स्वात्यां पयोदनिर्मुक्तं सूर्यरश्मिविमिश्रितम्।
सर्वदोषापहं स्वादु दिव्यमित्युच्यते जलम् ॥ ६ ॥

प्रावृड्जलदनिर्मुक्तमव्यक्तं स्वादुलक्षणम्।
वारि स्फटिकसङ्काशमान्तरिक्षमिति स्मृतम् ॥ ७ ॥

नद्यां शैलप्रसूतायामिन्द्रनीलसमप्रभम्।
प्रशस्तभूमिभागस्थं नीरं नादेयमुच्यते ॥ ८ ॥

---

१ D F शर्करया सह। २ D ण्डं F ढं। ३ A ढाक F डाग। ४ A तज्जलम्।

वालुकासु करैर्गर्तं कृत्वा यत्प्राप्यते जलम् ।
उत्क्षेपेणेन नैर्मल्यं याति निष्ष्(ष्य)न्दजं हि तत् ॥ ९ ॥

नद्याः शैलवराद्वाऽपि सृतमेकत्र संस्थितम् ।
कुमुदाम्भोजसञ्छन्नं तोयं सारसमुच्यते ॥ १६१० ॥

वापीकूपसमुत्पन्नं नीलोत्पलदलप्रभम् ।
विमलं मधुरास्वादं भौममम्भोऽभिधीयते ॥ ११ ॥

स्वयं दीर्घशिलाश्वभ्रेष्वैतसीपुष्पसन्निभम् ।
निर्मलं मधुरं पथ्यं सलिलं चौण्डमुच्यते ॥ १२ ॥

पालिबन्धेन संरुद्ध(द्धः)कुल्यापूरागतो रसः ।
प्रतिवर्षं वना(नवा)म्भोभिमि(र्मि)श्रस्ताडाक उच्यते ॥ १३ ॥

निर्मलं लघु पानीयमुत्तानं स्वादु शीतलम् ।
शैलसानुसमुद्भेदान्नैर्झरं परिकीर्तितम् ॥ १४ ॥

दशमं केचिदिच्छन्ति वार्क्षं जीवनमुत्तमम् ।
नारिकेलसमुद्भूतं स्वादु वृष्यं मनोहरम् ॥ १५ ॥

हंसोदकं तथा चान्यत् क्रियासंस्कारसंस्कृतम् ।
दिवा सूर्यांशुसन्तप्तं रात्रौ चन्द्रांशुशीतलम् ॥ १६ ॥

सकर्दमं सशैवालं पल्वलोत्थं सपल्लवम् ।
वर्जयेदूषरोद्भूतं गन्धवर्णैश्च दूषितम् ॥ १७ ॥

अशोकपल्लवप्रख्यं शुद्धस्फटिकसन्निभम् ।
नीलोत्पलदलश्यामं कषायमधुरं वरम् ॥ १८ ॥

कणामुस्तकसंयुक्तमेलोशीरकचन्दनैः ।
मर्दितं मृत्तिकापिण्डं खदिराङ्गारपाचितम् ॥ १९ ॥

निक्षिपेन्निर्मले तोये सर्वदोषहरे शुभे ।
कथितः पिण्डवासोऽयं सलिलेषु विचक्षणैः ॥ १६२० ॥

---

१ A क्षे । २ A ष्क । ३ D त्रैर । ४ C F ढ । ५ A प्रतिबन्धेन यत्तोयं तत्ताडागं समुच्यते । ६ D च्यते । ७ C क्षं । ८ D मृदि ।

सहकाररसेनापि पाटलोत्पलचम्पकैः।
वासयेच्च यथाकालं पुष्पवासोऽयमीरितः॥ २१॥

लवङ्गोशीरकर्पूरकान्तानलदचन्दनैः।
सलिलामयकङ्कोलपथ्याकर्चूरसंयुतैः॥ २२॥

विचूर्णितैः समैरेभिः सुशीतामलवारिणा।
चूर्णाधिवासिनः प्राह श्रीमत्सोमेश्वरो नृपः॥ २३॥

करकैर्मृण्मयैः श्लक्ष्णैः प्रवालारुणकान्तिभिः।
चर्मपात्रैः सुरम्यैर्वा त्रिफलो(ला)परिशोधितैः॥ २४॥

नालैश्च सुबहुच्छिद्रैः रौप्यस्फटिककाञ्चनैः।
सहितैस्तैः शुभकरैः सितवस्त्रावगुण्ठितैः॥ २५॥

भृतं सुशीतलं तोयं निर्मलं मृदु वीजितम्।
पिबेत्सौवर्णचषकैः शुक्तिभिर्वा बिसैरपि॥ २६॥

दिव्यं शरदि पानीयं हेमन्ते सरिदुद्भवम्।
शिशिरे वारि ताडागं वसन्ते सारसं पयः॥ २७॥

निदाघे नैर्झरं तोयं भौमं प्रावृषि पीयते।
हंसोदकं सदा पथ्यं वार्क्षं पेयं यथारुचि॥ २८॥

सहजं निर्मलं वाऽपि संस्कृतं गन्धवासनैः।
पीयते सलिलं यत्तु पानभोगः स कीर्तितः॥ २९॥

॥ इति पानीयभोगः ॥१४॥

प्रोक्तः पानीयभोगोऽयं सोमेश्वरमहीभुजा।
पादाभ्यङ्गोपभोगोऽयमधुना परिकीर्त्यते॥ १६३०॥

वामपार्श्वे शयानः सन्पादावभ्यङ्गयेत्सुखी।
सर्पिषा शतधौतेन नवनीतेन वा नृपः॥ ३१॥

दध्ना तैलेन पयसा तक्रेणापि युतेन वा।
श्रीखण्डक्षोदनीरेण बदर्याः फेनकेन वा॥ ३२॥

---

१ A व। २ A कांक्षा। ३ A णः। ४ A नि। ५ C मान्। ६ D न्यै। ७ D F स्का। ८ A जीवि। ९ A ब। १० F स्तु। ११ A चैनं। १२ A तथा। १३ A त्यैते। १४ F भि।

पादसंवाहदक्षाणां कामिनीनां मनोहरैः।
अशोकपल्लवप्रख्यैर्[1]हस्तैरत्यन्तपेशलैः ॥ ३३ ॥

वसन्ते सर्पिषा दध्ना शीतेन पयसाऽपि वा।
निदाघे नवनीतेन काञ्जिकेन[2] सफेनकैः ॥ ३४ ॥

वर्षासु वसयाभ्यङ्ग्यौ[4] पादौ तक्रेण वा पुनः।
शतधौतेन शरदि सर्पिषा चन्दनोदकैः ॥ ३५ ॥

हेमन्ते शिशिरे चैव तैलेनाभ्यञ्जयेत्पदे।
पश्चात्प्रक्षालयेत्पादौ सुखस्पर्शेन पाय(थ)सा ॥ ३६ ॥

मसूरयवपिष्टैश्च हरिद्राचूर्णमिश्रितैः।
उद्धृ(द्वृ)त्य च पुनः पादौ क्षालयेत्सुखवारिणा ॥ ३७ ॥

एवं यः कारयेद्राजा भोजनादूर्ध्वमन्वहम्।
पादाभ्यङ्गोपभोगोऽयं वर्णितः सोमभूभुजा ॥ ३८ ॥

इति पादाभ्यङ्गोपभोगः ॥ १९ ॥

इदानीं सुखदोऽत्यर्थं यानभोगो निरूप्यते।
दोला सुखासनं हस्ती करिण्यश्वतरी हयः ॥ ३९ ॥

रथो नौः प्लवकश्चेति[5] नवधा यानमुच्यते।
सुवक्रया वेणुजया हेमरत्ननिबद्धया ॥ १६४० ॥

स्वर्णशृङ्खलवत्पट्टन्यस्तशय्योपधानया।
दिव्यपट्टप्रच्छदया वीवँधद्वयबा(वा)ह्यया ॥ ४१ ॥

एकदण्डिकया यानं दोलायानं तदुच्यते।
दन्तिदन्तविनिर्माणं हेमरत्नविभूषितम् ॥ ४२ ॥

शार्दूलचर्मसन्नद्धं दण्डिकाद्वयधारि च।
चतुर्भिर्विविधैर्बा(वींवधैर्वा)ह्यं हंसशय्यासमन्वितम् ॥ ४३ ॥

पृथ्व्याधारेण संयुक्तं सुखासनमिति स्मृतम्।
समग्रं विपुलस्कन्धं मृदुसञ्चारसंयुतम् ॥ ४४ ॥

---

१ C D F स्तलैरभ्यञ्जयेच्छनैः। २ A सा। ३ C F काञ्जिकैः परिकीर्तितः D काञ्जिकैः कोल। ४ A ङ्गौ। ५ D निर्णी। ६ A का। ७ D विवि। ८ A श्वी।

जवने त्वरितं नागं याने शंसन्ति कोविदाः।
सौवर्णस्तम्भयुक्तेन मुक्तादामविराजिना ॥ ४५ ॥
काञ्चनैः कलशैः श्लक्ष्णैरुपरिष्टाद्विराजिना।
मयूरपिच्छपुच्छैर्वा प्रच्छन्नेन सुशोभिना ॥ ४६ ॥
चारुचामीकरच्छन्नपुष्पकेणोपशोभिता।
करिणी लघुसञ्चारा वेशदेश(शे) त्वकम्पना ॥ ४७ ॥
उपवेशे स्थिरा धीरा गमने च जवाधिका।
गतौ तु सलिला रम्या सर्वतस्त्रासवर्जिता ॥ ४८ ॥
चारुचामीकरच्छन्नपुष्पकेणोपशोभिता।
अस्खलन्ती पदन्यासे याने ऽश्वतरी वरा ॥ ४९ ॥
मयूरगतिको बा(वा)ह्यस्तित्तिरीगतिसन्निभः।
मरालगमनो वाऽपि चतुष्कगतिशोभितः ॥ १६५० ॥
गच्छतः कम्पतेऽश्वस्य पुच्छं ग्रीवं विशेषतः।
त्वरिता गतिरित्यर्थं मायूरीति निगद्यते ॥ ५१ ॥
शीघ्रं पदानि कुरुते यत्र पुच्छं न कम्पते।
सा गतिस्तैत्तिरी ज्ञेया हयवाहनकोविदैः ॥ ५२ ॥
पार्श्वाभ्यां दोलनं यत्र हंसवद्गच्छतो हरेः।
शिरोऽपि म(विधु)नुते तद्वन्मरालीगतिरीदृशी ॥ ५३ ॥
पादैश्चतुर्भिः सञ्चारे ललितं यत्र गच्छति।
चतुष्कगतिराख्याताऽनुत्तमा सुखदायिनी ॥ ५४ ॥
अश्वैश्चतुर्भिर्द्वाभ्यां वा युक्तश्चक्रयुगान्वितः।
मत्तवारणकैर्भव्यैश्चित्रितैः परिशोभितः ॥ ५५ ॥
नानावर्णपताकाभिर्भ्राजितः सुदृढाक्षकः।
उत्तमः स्यन्दनो याने नृपाणामेव निर्मितः ॥ ५६ ॥
शाकजैः फलकैश्छन्ना यौ च वल्कलवेष्टिता।
आयता सुदृढा नीरे सा नौर्याने प्रशस्यते ॥ ५७ ॥

---

१ This line is repeated below in 49। २ D देश। ३ D धारा। ४ D भनः। ५ D च्छं। ६ D वा। ७ D र। ८ D ज। ९ A उ। १० A तम्। ११ D च्छि। १२ A यो। १३ A र।

वेणुकम्राभिरन्योन्यं गुम्फितो वर्तुलाकृतिः।
पिनद्धश्चर्मणा बाह्ये प्लवकोऽयं जलेचरः॥ ५८॥

एतैर्यानैर्यथायोग्यं याति यः पृथिवीपतिः।
यानोपभोगः कथितः सोमेश्वरमहीभुजा॥ ५९॥

इतियानोपभोगः॥ १६॥

इदानीं छत्रभोगोऽयं कथ्यते राजवल्लभः।
हेमपट्टनिबद्धेन दण्डेनोपरि धारितम्॥ १६६०॥

नानावर्णसुसूत्राभिः कम्राभिः कृतपञ्जरम्।
श्वेतवस्त्रेण सञ्छन्नं मुक्तादामसुसूसकम्॥ ६१॥

नीलविद्रुममुक्ताभं लम्बनैः परिशोभितम्।
चञ्चत्काञ्चनजालेन कलशेन विराजितम्॥ ६२॥

पुण्डरीकसितच्छत्रं राजयोग्यमनुत्तमम्।
नीलपट्टनिबद्धानि रौप्यदण्डधृतानि च॥ ६३॥

नानावर्णविचित्राणि झल्लरीभिर्युतानि च।
मेघडम्बरनामानि चामरोत्तंसितानि च॥ ६४॥

छत्राणि विलसत्कान्तिमणिभिर्जडितानि च।
ससौवर्णकलापस्थं (स्थ) चन्द्रकैः परिकल्पितम्॥ ६५॥

सुवर्णदन्ती(न्ति)दण्डेन रत्नेन परिमण्डितम्।
कलशेन तदुत्थेन शुभ्रेण परिशोभितम्॥ ६६॥

पिच्छछत्रमिदं प्राहुः सांगिरीति विचक्षणाः।
रोहितैः पिञ्जरैश्चित्रैर्नानावर्णैर्नृपोत्तमः॥ ६७॥

आतपत्रैरसंख्यातैः वारयन्नातपं चरेत्।
एतेषां शीतलां छायामाश्रितः पृथिवीपतिः॥ ६८॥

सुखेन मोदते यत्तु छत्रभोगः प्रकीर्तितः।
छत्रभोगोऽयमुद्दिष्टः सोमेश्वरमहीभुजा॥ ६९॥

---

१ D षा। २ F मण्डितानि वराणि च। ३ A सौवर्णक। ४ A दंतप्रकल्पेन दंतिदण्डेन परिकल्पितं। ५ D सिग। ६ A वरि।

॥ इति छत्रभोगः ॥ १७ ॥

शय्याभोगोऽयमधुना वर्ण्यते सुखदायकः ।
हंसपिच्छमयी काचिच्छाल्मलीतूलजा परा ॥ १६७० ॥

कार्पासरचिता चान्या केसरैरितरा कृता ।
पल्लवैः कल्पिता काचित् काचित्कुसुमनिर्मिता ॥ ७१ ॥

पानीयपूरिता काचिच्छय्येयं सप्तधा स्मृता ।
दन्ताङ्घ्रि (:) लोहचरण(:)साष्टापदपदस्तथा ॥ ७२ ॥

वेर(र व)श्च वलनं चैव वेग्रिरुः (त्रिकः) पट्टिकामयः ।
दोलाक्षश्चेति कथिता मञ्चा विद्वद्भिरष्टधा ॥ ७३ ॥

शय्यानां लक्षणं वक्ष्ये मञ्चकानां तथैव च ।
मरालजठरोद्भूतैर्मण्डु(मृदु)भिः पु(पि)च्छगुच्छकैः ॥ ७४ ॥

श्लक्ष्णेन चर्मणा नद्धैः शय्या हंसमयी शुभा ।
शाल्मलीफलगर्भोत्थैः तूलैर्बीजविवर्जितैः ॥ ७५ ॥

घनेन वासनाँ(सा)नद्धैः शाल्मलीतूलिका भवेत् ।
कार्पासपिण्डकं यत्नाद्बीजं संस्फेद्य(स्फोट्य) पट्टके ॥ ७६ ॥

अयःशलाकया पश्चाद्धनुषा तं विवेचयेत् ।
दृढेन वाससाऽऽसीव्य विशालपरिशोभिना ॥ ७७ ॥

या शय्या क्रियते मृद्वी सा तु कार्पासजा मता ।
केसरैः पद्मसम्भूतैर्नागपुष्पसमुद्भवैः ॥ ७८ ॥

सुरभीकुसुमोत्थैश्च तथा कुङ्कुमसम्भवैः ।
पटीपट्टेन चित्रेण गुम्फितैश्चारु शिल्पिभिः ॥ ७९ ॥

शय्या केसरजाऽऽख्याता सुगन्धिः पृथिवीभुजाम् ।
कैमलोत्पलकल्हाररम्भाकङ्कोलिपल्लवैः ॥ १६८० ॥

कोमलैः कल्पिता शय्या शीतला पल्लवाभिधा ।
मल्लिकापाटलीपुष्पैः कुसुमैश्चम्पकस्य च ॥ ८१ ॥

---

१ A ल । २ D च । ३ A वग्रिकः F वग्रिहः । ४ A यने । ५ A स्थू । ६ D नने । ७ D मा ८ F तूली शाल्मलिका C शाल्मलीमा D लीतू । ९ A स्फे । १० A व्या । ११ D को ।

अन्यैः सुगन्धिभिः पुष्पैरपवृन्तैः कृता तु या ।
शय्या कुसुमजा नाम कामकेलिसुखावहा ॥ ८२ ॥

चर्मजा वारिणा पूर्णा तोयशय्या प्रकीर्तिता ।
द्विपदन्तकृतैः पादैश्चतुर्भिरुपशोभितै[1] ॥ ८३ ॥

दन्ताङ्घ्रिना(नो)म मञ्चोऽयम् सर्वदन्तमयः शुभः ।
ताम्रारकूटघटितश्चरणैस्तन्मयैः शुभैः ॥ ८४ ॥

लोहेमञ्चकनामाऽयं सुदृढः परिकीर्तितः ।
चारुचामीकरानद्धो रचनापरिरञ्जितः ॥ ८५ ॥

अष्टापदमयः प्रोक्तो मञ्चकोऽयं चतुष्पदः ।
यन्त्रिपत्रकृतैर्नादैरानन्दं तनुते नदन् ॥ ८६ ॥

वेत्र(रव)मञ्चः समाख्यातो रतिकेलिषु कामुकैः ।
उपवेशनमात्रेण गच्छत्यूर्ध्वमधश्च यः ॥ ८७ ॥

दृढाङ्घ्रिश्चारुरूपश्च लव(वल)मञ्चः प्रकीर्तितः ।
त्वग्भिर्वेत्रस्य बाह्याभिस्तनुभिर्गुम्फितो घनम् ॥ ८८ ॥

कुटिलैश्चरणैर्युक्तो वेत्रमञ्चः प्रकीर्तितः ।
कार्पासगुणकल्पाभिः पट्टिकाभिः सुगुम्फितः ॥ ८९ ॥

दीर्घाभिश्चित्रवर्णाभिर्मञ्चोऽयं पट्टिकाभिधः ।
श्रीखण्डदारुघटितः कनत्काञ्चनभूषितः ॥ १६९० ॥

खचितो दिव्यरत्नैश्च मत्तवारणशोभितः ।
सौवर्णशृङ्खलाबद्धो लम्बमानः सदोलनः ॥ ९१ ॥

किञ्जल्कशय्यामा(य्यया)युक्तो दोलामञ्चः सुखप्रदः ।
वसन्ते हंसजा शय्या क्रीडायां पुष्पपत्रजा ॥ ९२ ॥

निदाघे तूलजा शय्या मध्याह्ने तोयजा शुभा ।
हेमन्ते शिशिरे चैव वर्षासु च विचक्षणः ॥ ९३ ॥

भजेत शय्यां कार्पासीं नृपः शीतापनुत्तये ।
शरत्काले तु कैञ्जल्कीं दोलामञ्चसमाश्रिताम् ॥ ९४ ॥

---

१ D ता । २ A च । ३ F यन्त्र D यन्त्रयन्त्रि । ४ D रच F चर ।

अधितिष्ठेन्महीपालो भोगार्थं सुविचक्षणः।
एवंविधेषु मञ्चेषु शय्यास्वेवंविधासु च ॥ ९५ ॥

शेते विशाम्पतिर्यत्तु शय्याभोगः प्रकीर्तितः।
शय्याभोगोऽयमाख्यातः सोमेश्वरमहीभुजा ॥ ९६ ॥

॥ इति शय्याभोगः ॥ १८ ॥

अधुना धूपभोगोऽयं वर्ण्यते सौरभोत्कटैः।
लाक्षागुग्गुलकर्पूररालकुण्डुरुसिल्हकं ॥ ९७ ॥

श्रीखण्डं दारु सँरलं लघुकोष्ठं च वालकैः।
मांसीकुङ्कुमपथ्या च(श्च) कस्तूरीपूतिबीजकैः ॥ ९८ ॥

शङ्खनाभिनखैश्चैव सितामधुघृतं गुडः।
समान्येतानि चूर्णानि द्रवद्रव्यं विहाय च ॥ ९९ ॥

द्विगुणं लघुकर्पूरं चूर्णधूपोऽयमुत्तमः।
एतान्येव हि सिल्हेन मिश्रयेन्मधुसर्पिषा ॥ १७०० ॥

गुडेन पिण्डयेत्पश्चात् पिण्डधूपो वरो मतः।
द्रव्याण्येतानि तोयेन पिष्टानि मधुसर्पिषा ॥ १ ॥

वर्त्तिरूपाणि शुष्काणि वर्त्तिधूपो मनोहरः।
रीतिरूपमयो वापि सुवर्णघटितोऽथवा ॥ २ ॥

खगो वाऽपि मृगो वाऽपि सँरन्ध्रः सम्पुटात्मकः।
अङ्गारगर्भिते(तो) पिण्डेनार्न्वितो धूपमुद्गिरेत् ॥ ३ ॥

मुखकर्णादिभिश्छिद्रैः पिण्डधूपे त्वयं क्रमः।
अङ्गारगर्भिते पात्रे चैक्रदण्डेन संयुते ॥ ४ ॥

विकिरेद्धूपचूर्णं तद्वारंवारमिति क्रमः।
दन्तेन रचिते श्लक्ष्णे सुपात्रे बहुदण्डकैः ॥ ५ ॥

दण्डेन वा समायुक्ते धूपैंने सूचिसंयुते।
सूचिकाग्रे विनिक्षिप्य वर्त्तिं सन्धुक्ष्य वह्निना ॥ ६ ॥

---

१ F रः। २ D न्तु?। ३ A सिंहि। ४ A श। ५ A ष्ठ। ६ A ख। ७ A सं। ८ D ते। ९ D व। १० F पेन।

स्थैगयेत्सम्प(म्पु)टेनाथ रन्ध्रैर्धूपो विनिःसरेत् ।
करण्डं दण्डसंयुक्तं पाणिना परिवर्त्तयेत् ॥ ७ ॥

आत्मनोऽपि मुखं क्वापि प्रेयसीवदनेषु वा ।
करण्डकमदण्डं तु धूपवर्त्तिसमन्वितम् ॥ ८ ॥

अंशुकान्तं क्षिपेद्वाऽपि खोम्पके वाऽपि निक्षिपेत् ।
धूपयेत शुभां शय्यां वसनेनावगुण्ठिताम् ॥ ९ ॥

पञ्चसैधौतवासांसि पिण्डकैश्चूर्णकैरपि ।
गृहं च पिहितद्वारं निरोधितगवाक्षकम् ॥ १७१० ॥

धूपयेद्बहुलैर्धूपैः पिण्डधूमसमुद्भवैः ।
विलासचतुराणां हि नृपाणां च विनोदिनाम् ॥ ११ ॥

धूपभोगोऽयमाख्यातः सोमेश्वरमहीभुजा ।
भूलोकमल्लदेवेन धूपभोगोऽयमीरितः ॥ १२ ॥

इति धूपभोगः ॥ १९ ॥

योषितामुपभोगोऽयं कथ्यते स्मरदीपनः ।
अचापल्यं भयं लज्जा दाक्षिण्यमनुकूलता ॥ १३ ॥

मधुरस्वरता दाक्ष्यं पटुत्वं प्रियवादिता ।
मौनः शुचित्वं दाक्षिण्यं गुरुशुश्रूषणे रतिः ॥ १४ ॥

धर्मज्ञतार्जवं सत्यं कौशलं सर्वकर्मसु ।
हृष्टता स्मितहासित्वं पतिदोषनिगूहनम् ॥ १५ ॥

व्ययवैमुख्यमित्येते योषितां प्रवरा गुणाः ।
स्त्रीणां रूपवती श्रेष्ठा सुरूपासु सयौवना ॥ १६ ॥

सयौवनासु गीतज्ञा गीतज्ञास्वपि नर्तकी ।
उत्तरोत्तरमेतासु श्रैष्ठ्यं पूर्वगुणैः सह ॥ १७ ॥

एतैः सर्वगुणैर्युक्ता दुर्लभा रमणी भुवि ।
मृगी च पद्मिनी चैव चित्रिणी वडवा तथा ॥ १८ ॥

---

१ A F स्था। २ A जम्पने। ३ A अ। ४ F पाय। ५ D म। ६ D च। ७ C D F सु। ८ F वैर्गु।

हस्तिनी शङ्खिनी चेति षड्विधा जातिरिष्यते।
आद्ये द्वे उत्तमे तत्र मध्यमे मध्यसंस्थिते ॥ १९ ॥

अन्त्यास्थिते कनिष्ठे च त्रिधा जात्या प्रकीर्तिताः।
मध्यमोत्तमजातीया भोगयोग्या वरस्त्रियः ॥ १७२० ॥

हस्तिनी शङ्खिनी चेमे भोगाय परिवर्जयेत् ॥
पादौ कोकनदच्छायौ[1] गूढगुल्फोपशोभिनौ[2] ॥ २१ ॥

अनुपूर्वेण वृत्ते च जङ्घे ऊरू सकान्तिकौ[3] ॥
पीवरं जघनं गुह्यमश्वत्थदलसन्निभम् ॥ २२ ॥

तनु वृत्तं तथा मध्यं वर्तुलावुन्नतौ स्तनौ ॥
कोमलं बाहुयुगलं[4] शिरीषकुसुमोपमम् ॥ २३ ॥

कङ्केलिपल्लवाकारौ[5] करावृज्वङ्गुलीयुतौ।
आताम्रनखरौ ग्रीवा पूगीकण्ठोपमा मता ॥ २४ ॥

प्रवालमणिसन्दंश(दृश)[6] दशनच्छदसम्पुटम्।
दाडिमीबीजसङ्काशा रदनाः सुमनोहराः ॥ २५ ॥

समौ तनुकपोलौ च श्रवणौ शुक्तिसन्निभौ।
उन्नता सरलस्रोता[7] नासिका लक्षणान्विता ॥ २६ ॥

पक्ष्मले चक्षुषी दीर्घे त्रस्यन्मृगविलोकने।
वक्रे दीर्घे भ्रुवौ भालमष्टमीचन्द्रसन्निभम् ॥ २७ ॥

भालानुरूपं शीर्षं च सतरङ्गाः शिरोरुहाः।
सुप्रमाणा गलनि(ङ्गलति)का गतिर्मृगगजोपमा ॥ २८ ॥

क्षणे रोषः क्षणे तोषो बहुरीर्ष्याकुलेक्षणा।
ऋतुप्रमाणसम्प्रीतिर्लालसा रतिकर्मणि ॥ २९ ॥

पद्मसौरभ्यसङ्गशमच्छं निधुवनोदकम्।
चित्ते चञ्चलता दार्ढ्यमनुरागे प्रियं वचः ॥ १७३० ॥

---

१ D दाकारौ। २ C तौ। ३ D गु। ४ F ल्लि। ५ F सन्दे। ६ A ला।

एतैर्गुणैः समायुक्ता मृगीजात्योपलक्षिता ।
मधुवर्णाः सुकान्ताश्च नखराश्चरणोद्भवाः ॥ ३१ ॥

अङ्गुल्यः संहता रूढ्यः (ऋज्व्यः) परिपाट्या समाः शुभाः ।
रक्तपङ्कजसङ्काशौ समौ पादतलौ शुभौ ॥ ३२ ॥

गूढौ गुल्फौ सुवृत्तौ च जङ्घे पादानुरूपके ।
रम्भास्तम्भानिभावूरू विशालं जघनं तथा ॥ ३३ ॥

ईषद्विकसिताम्भोजसदृशं स्मरमन्दिरम् ।
वलित्रितयशोभाढ्यं मुष्टिग्राह्यं च मध्यमम् ॥ ३४ ॥

स्थूलश्रीफलसङ्काशौ स्तनावविरलौ समौ ।
वर्त्तुले बाहुशिखरे बाहू सुललितावपि ॥ ३५ ॥

सुकुमारतरौ हस्तौ तले पल्लवकोमले ।
मुद्गशिम्बिसमाकाराः करशाखा मनोरमाः ॥ ३६ ॥

पद्मपत्रसमच्छायमधुराः करजा वराः ।
नातिस्थूला नातिदीर्घा न ह्रस्वा सुस(ष)मा शुभा ॥ ३७ ॥

ग्रीवा रेखात्रयोपेता बिम्बीभागनिभोऽधरः ।
पक्वदाडिमबीजाभा दन्ताः कान्तिमनोहराः ॥ ३८ ॥

तिलपुष्पसमाकारा नासिका सुमनोहरा ।
नीलोत्पलस्य नालेन समे श्रवणगे(पा)लिके ॥ ३९ ॥

शोभने श्रवसी गण्डौ समावुज्वलकान्तिकौ ।
कुन्दपत्रोदरासीनशुभ्रभ्रमरसन्निभे ॥ १७४० ॥

लोचने प्रान्तसंरक्ते घनश्यामलपक्ष्मणी ।
सन्त्रस्तव(बा)लसारङ्गभङ्गीचञ्चलमीक्षणम् ॥ ४१ ॥

अधिज्यकामकोदण्डकुटिले सन्नते भ्रुवौ ।
अष्टमीचन्द्रसङ्काशं ललाटं सुमनोहरम् ॥ ४२ ॥

---

१ D रुज्वः F शब्द्यः । २ D घनं । ३ A प । ४ D नौ च । ५ D माकारा । ६ D कारे शुभ्रताम्ररसान्तरे ।

बहवः श्यामलाः सूक्ष्मा मृदुदीर्घाः[1] शिरोरुहाः।
नववंशसमच्छाया (यो) वर्णः कान्तिमनोरमः॥ ४३॥

गतिर्मत्तेभसदृशी शिरीषमृदुलं वपुः।
पद्मसौरभसङ्काशो वपुःपरिमलः शुभः॥ ४४॥

अम्भोजगर्भसंस्पर्धिगन्धं निधुवनोदकम्।
कोकिलालापमधुरो ध्वनिः श्रुतिसुखावहः॥ ४५॥

रम्यस्त्रीभावसंसर्गः शुचि चाल्पं च भोजनम्॥
अल्पभूषणसम्प्रीतिः श्वेतपुष्पाम्बरे रतिः॥ ४६॥

मानः सौतिशयो[2] लज्जा भूषणं परमं मतम्॥
गुरुदेवार्चनासक्तिः सम्भोगे त्यक्तलज्जता॥ ४७॥

दाक्षिण्यं दानशीलत्वं बन्धुप्रीतिर्मितं[3] वचः॥
सत्यवाँक्त्वं[4] दृढा प्रीतिः शोभा भूषां विनाऽपि च॥ ४८॥

एतैर्गुणैः समायुक्ता पद्मिनी कीर्तिता बुधैः।
लघुपादतले रम्ये तनुँजङ्घे[5] सुशोभने॥ ४९॥

किञ्चिद्वक्रौ शुभावूरू पृथुलं जघनस्थलम्।
उन्नतः सुकुमारश्च सरसो मदनालयः॥ १७५०॥

त्रिवलीमध्यसङ्काशो मध्यभागो मनोहरः।
पीनौ वृत्तौ सुरम्यौ च वँर्धमानौ[6] पयोधरौ॥ ५१॥

वक्षःस्थलं विशालं स्यादानुपूर्व्या[7] तनू भुजौ।
सुकुमारं करतलमङ्गुल्यः सरलाः शुभाः॥ ५२॥

कम्बुनाभिनिभः कण्ठः किञ्चिदभ्युन्नतोऽधरः।
सुच्छाया दशना नासा नातिदीर्घा न वामना॥ ५३॥

तनू कपोलफलकौ कर्णौ[8] शोभासमन्वितौ।
दीर्घे तीक्ष्णे च नयने निम्बपत्रार्धसन्निभे॥ ५४॥

---

१ D र्घ। २ F तोलनं। ३ A सान्ति। ४ D वाक्य। ५ A नतु। ६ D च। ७ F वर्त। ८ व।

भ्रुवौ भालतलं रम्यं वक्राः कृष्णाः शिरोरुहाः ।
सुप्रमाणं व संस्थानं लतावत्तनुविग्रहः ॥ ५५ ॥

गीते नृत्ते च वाद्ये च रतिः सुललिता गतिः ।
सुगन्धि रागसलिलं सुसूक्ष्मस्वरभाषणम् ॥ ५६ ॥

कलाकौशलसम्प्रीतिः श्यामो वर्णो मनोहरः ।
गौरः श्या(रश्या)मोऽथवावर्णश्चित्रभूषाम्बरस्पृहा ॥ ५७ ॥

विचित्रे च रते प्रीतिश्चित्रिण्या लक्षणन्त्विदम् ।
अलक्तरससच्छाये शोभने पादयोस्तले ॥ ५८ ॥

गुल्फौ सुसन्नतौ जङ्घे वृत्ते दीर्घे च मांसले ।
ईषद्वक्राकृती ऊरू गम्भीरं नाभिमण्डलम् ॥ ५९ ॥

उदरं तनु वृत्तं च स्तनावायतचूचुकौ ।
उरो विशालं बाहू च वृत्तौ दीर्घौ च मांसलौ ॥ १७६० ॥

रक्तपङ्कजसङ्काशौ कोमलौ करपल्लवौ ।
अङ्गुल्यः कोमला वृत्ता दीर्घा स्थूला च कन्धरा ॥ ६१ ॥

पीनौ रदच्छदौ रम्यौ दशनाः स्थूलसंहताः ।
तथा स्थूलायतौ कर्णौ नेत्रे नीलोत्पलप्रभे ॥ ६२ ॥

स्थूले भ्रुवौ तथा वक्रे निर्मग्नं भालमथोन्नतम् ।
स्थूला दीर्घा घनाः केशा बहुरीर्ष्या मृदुर्गतिः ॥ ६३ ॥

गम्भीरमधुरा वाणी चलं चित्तं मृदुस्तनुः ।
निद्रा बुभुक्षा सततं स्निग्धकामुककामिता ॥ ६४ ॥

सम्भोगान्ते सरक्तत्वं मांसगन्धिर्द्रवोऽधिकः ।
सुरताहवशूरत्वं नवाङ्गुलरतिस्तथा ॥ ६५ ॥

इत्येतैर्लक्षणैर्युक्ता वडवा परिकीर्तिता ।
शङ्खिनी हस्तिनीशीला विशालार्द्रभगाऽधमा ॥ ६६ ॥

---

१ D समुन्न । २ D ललाटं तद । ३ A ता । ४ A ग्रन्थि । ५ A वाः । ६ A ताः । ७ A श ।
८ A F विशीषाःभगा Df...द्रिभगा । ९ C F गो ।

दुर्गन्धा दुःस्वभावा च तस्माद्भोगे विवर्जिते ।
सुरूपा कान्तिसंयुक्ताचपला भयवर्जिता ॥ ६७ ॥

अस्वेदा च सुगन्धिश्च चिरकालनिमेषिणी ।
स्थिरस्तनी मिताहारा वलीपलितवर्जिता ॥ ६८ ॥

श्वेतभूषाम्बरप्रीता गौरश्यामोत्तमप्रिया ।
प्रसन्ना त्यागशीला च शौचाचारसमन्विता ॥ ६९ ॥

ईषल्लु(ट्ल)क्षणसम्पन्ना योषिद्देवांशकोद्भवा ।
सुसंस्थाना सुतन्वी च तरङ्गितशिरोरुहा ॥ १७७० ॥

सहासवदनाम्भोजा पक्ष्मलाक्षी दृढस्तनी ।
मितास्या तनुमध्या च दर्शनीयाँ नितम्बिनी ॥ ७१ ॥

सुकुमारकराङ्घ्रिश्च सुभगा प्रियभाषिणी ।
कलाविद्भङ्गिचतुरा सदा साहसिके रता ॥ ७२ ॥

सदैवासत्यवचना सिद्धांशकसमुद्भवा ।
सुरम्यानिम्नवदना शफरीचललोचना ॥ ७३ ॥

मध्ये क्षामा कान्तिमती सपुष्पनखरावली ।
नातिस्थूला न च कृशा गीतवाद्यप्रिया सदा ॥ ७४ ॥

सुगन्धिकुसुमासक्ता गीतज्ञा चातिकामिनी ।
अव्यवस्थाचलप्रान्ता स्वैरिणी पटुहासिनी ॥ ७५ ॥

ईदृग् लक्षणसंयुक्ता गन्धर्वांशकसम्भवा ।
सम्पूर्णचन्द्रवदना निम्ननासा कृशोदरी ॥ ७६ ॥

उत्तुङ्गभाला वक्रा(क्र)भ्रूश्चञ्चलविलोचना ।
तन्वी च हरितश्यामा घनवृत्तलघुस्तनी ॥ ७७ ॥

प्रमाणोत्सेधसंयुक्ता राजञ्जघनमण्डला ।
श्लक्ष्णोरुर्वृत्तजङ्घा च निर्लोमा स्वेदवर्जिता ॥ ७८ ॥

---

१ D वापलाभयवर्जिता । २ A धृड । ३ A य । ४ A ड । ५ A नी ।

कृशाङ्गुली स्वल्पनखी[1] स्वेदेपि च ससौरभा ।
गीतनृत्तकलादक्षा सम्भोगे चित्तहारिणी ॥ ७९ ॥

मौग्ध्यवैदग्ध्यसंयुक्ता सानुरागाऽतिकाङ्क्षिणी[2] ।
विलासविभ्रमोपेता विचित्रवसना(न)प्रिया ॥ १७८० ॥

सनर्महासचतुरा साऽप्सरोंशकसम्भवा ।
सहकारफलाकारवदना चारुहासिनी ॥ ८१ ॥

समभालैतला[3] सुभ्रूस्तीक्ष्णापाङ्गविलोकिनी ।
स्वच्छगण्डस्थलच्छाया वृत्तपीनपयोधरा ॥ ८२ ॥

सकान्तिरदना रम्यरेखालङ्कृतकन्धरा ।
तनुमध्या पृथुश्रोणी(णि) रुरुजङ्घा[4] मनोहरा ॥ ८३ ॥

माल्यमण्डनके दक्षा वृत्तज्ञा चपलाशया ।
उद्वेजयति भर्तारं काङ्क्षन्ती द्रविणं बहु ॥ ८४ ॥

पुनः सङ्घट्टते विद्याधरांशकसमुद्भवा ।
दीर्घानना निम्नघोणा लघुलोचनभामिनी ॥ ८५ ॥

त्रिकोणभालफलका घननीलशिरोरुहा ।
जङ्घाकाण्डे प्रकोष्टे च सूक्ष्मरोमसमन्विता ॥ ८६ ॥

विचूचुककुचाभोगा[5] मध्यभागे कृशा भृशम् ।
विशालजघनोपेता सुप्रमाणा लसन्नखी ॥ ८७ ॥

निगूहयित्री[6] गुह्यानि गुह्यकांशसमुद्भवा ।
नात्यायतमुखी दीर्घलोचना समनासिका ॥ ८८ ॥

तनुदन्तच्छदा दीर्घार्धिका[7] पृथुलहस्तिनी[8] ।
विशालवक्षाः सुग्रीवा भूषणेषु रता सदा ॥ ८९ ॥

मृदुबाहुः श्लक्ष्णकक्षा करकाठिन्यसंयुता ।
तनुमध्या शुभतनुर्विशालजघनस्थला ॥ १७९० ॥

---

१ D खा। २ F भि। ३ A र। ४ D त। ५ A यु D रू रू। ६ A गो। ७ D यन्ती।
८ D धिषका पृथुलस्तनी।

ईषद्वक्रोरुजङ्घा च स्फुटिताङ्घ्रितला मनाक् ।
चलचित्ता प्रिये लोला पुष्पमाल्यविलेपनाँ ॥ ९१ ॥

प्रस्थापयन्ती ताम्बूलं स्वीयं प्रियतमं प्रति ।
अत्यँन्तच्छविसंयुक्ता श्यामकर्ण(वर्णा) मनोरमा ॥ ९२ ॥

एवं रूपगुणोपेता किन्नरांशकसम्भवा ।
तन्वी गौरी लघुकुचा दीर्घनेत्रा कृशोदरी ॥ ९३ ॥

लघुश्रोणी सदा भीरुरेवं धारयते ३दृढम् ।
गन्धवद्रव्यमाल्येषु लुब्धा शुद्धासनप्रिया ॥ ९४ ॥

ज्योत्स्नार्ध्वँनिविहारेषु जलक्रीडासु लम्पटा ।
गोरश्यामा वक्रमतिश्छिद्रान्वेषणतत्परा ॥ ९५ ॥

एतल्लक्षणसंयुक्ता यक्षांशकसमुद्भवा ।
तन्वी कान्तिमती किञ्चिद्रँक्तपिङ्गललोचना ॥ ९६ ॥

अच्छगण्डस्थला स्निग्धघननीलशिरोरुहा ।

ईषद्विकृतजङ्घा च लीलाकुटिलगामिनी ॥ ९७ ॥

गृहान्तर्वर्तिनी नित्यं क्षीरखण्डासवप्रिया ।
सखीः सङ्कटयत्याशु पुनर्विघटयत्यपि ॥ ९८ ॥

गौरश्यामा च वर्णेन नागांशकसमुद्भवा ।
वक्रालका कुन्तलिनी दीर्घभ्रूर्दीर्घलोचना ॥ ९९ ॥

वृत्तस्तनी लघुतनुः कङ्कश्यामा समोदरी ।
उत्तुङ्गजघनाभोगा श्लक्ष्णजङ्घोरुशालिनी ॥ १०० ॥

कोमलाङ्घ्रितलाऽताम्रनखरावलिरञ्जिता ।
कातरा गूढसञ्चारा परवेश्माशनप्रिया ॥ १ ॥

एवं रूपगुणोपेता पिङ्यंशकसमुद्भवा ।
स्म(स्मे)रानना विशालाक्षी दृढस्तनमनोहरा ॥ २ ॥

---

१ A नम्। २ A नुष। ३ A द्ध। ४ D जाल। ५ A द्व ।

मृदुबाहुः कृशा मध्ये सुसंस्थान(ना)नितम्बिनी।
रम्यजङ्घोरुयुगला मृदुपादतला वरा ॥ ३ ॥

गौराङ्गी दृढचित्ता च देवभक्ता पतिव्रता।
ऋजुस्वभावा दान्ता च कोपना सुप्रसादिनी ॥ ४ ॥

स्वल्पाशना च धर्मज्ञा ऋष्यंशकसमुद्भवा।
ऋक्षवानरमार्जारदैत्यदानवरक्षसाम् ॥ ५ ॥

पिशाचखरशार्दूलमत्स्यसैरिभपोत्रिणाम्।
सारमेयाऽखुनकुलरुरुकाकगवामपि ॥ ६ ॥

क्रोष्टुट्टश्चिकहंसानां नक्रकुक्कुटयोरपि।
अन्यासामपि जातीनामंशकोद्भवयोषितः ॥ ७ ॥

रूपस्वभावगन्धाद्यैर्दूषिताः परिवर्जयेत्।
क्षत्रियान्वयसम्भूता शीलाचारगुणान्विता ॥ ८ ॥

सुरूपा चानुकूला च तरुणी शुभलक्षणा।
मृगी वा पद्मिनी वापि चित्रिणी वडवा तथा ॥ ९ ॥

देवाद्यंशकसम्भूता राज्ञी कार्या महीभुजा।
वैश्यशूद्रकुलोत्पन्नाः रूपयौवनसंयुताः(:)॥ १८१० ॥

गीतनृत्तकलादक्षाः चि(श्चि)त्तज्ञाः प्रेमनिर्भराः।
सम्भोगसुखसाम्राज्यसंवर्धनविचक्षणाः ॥ ११ ॥

अवरोधवधूः कान्ताः कुर्याद्भोगाय भूपतिः।
रूपलावण्यसंयुक्ता युक्तास्तारुण्यसम्पदा ॥ १२ ॥

सविलासा विलासिन्यः कर्तव्याः पृथिवीभुजा।
दिव्यरत्नविभूषाभिर्वस्त्रमाल्यादिलेपनैः ॥ १३ ॥

यानासनगृहैर्भव्यैर्माननीया यथाक्रमम्।
ईक्षणैर्नर्मभिर्गोष्ठ्या हसितैः स्पर्शनैरपि ॥ १४ ॥

---

१ A दै। २ A वो। ३ A स। ४ D देवतार्यंश। ५ A र्षां। ६ A तां। ७ A क्षां। ८ A

क्रीडाभिश्च प्रियालापैः सम्भोगैस्तांश्च रञ्जयेत् ।
वस्त्राभरणदानैश्च पानखादनतर्पणैः ॥ १५ ॥

प्रेमनिर्भरसंलापैर्वनादिक्रीडनैरपि ।
तोषयेद्योषितस्तास्तास्तुष्टा भोगाय कल्पयेत् ॥ १६ ॥

भोजने मज्जने कान्ता पादाभ्यङ्गेऽङ्गमर्दने ।
केशसंवाहने चैव दिव्यगन्धविलेपने ॥ १७ ॥

गीतवाद्यश्रुतौ वृ(नृ)त्तप्रेक्षणे चारुदर्शने ।
जलादिक्रीडने चैव योजयेत्ताः सुयोषितः ॥ १८ ॥

[1]अतोऽयमुपभोग्यत्वाद्योषिद्भोगः प्रकीर्तितः ।
राज्ञः सप्ताङ्गपूर्णस्य निःशेषीकृतवैरिणः ।
विंशतिः प्राह भोगानां श्रीमान् सोमेश्वरो नृपः ॥ १९ ॥

कन्दर्पोत्सवहेतुमद्भुतरसप्रोल्लासलीलास्पृशम्
विद्वन्मानसरञ्जनीं जनतया सत्कीर्तितां प्रत्यहम् ।
साश्चर्यामुपभोगविंशतिमिमां सोमेश्वरो भूपति-
र्वाग्देवीकुलनन्दनः कथितवान् प्रत्यर्थिभूपान्तकः ॥ १८२० ॥

इति श्री महाराजाधिराज–सत्याश्रयकुलतिलक–चालुक्याभरण–श्रीमद्भूलोकमल्ल–
श्रीसोमेश्वरविरचिते मानसोल्लासे राज्योपभोगकथने
तृतीयोऽध्यायः समाप्तः ॥

---

१ D स्तां । २ D नानागुणेन ।

# इदानीं प्रमोदापादकविनोदाः कथ्यन्ते ।



अत ऊर्ध्वं प्रवक्ष्यन्ते विनोदा हर्षहेतवः ।
विंशतिः सङ्ख्यया ते स्युर्लक्ष्यलक्षणसंयुताः ॥ १ ॥

क्षुरिकाखड्गकोदण्डचक्रकुन्तगदादिषु ।
शस्त्रेषु विविधैर्न्यासैः शिक्षितश्च तिजश्रमः ॥ २ ॥

तत्तद्विद्यान् समाहूय सेवकान्सचिवादिकान् ।
कुमारान् मण्डलाधीशान् परमण्डलिकानपि ॥ ३ ॥

पण्डितान् काव्यकर्तॄंश्च देशभाषाविशारदान् ।
पाठकान्गायकांश्चैव सूतमागधबन्दिनः ॥ ४ ॥

अन्तःपुरपुरन्ध्रीश्च शुद्धान्तवरयोषितः ।
विलासिनीर्मनःकान्ताः प्रसिद्धाः पण्ययोषितः ॥ ५ ॥

अलङ्कृतांस्तथा सर्वान्यथास्थानं निवेशयेत् ।
ततः स्वयं समुत्थाय प्रमोदनमथाचरेत् ॥ ॥ ६ ॥

घनं श्लक्ष्णं सितं वस्त्रं विलासपरिशोभितम् ।
आजानुलम्बिनं वृत्तं वीरकच्छादिवेष्टितम् ॥ ७ ॥

पञ्चवर्णैकपट्टैश्च चित्रपट्टैर्मनोहरैः ।
समन्ततो यथाशोभं समानाञ्चलमानतः ॥ ८ ॥

क्षुरिकागर्भितं भव्यं कनत्काञ्चनकल्पितम् ।
दलं प्रसृतिसङ्काशं दृढप(स)बादिवेष्टितम् ॥ ९ ॥

तिलके पूर्णचन्द्राभे रचयेद्भुजमस्तके ।
चन्दनं घुसृणोपेतं हेमपट्टसमाकृति ॥ १० ॥

ललाटे तिलकं कुर्यान्मध्ये कज्जलरेखया ।
तस्याः पार्श्वे च रेखाभ्यां सिताभ्यां परिभूषयेत् ॥ ११ ॥

---

१ A वि । २ A तॄं । ३ A ट । ४ A न्मा । ५ A व । ६ D सा । ७ D भृ । ८ A द्रुतम् । A तिः । १० A भ्यो ।

शेषभोगोपमां चर्चां चन्दनेनोरसि न्यसेत् ।
द्वीपिपुच्छाजिनेनाथ कुर्याच्छिरसि शेखरम् ॥ १२ ॥

चामीकरमयीं(यीं) कण्ठे चारुशृङ्खलिकां क्षिपेत् ।
हस्तयोर्मर्मवलयौ कर्णयोः स्वर्णपत्रके ॥ १३ ॥

एवं रचितशृङ्गारो वीरमूर्तिर्मनोहरः ।
प्रविशेत्खुरलीं रम्यां प्रेक्षकैः परिशोभिताम् ॥ १४ ॥

विहितोचितशृङ्गारो(रः) शस्त्रविद्याविशारदम् ।
प्रतियोगिनमास्थाय शस्त्रविद्यां विनोदयेत् ॥ १५ ॥

वितस्तिमात्रिकाहीनं मध्यमं विहितं स्मृतम् च ।
स्थापयित्वोत्तमां शस्त्रीं गृह्णीयाच्छिक्षया नृपः ॥ १६ ॥

अङ्गुष्ठपर्वमानेन माननीयासिधेनुका ।
मुष्टिभागं परित्यज्य गणयेद्वंशपृष्ठतः ॥ १७ ॥

आयुर्लक्ष्मीमृ(मृ)तिं चे(श्रे)ति समुच्चार्य पुनः पुनः ।
आयुर्लक्ष्म(क्ष्मी)प्र(प)दे शस्ता वर्ज्या मृत्युपदे स्थितौ ॥ १८ ॥

तीक्ष्णधारा दृढा लघ्वी तिर्यग्रेखाविवर्जिताम् ।
अभिन्नधारा नात्युच्चैर्नीचैस्तिष्ठेत्ससौष्ठवम् ॥ १९ ॥

वामं पादं तथा सव्यं प्रसृतं बाहुदण्डकम् ।
पुरस्कृत्यावतिष्ठेत सङ्ग्रामेच्छ परं प्रति ॥ २० ॥

समुष्टिकं बाहुदण्डं दक्षिणं क्षुरिकान्वितम् ।
शिरःसमं समुत्क्षिप्य भैरवं स्थानमाचरेत् ॥ २१ ॥

दक्षिणं क्षुरिकाहस्तमपसार्य च पृष्ठतः ।
वामदण्डं प्रसार्याग्रे पल्लीवालं प्रदर्शयेत् ॥ २२ ॥

क्षुरिकाग्रे तथा दण्डं प्रसार्य पुरतः समम् ।
पुरतो नम्रगात्रस्तु शुनकस्थानकं न्यसेत् ॥ २३ ॥

---

१ A र्यं । २ A रा । ३ F ङ्खिल । ४ A कै । ५ A परं । ६ F omits these two lines. । ७ D ज । ८ D प्य । ९ A तस्तिकम् । १० A घृ । ११ D करयो र्नृ । १२ D मेरु । १३ D क्ष्मीं । १४ D तिं चेति । १५ D ते । १६ A घृ । १७ A ताः । १८ A वः । १९ A चा ।

प्रसार्य दक्षिणं बाहुमसिधेनुमधोमुखीम् ।
उरसि न्यस्तदण्डस्तु स्थानकं नूकमाचरेत् ॥ २४ ॥

क्षुरिकाग्रं समुन्नम्य नीचे तु मणिबन्धने ।
दण्डं चोरसि संस्थाप्य विनूकं स्थानमाश्रयेत् ॥ २५ ॥

वामे भागे सशस्त्रीकं करं सव्यस्य कम्पयन् ।
दण्डवत्सन्न्यसेद्दण्डं लुलितं स्थानकं भजेत् ॥ २६ ॥

क्षुरिकाग्रं प्रसार्याग्रे दण्डं सङ्कोच्य वक्षसि ।
नहयं स्थानकं कुर्याद्भूप(पः) सौष्ठवसंयुतम् ॥ २७ ॥

असिधेनुमुरोदेशे कृत्वा दण्डं तदग्रतः ।
नट्टेकं नाम संस्थानं कुर्यात्सँ रञ्जयँत्स(न्स)ताम् ॥ २८ ॥

जानुनोर्मध्यभागे तु शस्त्र्यग्रेण स्पृशन्भुवम् ।
वामं प्रसार्य दोर्दण्डं स्थानं रोपितकं चरेत् ॥ २९ ॥

दण्डंकस्य शिरस्थाने सौंवि(सासि)धेनुं करं दधत् ।
वामदण्डं क्षिपन्नग्रे स्थानं पोत्ताङ्कुलं भजेत् ॥ ३० ॥

उत्क्षिप्य दक्षिणं बाहुं सासिधेनुं मृगारिवत् ।
दण्डं नीचं तथा कृत्वा स्थानं व्याघ्रनखं श्रयेत् ॥ ३१ ॥

वामदण्डस्थलस्याधः कुर्वन्मूर्मिं(र्वीं)सशस्त्रिक(का)म् ।
दक्षिणे च स्तने दण्डं भजेदर्धकपोलके ॥ ३२ ॥

वामं पुरःस्थितं पादं दक्षिणेन स्पृशेन्नुँ ।
वामं पुनः क्षिपेदग्रे दक्षिणेन पुनः स्पृशेत् ॥ ३३ ॥

तथैवोपन्यसेत्पादं दक्षिणं चरणेन तु ।
गतागतैर्विनिर्गच्छन्पैदग्राहं समाचरेत् ॥ ३४ ॥

पुरःस्थितेन पादेन पाश्चात्यं घट्टयेत्पुनः ।
तदेवाग्रे क्षिपन्गच्छन् पदप्राप्तिं गतिं भजेत् ॥ ३५ ॥

---

१ D रू। २ A न्य। ३ A ण्डस्त। ४ A न्य। ५ A वेत्। ६ D म। ७ D सं। ८ D ये। ९ D स्रा। १० A ल। ११ A नं। १२ D सासिधेनुकरं। १३ D र्यान्भू। १४ D तु। १५ D पा। १६ D पश्चात्सं। १७ D पादं। १८ A सिग।

न्यस्तौ च पादावुत्क्षिप्य प्रसर्पश्च शनैः शनैः।
अनुक्षेपगतिं कुर्यात् सर्पणेन[1] विसर्पणः॥ ३६॥

पादयोर्द्वैतसञ्चारैरीषदुत्क्षेपलक्षणैः।
सर्पणं सर्पवत् कुर्यात्सर्पिकां गतिमाचरेत्॥ ३७॥

आकुञ्चितैस्तथा पादैर्लीलाचङ्क्रमणाञ्चितैः।
मत्तवारणवद्गच्छन्मत्तेभगतिमाचरेत्॥ ३८॥

जिघृक्षया द्वैतं गत्वा यदुत्प्लुत्यापसर्पति।
तां गतिं वायसीं बिभ्रद्विचरेच्छस्त्रकोविदः॥ ३९॥

आकुञ्चिताभ्यां पादाभ्यामङ्गुल्यग्रै(:) स्पृशन्महीम्।
वाक्रोटीं गतिमास्थाय सञ्चरेत्क्षुरिकाकरः॥ ४०॥

गात्रसङ्कोचनं कृत्वा सिंहवल्लङ्घयन्भुवम्।
पञ्चाननगतिं कुर्वन्दर्शयेत्पाणिलाघवम्॥ ४१॥

किञ्चिदाकुञ्चयन् शस्त्रीं किञ्चिदालोलयन्भुजम्।
आवर्तैः परिवर्तैश्च तथा सव्यापसव्यकैः॥ ४२॥

भ्रामयेत् क्षुरिकामूर्ध्वं पृष्ठे पादे तथाऽग्रतः।
कक्षयोः कण्ठदेशे च पादसञ्चारसंयुतः॥ ४३॥

विद्युत्पङ्क्तेरमध्यस्थमिवात्मानं प्रदर्शयेत्।
चारणे धारणे चैव धारणे मारणे तथा॥ ४४॥

अमोघां दर्शयेदाशां दुर्निवारो भयङ्करः।
शस्त्रीं प्रदर्शयेदेवं दुष्टाशयविभीषणीम्॥ ४५॥

प्रेयसीं मानसोल्लासां विद्वज्जनविनोदिनीम्।
चतुर्वितस्तिकां शस्त्रीमादाय नृपतिस्ततः॥ ४६॥

दक्षिणाङ्घ्रिं पुरस्कृत्य दण्डं धृत्वा तथोरसि।
पूर्ववद्भ्रामयेदेनां करतालसमन्विताम्॥ ४७॥

---

१ D नातिसर्पणे। २ A भ्रं। ३ A द्व। ४ A इ। ५ A स्त्रिं। ६ A सव्याश्च व्य F सव्यैश्च ७ D शीर्षं। ८ A च। ९ A च्च। १० A घा।

सम्भारैः कथितैः पूर्वं दर्शयेत्पादलाघवम् ।
धारापू(घा)तो विधिस्तस्याः कथितः पूर्वसूरिभिः ॥ ४८ ॥

[1]खोच्छ(श्व)नं च तथा चान्ये प्रवदन्ति मनीषिणः ।
मतद्वयानुसारेण धाराघातैश्च खोश्च्[2]नैः ॥ ४९ ॥

चतुर्वितस्तिकाशस्त्र्या विद्योत्कर्षं प्रदर्शयेत् ।
आदाय च ततः शस्त्रीं दीर्घां पञ्चवितस्तिकाम् ॥ ५० ॥

कर्णोपान्ते तु विन्यस्य मुष्टिं परजयोर्[3]जिताम् ।
वामं बाहुं प्रसार्याथ करशाखामुखैः स्पृशन् ॥ ५१ ॥

शस्त्रीमुखं ततः पादैरुत्प्लुवेत चरेदपि ।
निषीदेत्कूर्मसंस्थाने लाघवेन तथोत्पतेत् ॥ ५२ ॥

खोश्च्[4]येदग्रघातेन दीर्घशस्त्र्[5]याम(स्व)यं मृधेः(धे) ।
दीर्घासिधेनुके चित्र्[6]यं(काचित्रं) दर्शयित्वेति पार्थिवः ॥ ५३ ॥

ततः खड्गविनोदेन रञ्जयेत्प्रेक्षकां[7]न् भृशम् ।
क्षुरिकोक्तप्रमाणेन गणयेत् खड्गमुत्तमम् ॥ ५४ ॥

पञ्चा[8]शताङ्गुलैः श्रेष्ठः पञ्चात्रिं(विं)शतिकोऽवरः ।
अनयोर्मध्यमानेन मध्यमः परिकी[9]र्त्यते ॥ ५५ ॥

अव्रणः पोगलो(रो)पेतस्तिर्यग्भेदविवर्जितः ।
व्रणयुक्तोऽपि निस्त्रिंशो बिल्वकुं[10]ञ्जरकुं[11]ण्डलैः ॥ ५६ ॥

वर्धमानध्वजच्छत्रस्वस्तिकैश्च व्रणैः शुभैः(भ)ः ।
मानहीनो विभिन्नश्च कुं[12][13]ण्ठितो ध्वनिवर्जितः ॥ ५७ ॥

[14]नेत्रचित्तविरोधी च वर्जनीयो दुरासदः ।
असिर्मरकतश्यामः पोगलै[15]ः(रै)ः परिवर्जितः ॥ ५८ ॥

बाणबाहुवं[16]नच्छेदी बाणाय शार्ङ्गिणा धृतः ।
कृपाणः शाद्वलश्यामस्तनुर्[17]वद्दीर्घपोगरैः ॥ ५९ ॥

---

१ F खांचनं । २ D च । ३ D जि । ४ A ख्रा । ५ A वि । ६ A का । ७ A ध्व । ८ A ष्टा । ९ A कथ्य । १० A प । ११ A तु । १२ A कुंवि । १३ D र्घि । १४ A वि । १५ A नव । १६ A न । १७ D लः ।

अच्छेद्यो रोहिणीवाहः पौलस्त्येन धृतः पुरा।
कुटिलैः पोगरैर्युक्तो वरस्क(रः के)सरसन्निभैः ॥ ६० ॥

मत्कुणः करवालोऽयं लोहवर्णो न वर्ण्यते।
गोजिह्वापल्लवप्रख्यः पोगरो यत्र दृश्यते ॥ ६१ ॥

असिर्निरवहो नाम द्विषच्छेदकरः शुभः।
तरुणीकेशसङ्काशः सूक्ष्मपाण्डुरपोगरः ॥ ६२ ॥

भद्राङ्गः करवालोऽयं भद्रकालीकरस्थितः।
राजजम्बूफलश्यामो वक्रपाण्डुरपोगरः ॥ ६३ ॥

स्निग्धच्छायवपुः खड्गः करवालोऽभिधीयते।
असिः प्रत्यग्रजीमूतशकलश्यामलच्छविः ॥ ६४ ॥

पाठीनत्वक्सपाकारपोगरोऽयं सुवर्णकः।
केलिचन्द्रकसंकाशैः पोगरैर्निर्विडैः श्रितः ॥ ६५ ॥

कच्छेल्लक इति ख्यातः खड्गः खड्गभृतां वरः।
तमालव्यालरोलम्बनिकुरुम्बसमच्छविः ॥ ६६ ॥

कौक्षेयकः समाख्यातः पुरुषाकारपोगरः।
एरण्डबीजसङ्काशैः(श)पोगरस्तारपट्टकः ॥ ६७ ॥

रामारोमावलिश्यामो न नमेन्नामितोऽप्यसिः।
नववारिधरः(र) श्यामः पिङ्गकुञ्चितपोगरः ॥ ६८ ॥

खड्गः षढालको नाम विषवज्रभयापहः।
स्वर्णचूर्णनिभैः सूक्ष्मैः पोगरैः स्वर्णपञ्जरः ॥ ६९ ॥

मुक्ताचूर्णसमाकारैः ख्यातस्तित्तिरवज्जरः(ज्रकः)।
पोगरैः कज्जलप्रख्यैः खड्गः स्यात्कालवज्जरः(ज्रकः) ॥ ७० ॥

वियत्श्याम(च्छया)वपुःसारः स्वल्पपाण्डुरपोगरः।
सरोजिनीच्छदच्छायः कोङ्गिः खड्गोऽभिधीयते ॥ ७१ ॥

---

१ A पो। २ A गारे। ३ D र्णेन A र्णौ। ४ A लीर। ५ D क्त्र। ६ A पुरः ख। ७ A वेङ्गि ८ A टी। ९ A रः। १० D वा। ११ A डे। १२ D बे। १३ A ङ्गः। १४ D F मतः १५ D निरुल F निकुर। १६ A च्छे। १७ A भीताख्यः। १८ D शाः। १९ D पोगराः। २० D काः। २१ F पढा D षडा। २२ D चूर्ण। २३ A गा। २४ A ख्यै। २५ D कौ।

कदलीशृङ्खला वापि यस्मिन्दृश्यान्तरान्तरा ।
वर्णपोगरभेदेन खड्गजातिर्निरूपिता ॥ ७२ ॥

सोमेश्वरनरेन्द्रेण शस्त्रशास्त्रकलाविदा ।
कोशात्[1] खड्गं समाकृष्य बिलादाशीविषं यथा ॥ ७३ ॥

चर्म वा फलकं वापि गृह्णीयाद्वामपाणिना ।
पाणिना भ्रामयेत्खड्गं चर्म वामेन चालयेत् ॥ ७४ ॥

पूर्वोक्तपदसञ्चारैः सञ्चरेत विचक्षणः ।
शीर्षस्योपरि संस्थाप्य खड्गचर्म तथोरसि ॥ ७५ ॥

दक्षिणाङ्घ्रिं पुरस्कृत्य स्थानं शिखरकं श्रयेत् ।
वामं हस्तं प्रसार्याग्रे चर्मणा फलकेन वा ॥ ७६ ॥

कर्णोपान्ते समासंज्य[3] स्थानं कापोलकं[4] भजेत् ।
वक्षस्यांसज्य फलकं खड्गं तत्रैव बाह्यतः ॥ ७७ ॥

परस्यान्तरमीक्षेत श्रीवत्सं स्थानमाश्रितः ।
खड्गं महीमुखं कृत्वा खड्गाग्रं पुरतः समम् ॥ ७८ ॥

वीक्ष्यमाणः[6] परच्छिद्रं स्थानं भूमण्डलं भजेत् ।
कुक्षिदेशे[7] त्सरुं कृत्वा फलं तिर्यक्तथोरसि ॥ ७९ ॥

अग्रे[10] प्रसार्य फलकं तीक्ष्णाग्रं स्थानकं न्यसेत् ।
कडगं चरणे विन्द्यादोलगं[11] दक्षिणाङ्घ्रिजे(के) ॥ ८० ॥

पोगरं वामभागे स्यात्कालवल्कं तु मस्तके ।
आनाभि कण्ठपर्यन्तं खड्गाग्रेण तु भेदनम् ॥ ८१ ॥

मुनयन्नाम तत्प्रोक्तं कौक्षेयकविचक्षणैः ।
वारणं हननं तेषु पञ्चघातेषु पाटवम् ॥ ८२ ॥

दर्शयेद्रचनाघातं[12] हस्तलाघवमाचरेत्[13] ।
फलके वा तथा चर्मण्यङ्गं सर्वं निगृह्य च ॥ ८३ ॥

---

१ A शख D F शादूख । २ D F साद्य । ३ D यो । ४ D वे । ५ D F स्यासाद्य । ६ A व । ७ D न्यसेत् । ८ D शस्थितम् । ९ D म्य । १० A अप्र । ११ D द्रो । १२ D द्धननं । १३ D रभे ।

सञ्चरेत्परघातार्थं शून्यं पश्येत्पराङ्गकम्[1]।
पञ्चघातप्रयोगं च पञ्चघातनिवारणम्॥ ८४॥

पादलाघवसंस्थानं चालनं खड्गचर्मणोः[2]।
प्रदर्श्य रञ्जयेद्राजा सर्वांश्च[3] खुरलीगतान्॥ ८५॥

बद्धगोधाङ्गुलीत्राणस्ततो गृह्णीत[4] कार्मुकम्।
पक्ववंशकृतं भव्यं गोलादरदरञ्जितम्॥ ८६॥

लाक्षाविलिप्तं कान्तं च स्नायुभिः परिवेष्टितम्।
स्वर्णपट्टनिबद्धं च नानारत्नविचित्रितम्॥ ८७॥

सुप्रमाणं दृढं रम्यमुर्छा(च्छा)लगुणसंयुतम्।
त्रिपर्व पञ्चपर्वापि सप्तपर्वं[5] तथैव च॥ ८८॥

नवपर्व ज्यया युक्तमर्कवल्कसमुत्थ(त्थ)या।
मौर्व्या वा दृढया सम्यक् श्लक्ष्णया समयापि च॥ ८९॥

मस्तकेन कृताधारं मुष्टिसौख्यविधायिना[6]।
सहस्रं[7] सार्धसाहस्रं द्विसहस्रमिति क्रमात्॥ ९०॥

बालानां[8] सङ्ख्यया युक्तं मृदु मध्यं तथोत्तमम्।
उत्तमेन दृढं हन्याद्दूरं मध्येन दर्शयेत्॥ ९१॥

मृदुना च तथा लक्ष्यं लाघवं चित्रमेव च।
उभावंसौ नतौ कार्यावुरश्च विततं तथा॥ ९२॥

पूर्व(र्वं) प्रसारितो[9] बाह्व(ह्वे) दृढं[10] मुष्टिरकम्पितः।
मणिबन्धे मनागन्तं[11](न्तः) वक्रः कार्यः स्वकल्पशः॥ ९३॥

मुष्टेरभिमुखं[12] वक्त्रं अंसस्योपरिसंस्थितम्।
चित्र(बु)कांश(स)स्य मध्यस्थमन्तरं चतुरङ्गुलम्॥ ९४॥

पूर्वबाहुः समः कार्योऽप्यपरो ब(व)लिनो(तो) भुजः।
दृष्टिर्लक्ष्ये[13]गता कार्या पार्श्वे च ऋजुसंस्थित(ते)॥ ९५॥

---

१ A ग। २ णोः। ३ A र्वां। ४ A ग। ५ A त्था। ६ A र्वं। ७ A क्तं क (F च) D च। ८ A र्यां। ९ D रम्भ। १० A ख्या। ११ A सहस्रं साहस्रं द्वैसाहस्रमिति क्रमात्। १२ D ब। १३ D ते। १४ A ढा। १५ A न्तु। १६ D म। १७ A क्ष।

पूरकेण समायुक्तं वायुना जठरं दृढम् ।
त्रिकं च सन्नतं कार्यं पादौ स्थानस्थितौ दृढौ ॥ ९६ ॥

एवं लक्षणसंयुक्तं दर्शयेत्[1]सौष्ठवं नृपः ।
पूर्वमाकुञ्चितं पादं चापस्थानाङ्गयोजितम् ॥ ९७ ॥

तिर्यक्प्रसारितं कृत्वा पृष्ठे[2] पादं तथाऽपरम् ।
अङ्गुष्ठः पूर्वपादस्य पश्चात्पादकनिष्ठिका ॥ ९८ ॥

वितस्तिपञ्चकं मध्यं तयोरालीढकं[3] भवेत् ।
व्यत्यासं पादयोः कृत्वा प्रत्यालीढं प्रयोजयेत् ॥ ९९ ॥

वैशाखे तु समौ पादौ वितस्तित्रयमन्तरम् ।
वितस्त्यन्तरमात्रौ तु समौ पादौ प्रयोजयेत् ॥ १०० ॥

पूर्ववत्पादसंस्थानं समपादं प्रदर्शयेत् ।
चतुर्वितस्तिकं मध्यं तिर्यक् पादावुभावपि ॥ १ ॥

अस्त्रादिवाहने शस्तं मण्डलं स्थानकं विदुः ।
पूर्वाङ्घ्रिपार्ष्णेरारभ्य पार्श्वाभ्या(श्रात्या)ङ्गुष्ठकावधि ॥ २ ॥

वितस्तिमात्रं[4] मध्यं चेज्जातं जातं(स्थानं) प्रदर्शयेत् ।
जातस्य वैपरीत्येनाभिजातं नियोजयेत् ॥ ३ ॥

पैश्चात्याङ्घ्रि(पाश्चात्याङ्घ्रि)समुत्क्षिप्य हंसपादं प्रकाशयेत् ।
बाह्ये तौ वलितौ पादौ जानुनी च भुवि स्थिते ॥ ४ ॥

आसनं दार्दुरं कृत्वा प्रौढिं प्रकटयेन्नृपः ।
अधः पादतले कृत्वा पद्मासनमथाचरेत् ॥ ५ ॥

वामं जानु क्षितौ कृत्वा दक्षिणं पादमुत्कटम् ।
गरुडस्यासने स्थित्वा गारुडान्सायकान्क्षिपेत्[5] ॥ ६ ॥

दक्षिणं स्वस्तिकाकारं वामं दर्दुरवत्पदम् ।
आसनं मृगयायोग्यं कुर्यात्स्वस्तिकदर्दुरम् ॥ ७ ॥

---

१ D F यन्। २ D ष्ठ। ३ A के। ४ A त्र। ५ D पार्श्वाभ्यामंघ्रिं। ६ A त्सा। ७ A क्षि।

आपीड्य भूमिं जानुभ्यामासनं जानुपीडनम्।
अनुत्तानेऽथवोत्ताने शयने शयनासनम्॥ ८॥

धृतचापस्य हस्तस्य तर्जनी प्रोन्नता यदि।
तुङ्गे मुष्टिः समाख्यातः सत्युत्ताने शरासने॥ ९॥

दक्षिणाग्रं यदा चापं तिर्यक् प्रणिहितं भवेत्।
उन्नतायां कनिष्ठायां मुष्टिः स्यादुपतुङ्गकः॥ ११०॥

अङ्गुष्ठमुन्नतं कुर्यान्मुष्टौ तं(ष्टिः सः)परिमण्डले(लः)।
गुलिकादिव्यचे(धे)तस्य विनियोगं प्रदर्शयेत्॥ ११॥

तर्जन्यङ्गुष्ठयोरग्रे अन्योन्यं परिचुम्बतः।
मुष्टिः समधृतो नाम स्थूले धनुषि दृश्यते॥ १२॥

तलेनाक्रम्यते चापं दृढाकर्षणकर्मणि।
मुष्टिस्तलाश्रयो नाम बलिनां सम्प्रदर्श्यते॥ १३॥

अङ्गुल्यस्तु समाश्चापे यस्मिन्नङ्गुष्ठपीडिताः।
समुष्टिः स विज्ञेयो दृढघाते प्रशस्यते॥ १४॥

एवं प्रयोगभेदेन चापे मुष्टिं तु षड्विधाम्।
प्रयोजयेत्क्रियाकाले चापविद्याविशारदः॥ १५॥

अङ्गुष्ठपीडितं कुर्यात्तर्जनीनखरं तले।
अङ्गुलीत्रितयं स्थाप्यं मुष्टिः स्यात्सिंहकर्णिका(कः)॥ १६॥

सिंहकर्णिकमुष्टौ च तर्जनी चेत्प्रसारिता।
पताको नाम मुष्टिः स्यान्नालिकास्थ(स्थू)लकाण्डके॥ १७॥

अङ्गुष्ठनखपृष्ठे च तर्जनीनखरो भवेत्।
अधोवर्तिभे(र्ती भ)वेन्मुष्टिः शेषाङ्गुल्योऽत्र पूर्ववत्॥ १८॥

तर्जन्यङ्गुष्ठयोरग्रे श्लिष्टे चेत्पूर्ववत्पुरा(रः)।
मुचुटी(टी) सूक्ष्मनाराचवर्ध्यधे मुष्टिः प्रशस्यते॥ १९॥

---

१ D डित। २ A ते। ३ A ङ्गा। ४ A ष्टिः। ५ A ता। ६ D प। ७ D रु। ८ A तौ। ९ A मा। १० A क। ११ D श्च। १२ A पाटि। १३ A स मुष्टिः। १४ A सम। १५ D ल। १६ D त्रया। १७ D चढी। १८ D व्याध।

तर्जन्यावेष्टिताङ्गुष्ठ(ः) शेषाः पाणितले स्थिता(ः)।
वज्रमुष्टिरियं ख्याता दृढकर्मणि कोविदैः ॥ १२० ॥

पुङ्खस्यो[1]र्ध्वमधः स्याच्चेत्तर्जनी[2] मध्यमा स्थिता(ता)।
तथा पुङ्खमुखेऽङ्गुष्टो[3] मुष्टिस्त्रैयम्बँको मतः ॥ २१ ॥

तर्जनीमध्यमामध्ये यत्र[4] पुङ्खः प्रपीड्यते।
अनामिकासमायोगान्मुष्टिः स्यादेकलव्यकः ॥ २२ ॥

त्र(त्रै)यम्बकैकलव्यौ द्वौ तिर्यक्कोदण्डमार्गणे।
एवं सप्तविधं मुष्टिं कुर्यान्नानाविधे व्यँधे[5] ॥ २३ ॥

आकृष्टसायकं मुष्टिं कर्णाग्रस्योर्ध्वं[6]मङ्गुले।
विन्यस्य दर्शयन्सो(येत्सो) ऽयं कैशिकं नीर्चवेधने ॥ २४ ॥

कर्णाग्रेंचुम्बितं मुष्टिं कृत्वा सायकपीडनम्।
सात्वतं दर्शयन्सो(येत्सो)ऽयं पूर्ववन्नीचैं[7]लक्ष(क्ष्य)के ॥ २५ ॥

कर्णनाभिसमं मुष्टिं कृत्वा मार्गणगर्भितम्।
वार्षगण्यं(वत्सकर्णं) प्रयुञ्जीत सोऽयं लक्ष्ये समं(मे) नृपः ॥ २६ ॥

अधस्तात्कर्णरन्ध्रस्य मुष्टिमेकाङ्गु[8]ले स्थिरम्।
विन्यस्य भरतं सोयं समे लक्ष्ये प्रदर्शयेत् ॥ २७ ॥

अपरे बाहुशिखरे मुष्टिं कृत्वा समार्गणम्।
उच्चे दूरे तथा लक्ष्ये छन्दन्यायं(स्कन्धन्यासं) प्रदर्शयेत् ॥ २८ ॥

उरःसमं समं लक्ष्यं मनुष्योत्सेधमानतः[9]।
तदूर्ध्वमुच्चं(च्चं) लक्ष्यं स्यात्तदधो नीचमुच्यते ॥ २९ ॥

शुष्कचर्मशतं[10] गव्यमहोरात्रं जले स्थितम्।
षोडशाङ्गुलविस्तीर्णं दृढं बद्धं च रज्जुभिः ॥ १३० ॥

इदं चर्म दृढं प्रोक्तं गजचर्मसमं बुधैः।
एवं विंशतिरश्वस्य[11] चर्माण्यष्टौ नरस्य तु ॥ ३१ ॥

---

१ D स्यार्ध। २ A ना। ३ A ष्टो। ४ A न्त। ५ A न्त्र। ६ D व। ७ A ष्व। ८ A व
९ A मा। १० F व। ११ A ङ्गलो। १२ A ष्येत्सो D ष्येत्से। १३ A व। १४ A श्व।

एवं सर्वदृढानां हि गजवाजिनृणां क्रमः।
कथितः सोमभूपेन जामदग्न्यमतानुगः॥ ३२॥

षड्विंशदङ्गुलां भस्त्रां छागमांसेन पूरयेत्।
एतन्मांसं दृढं विध्येद्गजकायप्रमाणकम्॥ ३३॥

गैजरा(जाजा)श्वखुराघातैः समन्तात्परिशोषितः(तम्)।
दृढमश्वखुरं नाम मध्ये मातङ्गमान(ज)कम्॥ ३४॥

विषाणं सप्तवर्षस्य महिषस्य प्रगृह्य च।
मूलाग्रवर्जितं मध्ये द्विपकायसमं दृढम्॥ ३५॥

सूत्रं पञ्चाङ्गुलोत्सेधं तिर्यगार्मा(या)मकल्पितम्।
निबिडं चर्मणा बद्धं विध्येत्करिसमं दृढम्॥ ३६॥

कूर्मपृष्ठकपालं तु हस्तविस्तारवर्तुलम्।
विध्येदस्थि दृढं नाम कुञ्जराङ्गप्रमाणकम्॥ ३७॥

षड्विंशदङ्गुलं स्थौल्याद्दाल्कजङ्घन(जाङ्गल)पिण्डितम्।
रज्जुभिर्वेष्टितं विध्येदिभगात्रसमं दृढम्॥ ३८॥

अङ्गुलं दारुसारं तु षोडशाङ्गुलविस्तृतम्।
इदं दारु दृढं विध्येद्दन्तिदेहसमं नृपः॥ ३९॥

भ्रमत्कुलालचक्रस्थं मृदः पिण्डं नवाङ्गुलम्।
दृढं प्रवाह(विहि)तं विध्येत्समं नागेन चर्मणा॥ १४०॥

कार्पासनिर्मितं पुञ्जमुत्सेधेन षडङ्गुलम्।
चर्मनद्धं दृढं विध्येत्सिन्धुराङ्गसमं नृपः॥ ४१॥

करीषधान्यपांसूनां पृथक्पर्णं तु कर्कट(श)म्।
अष्टाङ्गुलं दृढं विध्येद्वारणाङ्गसमं नृपः॥ ४२॥

द्व्यङ्गुलां मांसवर्णां च षोडशाङ्गुलविस्तृताम्।
शिलां विध्येद्दृढं सम्यक् स्तम्भेरमसमं नृपः॥ ४३॥

---

१ F दृत्रिं। २ A जराजाश्वखुरोघातैः। ३ D शे। ४ A णां। ५ D ह्यते। ६ D गुगमक। ७ D दात्र। ८ A ण्ड। ९ F त्रे A श्रं। १० D न्धू A ङ्धू।

षोडशाङ्गुलविस्तीर्णमुत्सेधे सर्षपास्त्रयः ।
आयसं दृढमेतत्तु विध्येत्[1]सामजसन्निभम् ॥ ४४ ॥

दृढान्येतानि बध्नीयात्स्तम्भशाखाद्वयान्तरे ।
त्रिवारमिते[2]नैव नरवक्षःसमुन्नतौ ॥ ४५ ॥

भित्वा तानि विनिर्गत्य निर्भिद्याग्रेण भूतलम् ।
यथावत्तिष्ठते बाणस्तथाविध्येत्क्रियायुतः ॥ ४६ ॥

अङ्गुष्ठभागपार्श्वे[3] तु तर्जन्यां सङ्गते शरे ।
चापमुष्टौ समे पुङ्खे समसन्धानमुच्यते ॥ ४७ ॥

समसन्धौ[6] रथे ज्यायामधःसन्धानकं भवेत् ।
तस्मादेवोर्ध्वतः सन्धादूर्ध्वसन्धानमिष्यते ॥ ४८ ॥

ऊर्ध्वदूरस्थिते लक्ष्ये नीचसन्धानसङ्गतिः ।
नीचलक्ष्ये तथा चोर्ध्वे समलक्ष्ये समं भवेत् ॥ ४९ ॥

षोडशाङ्गुलवृत्तं तु स्थूलं लक्ष्यमुदाहृतम् ।
अङ्गुलद्वितयं सूक्ष्मं पञ्चगुञ्जांशिरोरुहम् ॥ १५० ॥

शब्देनानुमितं[12] लक्ष्यं परापरमुदाहृतम् ।
चैलं[13] पञ्चविधं लक्ष्यं दर्शयेत्तस्य वेधने ( नम् ) ॥ ५१ ॥

तिर्यग्धावंस्तथा गच्छन्भ्राम्यंश्चैव तथोत्पतन् ।
आकाशे भूतले तोये तेषां स्थानमुदाहृतम् ॥ ५२ ॥

उत्तमं द्विशतं प्रोक्तं शतं सार्धं तु मध्यमम् ।
विंशं शतं कनिष्ठं स्यादूरे धन्वन्तरे क्षितौ ॥ ५३ ॥

धर्षयेदुत्तमं दूरं चतुर्भिः सायकैः शनैः ।
समपत्रैः स्थूलसूक्ष्मैः निःपत्रैश्चैव नागरैः ॥ ५४ ॥

पाते त्वेकं करे त्वेकं गगने पञ्चसायकान् ।
दर्शयेल्लाघवन्त्वेवं विध्येल्लक्ष्यं महीपतिः ॥ ५५ ॥

---

१ D वेध्ये । २ D तेन । ३ A श्वे । ४ D न्यां । ५ D मं । ६ D न्धौ । ७ F द्याव्या । ८ A वोद् । ९A स्थ । १०A ज्ञांशिरोसहां । ११A ष्टे । १२ Dते । १३A व । १४Dच्चा । १५ D पत्रैश्चैव च । १६A ङ्ग ।

चतस्रः सम्पदस्त्वेता[1] युद्धे शत्रुनिबर्हणे[2]।
मृगयायां विनोदेन सोपयोगा महीपतेः॥ ५६॥

चित्रं कुतूहलकरं[3] प्रेक्षकाणां मनोहरम्[4]।
दर्शयेत्तदपि प्रौढ्या विनोदाय महीपतिः॥ ५७॥

स्तम्भस्योपरिविन्यस्तचक्रयन्त्रे[5] सुकीलितम्।
वायुप्रेरितपत्रैस्तु भ्राम्यमाणं द्रुतं क्षणम्[6]॥ ५८॥

पात्रमध्ये स्थिते तोये वीक्ष्य[7] विध्यन्विलोचने।
प्रत्यालीढस्थितो राजा राधावेधं प्रदर्शयेत्॥ ५९॥

खर्जूरीसदृशाकारं कृत्वा दारुमयं तरुम्।
नाराचैः शतशो विध्येत्स्थाने कण्टकपत्रयोः॥ १६०॥

पत्राणां(णि)कण्टकांश्चैव सायकैरेव कल्पयेत्।
खर्जूरीवेधनं चित्रं प्रेयसीनां प्रदर्शयेत्॥ ६१॥

वृषलं सम्मुखं कृत्वा पत्रं वक्षसि विन्यसेत्।
तदेव तिर्यग् मोक्षेण बाणपुङ्खेन धारयेत्॥ ६२॥

पत्रच्छेदमिदं चित्रं चित्तभ्रान्तिकरं नृणाम्।
रसं[10] विस्मयमातन्वन्दर्शयेद्वेधमुत्तमम्॥ ६३॥

एकसन्धानयुक्ताभ्यां बाणाभ्यां लक्ष्ययुग्मकम्।
विध्यन्प्रदर्शयेच्चित्रं[11] यमलार्जुनसंज्ञकम्॥ ६४॥

अत ऊर्ध्वं स्थितं लक्ष्यमेकमोक्षेण[12] बाणयोः।
विकटार्जुनके[13](कं)चित्रं नृपो[14] विध्यन् विनोदयेत्॥ ६५॥

अर्धचन्द्राकृतीं कृत्वा तर्जन्यङ्गुष्ठकौ ततः।
तृणकाण्डं[15] तयोरग्रे[16] धारितं चतुरङ्गुलम्॥ ६६॥

अङ्गुल्यनुपपीतेन[17] तद्विध्यन्पृथिवीपतिः।
अर्धचन्द्राह्वयं चित्रं दर्शयेच्च सभासदाम्॥ ६७॥

---

१ A पा। २ A स्वे। ३ A त्र। ४ D कौतू। ५ D हस्ते। ६ A रु। ७ A मध्ये वीक्ष्यन्वि। ८ D य। ९ D ट। १० D स। ११ D विविधं। १२ A क्षण। १३ A र्जं। १४ A पे। १५ A ण्डे। १६ D ग्र। १७ A द्या।

सन्धेतः[1] सायकस्त्वेको द्वितीयः सम्मुखः स्थितः।
द्वाभ्यां लक्ष्येण[2] पुरः पश्चाच्च गच्छतः ॥ ६८ ॥

पूर्वापरस्थितं लक्ष्यं प्रविध्यन्नवनीपतिः।
मालाविद्याधरं चित्रं दर्शयेच्चित्रवेष्टितम् ॥ ६९ ॥

चतुर्भिरधिकाशीतिश्चित्राणामवनीभुजा।
इत्थं प्रदर्शनीया[3] स्याद्द्वापञ्चाशच्च तु(दु)ष्करा ॥ १७० ॥

दृढलक्ष्ये तथा दूरे लाघवे चित्रकर्मणि।
एवं लक्षणसंयुक्तां धनुर्विद्यां प्रदर्शयेत् ॥ ७१ ॥

ततोऽष्टारं समादाय चक्रं षड्[4]रमेव वा।
मुष्टिभिः सिंहकर्णाद्यैर्लक्ष्यं हन्यान्महीपतिः ॥ ७२ ॥

ईषत्कुञ्चिततर्जन्यां भ्रामयेद्वामदक्षिणम्।
उत्क्षिप्योत्क्षिप्य वेगेन पञ्च सप्त प्रधारयेत् ॥ ७३ ॥

एवं प्रदर्शयेच्चित्रं चक्रचारविचक्षणः।
ततः कुन्तं समादाय तदुत्कर्षं प्रदर्शयेत् ॥ ७४ ॥

सप्तारत्निर्भवेद्भूमौ षडरत्निस्तु वाजिनि।
वारणे च नवारत्निः कुन्तदण्डास्त्रयः स्मृताः ॥ ७५ ॥

त्रिशूली जर्जरो जीर्णो व्रणकोशसमन्वितः।
स्थूलग्रन्थिः कृशग्रन्थिर्दूरपर्वभिरायतः ॥ ७६ ॥

एवंविधेन दण्डेन युक्तं कुन्तं विवर्जयेत्।
सदोषं विघ्नकारित्वात्कुन्तकर्मणि निन्दितम् ॥ ७७ ॥

निष्कोशः सव्रणः[10] शुद्धः पक्ववेणुः स(सु)भूमिजः।
कुन्ते प्रशस्यते दण्डः सर्वकार्यस्य साधकः ॥ ७८ ॥

फलमग्रे भवेदेकविंशत्यङ्गुलमानतः।
अङ्कुशेन फलस्याधो[11] युक्तः पृष्ठे च कर्तरी ॥ ७९ ॥

---

१ D न्धि F न्धे। २ A क्षेण। ३ A दर्शनीया। ४ D स्युः। ५ F द्वि। ६ A °ड। ७ F omits these two lines। ८ A न्यां। ९ F omits these two lines। १० D श्रं। ११ A हं।

अंशनिर्मूलदेशे स्यादायसो मुकुलाकृतिः।
ईदृक्षो वा(क्षः पा)तिकः कुन्तः फलमात्रस्तु वाजिनि ॥ १८० ॥

पदातिकुन्तवत्कुन्तो दीर्घत्वेन विशेषतः।
गजारूढेन सन्धार्यः समराङ्गणमूर्धनि ॥ ८१ ॥

भूमिकुन्तं समादाय दक्षिणेन च पाणिना।
अंशनेरग्रतो हस्तमात्रेऽनुत्तानमुष्टिना ॥ ८२ ॥

वितस्तित्रितयं त्यक्त्वा वामेनोत्तानमुष्टिना ॥
सङ्गृह्य कुन्तं जाते(न) स्थानकेन चरेल्लघु ॥ ८३ ॥

चालयन्मणिबन्धेन कङ्कणावर्तमाचरेत्।
स्कन्धे चावर्तयन् कुन्तं कण्ठावर्तं प्रदर्शयेत् ॥ ८४ ॥

पृष्ठे च भ्रामयेत् कुन्तं पृष्ठावर्तं निदर्शयेत्।
कक्षायां च तथावर्तं तर्जन्यां तु तदान्वयम् ॥ ८५ ॥

यत्र यत्र प्रदेशे तु भ्रामयेत्कुन्तमुत्तमम्।
तत्तन्नाम्ना तमावर्तं दर्शयेत्कुन्तकोविदः ॥ ८६ ॥

फलेन दर्शयेदाशां परवेधात्मिकां नृपः।
अङ्कुशेन विकर्षाशां कर्तर्या धारणात्मिकाम् ॥ ८७ ॥

विनैनाशा(नाशाशा)प्रशन्यां च दर्शयेत्कुन्तकोविदः।
इति कुन्तविनोदेन रञ्जयेत समागतान् ॥ ८८ ॥

गदां लोहमयीं कुर्याद्दारुसारमयीं तथा।
घनेन निर्मितां वापि रत्नकाञ्चनभूषिताम् ॥ ८९ ॥

स्थूलोदरीं च स्थूलाग्रां समदन्तीं परां शुभाम्।
प्रगृह्य मूलदेशे तु खड्गवद्दृढमुष्टिना ॥ १९० ॥

भ्रामयेत्करयुग्मेन करेणैकेन वा पुनः।
विचरेन्मण्डलैश्चित्रैः सव्यैश्चैवापसव्यकैः ॥ ९१ ॥

---

१ A अं। २ A द। ३ D अंशेन चा A अंशनेर। ४ D पाणि। ५ D तेछा स्था A तेत्था ६ A ष। ७ D प्रद। ८ F वूर्तं। ९ D त्व। १० A र्तव्या। ११ D वन। १२ D श्च। १३ D तापरां। १४ A गृह्य मूलप्र। १५ D ले चि।

गतागतैश्च गोमूत्रैरुप्लुतैः[1]प्लुत(प्लवङ्गुत्प्लु) तैरपि ।
पातयन्परघातौंश्च महाराशाश्च दर्शयेत् ॥ ९२ ॥

उपन्यस्तैरपन्यस्तैरावर्तपरिवर्तनैः ।
दर्शयेच्च गदाविद्यां विनोदाय महीपतिः ॥ ९३ ॥

नीराज्यमानो राज्ञीभिः स्तूयमानश्च बन्दिभिः ।
कविभिर्वर्ण्यमानश्च गीयमानश्च गायकैः ॥ ९४ ॥

आशीर्भिर्वर्धमानश्च जयजीवेतिवादिभिः ।
पुरोधःप्रमुखैर्विप्रैर्नन्दवर्धस्वभाषितैः ॥ ९५ ॥

प्रणम्यमानो भूपालैर्बद्धाञ्जलिपुटैर्नरैः ।
भजेत्प्रमोदं भूपालः शस्त्रविद्याविनोदनैः ॥ ९६ ॥

शस्त्रविद्याविनोदोऽयं कथितः सोमभूभुजा ।

इति शस्त्रविद्याविनोदः ॥ १ ॥

अथ शास्त्रविनोदोऽयं विविधः परिकीर्त्यते ॥ ९७ ॥

देवता विधिनाभ्यर्च्य विप्रान्सन्तोष्य दानतः ।
निव(र्व)र्त्य राजकार्याणि क्षुत्काले विहिताशनः ॥ ९८ ॥

सभामण्डपमध्यस्थः समासीनः शुभासने ।
विनोदाय कवीन्प्रौढान् गाँयकान् वादिनस्तथा ॥ ९९ ॥

वाग्मिनः पण्डितान् प्राज्ञान् सर्वशास्त्रविशारदान् ।
समाहूय नृपस्तैस्तैरागतैः परिवेष्टितः ॥ २०० ॥

यथोचितासनासीनैराशीर्भिरभिनन्दितः ।
प्रसन्नकान्तया दृष्ट्या तान् सर्वानवलोक्य च ॥ १ ॥

तत्र शङ्कलादक्षान्निसर्गप्रतिभान्वितान् ।
रत्नत्रयकृताभ्यासान् सर्वव्यापारकोविदान् ॥ २ ॥

---

१ D त्योत्प्लुत्य । २ D तैस्तान् । ३ A थ । ४ A ता । ५ A चा । ६ A ण । ७ A गम ।

उत्पादकांश्च भावज्ञांश्छन्दोविचितिपारगान्[1]।
मधुरान् काव्यतत्त्वज्ञान् सर्वभाषाविशारदान्[2]॥ ३ ॥

आज्ञापयेत्कवीन्राजा कौव्यं[3] पठत सुन्दरम्।
पठ्यमाने ततः काव्ये गुणान् दोषान् विचारयेत्॥ ४ ॥

शब्दाः शरीरं काव्यस्य प्राणोऽर्थः परिकीर्तितः।
अलङ्काराश्तदौऽकारा(रः) रसा भावाश्च चेष्टिताः[4](तम्)॥ ५ ॥

छन्दोऽस्य पदसञ्चारो नानाप्रकृतयस्तथा।
शब्दविद्यास्य[5] मर्मैतैः काव्यदेवस्य रम्यता॥ ६ ॥

महाप्राणाक्षरं श्लिष्टं[6] मिथश्च श्लिष्टवर्णकम्।
प्रसिद्धार्थपदाख्यातं प्रसाद इति कथ्यते॥ ७ ॥

प्रारब्धमार्गनिर्वाहः समता परिकीर्तिता।
शब्दार्थौ कर्णसुखदौ माधुर्यं तत्प्रवक्ष(क्ष्य)ते॥ ८ ॥

अक्षराणां च लालित्यं सौकुमार्यं विदुर्बुधाः।
निरपेक्षार्थवाचित्वमर्थव्यक्तिरुदाहृता॥ ९ ॥

शस्तैर्विशेषणैर्युक्तैरौदार्यमभिधीयते[10]।
ओजः समासबाहुल्यं विकटाक्षरसन्धि वा[11]॥ २१० ॥

लोकानुसारि सम्भाव्यं[12] कथनं कान्तिरिष्यते।
समाधिरन्यधर्मश्चेदन्यत्र[13] प्रतिपद्यते॥ ११ ॥

दोषलेशैरसंस्पृष्टा गुणैः[14] सर्वैरलङ्कृता[15]।
वैदर्भी कथिता रीतिः श्रवणश्रव्यकारिणी[16]॥ १२ ॥

समस्तैरुद्भटैः[17] शब्दैरोजःकान्तिगुणान्वितैः।
गौडीया नाम सा प्रोक्ता[18] रीतिः काव्यविचक्षणैः॥ १३ ॥

---

१ D न्दःशास्त्रविशारदान्। २ D तिपारगान्। ३ A स्वकाव्यं पठयतामसौ। ४ A था। ५ D वे। ६ D न्त आख्यातः। ७ A ष्टे। ८ F र्थी। ९ A च। १० D क्तैः। ११ D F च। १२ A व्य। १३ D तः। १४ A खैः। १५ A णाः। १६ A णः। १७ A द्या। १८ A यु।

ईषत्कैवैः(श्लथैः)पदैर्युक्ता पुराणच्छायया युता ।
मधुरा सुकुमारा च पाञ्चाली[3] रीतिरिष्यते ॥ १४ ॥

विषमं चँ समं चैव तथैवार्धसमं भवेत् ।
एवं त्रिविधमाख्यातं वृत्तं छन्दोविशारदैः ॥ १५ ॥

एकाक्षरात्समारभ्य यावत्षड्विंशतिं गताः ।
एकैकाक्षरसंवृद्ध्या पादाः स्युश्छन्दसां विदुः ॥ १६ ॥

ऊर्ध्वं ततः समाँदिष्टाश्चण्डद(ट्ट)ष्ट्यादिदण्डकाः ।
तच्छेषं कथिता गाथाः पादैः षड्भिस्त्रिभिस्तथा ॥ १७ ॥

तत्रोक्ता प्रथमात्युक्ता द्वितीया मध्यमा ततः ।
प्रतिष्ठा सुप्रतिष्ठा च गायत्र्युष्णिगनुष्टुभा(भः) ॥ १८ ॥

बृहती च तथापङ्क्तिस्त्रिष्टुप् च जगती परा ।
तथातिजँगती[11] शक्वर्यन्यौ स्यादतिशक्करी ॥ १९ ॥

अष्टिरत्यष्टिरुद्दिष्टा धृतिश्चातिधृतिः स्मृता ।
कृँतिश्च प्रकृतिश्चैवमाकृतिर्विकृतिर्मता ॥ २२० ॥

सङ्कृँत्यभि(ति)कृती स्यातामुत्कृतिश्चरमा भवेत् ।
इति संज्ञाः समाख्याताश्छन्दसां पूर्वसूरिभिः ॥ २१ ॥

मकारस्त्रिगुरुर्ज्ञेयो नकारस्त्रिलघुर्मतः ।
आदौ गुरुर्भकाँरः स्यात्सकारे गुरुरन्ततः ॥ २२ ॥

मध्ये गुरुर्जकारः स्याद्रकाँरो लघुमध्यकः ।
आदौ लघुर्यँकारः स्यात्तकारोऽन्त्यैँलघुर्मतः ॥ २३ ॥

प्रस्तारो नष्टमुद्दिष्टमेकद्यादिलघु(ग)क्रिया ।
संख्या चैव तथा द्वाव(चैवाध्वयोगश्च)प्रत्ययाः षडुदाहृताः ॥ २४ ॥

---

१ D ह्लाघैः । २ A कै । ३ A ला । ४ D समता । ५ A विर्तिं । ६ A श्च । ७ A मुद्दि । ८ A कविद्यागन्थाः । ९ A त्रिष्टुप । १० A च जग । ११ A ता । १२ A न्य । १३ F कृ । १४ A संस्कृ । १५ D रे A रं । १६ A को मध्यलघु ( F घुः ) स्मृतः । १७ A र्घयकारे । १८ A न्य ।

एकदेशेन सादृश्यं बहुसादृश्यमेव वा।
यत्र प्रतीयते काव्ये सोपमेति निगद्यते ॥ २५ ॥

सा चापि द्विविधा प्रोक्ता पदवाक्यार्थभेदतः।
तत्रोदाहरणं वक्ष्ये पृथक् पृथगिदं यथा ॥ २६ ॥

पदार्थोपमा यथा।

इन्दुबिम्बसमानेन वदनेन कृशोदरी[२]।
आह्लादयति[३] चित्तं मे कुम्भिकुम्भोन्नतस्तनी ॥ २७ ॥

वाक्यार्थोपमा यथा।

वक्ष(क्षः)स्थले विलसता मुक्ताहारेण राजते[४]।
सुमेरुरिव गाङ्गेन प्रवाहेण नराधिपः ॥ २८ ॥

उपमेयं(ये) समारोप्य कथ्यते यत्र वस्तुनि।
उपमानं तदा ख्यातं रूपकं पूर्वसूरिभिः ॥ २९ ॥

पुष्पचापस्य तन्वङ्गी परमास्त्रं जगज्जये।
मनो हरति लोकस्य लावण्यरसदीर्घिका ॥ ३० ॥

समादाय च सादृश्यमन्यस्यान्यत्र भावनात्।
उत्प्रेक्ष(क्ष्य)ते हि[६] यद्वस्तु तामुत्प्रेक्षां प्रचक्षते ॥ ३१ ॥

मधु(म)वैरि(री)विधुस्तन्वि त्वया वक्त्रेण निर्जितः।
इतीव सेवते पादौ पद्मैकान्ती मृगीदृशः ॥ ३२ ॥

वक्तुं किञ्चिदुपक्रम्य निषेध इव तस्य यः।
उत्कर्षापादनायासावाक्षेपः कथितो बुधैः ॥ ३३ ॥

तस्याः(स्या)स्तव वियोगोत्थं तापं प्राणान्तकं शृणु[८]।
नं वक्ष्ये त्वं दयाहीनः परदुःखसुखी यतः ॥ ३४ ॥

गन्तुमिच्छसि चेद्गाढं गच्छ कान्त यथासुखम्।
मम यज्जावि तज्जावि नामङ्गल्यं ब्रवीम्यहम् ॥ ३५ ॥

१ F च। २ A शे। ३ F सि। ४ F से। ५ A तथा। ६ D च। ७ A आ। ८ D द्वयः। ९ D तद्व। १० A यदाहीनः। ११ A स्त।

उद्वर्तयामि गौराङ्गि चन्दनेन किमाननम् ।
निसर्गमधुरस्यास्य मण्डनेयं विडम्बना ॥ ३६ ॥

रूपं शब्दश्च गन्धश्च रसः स्पर्शक्रियागुणाः ।
द्रव्यं च वर्ण्यते यत्तु स्वभावोक्तिरसौ मता ॥ ३७ ॥

सर्वाङ्गैपाण्डुरैः पिच्छैश्चञ्च्वा च कनकत्विषा ।
हरिद्रापिञ्जरैः पादै राजहंसो विराजते ॥ ३८ ॥

इति रूपम् ।

अथ शब्दः

वीणाया निष्कलो नादो मधुरः श्रुतिशोभनः ।
कस्य नो हरते चेतो मृगीमपि वशं नयेत् ॥ ३९ ॥

इति शब्दः ।

अथ गन्धः

अन्येभगन्धमाघ्राय दिशो जिघ्रति वारणः ।
अत्यर्थं करमुत्क्षिप्य कोपारुणितलोचनः ॥ २४० ॥

इति गन्धः ।

अथ रसः

विशालायाः फलं रम्यं लोभादास्वाद्य सत्वतः ।
व्यादाय वदनं मूढो धुनीते मर्कटः शिरः ॥ ४१ ॥

इति रसः ।

अथ स्पर्शः

पीनवृत्तघनोत्तुङ्गस्तनस्पर्शे (र्शि) करोत्पलम् ।
तन्वङ्ग्या मानसं यूनां लज्जाधैर्यविवर्जितम् ॥ ४२ ॥

इति स्पर्शः ।

---

१ A णः । २ A ङ्गं । ३ D कि । ४ A म । ५ A ख: । ६ D शैः । ७ A ङ्ग्यां । ८ A ज ।

अथ क्रिया

ऊर्ध्वरोमा श्लथंश्रोत्रः पुच्छं कुण्डलतां नयन्।
कामुकः पृष्ठमारोहन् हरिणीमनुधावति ॥ ४३ ॥

इति क्रिया।

अथ गुणः

घनगर्जितमाकर्ण्य घनदानविभूषितः।
घनवारिमदस्रावी गजोऽयं मदगर्जनः ॥ ४४ ॥

इति गुणः।

अथ द्रव्यम्

अतसीपुष्पसङ्काशः पद्मपत्रायतेक्षणः।
शङ्खचक्रगदापाणिर्दृश्यते गरुडध्वजः ॥ ४५ ॥

इति द्रव्यम्।

गुणजातिक्रियाद्रव्यवाच्येकत्र स्थितं पदम्।
सर्वैः सम्बध्यते वाक्यैर्दीपकं तत्प्रचक्षते ॥ ४६ ॥

श्वेतिमा दृश्यते शङ्खे क्षीराम्भोधौ सुधाकरे।
दिग्दन्तिदशने कुन्दे यशःसु तव भूपते ॥ ४७ ॥

भद्रो नगेन्द्रः कुरुते स्वामिनो जयसम्पदम्।
मदयत्यूर्जितं राज्यं रिपूनभिभवत्यसौ ॥ ४८ ॥

कुरुते तव सङ्गीतं तद्विदां चित्तरञ्जनम्।
कामिन्या मन्मथोल्लासं सन्तापं च वियोगिनाम् ॥ ४९ ॥

विष्णुना निर्जिता दैत्याः सुरास्त्राता महात्मना।
योगिनः प्रापिता मोक्षं जनो जगति मोहितः ॥ २५० ॥

दीपक(कं)श्लोकमध्ये तु श्लोकस्यान्ते च दीपकम्।
गुणजातिक्रियाद्रव्यसंज्ञं ज्ञेयं विचक्षणैः ॥ ५१ ॥

पदमावर्तते यत्र भिन्नभिन्नार्थवाचि यत्।
आवृत्तिर्नाम सा ज्ञेया वचो व्युत्पत्तिकारिणी ॥ ५२ ॥

---

१ A थः। २ A गर्जिनी। ३ F च्यते। ४ A दाम्। ५ A चते। ६ A स्तु। ७ A य ८ A त्र। ९ A य। १० A क्ती। ११ A यत्। १२ D वैत्यप।

क्षीरेण नीरं घटते सद्भिः सन्तो मिलन्ति च ।
चक्राह्वाश्चक्रवाकीभिः सङ्गच्छन्ते दिनागमे ॥ ५३ ॥

पुष्पितां रचयत्येष वनमालीं[1] मधूत्सवः ।
पुष्पितां कुरुते तन्वीं नवयौवनसङ्गमः ॥ ५४ ॥

विधेयार्थस्य सिध्यर्थं[2] साम्यादन्यार्थभी(भा)षणम् ।
सोऽयमर्थान्तरन्यासः कथितः सोमभूभुजा ॥ ५५ ॥

पक्वाम्रकदलीद्राक्षाफलाढ्येऽपि वने वसन् ।
करभः कण्टकान्वाञ्छत्यधमो ह्यधमप्रियः ॥ ५६ ॥

उक्त्वा सादृश्यमन्योऽन्यमुपमानोपमेययोः ।
उपमेयस्य भेदोक्तिर्व्यतिरेकः स्मृतो बुधैः ॥ ५७ ॥

सुवंशजो गुणयुतो निर्जितारातिमण्डलः ।
दत्तपृष्ठो रणे चापस्त्वं पुनः सम्मुखः सदा ॥ ५८ ॥

प्रतीतकारणत्यागाद्यत्र कार्यमुदीर्यते[3] ।
हेत्वन्तरात्स्वभावाद्वा सेयमुक्ता विभावना ॥ ५९ ॥

दिग्वधूमुखमाभाति विना चन्दनचर्चया[4] ।
अतीवपाण्डुरच्छायं सान्द्रं चन्द्रमरीचिभिः ॥ ६० ॥

दोषेष्वशिक्षितैः सद्भिः कदाचिन्न प्रदुष्यते ।
कलुषं[5] साधुवृत्तेषु तथापि खलु मानसम् ॥ ६१ ॥

इष्टमर्थमनुक्ता(क्त्वा)न्यैः साभिप्रायैर्विशेषतः(णैः) ।
यदुच्यते समासेन सा समासोक्तिरिष्यते ॥ ६२ ॥

ऋजुभिः सफलैः सार्धं[6](र्थैः)गुणसङ्गमशालिभिः ।
पत्रिभिः सङ्गतो हन्ति वक्रश्चापः[7] पुरस्थितम् ॥ ६३ ॥

अर्थस्य[8] प्रतिपाद्यस्य यः सम्भाव्यः प्रदर्श्यते[9] ।
उत्कर्षोऽतिशयोक्तिः[10] स्यात् सोऽलङ्कारः कविप्रियः ॥ ६४ ॥

---

१ A ली । २ A न्वी । ३ D द्धार्थात् । ४ D ध्यादन्यत्रभा । ५ D सेत् । ६ A क । ७ A गोर्ध । ८ A दा । ९ A व । १० A खं । ११ A धर्मसु । १२ D सार्धैः । १३ F च । १४ A पं । १५ A ध । १६ D दृश्य । १७ A तिस्थात् ।

मम प्रियावियोगोऽयं रसायनमिवाभवत् ।
नैयामि[1] दिवसन्त्वेकं वर्षाणामयुतैः समम् ॥ ६५ ॥

स्थितयोरेकशय्यायां दम्पत्योर्मानिनो रुषा ।
वितस्तिमात्रमप्यासीदन्तरं शतयोजनम् ॥ ६६ ॥

विशेषणैर्हेतुभूतैर्विशेषो यत्र मन्यते ।
अलङ्कारः स कथितो हेतुर्नाम विचक्षणैः ॥ ६७ ॥

निःशेषितरिपोर्दोर्तुर्धर्मज्ञस्य दयावतः ।
तवैव[2] रमणीनाथ जगत्येकस्य वीरता[3] ॥ ६८ ॥

गूढेङ्गितैः संज्ञया वा सूच्यतेऽर्थो हृदि स्थितः ।
अलङ्कारः स सूक्ष्मः स्याद्विदग्धैरेव लक्ष्यते ॥ ६९ ॥

हृदिस्थं काम्रुकं दृष्ट्वा वयस्यां वक्ति कामिनी ।
दन्तनिर्मितदम्पत्योर्विवाहं[4] निशि कुर्वते ॥ ७० ॥

उद्दिष्टानां पदार्थानामनुद्दिष्टैर्यथाक्रमम् ।
सम्बन्धः कथ्यते योऽसौ यथासङ्ख्यं क्रमश्च सः ॥ ७१ ॥

शौर्येण काव्यबन्धेन रूपेण च नृप त्वया ।
रिपवः पण्डिता रामा निर्जिता निर्जिता हृताः ॥ ७२ ॥

गुरुदेवनृपादीनां माननेऽर्चा[5]भू(भा)षणम् ।
प्रेयो नाम स विज्ञेयः प्रीतेरुत्पादको यतः ॥ ७३ ॥

तव पादाम्बुजद्वन्द्वं ध्यायतः पुरुषोत्तम ।
समुद्भूता महाप्रीतिर्दुष्टे[6] वक्तुं न पार्यते ॥ ७४ ॥

त्वत्पादप्रणतिप्राप्तप्रसादात् रिपवः प्रभो ।
रमन्ते सह कान्ताभिः सम्प्रत्युद्यानभूमिषु ॥ ७५ ॥

कृशाङ्गैर्विकृतैर्नग्नैर्मुखवाद्यपरैर्गणैः ।
नृत्यद्भिः स्मापिता गौरी नवोढा सुस्थिता य (भ)वं ॥ ७६ ॥

---

१ A न यासि। २ A यै। ३ A तः। ४ A दं। ५ A इ F इ। ६ A दु। ७ A रि। ८ D स्वा F क्षा। ९ D तः।

देव त्वद्वैरिकान्तानां स्नातानां नयनोदकैः ।
प्रलापजपसक्तानां मुद्रालीके करस्थितिः ॥ ७७ ॥

त्वत्कोप(पे)पावकः साक्षादासिस्तव नराधिपः(प) ।
पतत्येष रिपौ यस्मिन् स भस्म भवति क्षणात् ॥ ७८ ॥

दृश्यते सेतुरद्यापि राघवेण कृतो महान् ।
रावणो निहतः सङ्ख्ये सीता प्रत्याहृता यतः ॥ ७९ ॥

रावणाज्जातसन्त्रासो मारीचिर्मृगरूपधृक् ।
लोभयन्स्वर्णशृङ्गाद्यैर्विद्धो रामेण लीलया ॥ ८० ॥

भिन्नां शूर्पनखानासां निर्यद्रुधिरसन्ततिम् ।
दृष्ट्वा जुगुप्सितां सीतां जहास रघुनन्दनः ॥ ८१ ॥

स वार्मनवपुर्देयाद्देवो निःश्रेयसं सताम् ।
पद्भ्यां लोकत्रयं क्रामन् यश्चकाराद्भुतं महत् ॥ ८२ ॥

अहङ्कारपरं वाक्यं वंशवीर्यश्रुतादिभिः ।
बध्यते यत्तदूर्जस्वि कथितं कविभिः पुरा ॥ ८३ ॥

कारागारे धृतः शक्रो बलान्निर्जित्य सङ्गरे ।
तस्य मे दशकण्ठस्य विहाराद्भूत किं भयम् ॥ ८४ ॥

तद्वाचकैः पदैः साक्षादनुक्त्वा तस्य सिद्धये ।
भङ्ग्यन्तरेण कथनं पर्यायोक्तिरुदाहृता ॥ ८५ ॥

रिपवस्तस्य भूपालाः सदाराः पाणिसम्पुटैः ।
पिवन्त्यरण्यमासाद्य नित्यं नवनवं जलम् ॥ ८६ ॥

क्वापि कार्ये प्रवृत्तस्य यदि दैवसहायता ।
कथ्यते यत्र तत् ख्यातं समी(मा)हितमलङ्कृतम् ॥ ८७ ॥

रुष्टा (ष्टां) प्रार्थयमानेन गौरीकण्ठग्रहो हठात् ।
प्राप्तः शिवेन कैलासकम्पाद्रावणनिर्मितात् ॥ ८८ ॥

---

१ A त्वा । २ A मुजालोके । ३ A क्षासिस्त । ४ A स्मसाद्र । ५ A ची । ६ A स
७ A यादेवे । ८ A सह । ९ A यत्र दूर्जस्विः । १० A न्त्या रण । ११ A त्वे ।

समृद्धो[1](द्धेः) हेमरत्नानामाशयस्य समुन्नतेः।
वर्णनं क्रियते यत्र तदुदात्तं प्रचक्षते ॥ ८९ ॥

त्वत्पादनतिमात्रेण समृद्धिर्जायते नृप[2]।
पद्मरागमहानीलहेममौक्तिकशालिनी ॥ ९० ॥

यं पश्यति क्षमापाल भवद्दृ[3]ष्टिः प्रसेदुषी।
तेन स्पर्धां वितन्वन्ति शक्रवैश्रवणादयः ॥ ९१ ॥

दृष्टमर्थमपन्हुत्य व्याजेनान्यस्य कीर्तनम्।
तदुत्कर्षव[4]तीं प्राहुरपन्हुतिमलङ्कृतिम् ॥ ९२ ॥

अयं न धरणीनाथ कर[5] कौक्षेयकस्तव।
त्वत्प्रतापानलस्येयमुद्गता धूमसन्ततिः ॥ ९३ ॥

अर्थ[6]ण्डेषु सँखण्डेषु नानार्थत्वं पदेषु यत्।
गुम्फ्यते कविभिः काव्यैः श्लि[7]ष्टमिष्टं मनीषिणाम् ॥ ९४ ॥

हतवान् दानवान् क्रूरान्भक्तै[8]न्दावनप्रियः।
पूज्यज्येष्ठबलः श्रीमान् भवान् कृष्णश्च भूपते ॥ ९५ ॥

सर्वहेतिभयात्त्व[9]क्तः शत्रवस्तन्मृगीदृषः।
आसन्नविधवाकारास्त्वयि सङ्ग्रामसङ्गते[10] ॥ ९६ ॥

क्रियाजातिगुणाधी(दी)नामुक्त्वा[11] वैकल्यमेकशः।
उत्कर्षस्याभिधानं यत्सा विशेषोक्तिरिष्यते ॥ ९७ ॥

अनाकारगतिश्चन्द्रस्त्वन्मुखं कठिनस्तनि[12]।
असागरसभूद्भूता सुधेयं वचनं तव ॥ ९८ ॥

उ[13]त्कृष्टैः सह निर्दे[14]शो व्यापारे यत्र कथ्यते।
साम्ययोगः स विज्ञेयो विशेषोत्पादहेतवे ॥ ९९ ॥

भवान् शक्रश्च राजेन्द्र बिभ्रतो भुवनत्रयम्।
त्वं धर्म[15]चरणादेव मरुत्वान्दृ[16]ष्टिसर्ज[17]नात् ॥ १०० ॥

---

१ F द्धौ। २ A पः। ३ A दृ। ४ A यतां। ५ A र। ६ A ष। ७ D पदार्थेषु। ८ D वाच्यैः श्लिष्ट मनीषिणाम्। ९ A ष। १० A क्तं। ११ A क्तू। १२ A ङ्कतौ। १३ D क्त्वा। १४ A नी, नं। १५ A उद्दिष्टैः। १६ A व। १७ A न्द।

अविरोध्यपि यद्वस्तु विरुद्धमिव भाष ( स ) ते ।
यत्र सोऽयमलङ्कारो विरुद्ध इति कथ्यते ॥ १ ॥

हारयोगेऽपि दारिद्र्यं न जहात्युदरं तव ।
अधस्थमपि वामोरु गुरुतां जघनं गतम् ॥ २ ॥

निर्वेदादथ सन्तोषादन्यदेव प्रशस्यते ।
अप्रस्तुतप्रशंसेयमाख्याता कविभिः पुरा ॥ ३ ॥

अपि वर्षसहस्राणि भ्रान्त्वा नो लभ्यते मरौ ।
तरुच्छाया दलं मूलं फलं जलमनाविलम् ॥ ४ ॥

अज्ञानाद्वा प्रसङ्गाद्वा बुद्धिपूर्वमथापि वा ।
आमृष्टममृतं येन स भवत्यजरामरः ॥ ५ ॥

निन्दाव्याजेन यत्किञ्चिच्छ्लि(स्तु)यते सविशेषणम् ।
व्याजस्तुतिरिति ख्याता नागरोक्तिविशारदैः ॥ ६ ॥

अधुनापि न शुष्यन्ति समुद्राः सप्त भूपते ।
महतापि किमेतेन त्वत्प्रतापाग्निना कृतम् ॥ ७ ॥

अर्थेऽन्यस्मिन् प्रवृत्तेन किञ्चित्तत्सदृशं फलम् ॥
निर्दिश्यते प्रतीत्यर्थं तन्निदर्शनमुच्यते ॥ ८ ॥

खलं खलु गुणाः प्राप्य भजन्ते दोषरूपताम् ।
अहिवक्त्रं समासाद्य दुग्धं सम्पद्यते विषम् ॥ ९ ॥

गुणानां कर्मणां वापि सहभावो निबध्यते ।
यत्र काव्ये समाख्याता परिवृत्तिरियं बुधैः ॥ ११० ॥

राजन्धर्मकरं स्तुत्यं सततं यत्सुखावहम् ।
तद्दत्वा द्रविणं कीर्त्तिमग्रहीस्त्वमनश्वरीम् ॥ ११ ॥

रणरङ्गाङ्गणे वीर शस्त्राणि पततां द्विषां ।
प्राणमात्राभयं दत्वा सर्वं धर्मं त्वमग्रहीः ॥ १२ ॥

---

१ A व । २ D दुच्य । ३ A पो । ४ A ग । ५ A कं । ६ D मृत्युं । ७ A लग्द । ८ A स्थ ।

करशाखाग्रमादाय द्विषतां सङ्गतान्तरे ।
भूवाजिगजसम्पन्ना दत्ता[1] लक्ष्मीस्त्वया नृप ॥ १३ ॥

अर्थस्याभीष्टभूतस्य यत्राशंसनमुच्यते ।
प्रशस्तवाचकैः शब्दैः साशीरित्यभिधीयते ॥ १४ ॥

लक्ष्मीलोचननीलाब्जविकासरजनीकरः[2] ॥
सुभगङ्करणो भूयाद्युष्माकं मधुसूदनः ॥ १५ ॥

अलङ्क्रियाणां बन्धीनां[3] द्वयोरपि निबन्धनम् ।
क्रियते यत्र तत्ख्यातं सङ्कीर्णमिति कोविदैः ॥ १६ ॥

यदि सा मृगशावाक्षी पाणिपल्लवशालिनी ।
दैवाद्दृष्टिपथं यायात्तया(दा) मोदेत[4] मे मनः ॥ १७ ॥

उरस्याङ्के करे बिभ्रत्कौस्तुभं श्रियमम्बुजम् ।
हरिर्वः श्रेयसे भूयाल्लक्ष्मीवक्त्राब्जषट्पदः ॥ १८ ॥

गुणः प्रबन्धविषयः कवेर्भाव(र्भाव)स्तु मानसः ।
भाविकं नाम तत्प्राहुः काव्यालङ्कारकोविदाः[5] ॥ १९ ॥

सर्गबन्धो महाकाव्यं समीक्षेतास्य[6] लक्षणम् ।
आशीर्वादो नमस्कारो वस्तूद्देशोऽपि तन्मुखः ॥ १२० ॥

पौराणिककथोद्भूतमितिहासकथाश्रितम् ।
स्वबुद्ध्युत्प्रेक्षितं प्राज्ञैर्[7]विशिष्टपुरुषाश्रितम् ॥ २१ ॥

धर्मार्थकाममोक्षाणां कथनैर्यत्समन्वितम् ।
पुरसागरशैलर्तुसोममूर्या(र्यो) दयैरपि ॥ २२ ॥

जलोद्यानमधुक्रीडासम्भोगोत्सववर्णनैः ।
विवाहैर्विप्रलम्भैश्च पुत्रजन्मोपवर्णनैः ॥ २३ ॥

द्यूतमन्त्रप्रयाणाजिनायकोत्कर्षकीर्तनैः ।
एतैर्वर्णनकैर्युक्तं न्यूनाधिक्येन दुष्यति ॥ २४ ॥

---

१ A त्त। २ D ली। ३ A द्धी। ४ D ता। ५ A न। ६ D र्व। ७ A त्म। ८ F ते। ९ D दयोऽपिच।

उच्छ्वासोन्मेषसर्गैर्वा काण्डस्तबकसन्धिभिः।
आश्वासैर्वा तथाध्यायैः पद्धत्या च विराजितम् ॥ २५ ॥

एतैरनतिविस्तीर्णैर्भव्यवृत्तैः सुसन्धिभिः।
रचितं रसभावाढ्यं काव्यं लक्षणसंयुतम् ॥ २६ ॥

वृत्तस(ग)न्धि तथा चूर्णं समस्तपदबन्धुरम्।
त्रिःप्रकारमिदं गद्यं पूर्ववर्णनकैर्युतम् ॥ २७ ॥

गद्यैः पद्यैः समायुक्तामेतद्वर्णनकैर्युताम्।
चम्पुनाम्ना समाख्यातां शुश्रूषेत महीपतिः ॥ २८ ॥

रूपाणि नाटकादीनि दश वीक्षेत भूपतिः।
तत्रादौ नाटके बीजं स्वल्पोद्दिष्टं तु कारणम् ॥ २९ ॥

अवान्तरार्थविच्छेदे बिन्दुरुच्छेदकारणम्।
कथामध्ये समुत्पन्नैर्मासमात्रैः पताकिकाँ ॥ १३० ॥

प्रादेशिकी स्यात्प्रकरी त्रिवर्गः कार्यमुच्यते।
एता(ः) प्रकृतयः पञ्च प्रोक्ता नाटकवेदिभिः ॥ ३१ ॥

पूर्वावस्थास्विहारम्भः साकल्पो(सङ्कल्पो)मानसः स्मृतः।
प्रयत्नस्तु फलावाप्तेर्व्यापारोऽतित्वरायुतः ॥ ३२ ॥

अपायपातिका(को)पायैः(?) प्राप्तिः सा(त्याशा) परिकीर्तिता।
प्रत्यूहस्य प्रतीकारो नियताप्तिश्च निश्चिता ॥ ३३ ॥

परिपूर्णफलावाप्तिः फलागम इति स्मृतः।
इत्यवस्थाः समाख्याताः पञ्च नाटकसंश्रयाः ॥ ३४ ॥

बीजप्रारम्भयोगेन मुखसन्धिरुदाहृतः।
बिन्दु यत्र(यत्न) समायोगे सन्धिः प्रतिमुखं मतम् ॥ ३५ ॥

पताकाप्त्याशयोर्योगे गर्भसन्धिरुदीरितः।
प्रकरीनियताप्तिभ्यां विमर्शः सन्धिरिष्यते ॥ ३६ ॥

---

१ A म्ब। २ A स। ३ D सर्व। ४ D द। ५ D श्रा। ६ A सैः। ७ D कः। ८ A र्णः F र्गाः। ९ D तः। १० A त्यो। ११ D पैः A ये। १२ F आयायत्यान्त। १३A यात। १४ A पैः। १५ D र्ज।

कार्यात्फलागमोपेतात्सन्धिर्निर्वहणं भवेत् ।
इति प्रगदिताः पञ्च सन्धयः सन्धिकोविदैः ॥ ३७ ॥

गुणैः श्लाघ्यैः समायुक्तः ख्यातवंशश्च नाटकैः (के) ।
धीरोदात्तः प्रतापी च काव्ये वा नायको नृपः ॥ ३८ ॥

पुरावृत्तानुकर्तव्या प्रशस्ता नाटके कथा ।
पञ्चाद्या दशपर्यन्तास्तस्मिन्नङ्गाः प्रकीर्तिताः ॥ ३९ ।

एको रसोऽत्र मुख्यः स्याच्छृङ्गारो वीर एव वा ।
एवमन्ये रसाः सर्वे कुर्यान्निर्वहे (ह) णेऽद्भुतम् ॥ १४० ॥

देवद्विजनरेन्द्राणां लिङ्गिनां संस्कृतं वचः ।
भवेद्वाक्यं महादेव्या मन्त्रिजाव(वे)श्ययोः क्वचित् ॥ ४१ ॥

स्त्रीणां विदूषकस्यापि शूद्राणां प्राकृतं वचः ।
म्लेच्छान्त्यजपिशाचादेः पैशाचं वापि मागधम् ॥ ४२ ॥

कार्य(:)प्रकरणे नेताऽमात्यो विप्रोऽथवा वणिक् ।
उत्प्रेक्ष्यं स तथा कुर्याच्छेषं नाटकलक्षणम् ॥ ४३ ॥

यत्र वक्ता भवेदेकः स्वरूप(स्य)वृत्तं परस्य वा ।
निपुणः पण्डितो धूर्त एकाङ्कः स तु भाणकः ॥ ४४ ॥

देवासुरकथाबद्धस्व्यङ्गे द्वादशनायकः ।
एवं समवकारः स्याच्छेषं नाटकवद्भवेत् ॥ ४५ ॥

ईहामृगस्त्वयं प्रोक्तो दिव्यप्रोद्धतनायकः ।
दिव्यस्त्रीहेतुसङ्ग्रामस्त्रीरोषकथनात्मकः ॥ ४६ ॥

शृङ्गारहास्यरहितैः रसैः सर्वैः समन्वितः ।
प्राप्तोऽयमुच्यते यत्र धीरोदात्तश्च नायकः ॥ ४७ ॥

मनुष्यनायकः ख्यातः स्वल्पस्त्रीजनसंयुतः ।
नियुद्धयुद्धसङ्क्षेपैस्तर्जनेन च संयुतः ॥ ४८ ॥

---

१ A वी । २ A ती । ३ A ब । ४ D या । ५ D णो । ६ A दैः । ७ F चा । ८ D ख्यः । ९ D पयस्य । १० D न्मृ । ११ A तैः ।

एकाङ्कः स्त्रीविहीनो वा बहुभिः पुरुषैर्युतः ।
व्यायोगोऽयं समाख्यातो नाट्यलक्षणकोविदैः ॥ ४९ ॥

ख्याताख्यातसमायुक्तः स्त्रीविलासै(प)समन्वितः ।
नृनायको निर्वृत्ताजिः करुणोऽत्ररसो मतः ॥ १५० ॥

भारतीवृत्तिबहुला(लो) नान्या(ना)चाकुलवे(चे)ष्टितैः ।
उत्सृष्टिकाङ्कः कथितो नाट्य(त्य)तत्त्वविचक्षणैः ॥ ५१ ॥

मुनिभिर्ब्राह्मणैः क(दु)ष्टनरैः प्राकृतसंस्कृतैः ।
वचोभिः क्रियते हास्यं शुद्धं प्रहसनं हि तत् ॥ ५२ ॥

वेश्या नपुंसकश्चेटो विटो धूर्तश्च बन्धकी ।
वेषचेष्टोक्तिविकटा बहुदम्भसमन्विता ॥ ५३ ॥

नानारूपाणि यत्र स्युर्वीथ्यङ्गानि त्रयोदश ।
सङ्कीर्ण(र्ण)नाम तत्प्रोक्तमेतत्प्रहसनं बुधैः ॥ ५४ ॥

एकपात्रा द्विपात्रा वा रसैः सर्वैः समन्विता ।
वीथ्यङ्गयुक्ता चैकाङ्का वीथिका नाम रूपकम् ॥ ५५ ॥

सूक्ष्मार्थस्य पदैस्यान्यपदेनार्थप्रकाशनम् ।
अङ्गमुद्धे(द्घा)त्यकं नाम वीथ्यङ्गं प्रथमं बुधैः ॥ ५६ ॥

यत्रान्यैस्य समादेशात् कार्यमन्यत्प्रसाध्यते ।
तच्चावलगितं नाम विज्ञेयं नाट्यवेदिभिः ॥ ५७ ॥

प्रस्तुतार्थे तु कस्मिँश्चिच्छुभे वाऽप्यथवाऽशुभे ।
कौशलादुच्यतेऽन्योऽर्थस्तदवस्पन्दितं मतम् ॥ ५८ ॥

उपहासेन संयुक्ता नालिका स्यात्प्रहेलिका ।
असत्प्रलापः स ज्ञेयो मूर्खेषु बुधभाषितम् ॥ ५९ ॥

एकद्वित्रिप्रवचना वाक्केली कथ्यते बुधैः ।
असद्भूतं मिथ(:)स्तोत्रं प्रपञ्चो हास्यकृन्मतः ॥ १६० ॥

---

१ A ताघ । २ A ता । ३ A सी । ४ A नृ । ५ D ता । ६ D कः । ७ A ब्र । ८ A कंचे । ९ A का । १० A वे । ११ A स्यवी । १२ A दास्यान्य । १३ D दूघास्य । १४ A न्योन्य । १५ A ङ्गि । १६ D न । १७ A प्रति वचना । १८ D साक ।

दोषा गुणा गुणा दोषा यत्र स्युर्मूर्दैवं[1] हि तत् ।
उक्तिप्रत्युक्तिमुत्कृष्टशूरयोऽधिबलं विदुः ॥ ६१ ॥

श्रुतिसाम्यादनेकार्थयोजनं त्रिगतं भवेत् ।
व्याहारो हास्यलोभाढ्याच्छ(द्वाक्छ)लनात्तु छलं भवेत् ॥ ६२ ॥

संरम्भैं[2]शस्त्रपतनविवाहपरिगुम्फितम् ।
बहुवाक्यापवादाभ्यां युतं गण्डं विदुर्बुधाः ॥ ६३ ॥

विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः ।
आनीयमानः स्वादुत्वं स्थायी भावो रसो मतः ॥ ६४ ॥

ज्ञान(य)मानतया तत्र विभावो भावपोषैंकृत् ।
अनुभावो विकारस्तु भावसंसूचनात्मकः ॥ ६५ ॥

अनुकूलमनोधर्माः सात्विकाः परिकीर्तिताः ।
विशेषादाँभिमुख्येन चरन्तो व्यभिचारिणः ॥ ६६ ॥

रोमाञ्चः प्रलयः स्वेदः स्तम्भः कम्पो विवर्णता ।
वैंश्रैं(स्व)र्यमश्रु चेत्यष्टौ भावाः सत्वसमुद्भवाः ॥ ६७ ॥

निर्वेदावेगवैवर्ण्यचिन्ताऽसूयादमैं (मद) श्रमाः ।
स्वापो विबोधो निद्रा च दैन्यालस्यमपस्मृतिः ॥ ६८ ॥

शङ्कौ ग्लानिस्त्रपा मोहो गर्वश्चपलता मतिः ।
अवहित्थोग्रतातर्कास्रासोन्मादौ विषण्णता ॥ ६९ ॥

अश्रु हर्षः स्मृतिर्जाड्यैंममर्षौ मरणं धृतिः ।
त्रिंशदेते त्रिभिर्युक्ता भावाः स्युर्व्यभिचारिणः ॥ १७० ॥

हासः शोको रतिः क्रोधो जुगुप्साभयविस्मयाः ।
उत्साहश्चेति विज्ञेयाः स्थायिभावा रसाश्रयाः ॥ ७१ ॥

हास्यं करुणशृङ्गारौ रौद्रवीभत्ससंज्ञकौ ।
भयानकाद्भुतौ वीर इत्यष्टौ नाटके रसाः ॥ ७२ ॥

---

१ A मैंदवं । २ A म्भं । ३ A योष । ४ A भावि । ५ D वैवर्ण्य । ६ D या । ७ A स्कृ ।
८ D शोको । ९ A ड्य । १० F षेमि ।

एवं काव्यकथाः श्रुत्वा विचार्य च गुणागुणौ ।
ततस्तु तार्किकान् राजा कौतुकेन विवादयेत् ॥ ७३ ॥

कुलेन विद्यया रूप्यात्या समयोवाद इष्यते ।
वादस्य विषयो गीतं नृत्तं वा वाद्यमेव वा ॥ ७४ ॥

स्वपक्षे साधनं यत्र परपक्षे च दूषणम् ।
सिद्धान्तेनाविरोधश्च सम्बन्धश्च प्रतिज्ञया ॥ ७५ ॥

हेतुदृष्टान्तयोर्योगो निगमोपनयौ तथा ।
पक्षस्य प्रतिपक्षस्य ग्रहो वादः स उच्यते ॥ ७६ ॥

साध्यधर्मविशिष्टस्य धर्मिणो यत्तु कीर्तनम् ।
प्रतिज्ञा नाम सा प्रोक्ता हेतुस्तत्साधनं विदुः ॥ ७७ ॥

साध्यसाधनयोर्यत्रा[1]विनाभावः प्रदर्श्यते ।
तदुदाहरणं प्रोक्तं निगमः पक्षनिर्णयः ॥ ७८ ॥

दृष्टान्ते कथि[2]तव्याप्तेर्हेतोः पक्षोपसंहृतिः ।
सै[3] चाप्युपनये(यः)पक्षे(क्ष)धर्मरूप्यापनयोच्यते ॥ ७९ ॥

उपनयः पक्षधर्म[4]रूप्यापनाये[5]पयुज्यते ।
शिष्यस्य गुरुणा सार्धं सतीर्थानां परस्परम् ॥ १८० ॥

वस्तुतत्त्वावबोधाय वादः कार्यो विमत्सरम् ।
जातिभिर्निग्रहस्थानै[6]श्छलैरपि समन्वितः ॥ ८१ ॥

स एव वादो जल्पः स्यात् रूप्यातिपूजादिहेतुकः ।
स्थापनं प्रतिपक्षस्य जल्पे[7] यस्मिन्न विद्यते ॥ ८२ ॥

वितण्डा नाम सा प्रोक्ता पूर्वोक्तफलसिद्धये ।
स्थ(छ)लमस्य विकल्पेन परवाक्योपघा[8]तनम् ॥ ८३ ॥

सामा[9]न्येनोपचारेण वचनेनेति तत्त्रिधा ।
प्रयुक्ते साधने सम्यगुत्तराप्रतिभा[10]सनात् ॥ ८४ ॥

---

१ A चार। २ A त्र। ३ D ता। ४ D adds this line । ५ A र्मा। ६ D क्यो। ७ A द्या। ८ A मे। ९ D भासना।

समीकरणबुद्ध्या[1] यः प्रसङ्गो जातिरित्यसौ।
प्रतिदृष्टान्तसरणं प्रतिज्ञाहानिरिष्यते ॥ ८५ ॥

अर्थान्तरस्य निर्देशः प्रतिज्ञान्तरमुच्यते।
सं[2] प्रतिज्ञाविरोधो यैर्द्वैरं[3] हेतुप्रतिज्ञयोः ॥ ८६ ॥

प्रतिज्ञायाः परित्यागस्तत्संसं[4](स सं)न्यासो विधीयते।
विशेषरहिते हेतौ दूषिते प्रतिवादिना ॥ ८७ ॥

सविशेषस्य कथनं हेत्वन्तरमुदाहृतम्।
प्रकृ[5]तार्थपरित्यागात्तदसम्बद्धभाषणम् ॥ ८८ ॥

अर्थान्तरमिति प्रोक्तं निग्रहस्थानसन्निधौ।
वारत्रितयमुक्तोऽपि पर्षदा प्रतिवादिना[6] ॥ ८९ ॥

यन्न वेत्ति परः सम्यगज्ञानाख्यं[7] तदुच्यते।
प्रतिज्ञादेः क्रमं त्यक्त्वा क्रमव्यत्ययसङ्ग्रहः ॥ १९० ॥

अप्राप्तकालं तत्प्रोक्तं निग्रहस्थानवेदिभिः।
केनाप्यवयवेनात्र हीनं तन्न्यू[8]नमुच्यते ॥ ९१ ॥

हेतूदाहरणाधिक्यादधिकं तद्विदुर्बुधाः।
अनुवादं परित्यज्य पुनस्तस्यै[9]वं भाषणम् ॥ ९२ ॥

शब्दस्यार्थस्य तत्प्रोक्तं पुनरुक्तं मनीषिभिः।
विज्ञातस्य पदार्थस्य त्रीन्वारान् भाषितस्य च ॥ ९३ ॥

नानु[10]वादः परोक्तस्य भवेत्तद(दन)नुवादनम्।
उत्तरस्य यदज्ञानमुक्तौ[11] त्वप्रतिभा बुधैः ॥ ९४ ॥

अन्यकार्यात्[12]कथाभङ्गः कथाविक्षेप उच्यते।
अभ्युपेत्य निजं दोषं परदोषस्य भाषणम् ॥ ९५ ॥

मतानुज्ञेति सा प्रोक्ता दोषोद्भावनवेदिभिः।
प्राप्तस्य निग्रहस्थानं तदनुद्भावनं चे[13]यत् ॥ ९६ ॥

---

१ A ब। २ A F सं। ३ A यं द्वैरं F A वै। ४ F सत्सं। ५ A तापा। ६ A ता। ७ D ग्ज्ञानाख्यं च। ८ A तन्यू। ९ A स्यव। १० A.....नानुवादनं। ११ D प। १२ D क्त। १३ D र्यंक। १४ D तु।

निग्राह्योपेक्षणं नाम निग्रहस्थानमुच्यते।
अनिग्रहे निग्रहस्य यदुद्भावनमुच्यते ॥ ९७ ॥

अनिग्राह्यं तु योगोऽयं दूषणत्वेन कीर्तितः।
स्वसिद्धान्तं परित्यज्य यदुच्छृङ्खलभाषणम् ॥ ९८ ॥

अपसिद्धान्तनामेदं निग्रहस्थानमुच्यते।
अपक्षधर्मो हेतुर्यः सोऽसिद्धः परिकीर्तितः ॥ ९९ ॥

साध्यधर्मविरुद्धो यः विरुद्धः परिकीर्तितः।
पक्षत्रितयगामी यः सोऽनैकान्तिक उच्यते ॥ २०० ॥

कालात्ययापदिष्टोऽयं पक्षे योऽन्येन बाध्यते।
सन्देहहेतुभूतेन बाध्यो यः प्रतिहेतुना ॥ १ ॥

हेत्वाभासः स विज्ञेयः समः प्रकरणेन सः।
ततो विवदमानेषु निग्रहस्थानवर्त्मनि ॥ २ ॥

स्थितानामजयं ब्रूयादितरेषां जयं नृपः।
इति शास्त्रविनोदेन दिनशेषं नयेन्नृपः ॥ ३ ॥

कवीनां तार्किकाणाञ्च प्रसादं भूरि दापयेत्।
उक्तः शास्त्रविनोदोऽयं सोमेश्वरमहीभुजा ॥ ४ ॥

इति शास्त्रविनोदः ॥ २ ॥

इदानीं गजवाह्यालीविनोदः परिकीर्त्यते।
गजैर्विनोदैनैं(नं) कुर्याद्वाह्यालीं सङ्गतो नृपः ॥ ५ ॥

सङ्ग्रामार्थं श्रमस्तेषां कार्यो यवनयोधने।
मदहीना न धावन्ति न युध्यन्ते मतङ्गजाः ॥ ६ ॥

मद एव गुणस्तस्मात्तदर्थं यत्नमाचरेत्।
बृंहणैः कवलैर्वृष्यैस्तदासञ्चय(ञ्जन)कारणैः ॥ ७ ॥

व्यस्तारकारकैश्चान्यैर्मुखवर्धनकैरपि।
करवृद्धिकरैर्योगैः कर्दशुद्धिकरैरपि ॥ ८ ॥

---

१ A omits this line। २ D स सिद्धः। ३ A दं। ४ A द्वागजा। ५ A व्या D व्यस्तारककरै। ६ D र।

प्रभेदैर्वर्धनैश्च गन्धवर्णकरैस्तथा।
दोषो(दर्पो)त्पादनकैः पिण्डैर्जातिधात्वनुसारतः ॥ ९ ॥

गजानुपचरेद्राजा प्रयत्नादन्नपानकैः।
तत्रादौ जातयो ज्ञेया त (स्त)स्माद्वक्ष्यामि लक्षणम् ॥ २१० ॥

गात्रापरं नखा दन्ताः कोशो मध्यं करं गलः।
तनून्येतानि दीर्घाणि शीर्षं पृष्ठं च वालधिः ॥ ११ ॥

तलानि चिबुकं चैव ह्रस्वानि च भवन्ति हि।
समदौ च कटौ कुक्षिः कर्णौ च तनवो भृशम् ॥ १२ ॥

अङ्गुली हनुकेशं च वक्षः कुब्जं प्रदृश्यते।
यस्य श्यामो भवेद्वर्णः कृष्णे स्थूले च लोचने ॥ १३ ॥

आकार ईदृशः प्रोक्तो वनचारस्तु कथ्यते।
एकाकी न प्रयात्येष गोप्रचारं[1] च गच्छति ॥ १४ ॥

यूथानुवर्ती भीरुश्च चलंचित्तो[2] वने मृगः।
धृतस्य कर्मकाले तु भवेदुत्तानवेदिता ॥ १५ ॥

दुःशीलता च चापल्यं लक्ष्मैतन्मृगदन्तिनः।
उरो मुखं तथा कर्णौ विशालानि भवन्ति हि ॥ १६ ॥

गात्रापरं शिरो दन्ताः सगदे(दं) वर्मकन्धरम्[3]।
केशा वालाश्च रोमाणिं स्थूलानि च भवन्ति हि ॥ १७ ॥

वालधिः पृष्ठवंशश्च चिबुकं हस्त एव च।
भवन्त्येतानि दीर्घाणि लम्बते मेढ्रकोशकम् ॥ १८ ॥

भेककुक्षिसमाकुक्षि लो(लों)चने कपिले शुभे।
कृष्णमेघनिभो वर्णः सर्वाङ्गे[5] परिपीनता ॥ १९ ॥

जाड्यं च बलिबाहुल्यमाहुर्मन्दस्य लक्षणम्।
वने तु वसतस्तस्य शशादेर्न भयं भवेत् ॥ २२० ॥

---

१ A र इव। २ D बलिचित्ता। ३ D च। ४ लच। ५ A श्च। ६ D वर्ण। ७ D क्ष A क्षो।

न रुष्यति भवत्येको निद्रालुः सततं भवेत्।
शिक्षाकाले धृतस्यैतल्लक्षणं परिदृश्यते ॥ २१ ॥

गम्भीरं वेदनं तस्य कर्म शीघ्रं न शिक्षति।
शिक्षितं विस्मरत्याशु मत्तः स्मरविशिक्षितः ॥ २२ ॥

मन्दकोपो गतौ स्तब्धो(ब्धो)मन्दो मातङ्ग ईदृशः।
गात्रापरं करः पुच्छं न स्थूलं न कृशं समम् ॥ २३ ॥

विशालमुन्नतं वक्षो धनुराकारवंशकः।
कुम्भौ च ना(वा)तकुम्भश्च कटौ चापि प्रवेश(ष्ट)कौ ॥ २४ ॥

स्थूल(ला)दन्ता भवन्तीह विपुलं श्रवणासनम्।
वराहजघनश्चैव छागकुक्षिर्मनोहरः ॥ २५ ॥

समस्निग्धा नखा दन्ता लोचने मधुपिङ्गले।
गौरवर्णोऽत्युदग्रश्च कृष्णबिन्दुविराजितः ॥ २६ ॥

आताम्रं तालुजिह्वोष्ठमेतद्भद्रस्य लक्षणम्।
वने यूथस्य पुरतो यात्याहारविहारयोः ॥ २७ ॥

मेघभेरीस्वनाद्भीतिं नैति हृष्यत्यनाकुलः।
समानीतो वनात्कर्मकौले सो(ऽस्या)न्वर्थवेदना ॥ २८ ॥

आशुग्राही सुशीलश्च न विस्मरति शिक्षितम्।
कर्मशूरः स्वयं शूरो रूपलक्षणसंयुतः ॥ २९ ॥

ईदृशो भद्रजातिः स्यात्कुञ्जरो विजयावहः।
मिश्रस्तूभयसंयोगे सङ्कीर्णस्त्रिगुणो मतः ॥ २३० ॥

भद्रमन्दो भद्रमृगो मन्दभद्रस्तथापरः।
मन्दमृगो मृगभद्रो मृगमन्दश्च मिश्रकः ॥ ३१ ॥

भद्रमन्दमृगश्चैको भद्रो वा मृगमन्दयोः।
मन्दभद्रमृगश्चान्यो मन्दो वा मृगभद्रयोः ॥ ३२ ॥

---

१ A शि। २ D तिः। ३ D ब्धा। ४ D वा। ५ A भवः। ६ A F द्रु। ७ D लस्तत्त्वार्थवेदने। ८ F त्व। ९ A गो।

गुणाधिक्येन नामैषां वर्णाद्वा मुखलक्षणात् ।
मिश्रसङ्कीर्णजातीनां नामलक्षणमीदृशम् ॥ ३३ ॥

मिश्राणां मिश्रचारस्तु सङ्कीर्णानां तथाह्वयः ।
शुद्धं(द्ध) सङ्कीर्णमिश्राणां जातिभेद इतीरितः ॥ ३४ ॥

एतेषामुत्तमो भद्रो मन्दो मध्यमलक्षणः ।
मृगः कनिष्ठो मिश्राणां सङ्कीर्णानामयं क्रमः ॥ ३५ ॥

श्लेष्मपित्तानिला ख्याता धातूनामपि जातिवत् ।
शुद्धा मिश्राश्च सङ्कीर्णा भेदा ज्ञेया विचक्षणैः ॥ ३६ ॥

सात्विकी कफतः पित्ताद्राजसी तामसी चलात् ।
प्रकृतिर्मिश्रसङ्कीर्णा विज्ञेया पूर्ववद्बुधैः ॥ ३७ ॥

मेधावी स्निग्धवर्णश्च दीप्ताग्निर्मितभोजनः ।
अन्वर्थवेदी दीर्घायुः कामुकः सात्विको गजः ॥ ३८ ॥

वेगवान् बहुभुक् शूरः प्रज्ञावाँश्चलमानसः ।
उत्तानवेदी दुष्टश्च राजसोऽयमनेकपः ॥ ३९ ॥

क्लेशेन कर्म गृह्णाति गृहीतं विस्मरत्यपि ।
प्रत्यर्थवेदी निद्रालुस्तामसो द्विरदः स्मृतः ॥ २४० ॥

बल्लोच्चटा विदारी च गोक्षुरः शाल्मली वरी ।
वाजिगन्धा तु गोक्षीरो (गाक्षीरी) गोजिह्वा भूमिशर्करा ॥ ४१ ॥

हिंस्रा च कुटजं धात्री छिन्ना माषाश्च चूर्णिताः ।
क्षीरेण सहितः पिण्डो गजानां बृंहणो महत् ॥ ४२ ॥

बलागोक्षुरकुष्माण्डमाषधात्रीशतावरी ।
उच्चटाकुटजां (जा) चूर्णं सम(भ)ये पयसान्वितः ( तम् ) ॥ ४३ ॥

पुरुषांकोल्लहिंस्राश्च लक्ष्मणा सिन्धुवल्लिका ।
चित्रकः सुरसा शिग्रुः काश्मीरी गिरिकर्णिका ॥ ४४ ॥

---

१ A मिव । २ D यः । ३ D बालोच्चदा A बलोच्छदा । ४ A हिस्ता । ५ D णे । ६ D उक्काट कुंजरं चूर्णं समये F उच्चटाकुटलां । ७ D पुरुषान् कोलहिंस्रांश्च । ८ A कं ।

भूशर्कराऽग्निमन्थः शफ(म्ब)री च शतावरी ।
पूतिकः कर्णिकारश्च व्यस्तारान्तै(रतै)लमम्बुना ॥ ४५ ॥

भल्लातमूलमूर्वा च कदली च महा[1]गुणः(हा) ।
केतकी च कुमारी च विदारी रक्तसौरिका ॥ ४६ ॥

एतैः समैः कृतश्चूर्णो[2] दधिक्षीरघृतान्वितः ।
दत्तः प्रतिभये[3] पिण्डो गजानां मुखवर्धनः ॥ ४७ ॥

कृष्णा घोला(ण्टा)वर्ता(बला)गुञ्जा सुवहा गोक्षुरः सहा[4] ।
शताव्हा मु[5]शली वेलु(लुं)प्रती(ची)वलविदारिका ॥ ४८ ॥

भूशर्करा शा[6]ल्मली च श्लक्ष्णाश्चूर्णीकृताः समाः ।
दध्ना पिण्डीकृता दत्ताः करीणां कटवर्धनः(नाः) ॥ ४९ ॥

एलाप्रियङ्गुकुटजहरितालं मनःशिला ।
त्रिमैतत्कु(यामा कु)ष्णधान्या(ना)श्च रामठं सर्षकञ्चुकः ॥ ४५० ॥

आखुविद्वेषि(ष्य)हिंस्राश्च मुस्ताचित्रकसैन्धवाः ।
वी[7]ना(रा) रसोनो धत्तूरस्त्रिवृत्ता(ता) च विचूर्णिता ॥ ५१ ॥

एतैर्वस्तै(र्तिं)स्तथा बस्तिः प्रलेपश्च कटे कृतः ।
प्रयुक्तोऽयं यथायोगं करीणां कटशोधकः ॥ ५२ ॥

पारापतशकृद्भिङ्गुवार्ति[8]नी[9] (र्तिंवा)परिवर्तयेत् ।
यवमध्यप्रमाणा च मुहूर्तस्थितिमर्हति ॥ ५३ ॥

चित्रकश्च तथा दूर्वा घो[10]ण्टामूलमथापि वा ।
चूतश्च तैः कृतश्चूर्णो भेदनो मधुतैलयुक् ॥ ५४ ॥

गुडस्तैलं पु(सु)रा शू(शु)ण्ठी कृष्णामधुव(क)संयुतम् ।
षडङ्गमेतद्दातव्यं मदभे[11]दनवर्धनम् ॥ ५५ ॥

अर्कशि[12]ग्रुरसोनाश्च कदम्बसमु[13]दायकः ।
पद्माट(क्ष)सुरसाह्वा(ह्वा)श्च गुडूची च कर[14]ञ्जकः ॥ ५६ ॥

---

१ D सुखावहा F सहागुवः । २ D र्णैः । ३ A र्यं । ४ D ती । ५ F दा । ६ A ल्ल । ७ A श । ८ A F कः । ९ A वा । १० A र्वांतं... । ११ D दवि । १२ A ग्र । १३ A वस्तु... । १४ D कम् ।

चम्पकं च समैरेतैश्चूर्णितैर्दधिमिश्रितैः ।
पिण्डोऽयं मदवृद्धौ स्यादिक्षुक्षीरघृतानि च ॥ ५७ ॥

केतकीशिग्रुसुरसावेल्लतू(न्त)रमुशीरकम् ।
सिद्धका(को)यूषि(थि)का रम्भा कबन्धो मुस्तकं च तैः ॥ ५८ ॥

चूर्णितैश्च समैः श्लक्ष्णैर्मधुतैलसमन्वितैः ।
दत्तैः प्रवर्तते गन्धः सिन्धुराणां मदाम्भसि ॥ ५९ ॥

पारिजातकपुष्पाणि किंशुकं किणिहीं(हीं)गुडः ।
हरीतकी हस्तिकर्णी मधुना मधु(द)शौक्ल्यकृत् ॥ ४६० ॥

शिलाजतुंज(च) तक्रेण शालिपिष्टमजापयः ।
यशः(यासः) काश्ची च शौक्ल्यस्य करणं करिणां मदे ॥ ६१ ॥

अञ्जनस्य तरोर्मूलं नारीरसपरिप्लुतम् ।
कुटजेन समायुक्तं नीलवर्णकरं मदे ॥ ६२ ॥

तालकद्विगुणा दर्वी रक्तवर्णकरी मदे ।
हरिद्रा मधुसंयुक्ता पीतवर्णा महामदे ॥ ६३ ॥

शयनावसरे दत्तां ग्रीसमध्ये मधुप्लुता ।
श्यामं वर्णं करोत्याशु करिणां मदवारिणः ॥ ६४ ॥

धात्रीफलानि नीली च मधुकं कृष्णवर्णव(कृ)त् ।
दूर्वा च मधुना दत्ता हरितं वर्णमावहेत् ॥ ६५ ॥

बृहतीफलमूलानि शुण्ठी सैन्धवसंयुता ।
मूत्रपञ्चकृते (तो) कोशे लेपोऽयं कोपदीपनः ॥ ६६ ॥

कोष्टे(कुष्ठं)वा दारुरजनी तगरं तैलसंयुतम् ।
पायुलेपप्रयोगेण करिणां कोपवर्धनम् ॥ ६७ ॥

पिप्पली मरिचं शुण्ठी मर्कटीफलमेव च ।
तैलेन कटलेपोऽयं करिणः कोपयेद्भृशम् ॥ ६८ ॥

---

१ A शा । २ D न्धा । ३ A न्धू । ४ D हं । ५ D सर्वरोगहृत् । ६ A त्तुत F तुत । ७ D क्त्य । ८ D द । ९ A त्वा । १० D F कासं । ११ A ती । १२ A रक्तम् । १३ D नः ।

राजिका पीलुमूलं च फणिजं पिप्पली कणा।
नागरं बीजपूरेण पिण्डोऽयं कोपदीपनः॥ ६९॥

कोपदीपनयोगास्तु कथिता ये कटादिषु।
पूर्वेद्युस्ते विधातव्या धावेच्चाहवकर्मणि॥ ४७०॥

बृंहणैः बृंह(हि)तानां च सप्त शोभा भवन्ति हि।
वक्ष्यामि लक्षणं तासां क्रमशो नामसंयुतम्॥ ७१॥

करं कर्णौ च पुच्छं च तुच्छं चालयति द्विपः।
सृक्कणी तालु जिह्वा च स्तनयुग्मं विलोचने॥ ७२॥

ईषद्व्यक्तिं समायाति सोज्झनं (सौजन्यं) वर्धते क्रमात्।
सुच्छाया रक्तवृद्धिश्च सञ्जातरुधिरा मता॥ ७३॥

प्रतिमाने च कण्ठे च मणिबन्धे च वक्षसि।
कक्षयोर्मांसवृद्धिश्चेत्प्रतिच्छन्नेति सा मता॥ ७४॥

सर्वसन्धिषु गात्रेषु वदने पक्षयोर्द्वयोः।
पीनता वलिनाशश्च यत्रासौ पक्षलेपिनी॥ ७५॥

कक्षयोः कन्द(न्ध)रोद्देशे दन्तस्योभयपार्श्वयोः।
उच्छूनता भवेद्यत्र धातुसाम्यं सकामता॥ ७६॥

वरिष्ठा द्यौ(द्यु)दियं शोभा चतुर्थी करिणां सदा।
युद्धेऽध्वनि विनोदे च समकक्षा प्रशस्यते॥ ७७॥

वंशा(शो)ऽस्य सम्म(म)तां याति त्रिकं पक्षो यथा(दा)गजे।
निद्रालुर्मन्दगामी च दीर्घोच्छ्वासस्तथालसः॥ ७८॥

पञ्चमा(मी) संमकल्पेयं शोभा शोभाकरी भृशम्।
गा(ग)तौ च ल(ला)ति मांसानि षष्ठी सौ व्यतिकीर्णिका॥ ७९॥

निमग्नः पृष्ठवंश(शो)स्य कदल्युत्तानपत्रवत्।
यत्र सा द्रोणिका नाम शोभेयं सप्तमी मता॥ ४८०॥

---

१ A य। २ D साद्य। ३ D ज। ४ D च्छि। ५ A F ना। ६ D कर्म। ७ D दि त्रयं।
८ These two lines are omitted in D। ९A सकल्पेयं। १०D गतिं। ११Aस्या।१२D कर्णिका।

ततः सञ्जातशोभस्य मन्दा(दा)वस्थां[1]तु(स्तु) दन्तिनः।
अतः(अन्तः)पञ्च मैहे(दे) सप्त द्वादशेतित्व(स)मीरिताः[3] ॥ ८१ ॥

पृष्ठं मेढ्रं समं तु स्यादीषद्रक्ते च लोचने।
कान्तिमान् करिणीलुब्धो नभश्च परिजिघ्रति ॥ ८२ ॥

गजवीथ्यां पदं धत्ते द्विपेभ्यः परिकुप्यति।
दर्शनीयो गजाघाती दन्ताभ्यां हन्ति भूरुहान् ॥ ८३ ॥

पांसुक्रीडनलोलः[5] स्यात्पङ्कालेपनतत्परः।
प्रथमान्त(न्तां)मदावस्थां प्राप्तः सञ्चित उच्यते ॥ ८४ ॥

स्वल्पनिद्रो रुषायुक्तो जृम्भते यस्तु सन्ततम्।
बहुक्रुद्धो[6] रक्तनेत्रो कोपावस्था द्वितीयकी ॥ ८५ ॥

कुरुते बृंहितं शश्वदन्नं च परिवर्तयेत्।
आलानं नाशु भजते शय्यां न प्रतिपद्यते ॥ ८६ ॥

वृक्षशाखां समालम्ब्य प्रसारयति कन्धराम्।
गमने पाटवं धत्ते तृतीये प्रसवे गजः ॥ ८७ ॥

उच्छ्वनः कटदेशस्तु मुखं च परिशोभितम्।
ऊर्ष(र्षा)मूलस्य योगेन स्रोतसी[8] विवृते तथा ॥ ८८ ॥

कटं[9] चुम्बति हस्तेन तिर्यग्वीक्षणतत्परः[10]।
अपसर्पति पश्चाच्च क्रोधनः सृक्कलेहनः ॥ ८९ ॥

अत्यासन्नमदो हृष्टो वारणः स्यात्प्रभेदने।
दृश्यते तिलकप्रायं दानं यस्य कटद्वये ॥ ४९० ॥

वाग्विभे(ग्विभा)ति यतस्तस्मै कुप्येत्तिलकितं हि तत्।
वितस्तिमात्रं वदने दानं गण्डस्थलान्तरे ॥ ९१ ॥

पुष्करे सीकरस्रावी निर्भयोऽर्धकपोलिके[11]।
गच्छन्नीषन्मदस्रावी दानतः प्रतिभूयसा ॥ ९२ ॥

---

१ A स्तातु। २ A व। ३ D द्वगी। ४ D भः। ५ D हा। ६ A द्धो त्वसौ सेयं F द्धे कसों। ७ A आर्षमूलस्य मलं च F ऊर्ष...मूलं च। ८ A सा। ९ D टौ। १० D र्गी। ११ A को।

दानप्रवाहौ[1] मिलितौ नेत्रयोर्दूषितामया(याः)।
मेघवद्गर्जितं यस्य पूर्वलक्षणलक्षितः ॥ ९३ ॥

अधोऽनु[2]बन्धिनी बाह्या तृतीया परिकीर्तिता।
बहुगन्धिमद[3]स्रावी समदक्षा(कक्षो) घनश्रिता(या)॥ ९४ ॥

हर्षकोऽप्यधिको यत्र विना(नो)दायोधने क्षमः।
सर्वसत्वजिघांसुः स्यादारूढस्य वशानुगः ॥ ९५ ॥

राजवाँ[4]ह्यो गजो यत्र सा भवेद्गन्धचाँरिणी।
सदा कलुषितस्वान्तो ग्रासद्वेषी[5] जिघांसनः ॥ ९६ ॥

कर्णयोस्तनयोरक्ष्णोः कटयोस्तालुपुष्करे।
रोमहर्षेषु कोशेषु स्रवत्यँष्टासु सर्वदा ॥ ९७ ॥

आरोहस्रवसो(त्स्रवसी) यस्यामवस्था क्रोधनी तु सा।
रात्रौ भ्राम्यति संरब्धः स्तम्भं नाश्रयते रुषा ॥ ९८ ॥

निद्रां बुभुक्षां नो वेत्ति नेत्रकर्णावधिं श्रयेत्।
अधो मर्द(:)प्रवाहेन(ण) भवेत्सो वाँलितापरः ॥ ९९ ॥

अतिप्रवाहवापाभ्यां निर्मा[10]सश्चास्थिभूषणः।
प्रणिधित्रितयो(या)लम्बी[11] प्रतिबिम्बं हिनास्ति च ॥ ५०० ॥

एवं निरङ्कुशो यस्यामवस्था सातिवर्तिनी।
न पश्यति न जानाति न शृणोति न तिष्ठति ॥ १ ॥

सम्भिन्नमदमर्यादो यस्यां क्षौण्यौ(क्षोण्यु)[12]गन्धवान्।
षष्ठ्यां निवर्तयेन्नागं सप्तमीं नैव लङ्घयेत् ॥ २ ॥

अन्त्यँधारा(तु)[13]क्षयादेही क्षिप्रमेव हि नश्यति।
एवं मदयुतान्नागान् विनोदाय प्रकल्पयेत् ॥ ३ ॥

गजाध्यक्षं समाहूय दीपनायादिशेन्नृपः।
वीरसूडाभिधं वाद्यं मृदङ्गमि[14]वहर्षणम् ॥ ४ ॥

---

१ A F दौ। २ D तु। ३ A द्र। ४ A F ह्यां। ५ D वा। ६ A F षा। ७ A त्पृष्ठसु। ८ D न्द। ९ A व। १० A र्मा। ११ D म्बाः। १२ A न्य। १३ D क्षपदा। १४ A F ध्वनि।

ढक्का(क्क)या जयघण्टाभिर्वादयेति च निर्दिशेत् ।
रजन्याः प्रथमे यामे वीरसूडस्य वाह(द)ने ॥ ५ ॥

समन्ताद्व्रजमावेष्ट्य तिष्ठेयुः परिचारकाः ।
सिंहनादांश्च ते कुर्युर्भटानां रोमहर्षणान् ॥ ६ ॥

तेषां रवान्समाकर्ण्य समाहूय महीपतिः ।
पट्टानि पट्टिकाश्चैव घनं श्वेतं दुकूलकम् ॥ ७ ॥

शृङ्गारार्थं नृपो दद्यात्तेषां तेषां पृथक् पृथक् ।
मण्डनार्थं मदेभानां तैलं सिन्दूरमेव च ॥ ८ ॥

कौशुम्भं वीरकक्षार्थं कोपायोद्दीपपिण्डकान् ।
निद्रारम्भे च निद्रार्थं निद्रान्ते मद(भद्र)दन्तिनाम् ॥ ९ ॥

मृगाणां शयनान्ते च निद्रार्थे मद(न्द)दन्तिनाम् ।
उद्दीपनं ततः पिण्डान् प्रागुपात्तान् पृथक् पृथक् ॥ ५१० ॥

प्रकृत्याद्यनुरोधेन महामात्रैः प्रदापयेत् ।
स्थापयेदातपे मन्दान् भद्रान्छायातपे गजान् ॥ ११ ॥

मृगांश्छायासु बध्नीयान्महामात्रो विचक्षणैः ।
विनोददिवसे तेषामन्नपानं निवारयेत् ॥ १२ ॥

तैलेन जघनं लेप्यं सिन्दूरेण च मस्तकम् ।
वातकुम्भस्य मध्यं(ध्ये)तु कुर्यात्तिलकमुत्तमम् ॥ १३ ॥

अलङ्कृतांस्तथा नागान् वाद्यालीभ्यास(श)देशतः ।
आलानेषु च बध्नीयाद् दूरतस्तु परस्परम् ॥ १४ ॥

शतधन्वान्तरायामां विस्तारे षष्टिसम्मितां ।
शङ्कुगर्तद्वयद्धीनां कण्टकादिविवर्जिताम् ॥ १५ ॥

अपांसुलां समां श्लक्ष्णां पूर्वभागोन्नतां मनाक् ।
भुवं कुम्भावृतां कुर्याद्वैघ्यें द्वारद्वयाङ्कितां ॥ १६ ॥

---

१ A दा। २ D टा आरोमहर्षणाः। ३ D वं स। ४ D यद्दन्ति। ५ A न। ६ A दद्यात्। ७ D स्मी। ८ A वें F थें। ९ A त्र। १० A णाः। ११ D क्विार। १२ D च। १३ A ल्प। १४ AF याद्। १५ A म्म। १६ A ता। १७ A र्ध्यं।

तोरणौ द्वौ प्रकुर्वीत द्वारयोः सुमनोहरौ ।
प्राङ्मुखोदङ्मुखो(खीं) वापि वाह्यालीं परिकल्पयेत् ॥ १७ ॥

पूर्वाभिमुखवाह्यालीदक्षिणं[2] मध्यभागतः ।
उपान्ते वृत्तिसंश्लिष्टं कुर्यादालोक्यमन्दिरम् ॥ १८ ॥

उच्चाधिष्ठानमूर्द्धस्थं[3] परिखाँपरिवेष्टितम् ।
विशालं च सुरम्यं च पृष्टभित्तिसमन्वितम् ॥ १९ ॥

सुधाधवलितैस्तम्भैः काञ्चनैः परिशोभितम् ।
नानावर्णवितानाढ्यं काचकुट्टिमकल्पितम् ॥ ५२० ॥

परिखायां परिन्यस्तैः फलकैः कृतमार्गकम् ।
निःश्रेणीकल्पितारोहं वारणानां निवारणम् ॥ २१ ॥

गेहमन्यं प्रकुर्वीत परिखायास्तु बाह्यतः ।
ईषत्पश्चात्[4]प्रदेशे तु दक्षिणं भागमाश्रितम् ॥ २२ ॥

परिखावेष्टितं तुङ्गं चित्रभित्तिसमन्वितम् ।
सुरम्यं सुविशालं[5] च परमण्डलिकाश्रयम् ॥ २३ ॥

आलोकमन्दिरस्याग्रे लालवेदीं(जालवेदीं) प्रकल्पयेत् ।
निखातैरष्टभिः स्तम्भैः पार्श्वद्वयनिवेशितैः ॥ २४ ॥

स्थूलदीर्घार्गलद्वन्द्वां[9] दृढकीलकधारिताम्[10] ।
द्विपक्षःस्थलोत्सेधां पार्श्वयोर्गत(र्त)संयुताम् ॥ २५ ॥

अन्यामीदृग्विधां कुर्याद्धावनान्तोष(प)योगिना(नी)म्[11] ।
पूर्वद्वारसमीपे तामुत्तरां दिशमाश्रिताम् ॥ २६ ॥

एवं लक्षणसंयुक्तां वाह्यालीं परिकल्प्य च ।
महत्तरेण विज्ञप्तः कृतदेवार्चनक्रियः ॥ २७ ॥

आघोष्य[12] डिण्डिमं राजा पुरवीथ्यां चतुष्पथे ।
तुन्दिलैर्गर्भिणी[13](णी) वृन्दैर्बालैः पादाङ्कुण्ठि[14]तैः ॥ २८ ॥

---

१ A F ल्या । २ A F णा । ३ A र्धभागस्थं । ४ A घा । ५ D तैः । ६ D त्पार्श्वात् F पाश्चात्य । ७ D लाक्षं । ८ D ष्टीं F द्वंद्वाढां । ९A न्दां । १०D धारितम् । ११ D वाचना । १२D स्फाल्य । १३ D तं । १४A कु ठि ।

न यातव्यं न यातव्यं[1] कौतुकाद्दर्शनोत्सुकैः।
विषमा मत्तमातङ्गा मारयन्ति कृतान्तवत् ॥ २९ ॥

अन्यां च घोषणां कुर्याद्यः कश्चित्पादवेगवान्।
धनलुब्धो द्विपस्याग्रे स धावतु स धावतु ॥ ५३० ॥

ततो भुक्त्युत्तरं[2] राजा प्रसाधनपरो भवेत्।
कान्तानां च कुमाराणां भूषार्थं वस्त्रभूषणम् ॥ ३१ ॥

प्रस्थापयेद्यथायोग्यं सामन्तामात्य[3]मन्त्रिणाम्।
आर्द्धाय्य करिणो वाहान् स्वयं सम्भृतमण्डनः ॥ ३२ ॥

अलङ्कृतास्तथा राज्ञीस्तथान्या भोगयोषितः।
आरोहयेत्[4]समायाताः करिणीः स्वर्णपुष्पकाः ॥ ३३ ॥

मुक्ताजालसमाकीर्णां पुष्पिकाकिङ्किणीयुताम्।
पार्श्वघण्टाद्वयोपेतां सिन्दूरारुणमस्तकाम् ॥ ३४ ॥

चामरालङ्कृतश्रोत्रां वृत्तनक्षत्रमालिकाम्।
ततः स्वयं समारोहेत् करिणीं मृदुचारिणीम् ॥ ३५ ॥

पश्चिमाशोन्मुखे सूर्ये किञ्चिद्विगलितातपे।
शनैः शनैर्व्रजन् गच्छेदिन्द्रभागे[5] महीपतिः ॥ ३६ ॥

ततः सम्भाष्य वाद्यालीमुपवेश्य करेणुकाः।
उत्तारयेत्ततः कान्ताः पुरस्ताच्च प्रवेशयेत् ॥ ३७ ॥

कुमारमण्डलाधीशसामन्तामात्यमान्यकान्।
सेवकान्विविधानन्यानालोकेन प्रवेशयेत् ॥ ३८ ॥

ततः करेणोरुत्तीर्णः सुखासनमधिष्ठितः।
विशेदवहितो राजा परिघासेतुमार्गतः ॥ ३९ ॥

निःश्रेण्याथ समारुह्य लीलयालोकमन्दिरम्।
सिंहासनमथारोहेत्कान्ताभिः परिवारितः ॥ ५४० ॥

---

१ A व्यां। २ A F क्तो। ३ A मान्य F न्मान्य। ४ D हूय। ५ D ङ्गीत। ६ A यन्स। ७ F काल A क्तामाला ८ A F गो। ९ A लाल।

ततः प्रवेशितान्सर्वान्यथार्हमुपवेशयेत् ।
वीरैर्मुडध्वनिं श्रुत्वा प्रहर्षोत्फुल्लमानसः ॥ ५४१ ॥

गजाध्यक्षं समादिश्य परिकारान्समाह्वयेत् ।
प्रच्छादनपटच्छन्ना अन्तर्विहितमण्डनाः ॥ ४२ ॥

अहमहमिकाक्रान्ता विज्ञपेयुः पृथक् पृथक् ।
परिपृच्छेत्ततो राजा तेषां धावनकारणम् ॥ ४३ ॥

अ(आ)वां मत्सरिणो(णौ) देव वयं कनककाङ्क्षिणः ।
मया द्विपासनं रुद्धमहं परिभवान्वितः ॥ ४४ ॥

प्रतिज्ञातु(तुं) समारूढो जवतोऽहं नराधिप ।
इति विज्ञाप्यमानस्तैर्यथायोग्यं समादिशेत् ॥ ४५ ॥

उत्तमो मध्यमो हीनस्त्रिविधः परिकारकः ।
एतेषां लक्षणं वक्ष्ये जवोत्कर्षात्पृथक् पृथक् ॥ ४६ ॥

प्रथमा द्विपभूमिः स्यात्मध्यमा नृपतेर्मही ।
तृतीया परिकारस्य भूमिरेवं त्रिधा मता ॥ ४७ ॥

प्रथमायां द्वितीयायां हस्तं निष्कासयन् भुवि ।
तृतीयायां परित्यज्य यो धावति स तूत्तमः ॥ ४८ ॥

मध्यमस्य च नागस्य विधिना प्राक्तनेन यः ।
पुरो धावति सैं ज्ञेयो मध्यमः परिकारकः ॥ ४९ ॥

कनिष्ठस्य तु नागस्य प्रागुक्तविधिना तु यः ।
अग्रे धावति सैं ज्ञेयः कनिष्ठः परिकारकः ॥ ५५० ॥

अग्रिमस्य पदाङ्कस्य पार्श्वात्यैः पुरतो भवेत् ।
ज्ञेयः स उत्तमजवो वाजिनामपि घातकः ॥ ५१ ॥

दशधन्वा(न्व)न्तरस्थे(स्थं) वा पटी(रि)कारं जवाधिकम् ।
पञ्चाशदन्तरे हन्ति दन्त्यसावुत्तमो जवे ॥ ५२ ॥

---

१ A वार। २ D लोचनः। ३ A अहमहाकान्ता। ४ D च्छयत। ५ A द्वीपा D द्विप्या। ६ D ज्ञातुमसौ। ७ A तीयां। ८ D उ। ९ D क्ते। १० A वि। ११ A वि। १२ D श्वान्त्यः। १३ A तु।

पौरस्त्यस्य[1] पदाङ्कस्य[2] पार्श्वात्यो[3] मध्यमो यदि ।
जवेन मध्यमो ज्ञेयो दन्ती गतिविशारदैः ॥ ५३ ॥

अष्टधन्वा(न्व)न्तरगतमशीत्या[4] परिकारकम् ।
यो हन्ति दन्ती स ज्ञेयो मध्यमो जववेदिभिः ॥ ५४ ॥

पूर्वस्य व(वा)रणाङ्कस्य भवेदर्थात्कु(वाक्तु)पश्चिमः ।
स कनिष्ठजवो ज्ञेयो वारणो वारणावरः ॥ ५५ ॥

पञ्चधन्वान्तरगतं शतधन्वा(न्व)न्तरावधि[5] ।
परिकारं निहन्यादयः सदा हीनजवो गजः ॥ ५६ ॥

भूमित्रये भूद्वये च प्रथमार्यां तथा भुवि ।
वेगयुक्ता गजाः सत्वश्रेष्ठमध्याधमाः क्रमात् ॥ ५७ ॥

आह्वाय स्थापयेद्वाह्यं (ह्वे) तीव्रकोपपराङ्मुखम् ।
पार्श्वात्यतोरणाभ्यर्णे मद(न्द)कोपं तु सम्मुखम् ॥ ५८ ॥

यावन्ती(तीं)भुवमाघातो या सङ्ख्या हस्तकर्षणो[10](णी) ।
तथाधिक्याज्जयोऽन्यस्य हीने हीनः समे समः ॥ ५९ ॥

गजेन[11] मत्सरी[12] धावन् प्रविश्य जघनान्तिकम् ।
तर्जयेन्निजहस्तेन[13] युध्यमानः प्रधावति ॥ ५६० ॥

भूमिद्वये तृतीयायां त्यक्त्वा गच्छति यो द्विपम्[14] ।
स जयी परिकारः स्याद्वारणस्तु पराजयी[15] ॥ ६१ ॥

तुम्बिकां[16] वा परित्यज्य वीथिं हित्वाऽन्यतो[17] व्रजेत् ।
सर्पवद्वापि यैः[18] सर्पधृ(र्पेद्धृ)तो[19] वा सम्पराजितः ॥ ६२ ॥

परार्थं धावमानस्तु जयी चेद्धनमाप्नुयात् ।
पराजये धनं नास्ति कुञ्जरेण हतो हतः ॥ ६३ ॥

---

१ A स्त । २ D पार्श्वान्त्यो । ३ D वारणो वारणोत्तमः । ४ These four lines are omitted in D । ५ A न्वा । ६ D विपः । ७ A न्या । ८ D न्तं । ९ D श्वान्त्य । १० D र्षणा । ११ D र्जने । १२ D रोयावत् । १३ F द्धस्ति । १४ D पः । १५ D यम् । १६ D कुंचितांकां वा । १७ A F न्यतो । १८ A F याः । १९ D द्वृत्तो । २० A द्भूत ।

जघने दन्तयोर्वापि कुर्याच्चूर्णेन लाञ्छनम् ।
मार्ष्टि वा तत्कृते चान्यः[1] प्रतिज्ञाधावनत्विदम् ॥ ६४ ॥

प्रतिज्ञापारगो यः स्याज्जयस्तस्य प्रकीर्तितः ।
प्रतिज्ञापगमे वापि मारणे वा गजो जयी ॥ ६५ ॥

नृपभूमौ लिखेद्रेखां विंशत्या कार्मुकैर्भुवि[2] ।
गजस्य धावतश्चान्तस्तिर्यग्यायी जयी भवेत्[3] ॥ ६६ ॥

लग्नश्च येन्निषेधार्थं[4] धावको विजयी भवेत् ।
तयोरन्यतरस्यापि मारणे वारणो[5] जयी[6] ॥ ६७ ॥

युगपद्धावतो पृष्ठे यस्य सीकरसङ्करः ।
जयं तस्य विजानीयात्तद्वधे हस्तिनो जयम् ॥ ६८ ॥

उत्तमो दन्तिनो भूमौ भूपभूमौ तु मध्यमः ।
कनिष्ठो निजभूमौ च स्थापनीयो यथाक्रमम् ॥ ६९ ॥

उत्तमो मध्यमं गच्छेन्मध्यमश्चाधमावधिम् ।
अधमो निजभूम्यन्तं धारयेयुर्गजं क्रमात् ॥ ५७० ॥

अनया परिपाटचैवं निजां भूमिं नयञ्जयी ।
एवं कर्तुं न शक्नोति हतेऽस्मिन् वारणो जयी ॥ ७१ ॥

बद्धहस्तो यदा चोरः पुरो धावति हस्तिनः ।
गतापराधो जीवेच्चद्धतः[10] पापात्प्रमुच्यते ॥ ७२ ॥

जवाधिकस्य नागस्य[11] वाजिनो धावनं पुरः ।
सीकराः सादिनः पृष्ठे निर्गतौ[12] सादिनो[13] जयः ॥ ७३ ॥

वलयं[14] दन्तिनो दन्ती(न्ते)[15] सादी क्षिपति दन्तिनः[16] ।
अन्यो हरति दण्डेन तत्राशक्तः पराजितः ॥ ७४ ॥

धावभेदाः समाख्यातास्तथा जयपराजयौ ।
इदानीं तु प्रवक्ष्यामि गजारोहणलक्षणम् ॥ ७५ ॥

---

१ A वान्यः । २ D के भु । ३ D नं श्रा A तश्चा । ४ A लग F गल । ५ A ल । ६ A धावको । ७ D णे । ८ A या । ९ D पद्व्यापनः पृष्ठो A वद्धा । १० D च अ F च्चेह । ११ A कान्त । १२ D ता । १३ D ध । १४ D चलनं । १५ F दिती । १६A भिः ।

निषादी त्रिविधो ज्ञेयो रेखायुक्तिबलैर्युतः।
अधमो मध्यमः श्रेष्ठः सर्वैस्तैरुत्तमोत्तमः ॥ ७६ ॥

गात्राभ्यामपराभ्यां च पार्श्वाभ्यामपि रज्जुभिः।
कर्णौ धृत्वा मुखे प्रोक्तं वृक्षादेरधिरोहणम् ॥ ७७ ॥

एतान्येवावरोहे स्युरापातः कर्णतो रैणम्(णे)।
एवं दशविधं प्रोक्तमवरोहणलक्षणम् ॥ ७८ ॥

प्रविश्यासनमुत्कृष्टं मध्यं मध्यसमासनम्।
पादाग्रेणावकृष्टं स्यादासनं त्रिविधं स्मृतम् ॥ ७९ ॥

मन्दादिजातौ युद्धे च प्रोक्तमुत्कृष्टमासनम्।
भद्रादिजातौ धावे च मध्यमासनमिष्यते ॥ ५८० ॥

अवाग्रे मृगजातौ तु शिरोविधृतितत्परे।
अवकृष्टासनं शस्तं मातङ्गानां यथाक्रमम् ॥ ८१ ॥

समं दृढं च संलग्नं जानुसन्धिसमाहितम्।
आसनत्रितयेऽप्येवं सौष्ठवं परिकल्पयेत् ॥ ८२ ॥

गजस्य प्रेरणार्थं यत् पुरस्तादासनं वपुः।
करोतु यन्ता प्रणिधेर्नो(धिर्नो)म्नासौ(सा)वनतो मतः ॥ ८३ ॥

अङ्कुशेन त्वथो(धो) वाऽपि घातार्थं कुरुते वपुः।
तिर्यग्वक्त्रं स विज्ञेयः पार्श्वावनतसंज्ञकः ॥ ८४ ॥

आकृष्टो(ष्य) पृष्ठतो नागमुत्तानं कुरुते वपुः।
यत्र यन्ता स प्रणिधिः पृष्ठावनतनामकः ॥ ८५ ॥

गजस्य भयनाशार्थं कोपोपशमनाय च।
सान्त्वनं क्रियते वाचा सौ भवेदुपलाघ(प)ना ॥ ८६ ॥

गजस्य शिक्षितं भावं क्रियया यत्प्रभाषते।
प्रज्ञापनाख्यः प्रणिधिः स ज्ञेयो गजशिक्षकैः ॥ ८७ ॥

---

१ A षाधी F धादी। २ D या। ३ A तरेण F तरेणं। ४ D तः। ५ A नासौवनगतो F नासौनतो। ६ A नारथवा F नरथावा। ७ A वकं। ८ D ष्टं। ९ A ग। १० D स्याद्भेद। ११ D तान्। १२ D वान्। १३ A यायां। १४ A रूया।

वाचाभिर्भर्त्सनं यत्स्याच्छिक्षार्थं सामजन्मनः ।
प्रणिधिस्तर्जनो नाम स प्रोक्तः सोमभूभुजा ॥ ८८ ॥

सृणिः प्रसार्यतेऽग्रे यैदातिक्षिप्तः स कथ्यते ।
पश्चादाकृष्यते यत्तु प्रतिक्षिप्तः स कथ्यते ॥ ८९ ॥

अङ्कुशो वर्त्यते यत्र पार्श्वयोरुभयोरपि ।
प्रहेतो नाम स ज्ञेय आरोहणविशारदैः ॥ ५९० ॥

उत्क्षिप्य भ्रामणं यत्तु सृणिः सूक्ष्मैः(क्ष्मः) स कथ्यते ।
सृणेरधोमुखीभाव आदीर्णः प्रणिधिर्भवेत् ॥ ९१ ॥

शिरस(:)स्पर्शमात्रं यदङ्कुशेन विधीयते ।
ईषत्पृँ(त्स्पृ)ष्टः स विज्ञेयो घातः प्रणिधिकोविदैः ॥ ९२ ॥

अर्धाङ्गुलं निमग्नश्चेदङ्कुशः करिमस्तके ।
प्रणिधानाभिधो घातो विधेयानां विधीयते ॥ ९३ ॥

द्वित्र्यङ्गुलप्रमाणस्तु घातः पीडितको मतः ।
द्वाभ्यां कराभ्यामुत्क्षिप्य स घातः क्षिप्तकः स्मृतः ॥ ९४ ॥

सृणिपार्श्वेन घातोऽयं भवेत्तारितकाभिधः ।
आराघातस्ततः प्रोक्तस्तोद इत्यभिधानतः ॥ ९५ ॥

आरक्षा द्वादश प्रोक्ता सृणिघाताश्रया गजे ।
कुम्भाग्रे बिन्दुसंज्ञे तु तदधश्च वितानकैः(कौ) ॥ ९६ ॥

वितानयोर्बहिः पार्श्वावग्राहावुदाहृतौ ।
वितानयोस्ततश्चान्तर्निदानौ समुदाहृतौ ॥ ९७ ॥

कर्णाग्रशिरसः सन्धिः स्रोतःसन्धिरुदाहृतः ।
तदग्रे कर्णसन्धिस्तु तत्पश्चात्कर्णमूलके ॥ ९८ ॥

पुरः सारयितुं नागमङ्कुशाग्रेण वेधनम् ।
कर्णमूले तदत्रोक्तं तोदनाम्ना विचक्षणैः ॥ ९९ ॥

---

१ D भिर्भं । २ A ग्रयं D ग्रन्था । ३ D र्तं । ४ A F ह्व । ५ D यन् । ६ D omits these two lines । ७ D त्स्व । ८ A धैः । ९ D लनि । १० D ग्र । ११ D धारघातस्ततप्रोक्तस्तोदयत्यभि १२ A राघातस्ततः प्रोक्तस्वेद इत्याश्रया । १३ A र्श्वावग्रा । १४ D पत । १५ A न्धी तु । १६ D यद नुत्रो । १७ D नुत्रं नाम ।

अवग्रहे विताने च पश्चात्सांधयितुं गजम् ।
अङ्कुशाग्रेण यो घातः सोऽवकर्ष इति स्मृतः ॥ ६०० ॥

तिर्यग्विवर्तनार्थं तु कर्णसन्धौ[1] सृणेर्हतिः ।
निवर्तन इति ख्यातो गजारोहणकोविदैः ॥ १ ॥

मुखोत्क्षेपाय यत्कुर्यान्निदानेऽङ्कुशघातनम् ।
उत्कर्णक[2] इति[3] ख्यातः सृणिकर्मविचक्षणैः ॥ २ ॥

पादयोः प्रणिधौ सह्यं[4] कलापस्य निपीडनम् ।
बहिर्मुखे च कर्तव्ये यन्तुः पादतले दृढे ॥ ३ ॥

दृढं पूरयितुं गाढमङ्गुष्ठाभ्यां प्रपीडयेत् ।
आकर्षणाय पाणिभ्यां स्थितं[5] य(तम)[6]वनिपीडनम् ॥ ४ ॥

वामतः प्रेरणे[7] घातो[8] दक्षिणेन पुनर्भवेत् ।
वामेनाङ्गुष्ठयोगेन दक्षिणेन निवर्तयेत् ॥ ५ ॥

अधोमुखं विधातुं तं कुञ्जरं[9] यदि वाञ्छति ।
निम्नाङ्गुष्ठौ विधातव्यौ ताभ्यामेव प्रपीडनम् ॥ ६ ॥

ऊर्ध्वाननं गजं गर्तुं यन्ता प्रेप्सुर्भवेद्यदि ।
उन्नताङ्गुष्ठयोगेन[10] प्रोन्नयेद् द्विरदाननम् ॥ ७ ॥

अङ्कुशोत्क्षेपमात्रेण[12] यो विद्यात्[13]दिङ्निर्तं[14] गजः ।
अन्त्यवेदी[15] स विज्ञेयः सङ्कीर्णोऽयं मतङ्गजः ॥ ८ ॥

अङ्कुशेन तु दण्डेन चर्मणि[16] स्मृत (स्पृष्ट) एव यः ।
द्विरदो वेत्ति यः कृत्यं मृग उत्तानवेदितः[17] ॥ ९ ॥

असृक्स्रावे चैं[18] हननं वेत्ति कृत्यं चिरेण यः ।
गम्भीरवेदी विज्ञेयो मन्दो नाम मतङ्गजः ॥ ६१० ॥

प्रहारस्यानुरूपेण यो जानाति वधावधम् ।
अन्वर्थवेदी विज्ञेयो भद्रजातिवरो गजः ॥ ११ ॥

---

१ D त्सन्ध । २ D णेइ । ३ D F विख्यातः । ४ A द्यः F न्यं । ५ A णंयप्रा । ६ DF स्थिय । ७ D F ध । ८ A णो । ९ F A तः । १० D रो । ११ A योचे । १२ D शक्षे । १३ D न्या । १४ A F तो । १५ A F अत्य । १६ A व । १७ A F ता । १८ F A हनान्येति कृत्या ।

धृतो धावति चात्यर्थं प्रेरितस्तु[1] न गच्छति ।
अत्यर्थवेदी विज्ञेयो व्यालो मिश्रगजो मतः ॥ १२ ॥

एकः प्रसारितः पादस्तदन्यो नतजानुकः ।
पार्श्वात्यमासनं ज्ञेयमेकजान्वानतं बुधैः[2] ॥ १३ ॥

प्रसारिताभ्यां पादाभ्यामातत[3]तोभयजानुकम् ।
उत्कुण्ड[4] (त्कट)उत्कटं ज्ञेयं पश्चिमं कुञ्जरासनम् ॥ १४ ॥

वंशस्योभयपार्श्वे यत्संहते नत[5]जानुनी[6] ।
मण्डूकासनमेतत्स्याद्[7]ऊर्ध्वसङ्ग्रामकर्मणि ॥ १५ ॥

एकमुत्कटकं पादमन्यच्च नतजानुकम् ।
यत्करोति नरः(गजः) पृष्ठे तत्कूर्मासनमुच्यते ॥ १६ ॥

यो धू(यद्धू)तविधूतो ( धुतौ ) शस्तमुभयानतजानुकम् ।
एकजानुनतं चैकमासनं धावकर्मणि ॥ १७ ॥

कूर्ममुत्कट[8]कं चैव लील[9]यानं(ने) प्रशस्यते ।
आसनं तूर्ध्वसंज्ञं यत् सङ्ग्रामे तद्विधीयते ॥ १८ ॥

सन्धि[10]धिं यावदाया[11]ति परिकारो गजस्य हि[12] ।
यन्त्रा तावन्न मोक्तव्या[13] सृणि[14]ः पार्ष्णिनिबन्धनैः(नी) ॥ १९ ॥

गज[15]ं धावयते यस्तु[16] परिकारस्य पृष्ठतः ।
दृष्ट्वा तल्लक्षया भाव्यं लक्षयेच्च जवक्षयम् ॥ ६२० ॥

आकुलं यदि[17]वेक्षेत निम्नपृष्ठो[18] भवेदपि ।
जडपादगतिर्वापि ज्ञेयो[19] नष्टगजस्तथा ॥ २१ ॥

नष्टस्य चेष्टितं ज्ञात्वा त्रिकान्दोलनकै[20]र्भृशम् ।
प्रेरयेद्वारणं यत्नो[21]द्यथासौ हन्यते द्रुतम् ॥ २२ ॥

पा[22]तितः परिकारश्चेत्करिणा करताडनैः ।
धारयेदङ्कुशाकर्षधारणं मारणोद्यतम् ॥ २३ ॥

---

१ D स्तनु वांछिती । २ D श्वान्त्य । । ३ D न । ४ A ण्डे मु । ५ A तु । ६ A F नि । ७ D र्ध्वं, ८ D omits these two lines । ९ A टित । १० D ल्यान । ११ A धिर्या । १२ A प, १३ D च । १४ D व्यः । १५ A णि पार्श्वेणि F श्वेणि । १६ D गजो A गजं धावयतो । १७ A न्तुः । १८ दिवीतेतं । १९ A F ष्ठे । २० A येद्गो जव स्तथा । २१ A कोभू । २२ A यत्नाद्य । २३ A F प ।

यदाङ्कुशं तिरस्कृत्य दन्ताभ्यां परिकारकम्।
मारयेत्सिन्धुरस्तस्य जयो यन्तुः पराजयः॥ २४॥

परिकारो नखाग्रे चेत्परितो न्यस्तविग्रहः।
उपायस्तत्र कर्तव्यो धावनीयो गजो भृशम्॥ २५॥

धावतो वारणेन्द्रस्य भवेद्यदि नखाहतिः।
तदा पराजयो न स्यादशक्यत्वान्निषादिनः॥ २६॥

परिवृत्य यथा नागः पादैर्मृद्नाति भूतलं।
पराजयस्तदा ज्ञेयो महामात्य(त्र)स्य निश्चितम्॥ २७॥

व्यालं क्रूराशय(यं)प्राप्तमवस्थामतिवर्तिनी (नीम्)।
परीक्षार्थं महीपालस्तं प्रयत्नात्समानयेत्॥ २८॥

वाचाङ्कुशेन पादाभ्यां दुर्निवारो मतङ्गजः।
आरूढकातिगो यस्मादनारूढंगजो मतः॥ २९॥

तस्मात्तादृग्विधं नागं मुखपट्टावृतेक्षणम्।
वस्त्रोदक(र)समाकीर्णो(र्ण)कर्णद्वितयरन्ध्रकम्॥ ६३०॥

आरोहैस्ते(हैस्तै) हयारूढैः सादिभिः परिवेष्टितम्।
कृतान्तमिव दुर्धर्षं वाह्यालीभूमिमानयेत्॥ ३१॥

वीरैः शूर(ड)रवं भूरि कारयेत्तस्य दूरतः।
द्वारप्रवेशनात् पूर्वमादिशेत् परिकारकम्॥ ३२॥

अपसार्य हयारोहानुत्सृजेत्कर्णकन्दुकौ।
मुखपट्टं समुत्क्षिप्य परिकारं प्रदर्शयेत्॥ ३३॥

उद्घाटितस्तब्धकर्णो निपीड्य चिबुकस्थलम्।
करं प्रसार्य पुरतः पुच्छमुन्नम्य कोपतः॥ ३४॥

संरम्भेण जवाधिक्यात्परिकारमनुद्रवेत्।
स्वमेनं इ( भ्रान्तभि)त्र सम्प्राप्य जिघांसं(सुः) परिकारकम्॥ ३५॥

---

१ D म। २ D ने। ३ A ति। ४ A F ख। ५ A F मुद्राति। ६ D लम्। ७ A ख्या। ८ A महीस्तं। ९ A धायते त। १० A णै द्वि तय। ११ A हास्ते D हास्तै F हस्ति। १२ D यन्। १३ D omits this line। १४ D चा। १५ A चटि। १६ D णौं। १७ A त।

अश्वसादिभिराक्रान्तस्त्यक्त्वा तं परिकारकम् ।
अश्वान्नभिद्रवन्नागः सर्वेषां भयकारकः ॥ ३६ ॥

निहत्याश्वं ततः सर्वान् प्रेक्षकान् समुपाद्रवन् ।
सम्प्राप्य च ततः पादैः कांश्चित्सम्परिपेषयेत् ॥ ३७ ॥

नखाघातैस्ततः कांश्चित्कांश्चिद्दन्ताविभेदनैः ।
शुण्डाप्रहारणैः कांश्चित्कांश्चित्पाषाणपातनैः ॥ ३८ ॥

वृक्षारूढांस्तथा कांश्चित्कांश्चिद्दन्ताभिहन(घात)नैः ।
गर्तप्रविष्टकान् कांश्चिच्छुण्डयोत्क्षिप्य मारयेत् ॥ ३९ ॥

संहारभैरवप्रख्यो मृत्युर्मातङ्गविग्रहः ।
रथानश्वान्नरानुष्ट्रान् मारयेदवितन्द्रितः ॥ ६४० ॥

एकतः करिणीयूथमन्यतो हयवृन्दकम् ।
नराणां युगलं तस्मिन् सङ्गतं नैव दृश्यते ॥ ४१ ॥

निर्जन्तुकं तदा जातं वाह्याली भूमिमण्डलम् ।
कथञ्चिन्नीयते कृच्छ्रात्सादिभिस्तोत्रपाणिभिः ॥ ४२ ॥

प्रवर्तयेत्ततो युद्धं गजानामनुरूपतः ।
कायेन घातनैः शक्त्या वयसा सत्त्वजातितः ॥ ४३ ॥

निष्टम्भवैत्क(वान्क)मठवेद्वारकश्चादिकोलवत् ।
कर्मबन्धैपरित्यक्तो भीमवच्च बलान्वितः ॥ ४४ ॥

चतुर्दशरदाघातैः परां परिणतिं गतः ।
युद्धकर्मप्रविष्टोऽयमजेयः प्रतिकुञ्जरैः ॥ ४५ ॥

तिर्यग्गुन्नतघातो यः परिलेखः स उच्यते ।
तल्लेखं तु विजानीयादूर्ध्वघातं तुं दण्डवत् ॥ ४६ ॥

स्वे(खे) दन्तद्वितयान्तस्थं वेदनं प्रतिदन्तिनः ।
कृत्वा यः(यत्)पीडनं तस्य स घातः कर्तरी मतः ॥ ४७ ॥

---

१ D तत्कान्त । २ D पेषणैः । ३ D दन्ताभिहननैस्तरोः । ४ D याकृष्य । ५ A भेरव । ६ D अश्वरत्नमुष्ट्रस्त्रं । ७ D था । ८ A तथा । ९ A त्या । १० A वा । ११ A द्वा । १२ A न्धा । १३ A घातै परि । १४ A तु । १५ A वदंनन्तिनः । १६ A घा । १७ A रि ।

दन्तवेष्टतले घातस्तलघातः स कथ्यते ।
अधस्ताद्दन्तघातः स्याच्चस्माच्च तलघातनम् ॥ ४८ ॥

वदनं तिर्यगुन्नम्य प्रहारस्त्वजघातनम् ।
प्र(अ)जाघाते तु वदनाच्चि(नन्ति)र्यगुन्नम्य घातयेत् ॥ ४९ ॥

प्रतिमाने प्रतिमानं रदनं दन्तवेष्टयोः ।
विधाय लोडनं यत्तु दन्तघातः स उच्यते ॥ ६५० ॥

शिरस्तिर्यक् समाकृष्य दन्तेनैकेन हन्ति यत् ।
प्रतीद्वी(तिद्वि)पप्रती(ति)मानं सूचीघातः स उच्यते ॥ ५१ ॥

दन्ताभ्यां दन्तघातेन शकलानि पतन्ति यत् ।
ताडकाघात इत्येष कथितो घातकोविदैः ॥ ५२ ॥
लीलावेलौं(लां) समारुह्य गात्राभ्यामतिकोपनः ।
हन्ति यत्सिंहवन्नागं स घातः सन्धितो मतः ॥ ५३ ॥

अपेत्य गात्रं सङ्कोच्य पश्चादुत्पत्य मेषवत् ।
हन्ति दन्ती प्रतीभं यत् स निर्घातः प्रकीर्तितः ॥ ५४ ॥

तथा कार्यो द्विपो यत्नाद्यथा न समपार्श्वकौ ।
भवेतां मत्तमातङ्गौ न स्यातां तिर्यग् यथासु(सु)खम् ॥ ५५ ।

गर्ज(जं)सम्मुखमान(ना)य्य स्वगजाल्लो(जंलो)ठयेत्ततः ।
पश्चात्पूं(त्सृ)ते प्रतिगजे स्वगजं वात्र(चाप) कर्षयेत् ॥ ५६ ॥

गजाध्यक्षैर्महामात्रैः परिकीर्यनिषादिनाम् ।
वादिनां वि(वी)रसूडस्य धावतां हयसादिनाम् ॥ ५७ ॥

वासांसि काञ्चनं भूरि स्वर्णभूषणकान्यपि ।
प(पा)रितोष(षि)कदानेन कुर्यान्मुदितमानसान् ॥ ५८ ॥

कदाचित्स्वयमारोहेद्विधेयभटलक्षणे(णम्) ।
विनोदार्थं महीपालो जननेत्रोत्सवाय च ॥ ५९ ॥

---

१ A घ। २ A लघातम्। ३ A र–जघा। ४ D वृथा। ५ A घाइ। ६ D षः। ७ D डौ। ८ D ऋसङ्कोचं। ९ D यौं। १० D पौ। ११ A स्य। १२ A या। १३ A ष। १४ D त। १५ D न्मु। १६ D क्षं। १७ D त्रै। १८ D कृत्वा। १९ D नं। २० A चि।

ततः समागतान् सर्वान्यथामानं विसर्ज्य च ।
करेणुकां समारुह्य प्रविशेद्राजमन्दिरम् ॥ ६६० ॥

उक्तोऽयं गजवाह्यालीविनोदः सोमभूभुजा ।

॥ इति गजवाह्यालीविनोदः ॥ ३ ॥

साम्प्रतं वाजिवाह्यालीविनोदः प्रतिपद्यते ॥ ६१ ॥

पूर्वं भूमिं परीक्षेत वाह्यालीहेतवे नृपः ।
अकर्दमामपाषाणां गर्तशङ्कुविवर्जिताम् ॥ ६२ ॥

न मृद्वीं नातिकठिनां प्रागुदीचीप्लवां शुभाम् ।
विशालां सुस(ष)मां श्लक्ष्णां वाह्यालीं कारयेन्नृपः ॥ ६३ ॥

शतधन्व(न्व)न्तरमितां चतुरस्रां समन्ततः ।
वृत्तिसंवेष्टितां द्वारद्वितयेन समन्विताम् ॥ ६४ ॥

उत्तरप्रान्तदेशे वा समीरस्यानुकूलतः ।
दक्षिणप्रान्तदेशे वा कुर्याद्दर्शनमण्डपम् ॥ ६५ ॥

रचयित्वा तु वाह्यालीं विज्ञप्तो गृहकारकैः ।
समाहूय हयाध्यक्षमश्वानयनमादिशेत् ॥ ६६ ॥

समानीतांस्ततो वाहानवलोक्य महीपतिः ।
तेषां जातीः परीक्षेत देशनामविभेदतः ॥ ६७ ॥

आवर्तवर्णसत्त्वानि छायागन्धगतिस्वराः ।
आकारश्चाष्टधाऽश्वानां श्रेष्ठमध्यकनीयसाम् ॥ ६८ ॥

काम्बोजयवनास्तेजी बाह्लीकाश्चार्तलास्तथा ।
तोख्खारकाः सकेकाणा एते सत्तोत्तमोत्तमाः ॥ ६९ ॥

पोद्दाराः कान्दलेयाश्च यौधेया वाजपेयकाः ।
वनायुजाः पारसीकाः षडेते चोत्तमा हयाः ॥ ६७० ॥

तैत्तिला वत्सकान्धारा वामतेया ससैन्धवाः ।
सावित्राः पार्वतेयाश्च काश्मीराः सौम्बतीयकाः ॥ ७१ ॥

---

१ D सूज्य। २ D तिकथ्यते। ३ A मांपा। ४ A चीं। ५ A कारयेद्धरणी। ६ AF राके। ७ A समाय। ८ D न्वि। ९ D न। १० A ह्री। ११ D तु। १२ A कवा। १३ D योद्धारः। १४ D त्रा। १५ D वा। १६ A द्य। १७ A नावार्मतेय। १८ A मध्यमा हयाः।

तेजीकुलजनीहारसारस्वततुरुष्ककाः ।
चतुर्दशैते वाहेषु मध्यमाः परिकीर्तिताः ॥ ७२ ॥

मेदका आर्जुनेयाश्च त्रैगर्ता गुर्जरास्तथा ।
राजसावन्त्यसौराष्ट्राः पारियात्राः सहोरकाः ॥ ७३ ॥

दुग्धवाटीः स्तब्धवाटाः कनिष्ठा द्वादश स्मृताः ।
तत्राप्येकोऽतिकष्टः स्यात्स्तब्धवादी(ट)समुद्भवः ॥ ७४ ॥

षड्विंशतिविभेदाः स्युः राज्ञा ने(ज्ञे)यास्तुरङ्गमाः ।
न जायन्ते कलौ यस्मात्तस्मान्न गणिता मया ॥ ७५ ॥

जलावर्तवदावर्तो मुकुलो मुकुलाकृतिः ।
शुक्तिः शुक्तिसमाकारो गोलीहा(जिव्हे)वावला(ली)ढकः ॥ ७६ ॥

शतपद्यभिधा ज्ञेया शतपद्या समाकृतिः ।
पादुका पादुकाकारस्तदर्धस्त्वर्धपादुकाः(का) ॥ ७७ ॥

बह्वावर्तसमायोगः सम्पातः परिकीर्तितः ।
अष्टौ भेदाः समाख्याता आवर्तानां मनीषिभिः ॥ ७८ ॥

द्वावुरस्यौ शिरस्यौ द्वौ द्वौ(द्वौ)रन्ध्रोपरन्ध्रयोः ।
एको भाले प्रमाणेन(पाणे च)ध्रुवावर्ता दश स्मृताः ॥ ७९ ॥

स्यान्निगाले देवमणिस्तदूर्ध्वो रोचमानकः ।
कण्ठावर्तस्तयोर्मध्ये प्रशस्तास्ते विशेषतः ॥ ६८० ॥

ललाटे सृक्कणोर्बाह्वोस्त्वचि केशान्तयोस्तथा ।
वक्षःस्थले कर्णमूले शुभावर्ताः प्रकीर्तिताः ॥ ८१ ॥

श्वेतैः कृष्णोऽरुणः पीतः शुद्धाश्चत्वार एव हि ।
मिश्रास्त्वनेकधा वर्णास्तेषां भेदः प्रवक्ष्यते ॥ ८२ ॥

केशा वालाश्च रोमाणि वर्म चैव खुरास्तथा ।
श्वेतैरेतैर्भवेदश्वः कंका(र्का)ह्वो विप्रजातिजः ॥ ८३ ॥

---

१ A साम्बती । २ D चतुष्कलाः । ३ FA गू । ४ D म्बष्टका । ५ A आहराः । ६ A टा...F यस्तथवायः । ७ D adds this line । ८ D ट्रित्रि । ९ D लीहावाहावली । १० A परिकीर्तितः । ११ A वोहावर्त । १२ A सयातः । १३ A तमि । १४ D दा । १५ A ङ्ग । १६ D स्तश्च । १७ D णौ । १८ A बाँहो । १९ A त । २०. D च । २१ A का । २२ D च । २३ D का ।

पूर्ववत्सर्वशुक्लाङ्गस्त्वचा कृष्णो[1] भवेद्यदि ।
वर्णनाम्ना[2] स विज्ञेयः कत्तलोऽयं तुरङ्गमः ॥ ८४ ॥

लोमभिः केशवालैश्च त्वचा कृष्णः[3] खुरैरपि ।
काल इत्युच्यते वाजी शूद्रः शौर्याधिकस्तथा ॥ ८५ ॥

केशप्रभृतिवालान्तः(न्त)सर्वाङ्गे रोहितो[4] यदि ।
कर्पूह[5] इति विख्यातः क्षत्रजातिस्तुरङ्गमः ॥ ८६ ॥

केशैस्तनुरुहैर्वालै काँश्चनाभैस्तुरङ्गमः ।
सेराह[6] इति विख्यातो वैश्यजातिसमुद्भवः ॥ ८७ ॥

सितलोहितरोमाणि सर्वाङ्गे मिश्रितानि च ।
मुखाङ्गिवालकेशेषु लोहितश्चोर उच्यते ॥ ८८ ॥

केशवालाङ्गितुण्डे च मेचको रुरुसन्निभः ।
नील इत्युच्यते वाजी सितकृष्णे तनूरुहे[10] ॥ ८९ ॥

पाटलीपुष्पसङ्काशा(शो) नलकेषु सितेतरः ।
कृष्णश्चन्थिकया[11](पा)हो[12]भ्यैः सङ्गामे[13] विजयप्रदः ॥ ६९० ॥

मधूकवल्कलच्छायो मोह इत्युच्यते हयः ।
पक्वजम्बूफलच्छायो जम्बु[14] इत्यभिधीयते ॥ ९१ ॥

केशे[15]वालेषु पीतश्च[16] लोहितो हरितो मतः[17] ।
उन्दुरेण[18] समच्छायः सम्र(म्रि)रुन्दीर[19] उच्यते ॥ ९२ ॥

केशे[20]केसर[21]पुच्छे च जानुनोऽधश्चे[22] मेचकः ।
सर्वाङ्गलोहितैः पीतैरुराहः[23] कथ्यते हयः ॥ ९३ ॥

शेष(शोण)स्तेष्वेव देशेषु सर्वाङ्गे किञ्चिदुज्वलः ।
रक्तरेखाङ्कितः[24] पृष्टे गोण्ठि[25](मण्ठ)वर्णस्तुरङ्गमः ॥ ९४ ॥

येन केनापि वर्णेन[26] मुखे पुच्छे च (पादेषु) पाण्डुरः[27] ।
पञ्चकल्याणनामायं भाषितः[30] सोमभूभुजा ॥ ९५ ॥

---

१ A ष्णा । २ A एतन्ना । ३ A कृष्टः । ४ A ख । ५ A क्वैरा । ६ D वा । ७ A लक्षणं यस्तु । ८ A सितष्णे । ९ A नु । १० A हि । ११ A न्धि । १२ D हेश्व । १३ D सुयुद्धविजयावहः । १४ A ब । १५ A लोह । १६ A श्वेलो । १७ D सि । १८ A अदुम्बर । १९ A य । २०D स उन्दुर । २१ D यः केसरसमः पुच्छे । २२ A स्तु । २३ D कहाहः । २४ A मेघीकृ । २५ A गंवि F गंठिक । २६ D षु । २७ A ण्ड । २८ A ल्या–नामा । २९ D माच । ३० D सोमभूपेन भाषितः ।

केशेषु वदने पुच्छे वंशे पादेषु[1] पाण्डुरः।
अष्टमण्ठा[2](ङ्क)लनामा च सर्ववर्णेषु शस्यते ॥ ९६ ॥

श्वेतः सर्वेषु पादेषु पादयोर्वापि यो भवेत्।
धौतपादः स विज्ञेयः प्रशस्तो मुखपुण्ड्रकः[3] ॥ ९७ ॥

विशालैः पट्टकैः श्वेतैः स्थाने स्थाने विराजितः।
येन केनापि वर्णेन हैलाह[4] इति कथ्यते ॥ ९८ ॥

चित्रितः पार्श्वदेशे च श्वेतबिन्दुकदम्बकैः।
यो वा को वा भवेद्वर्णस्तरङ्गः कथ्यते हयः ॥ ९९ ॥

सितस्य बिन्दवः कृष्णाः स्थूलाः सूक्ष्माः समन्ततः।
दृश्यन्ते वाजिनो यस्य पिङ्गलः स निगद्यते ॥ ७०० ॥

श्वेतस्य सर्वगात्रेषु श्यामला मण्डला यदि।
एके तं बहुलं प्राहुरपरे मलिनं बुधाः ॥ १ ॥

अङ्गनात्मैकोपि(ऽति)मेधावी दिव्याचारो[5] मिताशनः।
अलङ्कारसहो गीतमानपूजाप्रियः सदा ॥ २ ॥

उत्क्षिप्य पादं प्रद्रावी[6] शुचिशय्यासनप्रियः।
सोऽयमुत्तमसत्वः स्याच्छोभनाङ्गस्तुरङ्गमः ॥ ३ ॥

पारावतगलाभासः शक्रचापसमद्युतिः।
छायेयं पार्थिवा ज्ञेया हयरोमसमाश्रिता ॥ ४ ॥

मुक्तास्फटिकसङ्काशा छायेयं वारिजा शुभा।
बालार्कपद्मरागाभा छायेयं तैजसी स्मृता ॥ ५ ॥

क्षीरैः समासमा गन्धस्वेदादिषु शुभा हयौः[7]।
शुभद्विपे[8] च हंसे च शिखितित्तिरटिट्टिभैः[9] ॥ ६ ॥

गत्या सेमाना[10] ये वाहा सादिनान्ते[11] सुखावहाः।
बाहुमूले जानुसन्धौ गमने यस्य वक्रता[12] ॥ ७ ॥

---

१ A च। २ A रा। ३ A मुद्रकः। ४ A omits this Pâda। ५ D त्माकोप। ६ A चोक्षा। ७ D प्रज्ञा। ८ D जी। ९ A भो। १० A यः। ११ A शिरसि द्विणि। १२ A ससमाना। १३ A हादिनान्ते।

प्रसारणं च पादानामुच्चाङ्घ्रिः स वरो रणे ।
सन्धित्रयेऽपि[1] पादानां नतत्वं गमने यदि ॥ ८ ॥

वक्रपादस्तुरङ्गोऽयं विनोदेषु प्रशस्यते ।
द्रुतं क्षिपति पादांश्चेद्वक्रपादस्तुरङ्गमः ॥ ९ ॥

समपादो विनोदेषु प्रेक्षकाणां मनोहरः ।
नातीवोच्चैर्नातिनम्रैः पादैर्याति तुरङ्गमः ॥ ७१० ॥

मध्यपादः स विज्ञेयः प्रशस्तः समराङ्गणे ।
वक्रता मणिबन्धेषु[2] दृश्यते यस्य वाजिनः ॥ ११ ॥

नीचपादः स विज्ञेयः प्रशस्तोऽध्वगतौ हयः ।
पादानां दृश्यते यस्य स्तब्धता सर्वसन्धिषु ॥ १२ ॥

अध्वन्येवोपयोग्योऽसौ स्तब्धपादस्तुरङ्गमः ।
गम्भीरोऽस्खलितः स्निग्धो मधुरः श्रुतिकोमलः ॥ १३ ॥

ध्वानिः प्रशस्यतेऽश्वानां स्वामिनो[3] विजयावहः ।
निर्मांसमायतं वक्रमक्ष्णोर्मध्ये समुन्नतम् ॥ १४ ॥

निर्व्यलीकेन भावेन वाहानां शस्यते मुखम्[4] ।
श्वेते कृष्णे पिशङ्गे वा मल्लिकाकान्तिसन्निभे ॥ १५ ॥

वैडूर्यस्फटिकच्छाये पुष्परागसमप्रभे ।
एणोष्ट्रटिट्टिभक्रौञ्चहंसलोचनसन्निभे ॥ १६ ॥

प्रशस्ते[5] लोचने यस्य वाजिनस्ते शुभावहाः ।
ओष्ठौ[6] मुखं सृक्कणी च सूना प्रोथस्तनुर्मृदुः ॥ १७ ॥

स्तब्धावलोमशावन्तर्नागवल्लीदलोपमौ ।
ह्रस्वौ कर्णौ शुभौ शीर्षं कपित्थफलसन्निभम्[7] ॥ १८ ॥

स्कन्धः[8] पीनो दृढः शस्तो ग्रीवा केकिगलोपमा ।
वक्षो वृत्तं विशालं च स्थूलावंसौ[9] सुविस्तृतौ ॥ १९ ॥

---

१ A वाहासादिनां । २ D ऽपि । ३ D नां । ४ A सु । ५ A स ५ D स्त । ७ D ष्ठो । ८ D वां । ९ D शौ ।

क्रोडं सुनिबिडं शस्तं बाहू वृत्तौ[1] सुदीर्घकौ।
समानं वर्तुलं जानुयुगलं गूढगुल्फकम् ॥ ७२० ॥

जङ्घे दीर्घे च निर्मांसे तथा गूढशिरे मते।
मणिबन्धौ[2] तथा ह्रस्वौ स्तब्धौ चैव शुभावहौ ॥ २१ ॥

खुराः खैरखुराकारा[3] रेखावलिविवर्जिताः।
अन्तः कुहरसंयुक्ता अभिन्नाश्चैव कर्णिकाः ॥ २२ ॥

इषन्नम्रः पृष्ठवंशो ह्रस्वो मांसैः सुलेपितः[4]।
पार्श्वे दीर्घे समे वृत्ते समुद्धद्धं तथोदरम् ॥ २३ ॥

अरोमशौ वेककर्णौ(वर्णौ)[5] दूषणौ[6] वतू(तु)लौ लघू।
ह्रस्वं च मेहनं शस्तं सुसंलग्नौ तु पिण्डकौ ॥ २४ ॥

वृत्तं विशालं जघनं प्रच्छन्नं च गुदं वरम्।
सुदीर्घैर्बाहुभिर्बालैः पुच्छं मग्नं प्रशस्यते ॥ २५ ॥

उपान्तौ विकटौ शस्तौ ऋजुपीने च सक्थिनी।
ह्रस्वौ कूर्चौ स्मृतौ तेषां जङ्घाकाण्डौ च पूर्ववत् ॥ २६ ॥

कक्षायां[7] पुल(लि)ने द्वार्ल्पा(द्वीपे) मध्यखण्डे तथोपरि।
पञ्चस्वेतासु धारासु धावन्सत्त्वेन संयुतः ॥ २७ ॥

पञ्चम्यामपि धारायां[8] लोहमास्यगतं हयः।
अनवष्टभ्य[9] यो धावत्यस्खलंश्चलवोलधि[10](धिः) ॥ २८ ॥

अनुत्प्लुत्य[11]वतिष्ठेत म्रियमाणस्ततो भृशम्[12]।
स भवत्युत्तमप्राण इतरौ मध्यमाग(ध)मौ[13] ॥ २९ ॥

रोमस्वपि मनाक् स्पर्शं पार्ष्णिभ्यां सहते न च।
ऊरुसंवलनं बाह्वोरुक्षे(त्से)पं जवि(व)नो हयः ॥ ७३० ॥

पार्ष्णिसंस्पर्शमात्रेण रागात्[14]सं(त्स)म्पीडनेन च।
वेला(ल्ग)या ज्ञापनेनैव धावन्नन्तरपैत्तिकैः[15] ॥ ३१ ॥

---

१ A स्तौ. दी। २ A ब। ३ A खु। ४ D मेलि। ५ D सादकौ। ६ D वर्तुलौ च सदा लघू। ७ D वी। ८ D नद्या। ९ A या। १० D तृष्ट। ११ A स्व। १२ A चा। १३ D श्रु। १४ D णेत। १५ A मो। १६ A उ। १७ A पथि। १८ A सपी। १९ D वल। २० A ववधा। २१ D तम्।

पार्ष्णिसङ्घट्टनैर्गाढैः कशाघातैः सुनिष्ठुरैः ।
आराखाश्चनकैर्गच्छन् अश्वो मेंहः प्रकीर्तितः ॥ ३२ ॥

धेन्वन्तरशतं गत्वा पुनरागच्छति द्रुतम् ।
मात्रा षोडशकेनाश्वो भवेदुत्तमवेगवान् ॥ ३३ ॥

चतुर्विंशतिमात्राभिर्मध्यवेगस्तुरङ्गमः ।
द्वात्रिंशता तु मात्राभिर्हीनवेगस्तुरङ्गमः ॥ ३४ ॥

वितस्तिसप्तैकोत्सेधः खुरान्तात्कीकसावधिः ।
परिणाहे तथा दैर्घ्ये दश सार्धा वितस्तयः ॥ ३५ ॥

वक्रपुण्ड्राः छिन्नपुण्ड्राः कृष्णो(ष्णौ)ष्ठपुटतालुकाः ।
लग्नग्रीथा दीर्घकर्णा ह्रस्वगण्डोत्तरो(रौ)ष्ठकाः ॥ ३६ ॥

करालतीक्ष्णदंष्ट्राश्च गृध्रकाकविलोचनाः ।
स्कन्धे बहुवलीकाश्च तथा हीनस्वरान्विताः ॥ ३७ ॥

वक्रमेढ्राश्चित्रकर्णा लम्बमुष्कास्तुरङ्गमाः ।
घनकुञ्चितवालाश्च विज्ञेयास्ते हि सू(शू)कलाः ॥ ३८ ॥

एवंविधस्वरूपा ये दुष्टचित्ता भवन्ति ते ।
दन्तैः खादन्ति निघ्नन्ति पादैरभ्याशमागतम् ॥ ३९ ॥

पश्चाद्भागेन चोत्प्लुत्य पातयन्ति च सादिनम् ।
पूर्वपादौ समुत्क्षिप्य पतन्ति सह सादिना ॥ ७४० ॥

वल्गा(ल्गा)माकृष्य गच्छन्ति सङ्कटेषु विशन्ति च ।
सङ्गं(ङ्कं)माश्रित्य तिष्ठन्ति न यान्त्यपि च ताडिताः ॥ ४१ ॥

कुलालचक्रवत्तिर्यग्व(ग्भ्र)मन्ति च लुठन्ति च ।
एतैर्दोषैः समायुक्ता ज्ञेयास्ते दुष्टघोटकाः ॥ ४२ ॥

दुष्टानां दमनं वक्ष्ये घोटकानां यथोचितम् ।
उपायैर्विविधैर्यन्त्रैः(त्नैः)शिक्षां गृह्णन्ति ते यथा ॥ ४३ ॥

---

१ A ह्व । २ A घ्नः । ३ D श्वरंहः । ४ D तम् । ५ A धावन्शरशतं । ६ A पू, यू । ७ D री । ८ A ङ्ग । ९ A ङ्ग । १० A ह्व । ११ A तः । १२ D स्तुरङ्गमाः । १३ D तान् । १४ D ब । १५ D दा । १६ A श्री । १७ A लक्षणं । १८ A त ।

धार्यमाणस्तु यस्तिर्यग् भवत्यश्वः पुनःपुनः।
बाह्वां[1] वल्गां(ल्गां) समाकृष्य मण्डले साधयेत्तु तम् ॥ ४४ ॥

अविलाणं विधार्योर्ध्वं यस्तिष्ठति भयाद्भयः।
निपीड्य सृक्कणी[2](र्णी) गाढं स रागा(पादा)भ्यां प्रपीड्यते ॥ ४५ ॥

सम्यु[3]च्छलति यो वाजी तस्य वल्गौ[4] कृषेद् भृशम्।
पश्चात्स धार्यते गाढं वल्गा[5]कर्षणयोगतः ॥ ४६ ॥

वल्गामपाकरोत्यर्थं ति(त)प्रादौ धारयेद् दृढम्।
पश्चार्द्धं शिथिलां कर्षकु(न्कु)र्याद्वल्गौ[6](ल्गां) विचक्षणः ॥ ४७ ॥

न मन्येत(ता)विलाणं यः कर्कशो वदने हयः।
सूत्रिकां निक्षिपेदास्ये तस्यां वल्गां कृषे[7]द्भृशम् ॥ ४८ ॥

अविलाणं गतां वल्गौ[8] कर्षेत्सूत्रिकया सह।
तथापि चेन्न मन्येत कृषेन्मस्तकपट्टिकाम् ॥ ४९ ॥

उन्नामयति यः शीर्षं वारं वारं तुरङ्गमः।
वल्गौ[9](ल्गा)माकृष्य तं वाहं पुलया वाहयेत्सुधीः[10] ॥ ७५० ॥

ऊर्ध्वं[11] यो लालिकां धत्ते मोक्षाकर्षणतत्परः।
धारा[12]यं(यां) तं तुरीयायां तुरङ्गं वाहयेज्जवात् ॥ ५१ ॥

एवं कृते च मुञ्चेच्च लालिकां घोटको भयात्।
कविकावर्तिकापार्श्वे कीलकैस्तां प्रकीलयेत् ॥ ५२ ॥

उद्घाटयति यो वक्त्रं घोटको लघुहस्तकः।
तं पुलायां नियुञ्जीत वाजिवाहविशारदः ॥ ५३ ॥

निष्कासयति यो जिह्वां वारं वारं तुरङ्गमः।
लालिकां[13]पार्श्वतस्तस्य कारयेत्तीक्ष्णकण्टकान् ॥ ५४ ॥

योऽधस्तात् कुरुते शीर्षं तस्योरस्त्राणपट्टिकाम्।
विधाय शिथिलामूर्ध्वं[14] वल्गये(यो)न्नमयेच्छिरः ॥ ५५ ॥

---

१ D ह्वां। २ D क्कि। ३ A मच्च। ४ A लां। ५ A शे च्छनैः। ६ A ला। ७ D वल्गामपाक रोत्यर्थं यो वाजी, A क्षपां करोति। ८ A च्चा। ९ A लाकर्षतु। १० D लां। ११ A शे। १२ A बालां बलां। १३ D वल्ग A बल। १४ D यन्। १५ A धीः। १६ A र्च्वं D र्च्वंपोलायि। १७ D धारया तं त्वरायुक्तं वाहयेत्तुरगं जवात्। १८ A कांपा। १९ A र्च्वंबलये।

निहन्यादासनं यस्तु पश्चाद्भागं निवेशयेत् ।
स पश्चात्पादतो नेयो नामयेत्तु त्रिकं ततः ॥ ५६ ॥

उत्पतो वा(तेद्वा)ह्यमानो यस्य(यस्तस्य) वक्त्रे विनिक्षिपेत् ।
शिल्लिका(लीकां)केशि(श) निर्माण(ल्यं) न्यसेद्वा कडिया(वा)लिका(कम्)॥५७॥

एणवत्प्लुवते यस्तु तं कशादर्शनं विना ।
वल्गां[1] प्रशिथिलां धृत्वा धाराक्रान्त्या प्लुलापयेत् ॥ ५८ ॥

असोढारोहणो वाजी तस्य ग्रीवां पराङ्मुखीम् ।
कृत्वा वल्गां[2](ल्गां) दृढां धृत्वा वेगाद्वाह्यः स सादिना ॥ ५९ ॥

सर्पवद्वक्रगामी यस्तस्य पक्षद्वये हयौ ।
संयोज्य वाहयेद्यत्नात्ताडनाङ्कमणोक्तिभिः ॥ ७६० ॥

आरोहन्तं निहन्याद्यः पश्चात्पादेन वाहकः ।
उरः प्रमाणके तोये समारोहेन्निधाय तम् ॥ ६१ ॥

अश्ववारेण यः सांकमारुढेन पतेद्भुवि ।
पर्याणकविहीनं तमन्यमारोप्य वाहयेत् ॥ ६२ ॥

आधाय सादिनं वाजी येन केनापि वर्त्मना[3] ।
निःसरेत्तत्पथेनैव कशाघातैस्तु तं नयेत् ॥ ६३ ॥

यः पार्श्वमुत्क्षिपेद्वाढं गाढोरस्त्राणपीडितम्[4] ।
कृत्वा धृत्वा तथा वल्गां[5] वाहयेत्तं स्थिरासनम् ॥ ६४ ॥

प्रेरितोऽपि न गच्छेद्यस्तमारुह्य तुरङ्गमम् ।
तिष्ठेच्च सुचिरं कालं यावद्यास्यति कुत्रचित् ॥ ६५ ॥

तथापि चेन्न गच्छेद्यः कशया ताडयेत्तु तम् ।
तथापि चेत्स्थिरस्तिष्ठेद्दुर्दमो वाहनाधमः ॥ ६६ ॥

मोचकस्य प्रकर्तव्यौ[6] पार्ष्ण्यन्ते लोहकण्टकाः ।
तैः कुक्षौ[7] ताडनीयोऽसौ धावनार्थं तुरङ्गमः ॥ ६७ ॥

---

१ A वलां । २ A क्ल । ३ D वक्त्रां । ४ D नात् । ५ A शंङ्का । ६ A वर्त्यता । ७ A सरे । ८ A श्वेंषु क्षि । ९ A ढव । १० A वालां । ११ A व्या । १२ D क्ष्यां ।

एवं प्रमृद्यमानोऽपि पदमेकं न चेद्व्रजेत् ।
पश्चात्पादक्रमैर्नेयो भ्राम्यो वा चक्रवद्धयः ॥ ६८ ॥

एवं कृतेऽपि यो वाहः स्थाणुवत्तिष्ठति स्थिरः ।
पिधाय नेत्रे पट्टेन तूर्यादिस्वनमाचरेत् ॥ ६९ ॥

मण्डले वाह्यमानः सन्नन्तर्विशति यो हयः ।
वल्गां बाह्यां समाकृष्य मण्डले तं प्रसारयेत् ॥ ७० ॥

बहिर्व्रजति यो वाजी मण्डले भ्रमणक्रमे ।
तस्यान्यस्तुरगो योज्यो बहिः पार्श्वेऽश्वसादिना ॥ ७१ ॥

एकया वल्गया यस्तु सम्यक् धावति घोटकः ।
तयैव वल्गया वाह्यो यावन्निर्विण्णतां व्रजेत् ॥ ७२ ॥

प्रार्थ्य यस्तुतिस्तू ..... ।
एवं कृते स निर्वेदाद्वल्गामेनां परित्यजेत् ॥ ७३ ॥

अन्यया वल्गया सम्यक् धृतो धावति घोटकः ।
आश्रयं किमनुप्राप्य यस्तु तिष्ठति सू(शू)कलः ॥ ७४ ॥

अनाश्रये प्रदेशेऽसौ वाहनीयः प्रयत्नतः ।
एवं साध्या प्रयत्नेन सू(शू)कला दुष्टचेतसः ॥ ७५ ॥

ततस्ते राजवाह्यत्वं भजन्ति तुरगोत्तमाः ।
शुभवर्णैः शुभावर्तैः शुभगन्धैः शुभस्वरैः ॥ ७६ ॥

शुभसत्त्वैः शुभौंकारैर्युक्ता वाहाः शुभावहाः ।
मुखे पादेषु निर्मांसास्त्रिके वक्षसि विस्तृताः ॥ ७७ ॥

जघने स्कन्धयोः पीना ह्रस्वाः पृष्ठे च कर्णयोः ।
कन्धरामध्ययोर्वृत्ताः शावसारङ्गलोचनाः ॥ ७८ ॥

महाजवा महाप्राणा नृपाणामुचिता हयाः ।
एवं रूपगुणोपेतान् शिक्षितानश्ववाहकैः ॥ ७९ ॥

---

१ A वल्गां । २ A धार । ३ A वृण । ४ D omits this line । ५ A द्वला । ६ A लया । ७ A किसनुक्षि । ८ A सूलकः । ९ A त्वने । १० A व । ११ A भच्छायैः । १२ D तांश्चल ।

तुङ्गस्कन्धोन्नतग्रीवान् लोहलालाविमोक्षिणः ।
नीचपाश्चात्यचरणान् वेणं(ग)वन्मार्गगामिनः ॥ ७८० ॥

मण्डले सर्वधारासु प्रोथसञ्चुम्बितांसकान् ।
वल्गयाकृष्यं भागे तु क्षिपतस्तत्पदं पुरः ॥ ८१ ॥

प्रेरते(णे)धावतः शीघ्रं ग्रहणे तिष्ठतः सुखम् ।
जयघण्टादिनादेभ्यो बहुवाहखुरारवान्(त्) ॥ ८२ ॥

गजोष्ट्रसन्निधानाच्च त्रासो येषां न जायते ।
तानेवं शिक्षितानश्वानादायात्यन्तमुत्तमान् ॥ ८३ ॥

सज्जीकुर्याच्च पर्याणैर्दन्तिदन्तविनिर्मितैः ।
सौवर्णपट्टभूषाद्यैर्मुक्तामाणिक्यशोभितैः ॥ ८४ ॥

द्वीपिचर्मापिनद्धैश्च पटीपट्टविराजितैः ।
उरोबद्धैः पुच्छबद्धैर्नानावर्णैः सुशोभितैः ॥ ८५ ॥

पादाधारैश्च सौवर्णैर्लम्बिभिः पार्श्वयोर्द्वयोः ।
उष्ट्रलोमकृतैः पट्टैः सौवर्णकटकान्वितैः ॥ ८६ ॥

आकर्षवर्धकैः श्लक्ष्णैर्मध्यभागनिपीडितैः ।
हैमिभिः कैण्ठिकाभिश्च संलग्नाभिर्मुखे पुनः ॥ ८७ ॥

मस्तकस्थेन पट्टेन वृतैर्भिर्गण्डवर्धकैः ।
रौप्यनिर्मितलाली(ला)नां बद्धवल्गाभिरन्तयोः ॥ ८८ ॥

रत्नकाञ्चनयुक्तेन मुक्ताजालचितेन च ।
निबन्धकेन पर्यन्ते व्याघ्रलाङ्गू(ङ्गू)लशोभिना ॥ ८९ ॥

पेञ्चाकपुच्छपिच्छैश्च लोहितैर्भ्राजता भृशम् ।
शङ्खजैर्मणिभिर्वृत्तैः कू(क)णत्कनकशृङ्खलैः ॥ ७९० ॥

पदकैः पादुकाभिश्च हेमकिङ्किणिकान्वितैः ।
ग्रीवासु मण्डितानश्वान् कुङ्कुमेनोपलेपितान् ॥ ९१ ॥

---

१ D हं । २ A क्ष । ३ D त्य । ४ A णा । ५ D णु । ६ A ल, लयः । ७ A ण्ण । ८ A च । ९ D नि । १० A डनैः ११ A कविभिः काश्चित्स । १२ A त्रैः खलैः । १३ D सुखं । १४ D त्ता । १५ D नै । १६ A ला । १७ D लाश्वि । १८ D र्यो । १९ A त्रै । २० A पद ।

छत्रचामरसंयुक्तान् पुरतः काहलान्वितान्।
प्रस्थापयेच्च वाह्यालीं स्वयं यायात्ततो नृपः ॥ ९२ ॥

कृतप्रसाधनो[1] वीरो वाहविद्याविशारदः।
चित्रपट्टकुतोष्णीषो धृतपीतोर्ध्वकञ्चुकः[3] ॥ ९३ ॥

पटीपट्ट(ट्टं)सवालश्च(ञ्च) धारयन् धृतकङ्कश्च(ञ्चु)कः[5]।
चारुचामीकरमयीं शृङ्खलां वक्षसा धरन् ॥ ९४ ॥

स्वर्णताटङ्कपत्राभ्यां भूषितश्रवणद्वयः।
अन्यानपि हयारोहान् कृतविद्यान्[7] जितश्रमान् ॥ ९५ ॥

ज्ञाताश्वहृदयान् दक्षान् स्थिरहस्तान् दृढासनान्।
वीथीमण्डलधारासु सञ्चारचतुरान् वरान्[10] ॥ ९६ ॥

पञ्च(सच) वेदिततत्त्वज्ञानश्वान्त्रोहे[11](रोहा)त्रेश्वरः।
कृतानुरूपशृङ्गारान् विभजेच्च द्विधा[13]कृतान् ॥ ९७ ॥

स्वपक्षे स्थापयेदष्टावष्टौ पक्षान्तरे क्षिपेत्।
अन्तःपुरैः कुमारैश्च सचिवामात्यमन्त्रिभिः ॥ ९८ ॥

अन्यैर्बहुविधैः पात्रै राजयोग्यैः समन्वितः।
सुखासनं समारुह्य वाजिनं प्रियया सह ॥ ९९ ॥

ततः प्रविश्य वाह्यालीं सहयातान् प्रवेश्य च।
मण्डपे पूर्वसङ्केते यथास्थानं निवेशयेत् ॥ ८०० ॥

ततः स्वयं समारोहेद्दिव्यं काम्बोजवाजिनम्।
धन्वा(न्व)न्तरत्रयादन्तर्द्वारयोस्तोरणद्वयम्[13] ॥ १ ॥

तोरणस्तम्भयोर्मध्यं चतुर्धन्वा(न्व)न्तरायतम्।
कुर्यात् कन्दुकनिष्कासात्र ज्ञातुं जयपराजयौ ॥ २ ॥

यैश्चकन्दुकनिष्कासः कृतस्तेषां जयो भवेत्।
वक्रकुण्डलिताग्राः स्युर्वेत्रजा दृढबन्धनाः ॥ ३ ॥

---

१ A च। २ AD द। ३ D तार्ध। ४ A वल्गा। ५ A विभीतं। ६ A व। ७ D वर्ती। ८ A ये, यम्। ९ D विद्या। १० A हयान्। ११ A न् नत्वाऽरो। १२ A विधा। १३ D त। १४ D र्द्धा।

शोणेन[1] चर्मणा नद्धा मुखे कृष्णेन गुण्ठिताः[2] ।
पञ्चाङ्गुलपरीणाहा गेदि[3]काश्चार्द्रु[4](प)मात्रिकाः[5] ॥ ४ ॥

शोभिना हेमपट्टेन क्वचिद्रत्नविभूषिताः ।
प्रगृह्य गोदि[6]काः सर्वे पक्षद्वितयसादिनः ॥ ५ ॥

आरोहेयुर्वरान् वाहान् स्वतोरणसमीपगाः ।
सुवृत्तं कन्दुकं कृष्णं पारिभद्रकदारुणाँ ॥ ६ ॥

चर्मणा वेष्टितं भव्यं लोहितं दृष्टिरञ्जनम् ।
दुवाल्या प्रेरयन्नश्वं गेदि[7]काग्रेण भूतले ॥ ७ ॥

कन्दुकं चालयेदेकः परतोरणसम्मुखम् ।
तत्पक्षाश्चानुगच्छेयुः प्रतिपक्षाश्च[8]सम्मुखम् ॥ ८ ॥

आगच्छे[9]तं ततस्त्वेकः कन्दुकं ताडयन् बलात् ।
जवयुक्तेन वाहेन प्रतीपं कन्दुकं नयेत् ॥ ९ ॥

प्रतिपक्षस्तथैवान्यः कन्दुकं परिवर्तयेत् ।
एवमन्योन्यसङ्घर्षा[10]द्याताया[11]तैश्च कन्दुकम् ॥ ८१० ॥

क्रीडन्तः प्रेरयेयुस्ते बहु[12]धा तैरनेकशः ।
पुरोघातेन तेष्वेकः पश्चाद्घातेन चापरः ॥ ११ ॥

तिर्यग्घात(तै)स्तथा चान्यो बहिर्घात(तै)स्तथेतरः ।
गेडि(दि)काग्रेण सङ्गृह्य नयेतान्यो विहायसा ॥ १२ ॥

गगनस्थं परः सादी[13] ग्रेडि(दि)काग्रेण धारयेत् ।
अपर[14]श्चा[15]श्ववारोऽपि तं[16]मादायाम्बरान्नयेत् ॥ १३ ॥

एवं सङ्कुलघातेन कन्दुकं भुवि चाम्बरे ।
नयन्तस्तोरणस्यान्तर्बहिर्निष्कास्य कन्दुकम् ॥ १४ ॥

जयं लभन्ते तत्पक्षास्तूर्यनादविजृ[17]म्भितम् ।
विनोद्य कन्दुकेनैवं जयमासाद्य भूपतिः ॥ १५ ॥

---

१ A शौ । २ A गण्ठिता । ३ D डि । ४ D ट्टम । ५ A का । ६ D डि । ७ D णम् । ८ D डि ९ A श्च । १० D युः । ११ D घा । १२ A धायै । १३ A दि । १४ D श्च तथा सादी । १५ D आपातं गगनं नयेत् । १६ D ल । १७ D ल ।

तस्मादवतरेदश्वात्स्तूयमानश्च बन्दिभिः।
तोकारदेशसम्भूतं सर्वलक्षणसंयुतम् ॥ १६ ॥

शिक्षितं जवसम्पन्नमारोहेत्तुरगोत्तमम्।
ततो मण्डलवारीषु(धारासु) धारयेत्तं[1]चु(न्तु)रङ्गमम् ॥ १७ ॥

अन्तर्वल्गां[2] समाकृष्य बहिर्वल्गां[3](ल्गा)कृताश्रयः।
दृढोँ[4]क(रु)श्चलजङ्घश्च स्थिरहस्तोऽश्लथासनः ॥ १८ ॥

विस्तृतोरस्थलश्चैव बाह्वकर्णाग्रदन्तदृक्[5] ॥
अङ्गुष्ठाग्रेण सम्पीड्य पादाधारयुगं दृढम् ॥ १९ ॥

परतो मध्यपादेन[6] पार्ष्णिँभ्यां[7] ताडयेद्धयम्।
विगत्या परिगच्छन्तं कशाघातेन ताडयेत् ॥ ८२० ॥

वाग्भिः सन्तर्जयेदश्वमूरुभ्यां परिपीडयेत्।
धाँरासु[8] वर्धयेद्भावं क्रमेण च विवर्त्त(र्त)येत् ॥ २१ ॥

कुषितं सात्वयेदेनं स्कन्धांस्फालनमाचरेत्।
सव्यापसव्यचारीषु तां[9]तां[10] वल्गां[11] समाकृशेत् ॥ २२ ॥

वीथ्यामुत्प्लवने धार्यं सम्यग् वल्गाँ[12]द्वयं समम्।
एवं वाहनविद्यायामुत्कर्षं दर्शयेन्नृपः ॥ २३ ॥

रञ्जयन् प्रेक्षकाँ[13]ल्लोकानश्वविद्याविशारदान्।
अँन्तःपुरपुरन्ध्रीभिः[14] कृतनीराजनाविधिः ॥ २४ ॥

स्वर्णवस्त्रैरलङ्कारैस्तोषयेदश्ववाहकान्।
स्तूयमानो जनैः सर्वैर्गीयमानश्च गायकैः ॥ २५ ॥

कविभिः पँठ्यमानस्तु[15] प्रविशेद्राजमन्दिरम्।
एवं तुरगवाह्यालीविनोदः कथितो मुदा ॥ २६ ॥

भूलोकमल्लदेवेन जगदानन्ददायिना।
विनोदो वाजिँवाह्यालीसङ्गतः प्रतिपादितः ॥ २७ ॥

इति तुरगवाह्यालीविनोदः ॥ ४ ॥

---

१ D ततु। २ A लां, ल्ला। ३ D ल्ग। ४ A ढ। ५ A र्णेऽग्र। ६ A पद्देन। ७ A णि। ८ D सुधासु। ९ A न्धस्याला। १० D लम्बां वल्गां। ११ A बलां। १२ A ला। १३ A ततः। १४ A पा। १५ D ह।

अधुनाङ्कविनोदोऽयं वर्ण्यते सोमभूभुजा ।
के(ये)न वा युध्यते सार्धमेकः खलकधामनि ॥ २८ ॥

समेनास्त्रेण यस्तज्ज्ञैरङ्कः स परिकीर्तितः ।
अङ्काश्च त्रिविधाः प्रोक्तास्तेषां वक्ष्यामि लक्षणम् ॥ २९ ॥

अभिधानं नाम तेषां कारणैश्च पृथक् पृथक् ।
गालिभिस्ताडनैर्मूर्धहननैर्दलबन्धनैः ॥ ८३० ॥

आस्यताम्बूलघातैश्च केशानां छेदनैरपि ।
एतैरन्यैश्च विविधैः कारणैर्योऽभिभूयते ॥ ३१ ॥

परिभूताङ्क इत्येष विश्रुतो जनसंसदि ।
एकवेश्यानिमित्तेन कामक्रोधविमोहितः ॥ ३२ ॥

ईर्ष्यया युध्यते यस्तु मत्सराङ्कः स उच्यते ।
गृहक्षेत्रादिहरणात् सीमाव्याजाच्च युध्यते ॥ ३३ ॥

देशलाभनिमित्ताच्च भूम्यङ्के नामतो हि सः ।
एकमुद्दिश्य सर्वान्वा बिरुदं पाठयेत्तु यः ॥ ३४ ॥

गाययेद्वादयेद्वाऽपि काहलां वा मदोद्धतः ।
आरुह्य महिषं दर्प(र्पाद्) दिवा दीपं प्रदीपयेत् ॥ ३५ ॥

तृणानि विकिरन् वीथ्यां बिरुदाङ्के निगद्यते ।
शस्त्रविद्यावलेपेन युद्धवृत्त्या विजीविषुः ॥ ३६ ॥

युध्यते यस्तु स ज्ञेयो विद्याङ्के नाम नामतः ।
पित्रादिमारणोद्भूतं वैरं संस्मृत्य युध्यते ॥ ३७ ॥

वैराङ्क इति नामास्य कृतवान् सोमभूपतिः ।
कृतापराधकं राजा योधयेन्निग्रहाय यम् ॥ ३८ ॥

तादृशेन द्वितीयेन द्रोहाङ्कः सोऽभिधीयते ।
कृत्वा पापानि यो मोहाद्विरक्तोऽन्येत्य भूपतिः(तिम्) ॥ ३९ ॥

---

१ A मुच्य । २ A गामनी, धामति । ३ A ङ्कसाः । ४ A स्येता । ५ D वैत्वाद् । ६ D ट । ७ A द्वा द । ८ D हा । ९ A यन । १० A तम् ।

युध्येताद्य(घ)निवृत्त्यर्थं प्रायश्चित्ताङ्ग उच्यते ।
एवं विवादसम्पन्नान् वारयेद्युद्धकर्मणः ॥ ८४० ॥

अशक्यत्वात्ततो पश्चाद्योधयेद्धार्मिको नृपः ।
ईदृशैष्टविधानङ्गान्योधयन् पृथिवीपतिः ॥ ४१ ॥

पापं नाप्नोति तेषां च व्याजपापं व्यपोहति ।
कारयेत्खलकं राजा तुङ्गं वृत्तं समं दृढम् ॥ ४२ ॥

द्व्यष्टहस्तसुविस्तीर्णं त्रिगुणं परिणाहतः ।
द्वात्रिंशन्मेढकैर्युक्तं द्वारेणैकेन संयुतम् ॥ ४३ ॥

निम्बपत्रैः पताकाभिर्मेढकाग्राणि भूषयेत् ।
द्वारं सोपानसंयुक्तं कुर्यात्तोरणमण्डितम् ॥ ४४ ॥

अधिष्ठितं दण्डधरैः खलकं लक्षणान्वितम् ।
खलकेन समोत्सेधे कुर्याद्वीक्षणमण्डपम् ॥ ४५ ॥

विशालं चतुरस्रं च सवितानं च साङ्गणम् ।
मध्ये वेदिकया युक्तं चित्रभित्तिसमन्वितम् ॥ ४६ ॥

सुधाधवलितं रम्यं श्लक्ष्णकुट्टिमशोभितम् ।
स्वर्णपट्टपिनद्धैश्च स्तम्भैः सुपरिमण्डितम् ॥ ४७ ॥

वारे शनैश्चरे सोऽयमङ्गनाहूय योधयेत् ।
प्रतिज्ञां शृणुयात्तेषां विविधां शौर्यशालिनीम् ॥ ४८ ॥

प्रधावाम्यहमित्येको रुणध्मीति तथापरः ।
खेडामीति तथा चैको धारयामीति चापरः ॥ ४९ ॥

अपसर्पामि नेत्येकः च(श्च)सर्पामीति कश्चन ।
मारयाम्यहमित्येको म्रियेऽहं नेति चापरः ॥ ८५० ॥

शस्त्र्याः शस्त्रिकया स्पर्शं हनिष्यामीति कश्चन ।
अस्त्रशस्त्रैः तवाङ्गानि दारयामीति चेतरः ॥ ५१ ॥

---

१ A रुद्ध । २ A व । ३ D शो । ४ A न प्रा । ५ D द्वि । ६ A न्मण्ड । ७ D धा । ८ D दी । ९ A नी । १० D वादं । ११ A स्के । १२ A धा । १३ A खा । १४ D मीतिनैक चसर्पामीतिकश्चन । A अपसर्पामिनेत्येकः सर्पाम्रामीतिः चापरः । १५ A अस्त्रशस्त्रैः, आङ्गां ।

छिनद्मि पादं धावन्तं घ्नन्तं[1] हस्तं निहन्म्यहम् ।
दण्डं[2] छिनद्मि निक्षिप्तं[3] गात्रं विद्या(ध्या)म्युपागतम् ॥ ५२ ॥

ब्रुवतामेवमन्योन्यं प्रतिज्ञां लेखयेन्नृपः ।
तेषां भूषाविशेषांश्च दत्त्वा कुर्याद्विसर्जनम् ॥ ५३ ॥

ततः प्रभाकरे वारे कृतपूर्वाह्णिकक्रियैः[4] ।
निवर्त्य भोजनं राजा भवेत्सम्भृतमण्डनः ॥ ५४ ॥

यामावशेषे दिवसे शुद्धान्तवनितायुतः ।
प्रसादचित्तैर्भृत्यैश्च पुरैर्म(रम)ण्डलपालकैः ॥ ५५ ॥

परमण्डलभूपालैः सचिवामात्यमन्त्रिभिः ।
प्रविश्य वीक्षणाङ्ग(गा)रमधितिष्ठेन्नृपासनम् ॥ ५६ ॥

ततः समागतान् सर्वान्यथायोग्यं निवेशयेत् ।
अङ्गनास्ततः समायान्ति समारुह्य करेणुकाः ॥ ५७ ॥

मुदितास्तूर्यघोषेण कुर्वन्तः सिंहगर्जितम् ।
काहलां वादयन्तश्च बिरुदाक्षरवादिनीम् ॥ ५८ ॥

हरिताङ्गरागकाः केचित्केचित्पीताङ्गरागिणः ।
कृष्णाङ्गरागिणः केचित्केचिच्छ्वेताङ्गरागिणः ॥ ५९ ॥

त्रिबिन्दुं[5](न्दु) विन्दुमाला च (लञ्च)त्रिशूलं मण्डलाकृतिः[6](ति) ।
पुत्रिकाकारमर्धेन्दुसदृशं तिलकं भवेत् ॥ ८६० ॥

तिलकं भालदेशे तु नेत्रस्याधः कटस्थले ।
बाह्वोश्च शिखरे वर्त्से[7] दधाना जठरेऽपि च ॥ ६१ ॥

पञ्चवर्णकपट्टांश्च वसाना जानुलम्बिनः ।
सौवर्णं दधतो रम्यं पट्टिकावेष्टितं दलम् ॥ ६२ ॥

शङ्खजैर्मणिभिः स्थूलैः कृतकण्ठविभूषणाः ।
पीतलोहितपट्टैश्च शोभिताश्चावलम्बने[10] ॥ ६३ ॥

---

१ D घ्नतं । २ A ण्ड । ३ A नक्षिप्रं । ४ A याः । ५ A वीस D वीक्षणाङ्गारं । ६ A विंदं । ७ D ति । ८ D शिरसे । ९ D वृत्वा A धृत्वा । १० D म्बिनः ।

प्रविश्य खलकं सर्वे कृतकूर्मासनक्रियाः।
प्रणमन्तो महीपालं विज्ञपेयुः पृथक् पृथक् ॥ ६४ ॥

क्षितीशः परिभूतेन योधयेत्परिभावकम्[1]।
स्त्रीमत्सरसमायुक्तं मत्सरेणैव योधयेत् ॥ ६५ ॥

सविरोधौ क्षितेरर्त्यर्थे योधनीयो[3](यौ) परस्परम्।
विरुद्धं योधयेद्राजा विरुद्धप्रतिरोधिना ॥ ६६ ॥

विद्याङ्कः(ङ्कः) समविद्येन तद्विधेनैव योधयेत्।
वैराङ्कं[5](ङ्के) वैरिणा सार्धं योधनीयो महीभुजा ॥ ६७ ॥

द्रोहाङ्कं तादृशेनैव वध्येन सह योधयेत्।
पापिनां (नं) पापशुध्यर्थं पापिना सह योधयेत् ॥ ६८ ॥

दण्डधारयु(धृ)तं दण्डमङ्कन्योर्मध्यवर्तिनम्[7]।
अपनीयं[8] ततो मुञ्चेद्[9] द्वावङ्कौ युद्धलालसौ ॥ ६९ ॥

निवारयन्तौ खोञ्चन्तौ धावन्तावपसर्पिणौ।
क्रोधरक्तेक्षणौ वीरौ सन्दष्टो(ष्टौ)ष्टपुटावपि ॥ ८७० ॥

मुञ्च मुञ्चेति जल्पन्तौ खोञ्च खोञ्चेति भाषिणौ।
स्खलद्गतियुतौ वीरौ क्षिपन्तौ[10] पुरतः सह ॥ ७१ ॥

रुधिरोक्षितसर्वाङ्गौ लम्बमानान्त्रमालिकौ।
क्षुरिकायां विभिन्नायां पतितायां करादपि ॥ ७२ ॥

विच्छिन्नशस्त्रबाहौ च चरणे परिखण्डिते।
निवारणार्थं युद्धस्य दण्डं मध्ये निवेशयेत् ॥ ७३ ॥

अपक्षगामी नृपतिर्धर्मयुद्धं प्रवर्तयेत्।
निहन्तृणां[11] जयो युद्धे दैवेनैव प्रवर्तते ॥ ७४ ॥

प्रतिज्ञापालकानां तु जयं दद्यान्नृपः स्वयम्।
प्रसाददानकं भूरि वस्त्रकाञ्चनभूषणम् ॥ ७५ ॥

---

१ D कः। २ A तेत्य। ३ D यः। ४ D ङ्कं। ५ D ङ्कं यै। ६ D यं। ७ D तौ। ८ A च। ९ A द्धत्वे। १० A हतृणां।

ग्रामानश्वांस्तथा निष्कान्[1] वृत्तिं दत्वा तु जीवितम् ।
मृतानां बन्धुरक्षार्थं परलोकक्रियाकृते ॥ ७६ ॥

कृपादानं प्रदातव्यं काञ्चनं भूरि भूभुजा ।
एवमुक्तविनोदेन दिनशेषं समाप्य च ॥ ७७ ॥

विसर्ज्य च जनान् सर्वान्प्रविशेद्राजमन्दिरम् ।
एवमङ्कविनोदोऽयं कथितो सोमभूभुजाः[2] ॥ ७८ ॥

इत्यङ्कविनोदः ॥ ९ ॥

अथ मल्लविनोदोऽपि कथ्यते राजवल्लभः ।
मल्लास्तु त्रिविधा ज्ञेया उत्तमो मध्यमोऽधमः ॥ ७९ ॥

उत्तमो ज्यै(ज्ये)ष्ठिको[3] नाम मध्यमोऽन्तरज्येष्ठिकः[4] ।
कनिष्ठो गोवलो ज्ञेयः कार्यप्राणगुणोत्तरात् ॥ ८८० ॥

आविंशतेर्वत्सरेभ्यो भविष्णुर्मल्ल[5] उच्यते ।
तत ऊर्ध्वं त्रिंशदब्दात्प्ररूढः परिकीर्तितः ॥ ८१ ॥

ततः परं हीयमानो नियुद्धे त्वक्षमो भवेत् ।
महाकायो महाप्राणो मल्लविद्याविशारदः ॥ ८२ ॥

ज्येष्ठिकः कथ्यते मल्लः प्राणविद्याधिकोऽपि वा ।
अर्धेन ज्येष्ठिमल्लस्य कायप्राणगुणैस्तु[6] यः ८३ ॥

हीयमानो भवेन्मल्लो नाम्ना सोऽन्तरज्येष्ठिकः[7] ।
ततोऽपि हीयमानश्चेदेतैरेव गुणैस्तथा ॥ ८४ ॥

गोवलो नाम मल्लोऽसौ नियुद्धे वेगवान् वरः ।
वेगल्लः[8] सरलो दीर्घो भविष्णुः शैशवे भवेत् ॥ ८५ ॥

जङ्घाकाण्डे कोष्ठके च हनुदेशेऽस्थिसारवान् ।
द्वात्रिंशतां वत्सराणां पाल्यंशो(शे)[9] देशविश्रुः(श्रु)तः[10] ॥ ८६ ॥

पूर्णासु तासु पालीषु वर्तयिष्ये नियोधनम् ।
एवं समादिशन्मल्लान् सर्वान् क्षोणिपतिः स्वयम् ॥ ८७ ॥

---

१ A पत्नीं । २ A वीरनन्दनः । ३ D जे । ४ D जे । ५ A यः । ६ A णोऽ । ७ D जै । ८ D वेग । ९ D तां । १० A षोडश । ११ A स्तृताः ।

पोषार्थं द्रविणं तेभ्यो दत्त्वा पश्चाद्विसर्प(र्ज)येत् ।
भविष्णवः प्ररूढाश्च पोष्या बृंहणभोजनैः ॥ ८८ ॥

माषैर्मांसैस्तथा दध्ना पिष्टैः क्षीरविमिश्रितैः ।
घृतेन सितया चैव विदार्या वाजिगन्धया ॥ ८९ ॥

घृतेन भृष्टैः कुष्माण्डैश्चूर्णितैः सितयान्वितैः ।
योषितां दर्शनात्स्पर्शात्संल्ला(ला)पात्सङ्गमादपि ॥ ८९० ॥

संरक्ष्यो यत्नतो मल्ला विशेषेण भविष्णवः ।
एकान्तरे दिने कुर्युः श्रममश्रमहेतवे ॥ ९१ ॥

पृथक् पृथक् स्वगेहेषु निजैर्गोवलकैः सह ।
गोवँलैः सह कुर्वीत नियुद्धं प्राणवर्धनम् ॥ ९२ ॥

संस्थानानि च चत्वारि कल्पयेयुर्दृढानि च ।
विज्ञानानि च सर्वाणि तेभ्यसेर्युरशेषतः ॥ ९३ ॥

वक्ष्यामि स्थानकानाञ्च विज्ञानानां च लक्षणम् ।
कक्षे पूर्वापरे घृत्वा प्रोत्तानपतितस्य हि ॥ ९४ ॥

तत्कपोलं स्वपार्श्वेन सम्पीड्यार्धाङ्गकं भवेत् ।
पुरः कक्षं समादाय पूर्ववत्पातितः स हि ॥ ९५ ॥

मूर्ध्नि कूर्मासनं बध्द्वा भजेद्वाप्येकपादके(कम्) ।
उत्तानप्रतिमल्लस्य निवार्य चरणद्वयम् ॥ ९६ ॥

उदरस्योपरिस्थानं स्थानं करवलं स्मृतम् ।
स्वयमुत्तानपतितो जठरागमनोद्यतम् ॥ ९७ ॥

पादाभ्यां पीडयन् मध्ये जठरस्थानकं भवेत् ।
पराङ्मुखस्य मल्लस्य स्थितस्य पतितस्य वा ॥ ९८ ॥

कक्षामाक्रम्य पार्श्वाभ्यां पृष्ठस्थानकमाचरेत् ।
उक्तानि स्थानकान्येवं विज्ञानानि प्रचक्ष्महे ॥ ९९ ॥

---

१ D पौषा । २ A श्च । ३ प्रे । ४ A बृ । ५A क्षयेत्त । ६A मल्लान्वि । ७ A वा । ८ A श्वेत्पु । ९ A ल । १० A जेत् । ११ A ढां । १२ D प । १३ A नंतंस्था । १४ A न । १५ A खलं, A खं । १६ A च्छा ।

स्वरूपेण तथा नाम्ना विस्तरेण यथागमम् ।
अर्धाङ्गस्थानकच्छे(स्थे)न मल्लेन स्थूलवर्ष्मणा ॥ ९०० ॥

पीडनान्मुखदेशस्य विज्ञानं स्यात्तदेव तु ।
स्थित्वैवार्धाङ्गके स्थाने पादस्याकर्षणं बहिः ॥ १ ॥

बहिः पणमितिज्ञेयं विज्ञानं पादमोटनम् ।
शिरःस्थानकमास्थाय गृहीत्वैकेन मूर्धकम् ॥ २ ॥

अन्येन तत्करस्याधः क्षिप्तेन स्वकरे धृते ।
बहिर्भागे च वलिते विज्ञानं बाहुमोटनम् ॥ ३ ॥

तस्यैव परिद(ह)त्तस्य मोटने बाहुसौ भवेत् ।
जङ्घाभ्यां च भुजाक्रान्तौ ताभ्यां शिरसि पीडिते ॥ ४ ॥

पुरः कक्षां समाकृष्य गुणालं प्राणघातकः (कम्) ।
ग्रीवायाः सभुजायाश्च पादेनाक्रमणे सति ॥ ५ ॥

अन्यैजान्ववबद्धेन कुर्यादुत्तरढोङ्गरम् ।
शिरःस्थितेन मल्लेन विक्षेपायोद्यतं पदम् ॥ ६ ॥

गृहीत्वा सक्थियुग्मेन कक्षे निक्षिप्य पार्ष्णिकम् ।
उत्तानजानुदेशस्य कटियन्त्रेण पीडनम् ॥ ७ ॥

पट्टिशं नाम विज्ञानं जानुसन्धिप्रभञ्जनम् ।
अनेनैव प्रकारेण बाहुसन्धिप्रपीडनम् ॥ ८ ॥

छुडुकी नाम विज्ञानं प्राह सोमेशभूपतिः ।
अधो विधाय तद्वाहोः पूर्ववत्पीडनं यदि ॥ ९ ॥

विज्ञानमन्तश्छुडुकी बाहुसन्धिप्रभञ्जनी ।
मन्यां कक्षे विनिक्षिप्य भुजेनैकेन संयुताम् ॥ ९१० ॥

गलं प्रकोष्ठेनापीड्य तत्करेण करान्तरम् ।
सन्धौ प्रगृह्य जठरं सक्थिभ्यां परिपीडयेत् ॥ ११ ॥

---

१ D क्षे। २ A छिन्नौ चार्धाङ्गिकौ। ३ A व। ४ A न। ५ D च। ६ D चाटु A चापु। ७ A च्छा। ८ A ध्यौ, ष्णौ। ९ A न्व। १० D न्यद् ज्ञात्वा च वाहिन। ११ A त्व। १२ A रा। १३ A कां। १४ A दि। १५ D छण्डु A छड। १६ A धो। १७ A त्य। A १८ D न्तो बुडकी। १९ D नीः। २० A क।

ततस्तद् ढोङ्कुरं नाम विज्ञानं जीवघातनम् ।
अर्धाङ्गस्थानके स्थित्वा बाहुभ्यां मध्यमुन्नयन् ॥ १२ ॥

पार्श्वेन पीडयन् कण्ठं कक्षामूरुं स्वजङ्घया ।
तुर्यष्टिरिति विज्ञेयं विज्ञानं मध्यभञ्जनम् ॥ १३ ॥

शिरस्थानकविज्ञानान्यमूनेकादशैव तु ।
स्थाने करवले स्थित्वा वक्त्रे क्षिप्त्वा निजोदरम् ॥ १४ ॥

पादमुद्वहं नाम्ना विज्ञानं श्वासरोधनम् ।
उरसा पीडनं तद्वद्विज्ञानं मुखपट्टकम् ॥ १५ ॥

हस्तद्वयेन वक्त्रस्य पिधानं मुस्तिकाह्वयम् ।
स्थित्वा करवले स्थाने मणिबन्धस्य मोटनम् ॥ १६ ॥

क्रियते यत्र तत्प्रोक्तं कुट्टनं करभञ्जनम् ।
बाहुभ्यां मध्यमाक्रम्य जङ्घामाक्रम्य जङ्घया ॥ १७ ॥

जानुसन्धिविभागार्थं भजेच्चरणपट्टिशम् ।
परस्य जानुसन्धौ तु करं निक्षिप्य कञ्चनं ॥ १८ ॥

जङ्घाभ्यामूरुमाक्रम्य विदध्याल्लोलपादकम् ।
जठरस्थानके स्थित्वा बाहोर्यत्र निपीडनम् ॥ १९ ॥

सन्दंशाकृतिबाहुभ्यां सन्दंशं नाम तद्भवेत् ।
जङ्घां विधाय मन्यायां जानुसन्धिनिपीडितां ॥ २० ॥

चूर्दां वा पूर्वकक्ष्यां(क्षां)वा कर्ष(र्षन्) ढोङ्कुरमाचरेत् ।
ऊरुभ्यां मध्यमाक्रम्य पादौ निक्षिप्य कक्षयोः ॥ २१ ॥

आविध्य बाहुना जङ्घे कुर्याज्जवलशङ्खकम् ।
साम्याज्जवलशङ्खस्य पादस्यैकस्य पीडनात् ॥ २२ ॥

---

१ A स्वस्त, स्तत्त । २ A ठाङ्कुरक । ३ A मञ्चनं । ४ A त् । ५ D adds these two lines । ६ A ब । ७ A पो । ८ D ह्व, द्धव । ९ D कः । १० D सि । ११ A ब । १२ D ट्यकं A दार्कं । १३ A म । १४ D नः । १५ A भ्यामरु । १६ A न्त्र । १७ A सद । १८ D प्रपीडिताम् । १९ A ता २० D डा । २१D वत्कच्छा । २२ A क्का । २३ D पाद । २४ A जङ्घैः । २५ D वेन ।

उक्तं कक्षवडं[1] नाम विज्ञानं पादभञ्जनम् ।
सर्वाङ्गं पीडयेद्यत्र मध्यमाक्रम्य तिष्ठतः ॥ २३ ॥

सुमुखी नाम विज्ञानं सङ्कोचादङ्गसाधनम् ।
ऊरुभ्यां मध्यमाक्रम्य मन्यां कक्षान्तरे क्षिपेत् ॥ २४ ॥

ज्ञेयं गूढं गु[3]( ढाङ्गु )लिर्नाम विज्ञानं कण्ठमोटनम् ।
पृष्ठस्थौ[4]( न )कमास्थाय बाहू[5] कक्षान्तर्निगतौ[6] ॥ २५ ॥

मन्यायां सङ्गतौ कृत्वा करशाखानिबन्धनौ ।
ताभ्यां सम्पीडयेन्मन्यां कुर्वंश्चाधोमुखं शिरः ॥ २६ ॥

ऊरुभ्यां मध्यमापीडय युज्यो[10]द्वरुडपक्षकम्[11] ।
पृष्ठस्थैः[12] प्रतिमल्लस्य पृष्ठपृष्ठे[13] भुजं बलात् ॥ २७ ॥

आ[14]कृष्य वर्तयन्कुर्याद्विज्ञानं वेसर्णा[16]ब्दु( ष्टनं बु )धः ।
जानुसन्धौ क्षिपेज्जङ्घां पतितैः[17] स्यादवाङ्मुखम् ॥ २८ ॥

उरसा पीडयेत्पादं तदङ्गं[18]वलनं भवेत् ।
मन्यां कक्षान्तरे कुर्याद्बाहुं गरुडपक्षवत् ॥ २९ ॥

मध्यपीडनयोगेन भवेत्सेदु[20]पवेदनम् ।
एकद्विन्यङ्गुलीं[21] मुक्त्वा[22] करशाखाचतुष्टयम् ॥ ९३० ॥

भज्यतेऽङ्गुष्ठवर्ज्यं तद्विज्ञानं चतुरङ्गुलम् ।
बाहुना बाहुमाविध्य धृत्वा चान्येन मुद्धं[23]कम् ॥ ३१ ॥

मोट्यते[24] तु शिरोस्तियग्विज्ञानं तद्द्वधा(दा)भिधम्[25]
हस्तौ पादौ च शीर्षं च पद्भ्यामावेष्टयेत्[26] पीडनात् ॥ ३२ ॥

विज्ञानं तत्समाख्यातं डोकैं[27]रं सकुटुम्बकम् ।
विज्ञानान्येवमुक्तानि बन्धमोटनकारणम्[28] ॥ ३३ ॥

---

१ A टं। २ A गुधि। ३ D मु। ४ D ढ। ५ H यक्र। ६ D हु। ७ D रोक्षिपेत्। ८ D याः। ९ D न्यूर्ध्वौ। १० D ज्ज्या। ११ A रुड। १२ A स्था। १३ D ष्ठं। १४ A स्वा। १५ A र्तयः, र्धय। १६ A णेबु D नेबु। १७ D तस्यद्य। १८ D लव। १९ A न्म। २० A वै। २१ A ली। २२ A क्ता। २३ A द्ध। २४ A माद्य। २५ A रोति। २६ A द्य। २७ A त्कृ। २८ A बधमोड।

वक्ष्यामि वज्रनोपायान्विधिवच्छास्त्रदृष्टितः।
छुडुक्यां[1] तु प्रयुक्तायां भ्रमित्वा तां निषेधयेत् ॥ ३४ ॥

मुखस्योपरिजङ्घां[2] वा निक्षिप्य विनिवारयेत्।
पट्टिशेन गृहीताङ्घ्रिम्[3] स्त्रिवृत्त्यापनयेन्न[4]तम् ॥ ३५ ॥

बाहुमोटनविज्ञानं हस्तौ संयोज्य वारयेत्।
शिरस्थानगनं मल्लं बाहुभ्यामुत्क्षिपेद्[5]बलात् ॥ ३६ ॥

पादाभ्यामवकर्षेद्वा देहं वा वर्तयेदवाक्।
स्थितं करवँले[6] स्थाने जयेच्छुः[7] प्रतिमल्लकम् ॥ ३७ ॥

पश्चात्कक्षान्तरं (र) न्यस्तपादाङ्गुष्ठेन कर्षयेत्।
अशक्य(क्त)श्चेत्[8]तथा ऋक्षमूरुभ्यां तस्य सक्थिकम् ॥ ३८ ॥

निपीड्य धारयेन्मल्लं[9] यथा( था )नान्यक्षमो भवेत्।
जठरस्थानसंलग्नं[10] (ग्नां) पुरः कच्छां[11] विधार्य च ॥ ३९ ॥

कूर्पराभ्यां निपीड्योरू[12] अवसृत्य विमोचयेत्।
तथा मोचयमानस्य जङ्घे धृत्वा निजाङ्घ्रिणा ॥ ९४० ॥

नाभिदेशे विनुद्याथ पातयेद्धरणीतले।
पात्यमानस्तथा मल्लः पादं पश्चात्प्रसार्य[13] च ॥ ४१ ॥

तिष्ठेत्स्थैर्यमथालम्ब्य यथा न पतति क्षितौ।
पालीदिने नियुद्धाख्यः श्रम एवं[14] निवेदितः ॥ ४२ ॥

स च प्रभाते कर्तव्यो[15] विज्ञायो (नो) पायसिद्धितः।
उ(स)पालीदिवसे प्रातर्वालुकाभृतगोणिकाः ॥ ४३ ॥

बाहुभ्यामुत्क्षिपेच्छक्त्या पादाभ्यां च मुहुर्मुहुः।
भारं सोढुं स कर्तव्यो[16] ज्येष्ठैर्मल्लैर्विशेषतः ॥ ४४ ॥

भारश्रमोऽयमाख्यातो गात्रप्राणविवर्धनः।
भ्रमणार्थं ततो गच्छेत्क्रोशमेकं बहिः पुरात् ॥ ४५ ॥

---

१ A छुडक्या ज्ञानभोगेन यामित्वा। २ A ङ्घा। ३ D यान्वि। ४ A दृग। ५ D व। ६ A यस्थं। ७ A ह। ८ A श्च। ९ A यन्म। १० A ङ्ग। ११ D क्षां। १२ D रुं। १३ A सर्पयेत्। १४ A व। १५ D व्योविज्ञायो। १६ A व्या।

निवर्तेत तथा तूर्णं श्रमोऽयं भ्रमणाभिधः ।
पुष्करिण्यां तडागे वा नद्यां च प्रविशेज्जलम् ॥ ४६ ॥

कण्ठदघ्नं ततस्तोयं बाहुभ्यामवलोडयेत् ।
जङ्घाबलावहः पूर्वैः कथितो भ्रमणश्रमः ॥ ४७ ॥

बाहुप्राणकरो ज्ञेयो द्वितीयः सलिलः(ल)श्रमः ।
स्थितौ तुदेतामन्योन्यं कराभ्यां ब(बा)हुयुग्मकम् ॥ ४८ ॥

सायङ्काले विधातव्यो बाहूपेक्षणकः श्रमः ।
आश्लेषयोग्य(ग्यं) सुश्लक्ष्णमूर्ध्वं(र्ध्व) बाहुतलोन्नतम् ॥ ४९ ॥

दृढं निखानितं स्तम्भं चर्चितं चन्दनादिना ।
उत्प्लुत्याक्रम्य सक्थिभ्यां बाहुभ्यां चैव वक्षसा ॥ ९५० ॥

दृढं सम्पीड्य तं स्तम्भं पद्भ्यामूर्ध्वं समाश्रयेत् ।
बाहुभ्यां च ततोरुभ्यामावर्तनविवर्तनैः ॥ ५१ ॥

अधश्चोर्ध्वं च संश्लेष्य स्तम्भेन श्रममाचरेत् ।
एवं कृतश्रमा मल्लाः पुष्टा हृष्टाः समागताः ॥ ५२ ॥

विज्ञपेयुर्महीपालं मल्लाध्यक्षपुरःसराः ।
पार्ल्य(ल्यः) पूर्णा इहास्माकं पोषिता च निजा तनु(नुः) ॥ ५३ ॥

जितश्रमा वयं जाता नियोधयं महीपते ।
इति विज्ञाप्यमानस्तु गुणा(णां)स्तेषां विचारयेत् ॥ ५४ ॥

भेदैर्द्वादशभिर्युक्तान्मिथस्तेषां नियोधने ।
महाकायस्तु यो मल्लो भीरी स परिकीर्तितः ॥ ५५ ॥

बलाढ्यः कथ्यते प्राणी ऊर्जलश्च सुशिक्षितः ।
संस्थाननिरतो ज्ञेयो यः स्थाने सुस्थितासनः ॥ ५६ ॥

श्रमं न याति यो युद्धे बहुयोधी स कथ्यते ।
विज्ञानेन गृहीतोऽपि यो मुञ्चति न भाषते ॥ ५७ ॥

नास्फालयति हस्तेन सम्बद्धैः पतितो ह्यधः ।

---

१ D न । २ A तः । ३ D पाति । ४ A त । ५ A धं । ६ D adds this line । ७ A आधाश्चार्धं । ८ D पाल्याः । ९ D स्वपुत्रवत् । १० A ज । ११ D क्ताः मि । १२ A भी । १३ D कर्ज्व A कर्जा । १४ A परी । १५ D न । १६ A न्धः । १७ A रधेः ।

वलनं सहते यस्तु स भवेद्वलनेसहः ॥ ५८ ॥

यो रक्षति हि विज्ञानं मल्लो रक्षणको ह(म)तः ।
आशुप्रयुक्ते[1] विज्ञाने[2] तदपाये परं[3] द्रुतम् ॥ ५९ ॥

स मल्लो ढकणो धन्यः[4] शीघ्रविज्ञानकारकः ।
परप्रयुक्तं[5] विज्ञानं पररन्ध्रं च पश्यति ॥ ९६० ॥

दर्शनाख्यक्रियायोगान्मल्लो[6] दर्शन उच्यते ।
उत्प्लुत्य यो लगेत्कण्ठे स मल्लो लँगनो[7] भवेत् ॥ ६१ ॥

मर्यादापालको युद्धे नियतः परिकीर्तितः ।
एवंविधगुणान् मल्लान् समकायवयोबलान् ॥ ६२ ॥

नियुद्धे योजयेद्राजा करास्फालनपूर्वकम् ।
प्रतिज्ञां ते च जल्पन्ति शृणुयात्तां नराधिपः ॥ ६३ ॥

घटिकाभ्यन्तरे देव मोटयेत्प्र(प्र)तियोधिनम् ।
मल्लद्वयं मोटयामि जल्पत्येवं तथापरः ॥ ६४ ॥

मल्लत्रयं भिनद्मीति वदेदन्योऽपि ज्येष्ठकः[8] ।
विज्ञानेनाहमेकेन पातयामीति भाषते ॥ ६५ ॥

यस्मिन्नेव स्थित(तः)स्थाने तस्मिन्नेव निपातयेत्(ये) ।
एवं कृतप्रतिज्ञांस्तांन्विमर्द्य[9] च ततो निशि ॥ ६६ ॥

महत्तरं समाहूय महीपालः समादिशेत् ।
अलङ्कुरुष्व वाक्याडं[10] त(चारुखाडव)ज्ञेहं देवमण्डपम् ॥ ६७ ॥

इत्यादिष्टो नृपेन्द्रेण ततो ग्रा(ग्र)हमहत्तरः ।
स्तम्भैः षोडशभिर्युक्तं गृहं कृत्वा समायतम् ॥ ६८ ॥

पश्चिमे तु दिशाभागे चतुरस्रां सुविस्तृताम् ।
सार्धहस्तसमुत्सेधां वेदिकां तत्र कारयेत् ॥ ६९ ॥

---

१ A क्षु । २ D तदपाय । ३D परमं । ४ A न्या । ५ A क्त । ६ A द्म । ७ A लगतो । ८ A ध । ९ A भ । १० A कम् । ११ D द्यं ।

वेदिकाग्नेयकोणे तु कुर्याच्छ्रीकृष्णमण्डपम्।
वेदिकायाः[1] पुरोदेशे दशहस्तसुविस्तृता(त)म् ॥ ९७० ॥

त्रिंशद्धस्तपरीणाहं वितस्तिद्वयघातवत् ( खातकम् )।
पूरयेच्च ततः खातं ग्रामसञ्जातया मृदा ॥ ७१ ॥

मृत्तिकां सेचयेत्तोयैः कुद्दालैश्च निखार्तयेत्।
चौर(ल)येच्चालिनीभिश्च दृषदादीन्विशोधयेत् ॥ ७२ ॥

सुश्लक्ष्णां मृत्तिकामीषदार्द्रां[4] शुद्धां च कारयेत्।
एवमक्खोडकं[5] कृत्वा प्रातरागत्य भूपतिम् ॥ ७३ ॥

विज्ञापयेद्बृहामात्यः सर्वं सम्पादितं मया।
ततः कौतुकसंयुक्तो[6] मल्लाध्यक्षं समादिशेत् ॥ ७४ ॥

आवाह्याखिलान् मल्लान् नियुद्धायेति भूपतिः।
गृहीतवचना(नो)ऽध्यक्षो विनयानतकन्धरः ॥ ७५ ॥

निर्गत्य च तथा कुर्याद्यथादिष्टं महीभुजा।
ततः करेणुकाः सर्वाः प्रेषयेच्च पृथक् पृथक् ॥ ७६ ॥

ज्यैष्ठिकानां च मल्लानां तूर्याणि च बहूनि च।
सौवर्णशृङ्खलास्तेषु नेत्रपट्टं[11] पृथग्विधम् ॥ ७७ ॥

शृङ्गारार्थं यथायोग्यं दापयेच्च पृथक् पृथक्।
चन्दनालिप्तसर्वाङ्गाः स्वर्णशृङ्खलभूषिताः ॥ ७८ ॥

दधिमण्डेलभक्तांश्च[13] भुक्त्वा स्वल्पं प्रसाद्य[14] च।
गृहीताक्षततूर्यास्ते आरोहेयुः करेणुकाः ॥ ७९ ॥

म(ग)व्हरीतूर्यनादेन समायाता नृपाङ्गणम्।
कृतभोजनशृङ्गारैः[15] सायाह्ने सेवकैः सह ॥ ९८० ॥

पुत्रमित्रकलत्रैश्च विशेदाखाडकं तदा।
भुजास्फालननादेन पूरयन्तो दिगन्तरम् ॥ ८१ ॥

---

१ A याम्। २ A ड। ३ A सा। ४ A दार्द्रां चापि। ५ A क्खावडं D खाडकं। ६ D कौ। ७ A व्हायाखि। ८ A वयतो। ९ D पश्येद। १० A ङ्ग। ११ A त्र। १२ A रे।

विज्ञप्तेयुस्ततो भूपं सर्वे[१] मल्लाः समागताः ।
पुष्पाञ्जलिं गृहीत्वा च कृष्णे[२] कृष्ण(त)नमस्कृतिः ॥ ८२ ॥

सिंहासनं समारुह्य सर्वान्[३]स्थाने निवेशयेत् ।
यस्य येन कृतं[४] पूर्वं युद्धाय करताडनम् ॥ ८३ ॥

आहूय तानसौ मुक्ता योधयेत्पृथिवीपतिः ।
चर्मणं[५] परिधास्यं च दृढं[६] कच्छां विवेष्टच च ॥ ८४ ॥

जूटकं बन्धयित्वा तु भुजावास्फाल्य सन्मुखौ ।
नियुध्येतामुभौ मल्लौ रोधनैः प्रतिरोधनैः ॥ ८५ ॥

प्रकोष्ठधारणैश्चैव मणिबन्धविमोचनैः ।
कच्छधारणमोक्षाभ्यां पातनैरधरै[१०](रव)पातनैः ॥ ८६ ॥

बाहुसङ्घट्टनैश्चैव[११] तथा पादैरघट्टनैः ।
आश्लेषैः पीडनैश्चैव विश्लेषैरपसर्पणैः ॥ ८७ ॥

उत्प्लुत्य[१२] लंगनैः[१३] कण्ठे जठरे पृष्ठतस्तथा ।
भ्रमणैर्भ्रामणैश्चैव[१४] वलनैर्वर्तनैस्तथा[१५] ॥ ८८ ॥

सन्निपातावधूतैश्च[१६] तोलनैः स्फालनैस्तथा ।
नानाविधैश्च विज्ञानैर्विविधैर्बन्धमोचनैः[१७] ॥ ८९ ॥

श्रान्ताश्चोत्तानपतिताः स्वेदार्द्रीकृतविग्रहाः ।
कर्दमालिप्तसर्वाङ्गा मुकुलीकृतलोचनाः ॥ ९० ॥

मुञ्चन्तः श्वासफुत्कारं दृश्यन्ते[१८] ते समाकुलाः ।
द्वावप्येवंविधौ[१९] दृष्ट्वा समीकुर्यान्नृपेश्वरः ॥ ९१ ॥

आ(अ)श्रमस्य जयं दद्यान्मोटनाच्च विशेषतः ।
एवं नियोज्यं[२०] तान् सर्वान् सजयान् भूरिकाञ्चनैः ॥ ९२ ॥

वस्त्रैराभरणैर्यानैर्वाहैश्च परितोषयेत् ।
विसर्ज्य[२१] च ततो मल्लान् सेवकानितरानपि ॥ ९३ ॥

---

१ A नमे । २ A सर्व । ३ A ष्या । ४ A र्व । ५ A वि । ६ A तः । ७ D कृत । ८ A वलमं । ९ D ढां । १० D घः । ११ A नैचै । १२ D त्य च । १३ D लगेत् । १४ A चर्मणो । १५ A तेश्च । १६ D द्ध । १७ D ते । १८ ष्वनाकुलान् । १९ A र्धं । २० D ज्य । २१ A ज्य ।

मल्लयुद्धप्रकारान्तं[1] ब्रुवाणः प्रमदान्वितः ।
एवं मल्लविनोदेन नीत्वा वासरशेषकम् ॥ ९४ ॥

सुखासनं समारुह्य प्रविशेद्राजमन्दिरम् ।
मल्लानां लक्षणं युद्धं[2]श्रमं[3]श्च परिपोषणम् ॥ ९५ ॥

कथितं सोमभूपेन सर्वमल्लोपकारकम् ।
उक्तो मल्लविनोदोऽयं सोमेश्वरमहीभुजा ॥ ९६ ॥

इति मल्लविनोदः ॥ ६ ॥

ताम्रचूडविनोदस्तु साम्प्रतं परिकीर्त्यते ।
कुक्कुटानां च सद्भिस्तु ज्ञातव्या जातयः पुरा ॥ ९७ ॥

आकारः पोषणं चैव शुभं[6] रूपं च शाकुनम् ।
आयोधनप्रकारश्च व्यवस्थाश्च जयाजये ॥ ९८ ॥

कुक्कुटानामिदं ज्ञात्वा पश्चात्कुर्यात्तदाहवम् ।
पादौ सितौ सिते चारे[8] नखराः पाण्डुराः शुभाः ॥ ९९ ॥

लोचने च तथा शुक्ले शुक्लप्राणो विशेषतः ।
शङ्खध्वनिनिभो नादस्तीक्ष्णाग्रा पिच्छसन्ततिः ॥ १००० ॥

कम्बुग्रन्थिनिभं शीर्ष[10][11] यस्यासौ शङ्खजातिकः[12] ।
चरणौ पाण्डुरच्छायौ दीर्घौ[13]श्चाङ्कुलयः कृशाः ॥ १ ॥

दीर्घो देहस्तथा काश्यं वक्रौ[14] दीर्घा च नासिका ।
मृदुप्रहारसंयुक्तं मन्दयुद्धं[15] भवेत्स्थिरम् ॥ २ ॥

यस्यासौ स भवेज्जात्या कुक्कुटो गुरुसंज्ञकः ।
उन्नतः सितवृत्ताङ्गिः पृथुवक्षस्थलो महान् ॥ ३ ॥

आक्रम्य युध्यते शूर अंशुजातिः प्रकीर्तितः ।
सूक्ष्मैः[16] शोणपादश्च सितशुक्तिसमन्वितः ॥ ४ ॥

शुक्लाक्षो दीर्घशब्दश्च[17] जात्या नारः प्रकीर्तितः ।
हारिद्रौ चरणौ वापि[18] सितौ वा कृष्णबिन्दुकौ ॥ ५ ॥

---

१ A रान्ते । २ A द्धं । ३ A माच्च । ४ D तो । ५ A हवमिच्छद्भिर्ज्ञा । ६ A श्रुतं । ७ A र । ८ A ण्ड । ९ A ण । १० A न्धि । ११ A र्षं । १२ A की । १३ A र्घं । १४ A क । १५ D द्वय । १६ A श्मो । १७ A रावो । १८ D चा ।

कांस्यवर्णौ भवेतां वा प्रियङ्गुकणबिन्दुकौ ।
कृष्णाश्च नखरा यस्य कृष्णो वा चित्रितोऽपि वा ॥ ६ ॥

रक्ते[1] दृशौस्त(त)लस्तब्धो गृध्रजातिः स कुक्कुटः ।
श्यामला शुक्लयो[3] यस्य किञ्चित्पाण्डुरतां श्रितः ॥ ७ ॥

कृष्णा[4] रेखा वचौलेम्भो जात्यातेगोः[6] स कथ्यते ।
कृष्णवर्णोऽपि दीर्घाङ्गो वक्रतुण्डो रणे क्षमः[8] ॥ ८ ॥

बृहन्नाथो(दो)महाकायो जात्या श्रोणिः प्रकीर्तितः[10] ।
कृष्णपादो मारनेत्रः कृष्णपक्ष्मातिदीर्घकः ॥ ९ ॥

वैश्वयंश्च[12] शिरो युक्ते(द्धे) सर्पजातिः प्रकीर्तितः[13] ।
चरणौ हरितच्छायौ धारे शुक्ले च लोचने[15] ॥ १०१० ॥

आकारो वर्तुलो यस्य तं विद्यात्कूर्मजातिकम् ।
कन्धरादेशसञ्जातं पिच्छं केसरसंज्ञितम्[16] ॥ ११ ॥

त्रिकस्थानसमुद्भूतं बर्हमन्तरकं[18] विदुः ।
पुच्छे जातानि दीर्घाणि सक्थिस्थानि भुजानि तु ॥ १२ ॥

शाखादयोऽपि[19] कथ्यन्ते महिलापिच्छसंज्ञया ।
तेषामूर्ध्वगते पिच्छे दीर्घेषु(पुं)पिच्छसंज्ञिते ॥ १३ ॥

योषित्पिच्छवहिस्थानि वालश्चान्यनृजूनि[20] तु ।
निर्मांसे (सो) पादतलकः ह्रस्वाच्च(श्च)रणशाखिकाः ॥ १४ ॥

आरे वृत्ते तथा जङ्घे संश्लिष्टसमशुक्तिके[22] ।
बृहतीबीजसङ्काशा शुक्तयः कूर्पराश्रिताः १५ ॥

क्रोडपश्चिमपादाभ्यां पादयोर्वक्रता भवेत् ।
क्रोडदेशो विशालः स्याद् ग्रीवा दीर्घा च पीवरा ॥ १६ ॥

स्थूलं शिरस्तथा वृत्तं गर्भस्थे लघुलोचने[22] ।
स्थूला कुब्जा तथा वासा पेशलं तनु वासरम् ॥ १७ ॥

---

१ A क्तौ। २ A शो। ३ A क्ल। ४ A ष्णले। ५ A A चो। ६ A त्यागोः। ७ A तां। ८ A रण। ९ A णः। १० A ताः। ११ A च। १२ A यश्च। १३ D ता। १४ A रोच। १५ D सज्जि। १६ A रिकां। १७ A ये। १८ A र्धं। १९ D जंति। २० A सू। २१ A ब्रह्मन्ती। २२ A भोज।

केसरं विशदं दीर्घं तथा मकरिका वरा[1] ।
अंसौ समुन्नतौ शस्तौ ह्रस्वाह्रस्वविलम्बिनौ[2] ॥ १८ ॥

कर्कशानि च पिच्छानि पृष्ठं कूर्मवदुन्नतम्[3] ।
संलग्नः पुच्छसन्धिः स्यात्समं पुंच्छं[4] प्रशस्यते ॥ १९ ॥

दीर्घा[5] वालधिका शस्ता महिलापिच्छकं लघु ।
पुंपिच्छे[6] वायसे (चायते) स्यातां पृष्ठभागोऽतिविस्मृ(स्तृ)तः[7] ॥ १०२० ॥

एवं लक्षणसंयुक्तान् सुभटान्कुक्कुटान् वरान् ।
धारयित्वा कुलाये च तज्ज्ञैस्तान् परितो(पो)षयेत् ॥ २१ ॥

रसोदनैर्घृतोपेतैर्दध्ना च परिमिश्रितैः ।
अङ्गुष्ठतर्जनीयोगान्निष्पीड्य शिखरं दृढम् ॥ २२ ॥

इतरैः कराशाखाग्रैर्वक्त्रं व्यादाय भोजयेत् ।
धात्रीफलप्रमाणांश्च ग्रासान् यत्नेन भोजयेत् ॥ २३ ॥

पाययेच्छीतलं तोयं क्षालयेदुष्णवारिणा ।
मुखं सशेखरं लिम्पेन्मृदा लवणयुक्तया ॥ २४ ॥

निष्पावपत्रस्वैरसैर्निशया वा विलेपयेत्[8] ।
चंङ्क्रामयेत्समनाक् पश्चाद्यामैकमतन्द्रितः[9] ॥ २५ ॥

खेलयेत्पांसुले स्थाने करीषे वा सुचूर्णिते ।
मध्यंदिने कुलायेषु निक्षिपेत् कुक्कुटान् पृथक् ॥ २६ ॥

सायं पुनस्तथा भोज्यै[10](ज्याः)तैलेनाभ्यज्य युक्तितः ।
शेखरं मुखदेशं च जङ्घां पादतलं तथा ॥ २७ ॥

उष्णाम्बुप्लुतवस्त्रं तु निष्पीड्य स्वेदयेच्छनैः ।
वासयष्टिं[12] समारोप्य शाययेन्निशि कुक्कुटान ॥ २८ ॥

मार्जारादिभयाद्रक्षेत्प्रयत्नात्परिपालकः ।
एवं सम्पोष्य यत्नेन कुक्कुटान् युद्धकोविदान् ॥ २९ ॥

---

१ D राः । २ D ह्रस्वौह्रस्वावलम्बिनौ । ३ A पुष्पं । ४ A र्घं । ५ पुपि । ६ A गेऽतिविस्मृतः, गोविनिस्तत D गेतिविस्मृता । ७ A य । ८ A स । ९ A वाधि । १० A चक्रा । ११ A ज्य । १२ A ष्टि ।

पत्रिकालम्बनं कृत्वा ध्वजदण्डं समुत्क्षिपेत्।
ततः प्रसादचित्तैश्च कुक्कुटाहवलम्पटैः॥ १०३०॥

प्रतिपक्षीकृतं(तैः) सार्धं योधयेत्कुक्कुटान्नृपः।
प्रत्यर्थिषु तथा मुख्यां विधाय प्राणवल्लभाम्॥ ३१॥

तया सह प्रकुर्वीत कुक्कुटाहवमुत्तमम्।
वारे शनैश्चरे रात्रौ सम्मार्ज्य धरणीतलम्॥ ३२॥

सुलिप्ते मन्दिरस्यान्तरालिखेद्रतिमण्डलम्।
ग्रन्थिभ्यां नियतं सूत्रं कृत्वैकादशमुष्टिकम्॥ ३३॥

चतुरस्रं प्रकुर्वीत तेन मण्डलकं समम्।
प्राक्प्रत्यगायते रेखे द्वे मध्ये दक्षिणोत्तरे॥ ३४॥

एवं नवपदं क्षेत्रं समं यत्नात्प्रकल्पयेत्।
मध्यमं ब्रह्मणः कोष्ठं प्राच्यमिन्द्रस्य कोष्ठकम्॥ ३५॥

वन्हेराग्नेयकं कोष्ठं दक्षिणं यमकोष्ठकम्।
नैर्ऋ(ऋ)त्यं नैर्ऋ(ऋ)तं कोष्ठं पाश्चात्यं वरुणस्य च॥ ३६॥

वायव्यं वायुसंज्ञं स्यात् कौबेरं भैरवास्पदम्।
ईशानमीशकोष्ठं स्यात् तत्प्राच्यौं बहिरालिखेत्॥ ३७॥

सूर्यमण्डलकं वृत्तमर्धमिन्दोश्च मण्डलम्।
दक्षिणे दिङ्मुखे लेख्यं क्षुरिके शक्रकोष्ठके॥ ३८॥

उत्तराग्रा भवेत्पूर्वा दक्षिणा पश्चिमानना।
इन्द्रगेहालिखेत्पूर्वं कोष्ठकं तत्प्रमाणकम्॥ ३९॥

तोरणालङ्कृतं कुर्यात्त्रिशूलत्रयभूषितम्।
अग्निकोष्ठस्य तत्कोणे चुल्लीवद्विन्दुकत्रिकम्॥ १०४०॥

आलिखेद्यमकोष्ठस्यैं याम्ये रेखासमाश्रिता(तम्)।
मातृकागणमुद्दिश्य पङ्क्तितो बिन्दुसप्तकम्॥ ४१॥

---

१ A समर्प्य। २ D न्तेआ। ३ A न्धि। ४ A प्रच्या। ५ D नैर्ऋतं कोष्ठं पाश्चात्यं ज्ञेयं तद्वरुणस्य च। ६ A तेर। ७ D च्यामिन्द्रकोष्ठकं। ८ A णोदङ्मुखं। ९ D ख्ये। १० A स्यायामे।

त्रिकोणं[1] वारुणात्कोष्ठात्पश्चिमं[3] कोष्ठमालिखेत्[2] ।
तत्कोष्ठमध्ये विलिखेत्कुक्कुटस्य पदद्वयम् ॥ ४२ ॥

आग्नेयं[4](य)शिरसं सर्पं[5] विलिखेद्वायुकोष्ठके ।
कौबेरे[6] भैरवो लेख्यो दक्षिणाशाशिरो(रा) महान् ॥ ४३ ॥

कपालं[7] कर्त्रिका(कां) हस्त(हस्ते) त्रिशूल(लं)डमरुं[8] दधत् ।
शालिपिष्टस्य कल्केन शङ्खकल्केन वा बुधः ॥ ४४ ॥

मण्डलं रातिनामेदं शुचौ देशे समालिखेत् ।
आचार्या मन्त्रमुच्चार्य तत्तत्कोष्ठगतान्सुरान्[10] ॥ ४५ ॥

गन्धिभिर्विविधैः[11] पुष्पैस्ताम्बूलैर्धूपदीपकैः ।
इङ्गिताकारतत्त्वज्ञैर्जयाजयविचक्षणैः ॥ ४६ ॥

सेवाकारैश्च संवेष्ट्य समन्ताद्रतिमण्डलम् ।
तत्रैको मोक्षको दक्षः पूर्वाभिमुखमास्थितः ॥ ४७ ॥

त्रिकोणकोष्ठकस्यान्ते स्थापनीयो महीभुजा ।
तत्रैकं शुभसंयुक्तं सम्प्राप्तविजयं पुरा ॥ ४८ ॥

पाण्डुरं तु सिते पक्षे कृष्णं कृष्णे तु कुक्कुटम् ।
मोक्षको नृहरेर्यानं कुक्कुटं गरुडं तथा ॥ ४९ ॥

ध्यात्वा समाहितो भूत्वा मन्त्रमुच्चारयेदिमम् ।
ॐ गरुडानां सुवर्चो पक्षपक्षित्वनंतेरं[14] ग्रवत[15] अमा याहि स्वाहा ॥१०५०॥

पक्षौ वक्षः प्रयत्नेन त्रिकोणस्थपदस्थितम्[16] ।
जयेत्युक्त्वा विमुञ्चेत्तं[17] प्राङ्मुखं चरणायुधम् ॥ ५१ ॥

विमुक्तस्ताम्रचूडस्तु यद्वर्णं कुसुमं स्पृशेत् ।
चञ्चुर्वा[18] तद्वर्णमांशंसेत्कुक्कुटं प्रतियोधिनम्[19] ॥ ५२ ॥

ततोऽपसार्य पुष्पाणि वारिणा परिषिच्य[20] च ।
पुनस्तेनैव करुणं मोक्तव्यश्चरणायुधः ॥ ५३ ॥

---

१ A णव । २ A को । ३ A मः । ४ D यः । ५ A र्पं । ६ A रू । ७ D ल । ८ A रू । ९ A तत्कोष्ठं च । १० A न्त्रा । ११ D सुगन्धै । १२ A हरिमात्मानं । १३ A य । १४ A त । १५ A न तरय । १६ A ताम् । १७ D त्तद् । १८ A च्चा । १९ D मास्याते । २० D षिं ।

संलग्नपिच्छैः[1] शीघ्रं चेत्तोरणाभिमुखं व्रजेत् ।
ऊर्ध्वं दक्षिणनेत्रेण संविष्टो विजयं वदेत् ॥ ५४ ॥

इन्द्रकोष्ठं समाविश्य क्षुरिकामुत्तराननाम्[2] ।
मुष्टौ स्पृशन्[3] जयं शंसेदितरां वाँऽग्रदेशतः ॥ ५५ ॥

तस्मिन्कोष्ठे समास्थाँय घनवर्षमहीतले ।
दक्षिणे वित्तवर्षे च जयं शंसत्यसंशयँम्[4] ॥ ५६ ॥

तत्र थो[5] यदि वीक्षेत पादयोरन्तरालकम् ।
दक्षिणेन समावृत्य पश्यन्पृष्ठं जयं वदेत् ॥ ५७ ॥

तत्रस्थो) चरणाग्रेण दक्षिणेन शिखी स्पृशेत् ।
नासां वा नखराग्रेण मस्तकं वा जयी भवेत् ॥ ५८ ॥

परस्परसँमं[6] स्पृष्टं पक्षयुग्मं समुत्क्षिपेत् ।
तत्रस्थो जयमाशंसेत्कूँजन्वा[7] दक्षिणं व्रजेत् ॥ ५९ ॥

अनलस्य गृहे स्थित्वा स्थित्वा पिच्छनिभः सरन् ।
पक्षावास्फालयन्[8]वापि जयमाख्याति निश्चितम् ॥ १०६० ॥

तत्रस्थः पश्चिमं बिन्दुं[9] स्पृशन्स्था(शंश्चा)प्यप्रदक्षिणम् ।
परिवृत्य व्रजेन्[10]शीघ्रं कुक्कुटो विजयी भवेत् ॥ ६१ ॥

दक्षिणं कोष्ठमाविश्य कूटजं लग्नपिच्छगः ।
प्रसार्य कन्धरादूर्ध्वं सँम्पश्यन्[11] जयमादिशेत् ॥ ६२ ॥

तत्र प्रदक्षिणं कृत्वा घटयित्वा तु वर्त्मनि ।
दक्षिणे पुच्छमाधूय नेत्रं भित्त्वा जयी भवेत् ॥ ६३ ॥

तत्रस्थान्बिन्दुकांश्चञ्च्वा विशमाने(नो) च संस्पृशेत् ।
मूँलं[12] चाँदाक्षिणो[13] रा(या)यात्कुक्कुटो विजयी भवेत् ॥ ६४ ॥

नैऋ(ऋ)त्यँ[14] कोष्ठमासाद्य विनिमील्य विलोचने ।
शेते जठरमुन्नम्य जयँवांश्चरणायुधः ॥ ६५ ॥

---

१ D च्छं । २ D नु । ३ D स्पर्शं । ४ D त्रा । ५ A स्थां । ६ A यः । ७ A स्था । ८ A तृ । ९ A स्व D ख । १० D म । A ११ त्कूजत्वा । १२ D यित्वा । १३ A न्दुस्पृशंस्त्वच्छा F शंश्वस्था । १४ A जंशी । १५ D सजयन् । १६ A स्थू । १७ D वा । १८ A णाराया । १९ D तं । २० A यंवा ।

तत्रस्थानलकोणेन कृकवाकुर्विनिर्गतः ।
तद्गृहे मक्षिकां वापि कीटं वा खण्डयञ्जयी ॥ ६६ ॥

पुच्छं प्रसार्य वा तत्र जानुभ्यां वा महीं स्पृशेत् ।
निर्गत्य पुरुषं चञ्च्वा संस्पृशन् वा जयी भवेत् ॥ ६७ ॥

जलेशस्य गृहे स्थित्वा दक्षिणं चरणं पुरः ।
प्रसार्य चञ्च्वा भूदेवीं स्पृशन् विजयवान् भवेत् ॥ ६८ ॥

तत्रस्थं दक्षिणं भ्रान्त्वा भ्रुकुलीकृतपुच्छकम् ।
व्याघ्रवच्चालेद्यस्तु स जयी कुक्कुटो मतः ॥ ६९ ॥

विकीर्य पुच्छं तत्रस्थं चञ्च्वा पृष्टं स्पृशन्नपि ।
पादेन विलिखन् भूमिं जयमाप्नोति कुक्कुटः ॥ १०७० ॥

तस्माद्दुद्धाट्य वदनं ग्रीवामूर्ध्वं प्रसार्य च ।
जृम्भते यस्तु पक्षीशस्त्वरितं विजयी भवेत् ॥ ७१ ॥

कुलायकोष्ठके तिष्ठन्नव्रजन् घटयन् दृशौ ।
शिशुवज्जृम्भमाणस्तु विजयी चरणायुधः ॥ ७२ ॥

आसाद्य कोष्ठकं वा(प्रा)च्यमुपविश्य महीतलम् ।
चञ्च्वा स ताडयन् पक्षी विजयं ध्रुवमाप्नुयात् ॥ ७३ ॥

तत्रत्यो रङ्गमूर्धानं खादंश्चञ्च्वा जयी भवेत् ।
साशं ( सोऽश्नन् ) दंष्ट्राङ्कुरं वापि कूजन्वाऽपि मुहुर्मुहुः ॥ ७४ ॥

ऐशाने कोष्ठके स्थित्वा भैरवायुधवाससी ।
चक्षुर्वा संस्पृशञ्चञ्च्वा कुक्कुटो जयभाग् भवेत् ॥ ७५ ॥

कुबेरभवने स्थित्वा निक्षिपेद्गजवत्पदम् ।
चञ्चुना दक्षिणे भागे भूमौ घर्षञ्जयी भवेत् ॥ ७६ ॥

उत्क्षिपन्नपि पुष्पं च मोक्षं कर्ष( र्षन् ) जयी भवेत् ।
निर्गत्य शाम्भवात्कोष्ठात् भ्रमित्वा च प्रदक्षिणम् ॥ ७७ ॥

---

१ A धन्वा । २ A दुद्यम्य । ३ D ल । ४ A न्त्र । ५ D घटयेद्दृशौ A घटयन्दिशौ । ६ A त्रान्यो । ७ D र्ष्णौ । ८ D दन्त्वावि । ९ A दष्ट्राङ्कुरवा । १० A जत्वा । ११ A त्रैर । १२ A ज्यावहम् । १३ This line is omitted in D । १४ A ष्ठे ।

चञ्च्वा स्पृशन्निशानाथं जयमाप्नोति कर्मठः ।
ब्रह्मणः कोष्ठके स्थित्वा चक्षुषी[1] विनिमीलयन्[2] ॥ ७८ ॥

उत्क्षिपन् वदनं स्थित्वा विजयी चरणायुधः ।
तत्रस्थः कुक्कुटो गाढं ग्रसते गगनाङ्गणम् ॥ ७९ ॥

उत्क्षिपन् दक्षिणं पक्षं समानं विजयी भवेत् ।
रेखाद्वितीयसम्पाते कीलके वहते[3] यदि ॥ १०८० ॥

कीलकं वापि चोंक्कामेद्धन्याद्वा यदि घोणकम् ।
मध्यमेन खुरेणाथ वामं कण्डूयते यदि ॥ ८१ ॥

धुनुते वामतः पुच्छं तस्य चक्षुर्विभिद्यते ।
घर्षतो यदि चञ्च्वग्रं[4] नखस्योपरि संस्पृशेत् ॥ ८२ ॥

सन्धिं वा जानुनस्तस्य लोचनं स्फुटति स्फुटम् ।
वामेन चरणेनाथ स्पृशत्यङ्गं यथा निजम् ॥ ८३ ॥

तदङ्गं भिद्यते तस्य नासाँ चञ्चैव भज्यते ।
चरणस्य बहिर्भागं चञ्च्वग्रेण निहन्ति चेत् ॥ ८४ ॥

पुच्छं प्रसार्य धुनुते कुक्कुटः स पलायते ।
पिच्छानि सर्वगात्रेषु विकीर्णानि समानि चेत् ॥ ८५ ॥

दक्षिणं पादतलकं चञ्च्वा कोश्चति चेत्स्वकम् ।
नखं वामपदाक्रान्तगाढं यदि विकर्षति ॥ ८६ ॥

भिन्दन्नक्षस्य[5] नयनं कुक्कुटः समराङ्गणे ।
दक्षिणेन पदेनाङ्गं संस्पृशन् परघातनः ॥ ८७ ॥

दक्षिणे नतचेष्टाभिरादिशेज्जयमात्मनः ।
ग्रीवामाकुञ्च्य रसनां[6] दर्शयन् यदि जृम्भते ॥ ८८ ॥

उत्क्षिपेच्च मुहुः शीर्षं सङ्ख्या( ङ्ख्ये ) वा विषमे जयः ।
दक्षिणं पादमुत्क्षिप्य मुष्टिं[7] बद्ध्वावतिष्ठते ॥ ८९ ॥

---

१ A भ्रं । २ A षा । ३ D येत् । ४ D धुव A F हव । ५ A चक्कोमेह । ६ A ञ्च्वा । ७ A सां । ८ A ञ्च्वा । ९ These two lines are omitted in D । १० A द । ११ A णोत्र । १२ A च । १३ A ष्टिबद्ध ।

उत्क्षिप्तं दक्षिणं रूपं जयमाप्नोति निश्चितम् ।
प्रसार्यं दक्षिणं पादं सह पक्षेण कुक्कुटः ॥ १०९० ॥

अस्पृशन् रभसा कर्षञ्जयं शंसत्यवारितम् ।
दक्षिणाङ्गकृताचे(श्ये)ष्टाः सौष्ठवेन समन्विताः ॥ ९१ ॥

रत्यामन्यत्र देशे वा खलके वा जयावहाः ।
गतिः प्रदक्षिणा शस्ता वीक्षणं चारु दक्षिणम् ॥ ९२ ॥

अङ्गस्य गाढता श्रेष्ठा कथिता सोमभूभुजा ।
रत्यां निरीक्षमाणानां दक्षिणां(णं) जयवादिनाम् ॥ ९३ ॥

दीपोत्थकज्जलेनैषां शिखरे तिलकं न्यसेत् ।
निदाघे घटिताः पक्षा आषाढे सम्भवन्ति च ॥ ९४ ॥

यावदाश्वयुजं मासं तावत्तिष्ठन्ति कोमलाः ।
अत ऊर्ध्वं दृढाः पक्षास्ततो युद्धं प्रकल्पयेत् ॥ ९५ ॥

योधयेत्फाल्गुनं यावत्तत ऊर्ध्वं न योधयेत् ।
रत्यां निरीक्ष(क्षि)ता ये तु कुक्कुटा जयकारिणः ॥ ९६ ॥

प्रातः स्वल्पं प्रभोर्ऽयाथ निरीक्ष्याः पुनरेव ते ।
शुभाश्चेष्टा भजेयुर्ये प्रभाते कुक्कुटाः पुनः ॥ ९७ ॥

युद्धार्थं परिकल्प्यास्ते पञ्च सप्त नवाथवा ।
पट्टैश्च पट्टिकाभिश्च चन्दनैः कुङ्कुमैरपि ॥ ९८ ॥

माल्यैराभरणैश्चैव मण्डनीयास्तु नर्तकाः ।
वादकाः पुष्पमालाभिर्मण्डनीयाश्च लेपनैः ॥ ९९ ॥

अन्योन्यविजयस्वच्छाः(स्थाः) कुक्कुटायोधलम्पटाः ।
कुक्कुटायोधविज्ञाने तज्ज्ञा भूष्याश्च मण्डनैः ॥ ११०० ॥

सेवकारान् जयज्ञांश्च विशेषेण विभूषयेत् ।
उच्छ्रितध्वजकादन्ये ध्वजं हर्तुं समुद्यताः ॥ १ ॥

---

१ D सत्येन । २ D छावन । ३ D हः । ४ A त्या । ५ D गज । ६ A ते । ७ A त्या । ८ A यो । ९ A यात्रा । १० A स्थि । ११ A वान्य ।

तूर्यनादेन संहृष्टाः कुर्वन्तः सिंहगर्जितम् ।
कल्पितान् कुक्कुटान् श्लिष्टान्[1]संयोज्य च पुनः पुनः ॥ २ ॥

प्रहरत्रितयादूर्ध्वं गच्छेयुः खलकं पुरः ।
त्रिंशद्धस्तपरीणाहं सुवृत्तं वेदिकावृतम् ॥ ३ ॥

बहुभिर्मेढकैर्[2]बद्धं समन्तान्मृदुभूमिकम् ।
पांसुकर्दमपाषाणैर्वर्जितं सुसमं दृढम् ॥ ४ ॥

पूर्व[3]द्वारसमोपेतं पुष्पमण्डपिकायुतम् ।
प्रतीच्यां कल्पितास्तेऽपि पूर्ववद्धायनोच्छ्रितम् ॥ ५ ॥

खलकं कारयेद्राजा मण्डपेन समन्वितम् ।
राज्ञः पक्षस्थिताः सर्वे विशेयुः[4] खलकं पुरा ॥ ६ ॥

उत्तरे दक्षिणे वापि दिग्भागे खलकान्ततः ।
आच्छाद्य कुक्कुटान्वस्त्रै[5]स्तिष्ठेयुः पङ्क्तिसंस्थ[6](स्तु)ते ॥ ७ ॥

प्रतिपक्षागमालोके[7] कारयेत्तत्पराजयः(यम्) ।
ततो राजा समभ्येत्य वेदिकां परिभूषयेत् ॥ ८ ॥

अन्तःपुरपुरन्ध्रीभिः प्राणवल्लभया युतैः[8] ।
पूर्वोक्तेन प्रकारेण तदन्यां दिशमाश्रिताः ॥ ९ ॥

नृपपक्षस्थिताः सर्वे तिष्ठेयुर्गलगर्जनाः ।
ततः पूर्वं[9] प्रविष्टा[10] ये चेष्टाविज्ञानकोविदाः ॥ ११[11]० ॥

वीक्षेरन्[12]तेऽन्यमुद्घाघन्कु(न्नन्तरुद्घाट्य कु)क्कुटान्स्वान्पृथक् पृथक्[13]
तत्र यः शुभचेष्टाभिरन्वितस्तान्नियोधनम् ॥ ११ ॥

प्रकुर्युः कुक्कुटं तज्ज्ञा आरे चान्योऽस्य[14] तेजयेत् ।
क्षुरिकाग्रेण संलेख्य पुत्रिकां धरणीतले ॥ १२ ॥

तन्नेत्रमृदमादाय दक्षिणाराने क्षिपेत् ।
यथा तैक्ष्ण्यं भजेदारा तथा कुर्वीत कोविदः ॥ १३ ॥

---

१ A द्यायुद्धायोग्याश्च वा, श्लिष्टान् समशक्तिकवायुना । २ D डकैर्बद्धं सङ्कृतान् । A ढके तद्वत्स । ३ A पूर्वं । ४ A षा । ५ A त्त । ६ A स्त्रि । ७ A क्य । ८ D खलकेतत्प । ९ D सभामेत्य । १० A प । ११ D न्वि । १२ D र्वं । १३ A ति । १४ A क्ष्ये । १५ खन्यमुद्घाट्य कुक्कुटान् । १६ D न्यौस्थि

आरे[1] सुनिशिते कृत्वा भूमिं[2] संसिच्य[3] वारिणा ।
तन्मृदा लेपयेत्पादावूर्ध्वं तालुं[4] च शेखरम् ॥ १४ ॥

अनेनैव प्रकारेण कुर्वीरन्(र्वाणः) प्रतिशस्यते ।
मिश्रपादो जयेच्छ्वेतं तं श्वेतो जयमेचकम् ॥ १५ ॥

मिश्रपादो जयेत्कृष्णं[5] एवं पक्षान्तरैः सह ।
योधयेत्कुक्कुटौ[6] पश्चाद्धीरनीराजितावुभौ ॥ १६ ॥

विकीर्णकेसरगतौ चञ्चुप्रान्तेन[7] मस्तकम् ॥
कुक्कुटौ[8] केसरारूढां चिबुकालम्बिकूर्चिकाम्[9] ॥ १७ ॥

पृष्टं पुच्छं तथा धृत्वा धृत्वा[10] पादप्रहारिणौ ।
मुखदेशं विभिन्दन्तावारघातैः[11] परस्परम् ॥ १८ ॥

वमन्तौ रुधिरं वक्त्रात्स्रवच्छोणितमस्तकौ ।
मुहुर्मुहुर्धार्यमाणौ मार्जकैः पाय(द)तोदकैः[12] ॥ १९ ॥

वाससा विध्यै(ध्य)मानौ तौ[13] मुच्यमानौ पुनः पुनः ।
धावन्तावनुगच्छन्तौ भ्रमन्तौ तावपि क्वचित्[14] ॥ ११२० ॥

सम्मुखौ पुनरायातौ गोपायन्तौ च मस्तकम् ।
सन्दष्टचञ्चुकौ शान्तौ पाता(दा)घातविवर्जितौ ॥ २१ ॥

निश्वसन्तौ विकास्यास्यं शिथिलीकृतपक्षकौ ।
श्लथपुच्छौ[15] स्तब्धपादौ तिष्ठन्तौ च सवेपथू(थु)[16] ॥ २२ ॥

सन्दष्टचञ्चुकौ शान्तौ पादाघातविवर्जितौ ।
लिखिताविव तिष्ठन्तौ जङ्घान्तन्यस्तमस्तकौ[17] ॥ २३ ॥

पक्षान्तस्थितवक्त्रौ च मिथः संश्लिष्टकन्धरौ ।
घटिताविव तिष्ठन्तौ चेष्टाहीनौ[18] च कुक्कुटौ ॥ २४ ॥

न स्पृष्टव्यौ तथा भूमौ मार्जकैर्धर्मवर्तिभिः ।
अन्यथा मार्जकैः स्थित्वा प्रोज्झनीयमसृक् सृतम्[19] ॥ २५ ॥

---

१ D रा । २ A मि । ३ A ष्य । ४ A ल्लु । ५ A ष्ण । ६ A टौ । ७ D करणा चञ्चु । ८ D न मिज । ९ A दीं । १० A र्चं । ११ A कु । १२ D थाघचा । १३ A तं । १४ A के । १५ D विद्य । १६ A तु । १७ D न्तावपिच । १८ D Omits this line । १९ A ष्ण । २० D यथापशू । २१ A गत । २२ D ष्ट । २३ D च्छा ।

आच्छाद्य वाससा वक्त्रं कुक्कुटस्याधिमार्जकः ।
स्वेदयेच्च (च्छ्व) सितैरुष्णैर्वारं वारं मुखोद्गतैः ॥ २६ ॥

उद्धरेत्पतितं शीघ्रं वक्त्रं च रु(ऋ)जुतां नयेत् ।
श्रमार्तं पाययेत्तोयं मार्जकानामयं विधिः ॥ २७ ॥

कुक्कुटो यस्य पक्षस्थः प्रहरेच्च यदा यदा ।
तदा तदा प्रकुर्वीरंस्तत्पक्षा गलगर्जितम् ॥ २८ ॥

मीलिते स्फुटिते चापि लोचने कुक्कुटस्य हि ।
भग्ने तु चञ्चुपुटके श्रमे वा रक्तनिर्गमात् ॥ २९ ॥

स्वीकृत्यापजयं युद्धाद्वारणीयैः स्वकुक्कुटः ।
मृते पलायिते वापि दैवादेव पराजयः ॥ ११३० ॥

पराजितानामारुह्य पृष्ठं स्कन्धं जयावहाः ।
परिहार(स)परैर्वाक्यैर्लज्जयेयुः पराजितान् ॥ ३१ ॥

परिहासपदार्थाभिर्मर्मभिर्भि(न्भि)तगालिभिः ।
त्रिपदीभिः सरामा(गा)भिर्गापयेयुः पराजितान् ॥ ३२ ॥

पराजितानामाकृष्य ध्वजयष्टि(ष्ठि)बलात्ततः ।
जयतूर्यनिनादैश्च नृत्यद्भिर्नर्तकैः पुनः ॥ ३३ ॥

करेणुकां समारोप्य कुक्कुटं विजयोर्जितम् ।
भ्रामयेत्पुरवीथीषु जयी भवनमानयेत् ॥ ३४ ॥

दिवसत्रितयन्त्वेवं विनाऽपानीयसङ्क्षयात् ।
योधयेत्कुक्कुटान्श्रेष्ठान् जयावधि महीपतिः ॥ ३५ ॥

अवधिं युद्धचमानस्य ज्ञातुं नालीं प्रकल्पयेत् ।
सौवर्णीं राजतीं वापि द्वात्रिंशत्यङ्गुलायताम् ॥ ३६ ॥

मध्ये वक्रां सुसंश्लिष्टां स्रोतसीं लोकवाहिनीम् ।
वदनेन पिधायास्यं तस्यां शून्यां (न्यं) तु वेदयेत् ॥ ३७ ॥

---

१ A सा । २ D स्य वि । ३ A खे । ४ D मि । ५ A जनां । ६ A आ । ७ A त्कांग । ८ D वा । ९ यस्तु । १० D तस्यदैव । ११ D न्वितान् । १२ A ताः । १३ A भि म । १४ A ....। १५ D नपा । १६ D चिन्ता । १७ D ट्टा । १८ D सो । १९ A नी । २० D स्याः । २१ D नु ।

जैलपूर्णां[1](र्णा)तदन्येन वक्त्रेण विनिवेशयेत्।
तोयपूर्णे घटे तस्यां[2] रन्ध्रान्निष्कासयेज्जलम् ॥ ३८ ॥

ज्वा(ना)लायाः श्लक्ष्णभागस्तु मेयस्त्वङ्गुलमानतः।
एकद्वित्रिक्रमेणैवं यावत्स्याद्वादशाङ्गुलम् ॥ ३९ ॥

ततोऽर्कवारे सम्प्राप्ते योधयेदग्रयोधिनम्।
सोमवारे तु धौरेयं[8] कुक्कुटं जलसङ्क्षयात् ॥ ११४० ॥

सलिलस्याढकं यावन्नाडी रन्ध्रेण संश्रयेत्।
मुख्यं तु योधयेत्तावत्तदर्धेनाग्रयोधिनम् ॥ ४१ ॥

द्वितीये सोमवारे स्यादाढकाद्वितयं ततः।
योधयेदाढकन्त्वेकं द्वौ प्रस्थौ[5] विनिवारयेत् ॥ ४२ ॥

पुनः प्रस्थद्वयं यावद्योधयेत्कुक्कुटौ[6] मिथः।
तद्वत्कुक्कुटमानार्थं[7] योधयेदग्रयोधिनम् ॥ ४३ ॥

तृतीये सोमवारे स्यादाढकत्रितयं जलम्।
योधयेदाढकं त्वेकं द्वौ प्रस्थौ विनिवारयेत् ॥ ४४ ॥

पुनरप्याढकं युद्धं प्रस्थमेकं निवारयेत्।
अवशिष्टं पुनः प्रस्थं योधयेच्चरणायुधम् ॥ ४५ ॥

एवं द्वादशरात्रेषु नीरमानं प्रकल्पयेत्।
ध्वजयष्टिं तु गृह्णीयुः[9] सम्प्राप्ते[10]विजया बलात् ॥ ४६ ॥

अनेनैव प्रकारेण पञ्च सोमस्य वासरान्।
योधयेत्कुक्कुटान् राजा पुरेयोधिभिरन्वितान्[12] ॥ ४७ ॥

षष्ठे वारे तु सम्प्राप्ते कुलायं परिमण्डयेत्।
वस्त्रैः काञ्चनपट्टैश्च पट्टिकामाल्यकैरपि ॥ ४८ ॥

पराजितस्ततः पूर्वं वर्णमाख्याय निक्षिपेत्।
कुलाये कुक्कुटं प्रातरन्यैरप्राप्तदर्शनम् ॥ ४९ ॥

---

१ A न। २ A र्णे। ३ A स्यां। ४ D मिथ। ५ A स्तौ। ६ A च्छाद। ७ A ध्वजक। ८ A र्धे। ९ A जि। १० A याद। ११ A ते। १२ D पुनरर्चीभिरर्चितान्।

बलवान्निक्षिपेत्पश्चात्कुक्कुटं जयशंसिनम्[1] ।
न विलम्बं प्रकुर्वीत मासार्धादधिकं क्वचित्[2] ॥ ११५० ॥

निम्बपत्रमपामार्गं सूर्यपत्र(त्रं)ससर्षपम् ।
बदरीवटपत्रं च ब्रह्मदण्डिसमन्वितम्[3] ॥ ५१ ॥

बन्धनीयं कुलायाग्रे रक्षार्थं परिकर्मणे[4] ।
रजकावटतोयेन सेचनीयौ कुलायकौ[5] ॥ ५२ ॥

नानाविधफलैः पुष्पैर्नानापक्वान्नवस्त्रकैः[6] ।
मण्डयेत्तौ[7] यथाभागमासमन्तान्मनोहरम् ॥ ५३ ॥

कुलाये मण्डिते सम्यक् करिणीमधिरोपयेत् ।
उषिता नर्तकाः सर्वे नृत्यन्तो यान्ति ते पुरः ॥ ५४ ॥

किरन्तः पुष्पवर्षाणि कुर्वन्तः सिंहगर्जितम् ।
महता तूर्यघोषेण पूरयन्तो दिगन्तरम् ॥ ५५ ॥

विभूत्या परया युक्ताः पक्षद्वितयवेदिनः ।
प्रविशेयुः खलं[8] सर्वे पराजितपुरःसरम्(राः) ॥ ५६ ॥

ताम्बूलं चन्दनं पुष्पं वस्त्राण्याभरणानि च ।
यथायोग्यं प्रयच्छन्तो[9] मानयन्तः परस्परम् ॥ ५७ ॥

नीडयोः स्थितयोः पूर्वं मण्डितौ तौ कुलायकौ[10] ।
न्यसेन्नृपतिशोभार्थं स्वे स्वे पक्षं(क्षे) निजं निजम् ॥ ५८ ॥

पुरा जिताः कुलायस्था(स्थाः)[11] परिमार्ज्य[12] पुरोऽङ्गणम्[13] ।
पृष्ठतस्तूर्यनादेन समुत्पार्द्य[14](द्य)कुलायकम् ॥ ५९ ॥

वीक्षेरन्कुक्कुटं तज्ज्ञा जयाय जयसूचकम् ।
कुक्कुटाभिमुखो भूत्वा यदि तिष्ठति कुक्कुटः ॥ ११६० ॥

न निस्सरति नीडाद्वा[15] तिष्ठेद्वापि पराङ्मुखः ।
भवेत्सङ्कुचितग्रीवो निर्दिशेत्स पराभवम् ॥ ६१ ॥

---

१ D नः। २ A सार्धाधि। ३ D ण्डी। ४ A र। ५ A खलमण्डपिकां पुष्पैः फलैः। ६ A तां तथा ७ A नन्ता। ८ A D र। ९ D ले। D १० न्या। ११ A कैः। १२ D स्याः। १३ A परसार्जा। १४ D ग। १५ A द्य। १६ A वस्ति।

भूमिं विलिख्य तिष्ठेद्वा अश्मिलानाह्वयन्ति(येत) वा।
प्रदक्षिणमुपावृत्य निःसरन् विजयी भवेत् ॥ ६२ ॥

कुक्कुटे निर्गते नीडाद्वा(द्वा)रे कुर्यात्सुतेजिते।
क्रमोऽयं प्रतिपक्षेऽपि शेषं कुर्वीत पूर्ववत् ॥ ६३ ॥

योधयेत्पूर्ववच्चौ तु पूर्ववच्च जयाजयौ।
हसनं खेलनं गीतं सर्वं पूर्ववदाचरेत् ॥ ६४ ॥

युद्धेरन्कन्दुकैः पुष्पैः पक्षिणोर्युध्यमानयोः।
हरिचन्दननीरैश्च सिञ्चेयुर्जलयन्त्रकैः ॥ ६५ ॥

कुक्कुटाकारमुद्राभिः कुङ्कुमाङ्गैरभङ्गयेत्।
पराजितं जयोपेतो ललाटे दोष्णि वक्षसि ॥ ६६ ॥

एकादशस्तथा वारो नान्दीमुख इति स्मृतः।
द्वादशः कृत्तिकट्टाख्यस्तत्राप्येवं विभूतयः ॥ ६७ ॥

तत ऊर्ध्वं न युद्धं स्यात्कुक्कुटानां कथञ्चन।
कुक्कुटानां विनोदोयं कथितः सोमभूभुजा ॥ ६८ ॥
शृङ्गारवीररौद्राश्च कृता(करुणा)द्भुतभयानकाः।
बीभत्सहास्यसंयुक्ता रसाः स्युः कुक्कुटाहवे ॥ ६९ ॥

कुक्कवाकुविनोदोऽयं वर्णितः सोमभूभुजा।

इति कुक्कुटविनोदः ॥ ७ ॥

इदानीं कथ्यते कोऽपि विनोदो लावकाश्रयः ॥ ११७० ॥

कच्छेलः खारडीकश्च गोरञ्जो विगरस्तथा।
पांसुलाश्चे(लोवे)रसश्चैताः षट् स्युर्लावकजातयः ॥ ७१ ॥

कच्छमण्डलसम्भूता कच्छेलाः परिकीर्तिताः।
तद्वंश्यास्तु गृहोत्पन्नाः खारडीका भवन्ति ते ॥ ७२ ॥

विन्ध्ये सह्ये च सम्भूता लावकाः शोणमस्तकाः।
गेरञ्जा इति विख्याता युद्धकर्मणि मध्यमाः ॥ ७३ ॥

---

१ D महिलां चा। २ A त्क। ३ D g। ४ A ङ्का, को। ५ D ङ्कादि। ६ A श कृत्तिकादा। ७ D adds this line। ८ D छे। ९ D का। १० D लः। ११ A D लो श्वेतस्ताश्च। १२ D छ। १३ D छे। १४ A द्वत्स्या। १५ A न्ध्य। १६ D गौ।

खारडीकेण संयुक्ता(क्ता) गेरञ्ज्या जायते तु यः।
विस(ग)रः स समाख्यातो मिश्रजातिरसन्ततिः ॥ ७४ ॥

कच्छदेशं परित्यज्य येऽन्यदेशसमुद्भवाः।
अशोणमस्तकाः सर्वे लावकाः पाशु(पांसु)लाः मताः ॥ ७५ ॥

खारपांसुलयोगाच्च लावः समुपजायते।
वेरसो नाम संज्ञेयः पांसुलानामयं बली ॥ ७६ ॥

सर्वेषामुत्तमः प्रोक्तः खारडीविगरस्तथा।
वेरसः पांसुलश्चैव मध्यमौ परिकीर्तितौ ॥ ७७ ॥

पांसुलः पांसुलेनैव युद्धं कर्तुं भवेत्क्षमः।
गेरञ्जी लाविका श्रेष्ठा विगराणां प्रसूतये ॥ ७८ ॥

युद्धकर्मसु गेरञ्जः कातरः परिकीर्तितः।
आश्विनात्फाल्गुनं यावत् प्रसूयन्ते तु लावकाः ॥ ७९ ॥

तिलपुष्पोद्गमे जाता अग्रजाः परिकीर्तिताः।
मधूकपुष्पपाते तु पाश्चात्या इति विश्रुताः ॥ ११८० ॥

तस्मादाश्वयुजे तेषां यत्नं कुर्वीत सन्ततेः।
गेरञ्जी खारडी लावी महाकायी सुलक्षणा ॥ ८१ ॥

पञ्जरेषु विनिक्षिप्य पोषयेच्च प्रयत्नतः।
गोधूमपिष्टसंयुक्तं मत्स्यमांसं सुचूर्णितम् ॥ ८२ ॥

जलोष्मस्वेदितं तैलमृदितं करपल्लवैः।
अङ्गुष्ठतर्जनीयोगात्सेवाः कुर्याद्यथाविधि ॥ ८३ ॥

ताभिः सम्पोषयल्लावीर्यावनालार्द्रबीजकैः।
प्रियङ्गुतण्डुलैस्तद्वन्मुद्गानां विदलैरपि ॥ ८४ ॥

त्रिकालं भोजयेदेताः पानीयं पाययेदपि।
करीषसार्ध(सान्द्र)चूर्णेन मृत्तिकामिश्रितेन च ॥ ८५ ॥

---

१ D वरार। २ A यो। ३ A वा। ४ A आ। ५ A कास्ते। ६ DS शुभावहाः। ७ A has विचित्रं यस्य सर्वाङ्गं विगरो नामनामतः। ८ A चे ९ A य। १० D लः। ११ A व क्ष। १२ A गो। १३ D व। १४ D यातेषु। १५ A गो। १६ A ञ्जीः। १७ A र्लावीर्मं। १८ A यः। १९ A णः। २० D त्सर्वाः। २१ A वचाकृतीः।

प्रियङ्गुधान्यमिश्रेण तद्विहारं प्रकल्पयेत् ।
पूर्वाह्णे चापराह्णे च किञ्चिदातपगोचरे ॥ ८६ ॥

मध्याह्ने शीतले स्थाने स्थापयेत्ताः प्रयत्नतः ।
गैरेञ्जीसङ्गमेच्छाश्च सर्वे सुरतकांक्षिणः ॥ ८७ ॥

प्रजनने वीर्यसम्पन्नाः पोष्याः खारडिका वरैः ।
पुष्टासु तासु लावीषु विवृते स्मरमन्दिरे ॥ ८८ ॥

गर्भाशये समुच्छूने मृदुस्पर्शे व्यवापयेत् ।
गर्भाशये घनीभूते व्यक्तीभूते चा(तथा)ण्डके ॥ ८९ ॥

न लगेद्वीर्यतो यस्मात्तस्मात्काले व्यवापयेत् ।
वंशकाग्रशलाकाभिस्तालुदेशे परान्विताः (ताम्) ॥ ११९० ॥

ऊर्ध्व(र्ध्वं)वस्त्रेण सन्नद्धां मध्ये कस्रा(स्रां) विभाजिताः (ताम्) ।
पार्श्वद्व(द्वा)रैद्वयोपेता(तां) मध्यद्वारसमन्विताः (ताम्) ॥ ९१ ॥

अन्तर्जलं(जालीं) विधायास्यां दम्पती विनिवेशयेत् ।
एकस्मिन् कोष्ठके लावीमन्यस्मिन् लावकं क्षिपेत् ॥ ९२ ॥

रते(घु)मेलयेत्तौ तु द्वारमुद्घाट्य मध्यमम् ।
सम्भोगे विनिवृत्ते च पूर्ववत्पञ्जरे क्षिपेत् ॥ ९३ ॥

अन्येद्युः प्रसवे प्राप्ते लेष्व्यां जाल्यां विनिक्षिपेत् ।
गण्डकानि (काम्नि) क्षिपेद्वारि पार्श्वद्वारसमन्विताम् (न्) ॥ ९४ ॥

गण्डकाभ्यन्तरे लावी प्रविश्याण्डं प्रसूयते ।
एकान्तरे दिने प्राप्ते लावी सूते तथाण्डकम् ॥ ९५ ॥

एवं क्रमेण सा सूते बहून्यण्डानि लाविका ।
पश्चादाच्छाद्य पक्षाभ्यां विवर्सेच्छिशुवत्सला ॥ ९६ ॥

त्रिसप्तवासराण्येवं रक्षत्यण्डान्यहर्निशम् ।
ततश्चाण्डानि निर्भिद्य निःसरन्ति च पिल्लिकाः ॥ ९७ ॥

---

१ A गो । २ A श्वश्वत्स । ३ A जान । ४ A च । ५A प । ६ these two lines are omitted in D । ७ D वेदेशे । ८ A द्वांमध्य । ९ A या । १० A नर्जल्लीं । ११ D रतुर्मे A रते. । १२ A ल. द्वल्यां । १३ D तम् । १४ A संशि । १५ A न्त्य ।

तदानीमेव धावन्ति मात्रा सह बुभुक्षिताः।
ततः पुनः क्षिपेज्ज्याल्यामेव वा सह पिल्लकान् ॥ ९८ ॥

वंप्रिकीय(प्रकीटा)न्समादाय ग्रासार्थं तत्र निक्षिपेत्।
ततः क्रमात्प्रवर्त(र्ध)न्ते स्त्रीपुंसाकृत्यलक्षिताः ॥ ९९ ॥

ऊर्ध्व(र्ध्वं)मासद्वयाद्वर्त्ति यान्ति पिच्छविशेषतः।
सितासिताभ्यां राजिभ्यामुपेतैः पिच्छकैः रुजैः (चः) ॥ १२० ॥

बिभ्राणस्ते पुमांसः स्युस्ताम्रवर्णैस्तु योषितः।
त्रिचतुर्मासकादूर्ध्वं युध्यन्ते ते परस्परम् ॥ १ ॥

पृथक् पृथक् प्रकर्तव्याः पञ्जरेषु विचक्षणैः।
ततः संवत्सरादूर्ध्वं युद्धयोग्या भवन्ति ते ॥ २ ॥

अन्योऽन्यं न सहन्ते ते दर्पक्रोधसमन्विताः।
ततः श्रमं कारयेत लावकान्युद्धसिद्धये ॥ ३ ॥

लावीं पञ्जरके कृत्वा दर्शयेल्लावकस्य ताम्।
आकृष्य पञ्जराल्लावं निक्षिपेत्तमवान्तरे (वस्तरे) ॥ ४ ॥

वंभ्रीभिर्मुकुलाकारैर्निं(रोनि)मिते कलशान्विते।
अधस्ताच्च तथा चान्यं लावकं रक्षयेद्बुधः ॥ ५ ॥

दर्शयेत्तस्य कोपार्थं लावकं दर्पकूजितम्।
वि(पि)धार्य योधयेत्तन्तु वस्त्रवेण्या तु लावकम् ॥ ६ ॥

अवस्तरे स्थितं लावं वस्त्रेणाच्छाद्य शिक्षकः।
लावकीं धारणीरज्वा लम्बितां दर्शयेत्पुरः ॥ ७ ॥

धावयेत्तं(त्तां) शनैस्तज्ज्ञो लावकं चानुधावयेत्।
उत्क्षिपेच्च तथा चोर्ध्वं पक्षयोर्दार्ढ्यसिद्धये ॥ ८ ॥

पोषयेच्च तथा लावं पोषितौ पितरौ यथा।
पुष्टं जितश्रमं शूरं योधयेत्प्रतियोधिना ॥ ९ ॥

---

१ A पे. त्या। २ D नम्रकीडात्। ३ D च्छं। ४ D रः। ५ A र्णैस्त। ६ D सि। ७ A दु। ८ D पौद्गन्ध। ९ A रांला। १० D drops these lines। ११ D ये। १२ D वान्त। १३A की। १४ D र्णी। १५ A ता। १६ A यन्पु। १७ A श्रा। १८ द्झो। १९ A वा।

धात्रीफलसमाकारं मस्तकं स्थूलकन्धरम् ।
आपाण्डुरभ्रुवं ह्रस्वलोचनं कुब्जचञ्चुकम् ॥ १२१० ॥

स्व(ख)राल्पपिच्छसंयुक्तं स्थूलोरुं वृत्तजङ्घकम् ।
विशालाङ्घ्रितलं दीर्घचरणाङ्गुलिसन्ततिम् ॥ ११ ॥

पृथुत्रिकं महाकायं युद्धकर्मविशारदम् ।
ज्यैष्ठिकं तं प्रकुर्वीत लावकं वरलक्षणम् ॥ १२ ॥

अन्तर्ज्येष्ठिं प्रकुर्वीत तनो न्यूनं च लावकम् ।
ततोऽपि गुणतो हीनं विदधीती(ता)ग्रयोधिनम् ॥ १३ ॥

मात्राशतेन विंशेन पूर्यते तोयधारया ।
तावत्पात्रं प्रकुर्वीत सा नाडी कथिता बुधैः ॥ १४ ॥

एकां च योधयेन्नाडीमेकां विश्रामयेत्तथा ।
विश्रामनाडीः सन्त्यज्य योधयेत्पञ्चनाडिकाः ॥ १५ ॥

एवं च योधयेत्सप्त नव चैव यथाक्रमम् ।
हीनं मध्यं तथा ज्येष्ठं लावकं धरणीपतिः ॥ १६ ॥

वितस्त्युत्सेधसंयुक्तं हस्तत्रितयविस्तृतम् ।
किल(लि)ञ्जं कारयेन्नीलं वस्त्रेण परिगुम्फितम् ॥ १७ ॥

वृत्ताकारं तथादाय भूतले खलकाकृतिं ।
अक्खाडं नाम तज्ज्ञेयं लावौ तत्र तु योधयेत् ॥ १८ ॥

खारडीं खारडीकेन विगरं विगरेण च ।
चे(वे)रसञ्चे(संवे)रसेनैव कच्छलं कच्छलेन च ॥ १९ ॥

प्रागेव लाययुद्धार्थं योधयेदग्रयोधिनम् ।
अन्तर्ज्येष्ठि(ष्ठिं) तथा मध्ये ज्येष्ठिमं तं(मन्ते) नियोधयेत् ॥ १२२० ॥

उत्क्षिप्तोऽवस्तरो येन निर्जलावकदर्पतः ।
तस्य चेद्युध्यते लावो नवनाडीकृतावधि ॥ २१ ॥

---

१ A क्त । २ A स्वा । ३ A र्घं । ४ A ति । ५ A र्ब्यं । ६ A तो । ७ डीं । ८ A न्त । ९ D ज । १० A काम् । ११ D कनिष्ठं । १२ D कल A का । १३ D तिः । १४ A ण्डं । १५ D मध्ये । १६ D त्यश्चेत । १७ D बलवान् दर्पतः स्वयम् । १८ D धिः ।

नवनाड्यन्तरे लावो विजयेत परं यदि ।
विशेषेण जयस्तस्य तस्यैवावस्तरो चलः ॥ २२ ॥

नवनाडीकृतां सङ्ख्यां पूरयेद्यदि लावकः ।
तस्यैव विजयो ज्ञेयो येनावस्तर उच्छ्रितः ॥ २३ ॥

त(उ)च्छ्रितावस्तरस्यैव लावो यदि पलायते ।
नवनाड्यन्तरे तस्मात्तदन्यो जयमाप्नुयात् ॥ २४ ॥

अवस्तरं च गृह्णाति कृतं च पर्णमश्नुते ।
साम्ये पणो न लभ्येत समयाद्वा स लभ्यते ॥ २५ ॥

ततः प्रवर्तते(येद्) युद्धं लावकानां नरेश्वरः ।
युध्यमानास्ततो लावाश्चञ्चवा चर्वन्ति मस्तकम् ॥ २६ ॥

कृकाटिकां विधृत्वाऽथ चत्वारो(त्वरयो)त्प्लुत्य पक्षकैः ।
प्रहरन्ति मुहुः पादैर्भ्रमन्ति च विमुक्तये ॥ २७ ॥

ग्रीवांपुच्छं समुत्पाद्य(द्य) चञ्चवा भिन्दन्ति कन्धराम् ।
सन्दशवत्तथा नासां दृष्ट्वा निघ्नन्ति पक्षकैः ॥ २८ ॥

रक्ताक्तशिरसः केचिद्भिन्नग्रीवास्तथापरे ।
पिच्छैर्वियोजिताः केचित्केचिल्लोहितगात्रकाः ॥ २९ ॥

उत्खातनखराः केचित्केचित्पाटितवर्ष्मकाः ।
उत्प(त्स)न्नचञ्चवः केचित्केचिदुद्वान्तशोणिताः ॥ १२३० ॥

पुरः प्रसर्पिणः केचित्केचित्स्युरपसर्पिणः ।
आक्रान्तकन्धराः केचित् केचिदुन्नमितानानाः ॥ ३१ ॥

स्रस्ताङ्गाः स्रस्तपक्षाश्च स्रस्तग्रीवा विलोचनाः ।
स्रस्तजङ्घोरुपादाश्च स्रस्तसर्वाङ्गसन्धयः ॥ ३२ ॥

धैर्यमालम्ब्य तिष्ठन्ति व्यादायास्यं च (श्व) सन्ति च ।
तथाप्यमर्षा युध्यन्ते गात्रादभ्यधिकं मनः ॥ ३३ ॥

---

१ A फ। २ A द। ३ A दौ। ४ D वां। ५ A प। ६ A लोहितैः। ७ A त्सु। ८ A नमदा।

प्रागवस्थामतिक्रम्य त्वरितं[1] प्रहरन्ति ये।
गर्ल्गर्ज[2]श्च कुर्वन्तो नदन्ताश्च मुहुर्मुहुः॥ ३४॥

लाविका ये न वीक्ष्यँ[3](क्ष)न्ते ये च सङ्कोचिताङ्गकाः।
पलायनपरा ज्ञेया लावकास्ते विचक्षणैः॥ ३५॥

एवंविधान्परिज्ञाय पलायनपरायणान्।
अन्यँद्युद्धं समामन्त्र्य युद्धादेनान्निवारयेत्॥ ३६॥

एकस्य चञ्च्वां भग्नायां साम्यं कुर्याद्द्वयोरपि।
अक्षमत्वेन वा साम्यं द्वयोः कुर्यान्महीपतिः॥ ३७॥

शूरस्य विजयं दद्याद्द्रुतस्य पराजयम्।
इति लावकयुद्धेऽस्मिन् समयः परिकीर्तितः॥ ३८॥

इति लावकयुद्धः (द्धश) ॥ ८ ॥

इदानीं मेषयुद्धँ[4]स्य विनोदः परिकीर्त्यते।
मेषास्तु त्रिविधा ज्ञेयाश्चोलिका जटिलास्तथा॥ ३९॥

शोणवर्णास्तथा चान्ये सम्भवन्ति महीतले।
भ्रुवौ पादाश्च जठरं पुच्छमास्यं श्रुतिद्वयम्॥ १२४०॥

इति यस्य भवेत्कृष्णं चोलिकः स उदाहृतः।
एतैरेव भवेच्छ्वेतैः कृँष्णश्चोत्साहचोलिकाः (कः)॥ ४१॥

रोमाणि स्थूलदीर्घाणि तेषां कण्ठे स्तने[5] तथा।
येन केनापि वर्णेन यस्योर्णा सर्वगात्रजा॥ ४२॥

मृदुला गुम्फिता श्लक्ष्णा जटिलँ[6]ः स प्रकीर्तितँ[7]ः।
बन्धुर(रः)स्कन्धदेशे तु स्थूलसँ[8]ङ्गतशृङ्गकः॥ ४३॥

ह्रस्वाणि स्थूलरोमाणि सर्वाङ्गीणानि यस्य तु।
लोहितो यश्च वर्णेन शोणः[9] स परिकीर्तितः॥ ४४॥

विभक्ताङ्गोऽस्थिसारश्च शूरश्चाक्षैँ[10]श(त) तुण्डकः।
आवर्तः प्रोथदेशे स्याच्छतपद्या समाकृतिः॥ ४५॥

---

१ A च। २ A च्छ। ३ A जंच। ४ A क्ष्यते। ५ A न्यायु। ६ A द्धोऽथ F द्धोत्थ। ७ A त। ८ D च्छा। ९ D नौ। १० D लास्ते। ११ D ताः। १२ A स्थ। १३ A त्सङ्कक। १४ A शौ। १५ D कृत।

पुच्छेन मुकुलावर्तः सः शुभो लक्षणान्वितः ॥
पराङ्मुखो य उत्पन्नो युद्धे न स पराजितः ॥ ४६ ॥

कृष्णमस्तकमेषोऽपि शूरः स्यादिति निश्चितम् ।
तेषां तु[1] पोषणं कार्यं सूपकैश्चणकैरपि ॥ ४७ ॥

तैलाक्तया कृसरया[2] दूर्वावेष्या तथार्द्रया ।
सैन्धवं घृतसंयुक्तं सप्तमेऽहनि दापयेत् ॥ ४८ ॥

दातव्यं पोषणार्थं तु तेन रोडो बली भवेत् ।
पूर्वाह्णे चापराह्णे च भ्रममेव(येच्च) शनैः शनैः ॥ ४९ ॥

निवर्त्य पाययेत्तोयं तेन चाप्यायितो भवेत् ।
पत्ति(ट्टि)का(कां)लोहसम्भूता(तां) शृङ्गे[3] विध्वास्य कीलयेत् ॥ १२५० ॥

मुद्रिका(कां)बन्धनार्थं हि तत्रैव विनिवेशयेत् ।
शृङ्गद्वयेऽपि बध्नीयात् मटकद्वितये ध्रुवम् ॥ ५१ ॥

तिमिरे स्थापयेन्मेषं कशुनं चापि भोजयेत् ।
आदित्यवारे युद्धार्थं कारयेल्लघुभोजनम् ॥ ५२ ॥

मदार्थं पाययेन्मद्यं व्योषं वा भूर्ण(र्ज)पर्णकम् ।
क्रोधार्थं निक्षिपेद्वक्त्रे तेन युध्येत निष्ठुरम्[4] ॥ ५३ ॥

योधयेच्च ततो मेषावन्योन्यं घोरघट्टनैः[5] ।
ततोऽपसृत्य सर्पन्तौ कुर्वन्तौ शीर्षताडनम् ॥ ५४ ॥

कृकाटीमांसखण्डानि पातयन्तौ महीतले ।
युध्येते मेषकौ[6] किञ्चिपदसृत्यातिदूरकम् ॥ ५५ ॥

केचि[10](काश्चि)च्छीघ्रप्रहारांश्च कुर्वन्तौ शतसङ्ख्यया ।
उन्नयेत्पतितं योक्ता भग्नवत्सं[11] ततो नमेत्[12] ॥ ५६ ॥

पलायितस्तु यो मेषो न स शक्यः प्रयोजितुम्[13] ।
पणपूर्वं नियोद्ध्यास्ते ध्वजहेतोर्नियोधनम् ॥ ५७ ॥

---

१ D श्चान्यन्त । २ A नु । ३ A श । ४ A भृश । ५ D क्र । ६ A रः । ७ A नौ । ८ A युद्धयते । ९ A को । १० D किंचिच्छीघ्रं । ११ A पेत्य । १२ D भुग्न । १३ A स्वजयो । १४ D adds these two lines.

पलायते ततो मेषे पणो ग्राह्यो यथोदितः ।
एष[2] मेषविशेषाणां विनोदः कथितो भृशम् ॥ ५८ ॥

कथ्यते सोमभूपेन विनोदो महिषाश्रयः ।
भूलोकमल्लदेवेन कलासर्वस्ववेदिना ॥ ५९ ॥

इति मेषविनोदः ॥ ९ ॥

इदानीं कथ्यते कोऽपि विनोदो महिषाश्रयः ।
वैदर्भा(र्भ्यां)[3] कारहाटी[4]श्च जालंधन्[5]रसमुद्भवाः ॥ १२६० ॥

सौराष्ट्रमध्यदेशा(श्या)श्च महिषा युद्धवेदिनः ।
स्थूलस्कन्धा महाकाया विशालोरस्थलास्तथा ॥ ६१ ॥

कुब्जपौल(र)स्त्यपादाश्च लाक्षापिङ्गलचक्षुषः ।
हीनाः पश्चिमभागेषु भुग्नपृष्ठाः[6] समोदराः[7] ॥ ६२ ॥

अस्रस्तमेढ्रकाश्चैव ह्रस्ववर्क्रविषाणकाः ।
श्वेतकृष्णाः सपुण्ड्राश्च श्वेताङ्घ्रिश्वेतपुच्छकाः[8] ॥ ६३ ॥

ईदृशा महिषा ज्ञेया प्रशस्ता युद्धकर्मणि ।
बालान्प्रियङ्गुपिष्टेन क्षीरमिश्रेण पोषयेत् ॥ ६४ ॥

दध्ना समाषचूर्णेन बृंहयेत्तान् प्रयत्नतः ।
ऊर्ध्वं संवत्सरात्तेषां नासावेधं समाचरेत् ॥ ६५ ॥

नासायां निक्षिपेद्रज्जुं दृढां धारणहेतवे ।
पिण्याकैः पू(कपू)र्णकुल्माषैर्विदलैश्चणकस्य च ॥ ६६ ॥

कृशराभि[9]ः सतैलाभिस्तक्रैर्लवणसंयुतैः ।
तत्तत्कालसमुद्भूतैर्हरितैर्यवसैरपि ॥ ६७ ॥

जलावगाहनैस्तेषां तुष्टिं पुष्टिं च कारयेत् ।
वर्षाणां पञ्चकादूर्ध्वं दर्पवन्तो बलान्विताः ॥ ६८ ॥

महाकाया विभक्ताङ्गा युद्धयोग्या भवन्ति ते ।
महिषीवृन्दमध्यस्थौ कर्दमालिप्तगात्रकौ ॥ ६९ ॥

---

१ A यिनि । २ A क । ३ A ट । ४ A ल । ५ D स्थ । ६ A भ । ७ A रा । ८ A त्र । ९ D श्च । १० A कः । ११ A भि ।

निम्बपत्रकृतां मालां धारयन्तावुरःस्थले ॥
विमुक्तनासिकाबन्धौ तुं(शूं)लिकाप्रोतशृङ्गकौ ॥ १२७० ॥

गोपानां करतालैश्च सिंहनादैः प्रहर्षितौ ।
ऊर्ध्वमुत्क्षिप्य वदनं वीक्षमाणौ परस्परम् ॥ ७१ ॥

कुञ्जराविव दुर्धर्षौ महिषौ[2] योधयेन्नृपैः[3] ।
प्रहरन्तौ विषाणाग्रैः कोपान्मीलितमस्तकौ ॥ ७२ ॥

नर्दन्तावि(व)वसर्पन्तौ भूतलन्यस्तजानुकौ ।
उत्क्षिप्तपुच्छकौ क्रुद्धौ श्वसन्तौ वान्तफेनकौ ॥ ७३ ॥

कीनाश(नाश)लिप्तसर्वाङ्गौ क्रोधसंरक्तलोचनौ ।
तत्रैकैः पीड्यमानस्तु महिषेण बलीयसा ॥ ७४ ॥

शृङ्गाग्रदारितस्कन्धैः मैरिभैः प्रपलायते ।
पाश्चात्यभागं शृङ्गाभ्यां धारयन्ननुधावति ॥ ७५ ॥

सम्प्राप्तविजयः क्रोधाव(द्ध)ली प्रेक्षकनाशनैः ।
विनोदो महिषस्यैवं कथितः सोमभूभुजा ॥ ७६ ॥

इति महिषविनोदः ॥ १० ॥

पारावतविनोदस्य वर्णनं क्रियतेऽधुना ।
सिन्धुदेशे विशेषेण ब्राह्मणाः क्षत्रिया विशः ॥ ७७ ॥

पारापताः प्रजायन्ते शूद्राः स्युर्यत्र कुत्रचित् ।
सशिखा पादपिच्छाढ्याश्चिरकणनशालिनः ॥ ७८ ॥

ज्ञेयास्ते ब्राह्मणा जात्या पवित्राः शुभदर्शनाः ।
पादपिच्छैः समायुक्ताः शश्वत्कणनकोविदाः ॥ ७९ ॥

पारापताः शिखाहीनाः ज्ञेया क्षत्रियजातयः ।
अल्पकणसमायुक्ताः पादपिच्छविवर्जिताः ॥ १२८० ॥

पारापतास्तु विशिखा विज्ञेया वैश्यजातयः ।
श्वेताः कृष्णास्तथा शोणाः पीताश्च हरितास्तथा ॥ ८१ ॥

---

१ D शूलका शूलिनौ । २ A षो । ३ A पाः । ४ A कुद्धौ स्वसतौ वातफेनकौ । ५ A कि । ६ A क्त । ७ A क । ८ A ग्रं । ९ A न्ध । १० A भ । ११ ब । १२ A रप । १३ A ण । १४ D परा । १५ A या । १६ A श्वित्रेक्षणविशालिनः । १७ D स ।

कर्बुराः पाटलाश्चित्रा भवन्त्येतासु जातिषु ।
हरिताङ्गा नीलकण्ठाः[1] कृष्णराजिकपक्षकाः ॥ ८२ ॥

रक्तलोचनपादाश्च शूद्राः[2] पारापतास्तथा ।
देवालये तथा सौधे शैलाग्रे च वसन्ति ते ॥ ८३ ॥

न पोष्या ध्वनिहीनत्वाच्छूद्राः[3] पारापताधमाः ।
चण्डालान्त्यजजातीयाः कपोता विविधा पुनः ॥ ८४ ॥

न स्पृश्या नैव सम्पोष्या गृहस्थेन कदाचन ।
प्रमादाद्यस्य गेहान्तः प्रविष्टाश्चेत्[4] कपोतकाः[5] ॥ ८५ ॥

प्रायश्चित्तं प्रकुर्वीत वेदोक्तविधिना बुधः[6] ।
ब्राह्मणाः क्षत्रियाश्चैमे प्रशस्ता राजमन्दिरे ॥ ८६ ॥

पोषणीयाः प्रयत्नेन यवगोधूमतण्डुलैः ।
अन्यैरपि तथा धान्यैः शुक्लैरादैरथापि वा ॥ ८७ ॥

पानीयपूरितं पश्चात्पानार्थं स्थापयेद्बुधः ।
सौवर्णे राजते वापि पञ्जरे दारुनिर्मिते ॥ ८८ ॥

स्थापयेद्दम्पती[9c] राजा सदृशौ वर्णरूपतः[11] ।
पतिव्रता भवन्त्येताः पारापतकुलाङ्गनाः ॥ ८९ ॥

पारापतश्च स्वगृहं प्रवेशयति नेतरम्[12] ।
गलघूर्णितनादेन फुल्लद्रुतगलेन[13] च ॥ १२९० ॥

प्रसारितेन पुच्छेन प्रियां दृष्ट्वा प्रनृत्यति ।
चुम्बति[14] प्रेयसीं प्रीत्या परिवृत्य मुहुर्मुहुः ॥ ९१ ॥

सङ्गमं च करोत्येष वारं वारं मुदान्वितः ।
रक्षते(न्तौ)[15] चाण्डके स्नेहात् यामं यामं पृथक् पृथक् ॥ ९२ ॥

शावकान् पालयन्तौ तौ कण्ठस्थाहारदानतः ।
पारापतं तथाभूतं शिक्षितं क्रमशः पथि ॥ ९३ ॥

---

१ A ष्ठा । २ A द्रा । ३ A द्रा । ४ D चे । ५ D तिकाः । ६ A ततः । ७ A प्रो । ८ A यं । ९ D र्थे । १० A तिं । ११ D रूपवर्णतः । १२ D रः । १३ A लिं । १४ D न्ति । १५ D adds these two lines ।

तमेकं पञ्जरे कृत्वा नीत्वा दूरं समुत्सृजेत् ।
लेखपत्रं समासज्य कण्ठे तं मोचयेन्नरः ॥ ९४ ॥

त्रिंशद्योजनपर्यन्तमङ्गा याति स्मरन् प्रियाम् ।
पवित्रा दर्शनीयाश्च राजकार्योपयोगिनः ॥ ९५ ॥

अत एव महीपालैः संग्राह्यास्ते विशेषतः ।
रतिकालेऽपि ते धार्या रागवर्धनहेतवे ॥ ९६ ॥

गलघूर्णितनादेन हर्षमुत्पादयन्ति हि ।
पारापतविनोदोऽयं धर्मकर्मार्थसिद्धये ॥ ९७ ॥

इति पारापतविनोदः ॥ ११ ॥

इदानीं कीर्त्यते सद्यो विनोदः सरमाभुवः ।
आभिराः सेवुणाश्चैव कह्लेराः पडियण्ड(र्यन्त) जाः ॥ ९८ ॥

त्रैगर्ता दुग्धवाटाश्च तथा कर्णाटदेशजाः ।
आन्ध्रदेशसमुत्पन्नास्तथा च्य(च)वनवासजाः ॥ ९९ ॥

वैदर्भास्तालनीराश्च तापीतटसमुद्भवाः ।
राष्ट्रेष्वेतेषु सञ्जाताः शौर्यवीर्यबलान्विताः ॥ १०० ॥

सुरावाः सारमेयाः स्युर्नानावर्णगुणान्विताः ।
आभीराः तनुरोमाणः सेवुणाश्च तनुत्वचः ॥ १ ॥

कह्लेराः स्वच्छरोमाणः पर्यन्तास्तनुपुच्छकाः ।
त्रैगर्तास्तु महाकायाः दुग्धवाटाः कृशाङ्गकाः ॥ २ ॥

कर्णाटदेशसम्भूताः कुब्जकेशाश्च कुक्कुराः ।
आन्ध्रदेशसमुत्पन्नाः स्वल्पकाया महाबलाः ॥ ३ ॥

रोमशा वनवासाः स्युर्वैदर्भा रम्यमूर्तयः ।
स्ना(ता)लनीरसमुत्पन्नाः कान्तिमन्तोऽल्परोमकाः ॥ ४ ॥

तापीतटसमुत्पन्नाः शुनकाः कोमलाङ्गकाः ।
पाण्डुराः शोणवर्णाश्च पीतश्वेताश्च कर्बुराः ॥ ५ ॥

---

१ A साद्य । २ D वः । ३ D कथितः सोममूभुजा । ४ A कथितः । ५ A सेनु D सैवु । ६ D ह्लो । ७ D म । ८ A जः । ९ A अ । १० A शूरास्ताः । ११ A या स्य । १२ D भी । १३ D सैं १४ D ह्लो । १५ A ण । १६ A सा वा नवास ।

धूम्राङ्गाः पाटलाश्चैव तथा मेचकराजिकाः।
भ्रूनेत्रतुण्डधवलाः स(श)बलाः कृष्णरोहिताः॥ ६॥

श्वेतबिन्दुभिराकीर्णा नानावर्णास्तथापरे।
ऊर्ध्वकर्णाः श्लिष्टकर्णासा(स्त)थापतितकर्णकाः॥ ७॥

तथा स्रस्तैककर्णाश्च सारमेया भवन्ति ते।
शिरसि[1] श्वेतकेशाश्च पुच्छाग्रे चैव[2] पाण्डुराः॥ ८॥

ध्रुवावर्तैर्विहीनाश्च न ग्राह्याः कुक्कुराधमाः।
रसोनबीजसङ्काशैर्दंष्ट्राङ्कुरविराजिताः॥ ९॥

चूतपल्लवसङ्काशरसनाराञ्जिताननाः।
लाक्षारससमच्छायस्थूलोत्तुङ्गविलोचनाः॥ १३१०॥

पतितभ्रूयुगस्थूलमूर्धानो जठराननाः।
सर्जपत्रसमाकारा(:)कर्णोपान्ते ध्रुवान्विताः॥ ११॥

स्थूलदीर्घनखग्रीवाः सुस्थविस्तीर्णवक्षसः।
तनुवर्तुलमध्याश्च विशालांश(स)फलस्थलाः॥ १२॥

निर्मांसोरु(सोरू)रुजङ्घाश्च तथा वृत्ताङ्घ्रिसन्धयः।
खर्जूरबीजसङ्काशनखराः प्रिष्ठ(स्पृष्ट)भूमयः॥ १३॥

हरिणदृक्[3]समाकाराः पृष्ठप्रतनुपुच्छकाः।
कर्कशस्पर्शरोमाणः श्लक्ष्णविग्रहकान्तयः॥ १४॥

क्रोधशक्तिसमोपेताः प्रशस्ताः सरमासुताः।
एवंविधगुणोपेताः शक्तिमन्तो[4] महाबलाः॥ १५॥

वराहपुण्डरीकाश्वैर्भल्लैर्निर्भेदकोविदाः।
दीर्घनिर्मांसवदनाः कृशनासाल्पभोजनाः॥ १६॥

जिगि(ङ्गि)णीपत्रसङ्काशश्रवसस्तनुकन्धराः।
शशपृष्ठसदृक्पृष्ठाः कन्दुकाकारमस्तकाः॥ १७॥

---

१ A स्ये। २ A ष्व। ३ A शाः। ४ D निःकाश। ५ D सर्जपत्र। ६ A लास्तु। ७ A गा। ८ A न्त। ९ A ता। १० A स्त। ११ D लाः। १२ A सउ। १३ D रान्पृ। १४ A दृक्सनाकारप्रष्ठा। १५ A व। १६ A श्व। १७ D ल्लु। १८ D कृ। १९ D जं।

पिप्पिलीमध्यमध्याश्च पृथवः समजङ्घिकाः।
गोधूमसूक्ष्मनरवरास्तुण्डीफलतलास्तथा ॥ १८ ॥

ऊर्ध्वसंलग्नवक्षाश्च तनुत्वक्सूक्ष्मरोमकाः।
लताललितपुच्छाश्च पूर्वापरसुशोभिताः ॥ १९ ॥

सकृद्द्वित्रि(स्त्रिः)प्रसूताश्च वेगिन्यो ग्रहिणीर्युः(ग्राहिभिर्यु)ताः।
शशकोड्डटसारङ्गकुरङ्गहरिणैन(ण)कान् ॥ १३२० ॥

हन्तुमेताः प्रयोक्तव्यास्त्वरिताः कुक्कुराङ्गनाः।
पोष्या मांसैर्वसैर्भै(साभ)क्तैर्निशि क्षीरेण तर्पिताः ॥ २१ ॥

प्रसूता मण्डपानेन दुग्धेनैव हि बालकाः।
नीडस्थितान्वनस्थान्हन् शशान् हन्तुं विनोदवान् ॥ २२ ॥

सारमेयीद्वयं मुञ्चेत् पणपूर्वं महीपतिः।
यैस्थूनि(च्छुनी) पूर्वमाधत्ते शंसस्त(शशन्त)स्य भवेज्जयः ॥ २३ ॥

शूनीभ्यां युगपद्ग्राहे भवेत्साम्यं द्वयोरपि।
सूकरस्य बहून्मुञ्चेत्सारमेयान् महाबलान् ॥ २४ ॥

तेषु प्ररोधिनं क्रोडमूर्ध्वकेशं रुषान्वितम्।
सङ्कोचितसमस्ताङ्गं वमन्तं फेनपिण्डकम् ॥ २५ ॥

गर्जन्तं घर्घरैर्नादैर्दंष्ट्रासङ्घट्टभीषणम्।
तोमरैर्भल्लनाराचैर्निशितैस्तं प्रवेश(ध)येत् ॥ २६ ॥

ततः श्वानः प्रगृह्णन्ति स्कन्धे कण्ठे च कर्णयोः ॥
पार्श्वात्यसक्थिभागेषु द(द)शन्तः खादयन्ति ते ॥ २७ ॥

ततः किलकिलानादं कुर्वन्प्राणैर्वियुज्यते।
सारमेयविनोदोऽयं कथितः सोमभूभुजा ॥ २८ ॥

इति सारमेयविनोदः ॥ १२ ॥

---

१ A प्र। २ A रातु। ३ A कद्वि। ४ A णिच्युता। ५ A णोनका। ६ A शे। ७ A ता। ८ A का। ९ A च। १० A नाश। ११A य। १२D शुनी यं शशमाधत्ते तस्य स्याज्जय एव च। १३D विचक्षणान्। १४ A डमूर्ध। १५ A घ। ६ A नं। १७ A प। १८ A दशन्तः।

सद्यः श्येनविनोदोऽयं कथ्यते कौतुकावहः।
शालिवा[1] जावडा(ला) लङ्घु(घ्रः) प्राजिको लङ्गर्ण[2]स्तथा ॥ २९ ॥

सञ्चाणा वेसरा गृध्रास्तथा यँ[3](ज)वलकण्ठि(ट्टि)काः।
चँण्डी[4] यावावहाः श्येनाः श्येनानां जातयस्त्विमाः ॥ १३३० ॥

विनोदेषुं प्रयुञ्जन्ते ततोऽन्ये जातिमात्रकाः।
कोँणक[5]श्चेति विख्यातँः[6] पुमानल्पशरीरकँः[7] ॥ ३१ ॥

अजेंडेति[8] च विख्याता श्येनयोषाँ[9] बृहद्वपुः।
श्येनैं[10]जातिषु विख्याता विनोदेंष्वजडा[11] वरा ॥ ३२ ॥

कोणँ[12]का स्वल्पकायत्वादधमा लघुँ[13]मारकाँ[14]ः।
नवा इत्यभिधीयन्ते प्रथमे वत्सरे मताः ॥ ३३ ॥

मुक्तप्रँ[15]रूढपुच्छाश्च कुपुचाँ[16] इति विश्रुताः।
वर्षासु पुच्छं मुञ्चन्ति नवं शरदि बिभ्रति ॥ ३४ ॥

प्रतिवर्षं भवत्येवं बलिनो वेगसंयुताः।
उपायैस्तैस्तु सङ्ग्राह्याश्चतुर्भिश्चतुरैर्नवैः ॥ ३५ ॥

करैर्जालैश्च पाशैश्च चिक्कलेपैश्च युक्तितः।
सञ्चाणा वेसँरा ग्राह्या नीडस्थाश्च करग्रहैः ॥ ३६ ॥

अजातपक्षकाः शावा अलेजँम्ब[17] इति स्मृताः।
सार्धहस्तसुविस्तीर्णः(र्ण) हस्तत्रयसमन्वितम् ॥ ३७ ॥

चतुर्भिरङ्गुलैः(ल) स्थूलैः सार्धहस्तप्रमाणकैः।
दण्डैर्विधारितं कृत्वा जालं भूमौ निवेशयेत् ॥ ३८ ॥

जालकात्परतो बद्धाः स्थापनीयाः कपोतकाः।
वृक्षाग्राच्छिखरा[18]द्वाऽपि गगनाद्वा निपात्य तँम्[19](तान्) ॥ ३९ ॥

चतुर्भिरङ्गुलैः(ल) स्थूलैः सार्धहस्तप्रमाणकैः।
प्रहरन् बध्यते श्येनो जालेन परिगुम्फितः ॥ १३४० ॥

---

१ D लिवी। २ D णा। ३ D च जय F यमल। ४ F रुचेण्डी कायाश्चहाः हावाः A रुचेण्डी-वहावा। ५ D घूप। ६ D द्रोणि A द्रोण। ७ A ताः। ८ A काः। ९ D जाण्डे। १० A धा। ११ A has श्येनजातिषु विख्यातः पुमानल्पशरीरकः before this line। १२ A दोष्व। १३ D ताण F तोण। १४ A ङ्ग। १५ F नतः। १६ A गू। १७ D ध्वा। १८ D नीडस्थाश्च करग्रहैः। १९ D श्च। २० D आल २१ D राग्राद्वापि। २२ A तः।

क्रमाज्जालं[1] विधायादौ[2] चतुरस्रं समायतम्।
आपादमस्तकोत्सेधं हरित्पल्लववेष्टितम्[3] ॥ ४१ ॥

वध्रं दण्डं तथालम्ब्य कण्ठेनावशुजेन वा।
तद्विकाख्यमवष्टभ्य[4] यष्ट्यग्रस्थितपाशतः ॥ ४२ ॥

कण्ठे गृहीत्वा कर्षेत्तं[5] खादन्तं बद्धपक्षिणम्।
शीघ्रं पाशैर्विमुञ्चेत यथा प्राणैर्न मुच्यते ॥ ४३ ॥

अश्वत्थदुग्धमादाय शनैर्मृद्वग्निना पचेत्।
यावच्चिक्कणतां याति किञ्चित्तैलेन मर्दयेत् ॥ ४४ ॥

बद्धयष्टिस्तु(न्तु) चिक्केन हस्तमात्रात्प्रं(म्प)लेपयेत्।
बद्धस्य पक्षिणः पार्श्वे समन्तात्तां प्ररोपयेत् ॥ ४५ ॥

पतन्तं सहसा श्येनं पक्षिणं भोक्तुमुद्यतम्।
यष्ट्यस्ता निबध्नन्ति चिक्कलिप्ताः समन्ततः ॥ ४६ ॥

तैलेन भस्मना चिक्कं स्फोटयेत्पक्षिपिच्छगम्।
एवं धृतांस्तु तान् श्येनान्मुते(मुञ्च) पक्षपुटांस्ततः ॥ ४७ ॥

तनुबंन्धि(न्ध)बध्न(द्ध) पादान् हस्तमारोप्य यत्नतः।
तन्मुखं मांसखण्डेन स्पृष्टं[9] तद्भक्षयेद्यथा ॥ ४८ ॥

वारं वारं स्पृशेद्धस्तैस्तस्य त्रासनिवृत्तये।
जागरं कारयेच्छ्येनं रात्रौ स्थैर्योपपत्तये ॥ ४९ ॥

ततस्त्र्यहे व्यतीते तु सायंसन्ध्यासमागमे।
तरुमूले स्वयं स्थित्वा मनागुद्घाटयेद्दृशौ ॥ १३५० ॥

धारके तरुमूलस्थे सिद्धयत्येषां समुत्प्लवः।
समुत्प्लवस्य[11] संसिद्धौ कुर्याद्ध(द्ध)र्मविकासनम् ॥ ५१ ॥

चेटकान्[12] भक्षयेत्तांस्तु पोषणार्थं च धारकः।
प्रमाणेन परं दद्याद्यथा क्षुद्बर्धते भृशम् ॥ ५२ ॥

---

१ D कम्राजा। २ D थ। ३ A प। ४ D डी। ५ D ग्रे। ६ A र्षं। ७ A न्प्रक। ८ A द। ९ D ध्नान् A ध्नि। १० A स्प। ११ A त्प। १२ A व।

ग्रासगृह्णुर्यदा श्येनस्तदा हस्तान्तरं नयेत् ।
दर्शनात्कलविङ्कस्य प्रलोभ्य च शनैः शनैः ॥ ५३ ॥

कुर्यात्सु(त्सु)वर्तुलं श्लक्ष्णं दोरं हस्तप्रमाणकम् ।
एकतो मुद्रिकायुक्तमन्यतो वध्रसंयुतम् ॥ ५४ ॥

तन्मुद्रिकामध्यगतां रज्जुं दीर्घां प्रकल्पयेत् ।
तदन्तं धारको धत्ते शिक्षकश्च तथा परम् ॥ ५५ ॥

एहीति ध्वनिमाहूय चटकं दर्शयेत्पुरः ।
आनयेत्स्वकराभ्याशमाराद्दूरात्क्रमात्क्रमात् ॥ ५६ ॥

आह्वाने(नं) शिक्षिते श्येने दोरकं प्रतिमोचयेत् ।
विमुक्तदोरकं श्येनं समाह्वानमुशिक्षितम् ॥ ५७ ॥

चटकं प्रोतनयनमुत्क्षिप्तं गगनान्तरम् ।
निहन्तुं मोचयेच्छ्येनं मुष्टिमध्ये व्यवस्थितम् ॥ ५८ ॥

मुष्टिनिर्गमसिद्धं तं स्थूलपक्षिषु योजयेत् ।
बृहत्कायांस्तथा श्येनान्विना मुष्टेर्य(ष्ट्या) तु शिक्षयेत् ॥ ५९ ॥

सेवा(श्वा)णं वेसरं चैव तथा रगणजातिकम् ।
शिक्षयेन्मुष्टियोगेन तदन्यान्मुष्टिना विना ॥ १३६० ॥

विनामुष्टिं(यष्टिं) विना मुष्ट्या शिक्ष्या जलव(वल)क्कट्टिकाः ।
प्राङ्नी चैव गृध्रजाती च शशकेषु नियोजयेत् ॥ ६१ ॥

जालिवं जावलं लग्नं शिक्षयेद्वचनक्रमात् ।
वायसं करसंलग्नं दर्शयित्वा समाह्वयेत् ॥ ६२ ॥

अम्बरादागते श्येने काकं यत्नेन वञ्चयेत् ।
वञ्चिते वायसे श्येनः पुनर्गच्छति वेगवान् ॥ ६३ ॥

शिक्षयेच्च प्रदर्श्यैवमेहीति वचसाह्वयेत् ।
बहुशो वञ्चितं श्येनं वायसेनैव तर्पयेत् ॥ ६४ ॥

---

१ A क। २ A भ्यं। ३ D त्सवर्तुलां रज्जुं A त्संव। ४ A समु। ५ A क्ष्णं। ६ D क्षित। ७ A द्। ८ A न्। ९ A म। १० A यष्टिषु। ११ D ष्ट्यं। १२ D संवाणं वस। १३ D omits this line। १४ D व्। १५ A शशाणे। १६ A रादि। A १७ ने।

कङ्कादिषु विहङ्गेषु नभस्तलविहारिषु ।
मारणं शिक्षयेदेतान् बलिष्ठान् शालिवाटि(दि)कान् ॥ ६५ ॥

विनोददिवसौत्पूर्वमर्धभोजननागरौ (जागरे) ।
कारयेच्छिक्षितान् श्येनान् कोपस्यस्पार्ध(स्पर्द्धाधि)वृद्धये ॥ ६६ ॥

मांसभोजनवेलायां गिलितं पुच्छमुद्गिरन् ।
श्वेस्तने क्षुधितो ज्ञेयस्ततो मुञ्चेच्च पक्षिषु ॥ ६७ ॥

वृषवाहं समारुह्य धारकैः श्येनपाणिभिः ।
मोचकैर्मुष्टिगैःश्ये(गश्ये) नैर्वामपाणिस्थयष्टिभिः ॥ ६८ ॥

पार्श्वद्वितयपङ्क्तिस्थैर्बहुभिः परिवेष्टितः ।
गच्छेद्बहुतृणां भूमिं स्वल्पवीरुत्समावृताम् ॥ ६९ ॥

बल्वजस्तम्बसङ्कीर्णां बहुपक्षिभिराश्रिताम् ।
यष्टिभिश्चालयन्घासं विटपाग्राणि ताडयेत् ॥ १३७० ॥

ताडयेद्गुल्ममध्यानि त्रासयेन्शशपक्षिणः ।
उड्डीनेषु विहङ्गेषु मोचयेच्छ्येनकं नृपः ॥ ७१ ॥

कपिञ्जलेषु लावेषु वर्तकातित्तिरीष्वपि ।
तथा तृणमयूरेषु टिट्टिभादिषु पक्षिषु ॥ ७२ ॥

वेसरोल्लु(राँल्ल)गडान् श्येनान पक्षिष्वेतेषु मोचयेत् ।
क्रौञ्चसारसकङ्केषु शालिवारुयान् विमोचयेत् ॥ ७३ ॥

शशेषु गृध्रजातीयान् क्रौद्वि(प्राजि)कानेणशावके ।
मोचयेद्बककाकेषु तथा जवलकट्टिभौ(का)न् ॥ ७४ ॥

बकेषु चक्रवाकेषु तथा तृणमयूरके ।
जौ(व)डा(लाँ)लुगडाश्चै(डांश्चै)व मोचयेत्पृथिवीपतिः ॥ ७५ ॥

---

१ A स्थ । २ A ढि । ३ A सापू । ४ A मं । ५ A लिक्षितान्श्ये । ६ D येन कोपो भवेद्बलम् । ७ A छ । ८ A रम् । ९ A स्व । १० A योत । ११ A श्चयु । १२ A षो । १३A कैस्ये । १४ D गैः । १५ A नोवा । १६ A भोरुप । १७ A नृ । १८ D म्म । १९ A श्च । २० A त्फ । २१ A येच्चशि । २२ A यछे । २३ D ध्विव । २४ A प्र । २५ A राळ्गतान् । २६ A क्रो । २७ A पा । २८ A वृद्ध । २९ D ह्लादि । ३० A का । ३१A टि । ३२ D का । ३३ A र । ३४ A प्रण । ३५ D अण्डजेषु च सर्वेषु ।

वेसरो[1] रंगणान्[2]हन्ति संघ्राणा[3] मुष्टिशक्तितः।
अम्बरस्थान्[4] खगान् हन्तुं प्रभवन्ति स्ववेगतः॥ ७६॥

कङ्कगदीनपि दूरस्थान्[5]पि दृष्टेरगोचरान्[6]।
स्वपक्षबलसामर्थ्यात् प्रहर्तुं शालिवा(वः) क्षमः॥ ७७॥

द्रुमचर्मपिनद्धांगाः स्वपक्षबलसामर्थ्यात् प्रहर्तुं शालिवादनाः(वाः क्षमाः)।
प्राजिं[7]काश्च तथा गृध्राः स्थूलां[8]न्घ्नन्ति विहङ्गमान्॥ ७८॥

अम्बरेणै[9]व दूरस्थान्स्वपक्षबलमाश्रिताः।
एवं श्येनविनोदोऽयं कथि[10]तः सोमभूभुजा॥ ७९॥

उक्त[11]ः सक्(त्क्)तविश्वेन सोमेश्वरमहीभुजा।
उदितः सोमभूपेन विनोदः श्येनसम्भवः॥ १३८०॥

इति श्येनविनोदः॥ १३॥

अग्रे मत्स्यविनोदोऽयं कीर्त्यते राजवल्लभैः[12]।
मत्स्याः स्युर्बहुजातीया गणनागोचरा न ते॥ ८१॥

तथापि कियतो वक्ष्ये विनोदेषूपयोगिनः।
ते च जात्या द्विधा ज्ञेयाश्चर्मजा[13]ः शल्ककजा इति॥ ८२॥

प्रत्येकं ते द्विधा प्रोक्ताः स्थूलसूक्ष्मविभेदतः।
द्रुमचर्मपिनद्धाङ्गाश्चर्मजाः शल्कै[14]र्वर्जिताः॥ ८३॥

शल्कशुक्तिपिनद्धां[15]गाः शल्ककजास्ते प्र[16]कीर्तिताः।
केचित्समुद्रसम्भूताः केचिन्नद्युद्भवा अपि॥ ८४॥

तेषां नामानि वक्ष्यामि सङ्क्षेपेण निबोधत।
सोरश्च शृङ्गसोरश्च चं[17]विलोचो बं[18]लस्तथा॥ ८५॥

कण्टकारः सङ्कुचकै[19]श्चर्मजा[20]ः[21] सागरोद्भवाः।
कोवासकः[22] खि[23]रीडश्च पा[24]ठीनः सिं[25]हतुण्डकः॥ ८६॥

---

१ A F वंशे। २ A F ग। ३ A घ्न। ४ D संघा। ५ A मिष्टि। ६ D adds this line। ७ D न्पक्षिणोगोचरांस्तथा। ८ D adds this line। ९ A only has this line। १० D ङि। ११ D लान्घ। १२ A नैव। १३ A रोदितारातिपोष्टिता। १४ A gives these two lines। १५ A भ। १६ A जा। १७ A क। १८ A ढाये। १९ D त्र। २० D च। २१ D म्बि। २२ A का। २३ A जौ। २४ A रडश्चैव। २५ A पी। २६ A सी।

एते मत्स्या महाकायाश्चर्मजा निम्नगोद्भवाः।
पाटलः(ल) पिच्छकस्त्वेकस्तथाऽन्यो दन्तपाटलः॥ ८७॥

मध्यकायाविमौ मत्स्यौ नदीजौ चर्मसम्भवौ।
गागरो गोज्जलश्चैव विदुवश्च तथापरः॥ ८८॥

मत्स्यः कण्ठरयश्चेति स्वल्पकाया नदोद्भवाः।
पण्डिमानो महाकायः शल्कजाः सागरोद्भवाः॥ ८९॥

पल्लकस्तोमरश्चेति मध्यकायौ समुद्रजौ।
महाशीलकल्लवश्च नाडको बडिशस्तथा॥ १३९०॥

वटगिश्च महाकायाः सशल्काः सरिदुद्भवाः।
रोहितः स्वर्णमीनश्च तथा खण्डालिपोऽपरः॥ ९१॥

मध्यकायाः सशल्कास्ते बलवन्तो नदीचराः।
मरिलस्तुम्बयो वाञ्चि शल्कजा मध्यविग्रहाः॥ ९२॥

एते त्रयो न खादन्ति पिष्टि(ष्ठ)मामिषभोजिनः।
कौरेत्थश्च महानद्या सङ्गतस्थे महीभृतः॥ ९३॥

षट् सप्त योजने(नं) यावन्नदीमायाति सागरात्।
गम्भीरेषु विशालेषु ह्रदेषु विलसन्ति ते॥ ९४॥

तेषां सङ्ग्रहणे स्थानमिदमेव न सागरः।
नद्यां कर्दमहीनायां सशिलायां भवन्ति ते॥ ९५॥

कोवाकीर्या महाकायाः सशल्का मध्यजातयः।
शिलासङ्घट्टके स्थाने गम्भीरे कोरकादयः॥ ९६॥

वालुकाबहुले तोये गम्भीरे रोहितादयः।
सपङ्के च सुविस्तीर्णे प्रवाहरहिते ह्रदे॥ ९७॥

पाठीनप्रमुखा मत्स्या निवसन्ति सकच्छपाः।
पाषाणप्रान्तविवरे नाभिदघ्नोदके तथा॥ ९८॥

---

१ A स्त्व। २ A ल। ३ A दि। ४ D ग। ५ D ज। ६ A दु। ७ D य। ८ A दाभ। ९ A ण्डी। १० D जः। ११ D वः। १२ D ल्ला। १३ A शि। १४ D ह्रस्व। १५ A स्ता। १६ A पर। १७ D मा। १८ D षष्ठा। १९ D लि। २० D चो। २१ D कोल। २२ A श्च। २३ A ता। २४ A न्ति। २५ A सि। २६ A द्या। २७ D शी। २८ D ङ्कट। २९ A ल। ३० A के। ३१ A स्त। ३२ A हं। ३३ A त्सयी।

थोग्यरस्तुम्बेरो वामी निवसन्ति निजेच्छया।
हृदशीर्षे तथा चान्ते मध्ये वा सङ्कटस्थले ॥ ९९ ॥

वक्रस्थले वा द्वीपे वा सायं प्रातश्च चारयेत्।
तिलानां पललं पिण्डी लाजानां चूर्णमेव च ॥ १४०० ॥

भर्जितं चणपिष्टं च भक्तकेन समन्वितम्।
बिल्वमात्रान् कृतान् गोलान् कल्क(ह्ल)वादींश्च चारयेत् ॥ १ ॥

चूर्णकं सिच्छ(क्थ)कैर्युक्तं जलमध्ये च लोडयेत्।
तिलानां पललैः कण्वै रोदनेन विमिश्रितैः ॥ २ ॥

बदरीमात्रकान् गोलान् चारयेद्रोहितादिकान्।
भृष्टकौसुम्भचूर्णेन भक्तकैः सह सक्तुभिः ॥ ३ ॥

चारयेद्भडिशान् मत्स्यान् पिण्डानाम्रफलाकृतीन्।
बिल्वपत्राणि सैङ्क्षोद्य सक्तुकेन समन्वितम्( तान् ) ॥ ४ ॥

धात्रीफलमितान् पिण्डान् चारयेगिरंन् (त्प्रकिरन्) बुधैः।
तिलीकाकालखण्डानि कौवकांश्चारयेत्सुधीः ॥ ५ ॥

पूतिगन्धीनि मांसानि पाठीनानपि चारयेत्।
धिचकांश्चारयेत्तज्ज्ञैः सिंहतुण्डाभिधान्झषान् ॥ ६ ॥

मरलीं चारयेद्यत्नाद्वीवरः कर्कटामिषम्।
भृष्टमूषिकमांसानि चारयेत्कच्छपान् बुधः ॥ ७ ॥

भूलवा(ताः)क्षुद्रमत्स्यांश्च चारयेद्वामिषं वतो(तु तान्)।
तडागपालिपादेशे जलाहरणतीर्थके ॥ ८ ॥

अनेनैव प्रकारेण चारयेद्यत्नतो झषान्।
एवं वा(चा)रितमत्स्यैश्च चारकैः पृथिवीपतिः ॥ ९ ॥

---

१ F थोग्य। २ A F बगे-मि। ३ A दा। ४ A वाते। ५ A वा। ६ A डी। ७ A च। ८ A गर्भि। ९ A छश्च। १० A ताक्ष। ११ A तागो। १२ A लाकह्लधादिश्च। १३ A लै किण्वै। १४ A कागो। १५ A ला। १६ A जा। १७ A द्राढि। १८ A का। १९ A सूप। २० A ति। २१ A सुंक्षु। २२ A जा। २३ D न्वरगीन्। २४ A ध। २५ A ण्ड। २६ A काश्चा। २७ A न्वा। २८ A टिनान। २९ A वि। ३० A कं। ३१ A ज्ञा। ३२ A रु। ३३ A लिं। ३४ A द्यन्ता। ३५ A क्ष। ३६ A तृष्टघृषी। ३७ A स्त्या। ३८ D खाचितम्। ३९ A श। ४० A कः। ४१ A खात्। ४२ A त्सै।

विज्ञप्तस्तान्समाक्रष्टुं पश्येद्रज्जूंश्च यष्टिकाः[1]।
मूर्वार्कन्दुकयोर्वल्कैः सुदृढैरर्कवल्कलैः ॥ १४१० ॥
कार्पासतन्तुभिः श्लक्ष्णैः कारयेद्दोरिका वराः[2]।
तत्र मूर्व(र्वी)भवाः[3] श्रेष्ठा मध्यमाः कटंकार्जकी[4](न्दुकार्कजाः) ॥ ११ ॥
कार्पासजाः[5] कनिष्ठा(ः) स्युर्द्रार्ढ्यभेदाद्यथाक्रमम् ।
स्थूला मध्याश्च सूक्ष्माश्च त्रिगुणाश्च समायताः[6] ॥ १२ ॥
श्लक्ष्णाश्च दोरिकास्तज्ज्ञैः[7] कुर्यादङ्गुलवर्तिकाः ।
छा(व्या)मानां द्वे शते तज्ज्ञैः[8] प्रमाणं परमावधि ॥ १३ ॥
नैव व्यामद्वया(य)हीनां कुर्याद्रज्जुं प्रमाणतः[9] ।
चतुर्वृत्त(न्त)शलाकान्तः स्था(स्थौ)ल्ये प्रोक्त(क्तः) परोऽवधिः[10] ॥ १४ ॥
हयकेशप्रमाणोऽयं तनुत्वे परमोऽवधिः[11] ।
वैणवी(वी) शस्यते यष्टिर्भूतलादुद्गता तु या[12] ॥ १५ ॥
शाखा वा कण्टकाकारा माडशाखार्थ[13] वा भवेत् ।
सरटस्य तु पुच्छेन सदृशी क्रमकी[14]र्श्यतः ॥ १६ ॥
आसन्नपर्वसंयुक्ता नीरन्ध्रा[15] पक्षवंशजा ।
षडङ्गुलपरीणाहा(हो) मूलदेश(शे)परोऽवधिः[16] ॥ १७ ॥
स्थूलयष्टेः कनिष्ठास्यात्त(यास्त)र्धं स्यात्परोऽवधिः[17] ।
नातिदीर्घा नातिह्रस्वा शिथिला नैव नो[18] दृढा ॥ १८ ॥
यष्टिः प्रशस्यते[19] तज्ज्ञैर्वैणवी मत्स्यकर्षणे ।
दशाङ्गुलपरीमाणा माडशाखासमुद्भवा ॥ १९ ॥
क्रमात्तन्वी[20] वरा यष्टिः स्यादसंहतपर्विका ।
गालमङ्कुशवक्रं[21] स्यात्तथाश्वखुरच(व)क्रकम् ॥ १४२० ॥
माकन्दफलवक्त्रं[22] च म(क) कैटाकारच(व)क्रकम् ।
तीक्ष्णश्च(क्ष्णं च) ततविश्रेणि लोहेन घटितं दृढम् ॥ २१ ॥

---

१ A स्थात्स । २ A क. प । ३ A श्चाद्रज्जूं । ४ A का । ५ A मुर्वाके दुकयथावल्के । ६ A रक्त ७ A दारिका वरा । ८ A पूर्वं । ९ A वा । १० D ट्ट । ११ D काः । १२ D जा । १३ A ष्ठा । १४ A द्रार्ढ्यदाद्य । १५A त्ता । १६ A स्ततज्ञाः । १७A जा Dज्या । १८A ज्ञाः । १९A न्योमल्हया विना । २० A चतुर्वृत्त । २१A क्तपरोवधि D क्तो । २२ D मा Aमोवधि । २३D णा । २४ A भू । २५ A य २६ A वा । २७ A नि । २८ A धि । २९ A धि । ३० A ना । ३१ A षु । ३२ A तान्वि ३३ D देशे । ३४ A त्याश्च । ३५ A वक्त्रं । ३६ A क्ष्णा ।

स्थूलमूलं च सूक्ष्माग्रं कण्टकेन समन्वितम्[1] ।
रज्जुबन्धनदेशस्तु वृत्तो वा[2] फलकाकृतिः ॥ २२ ॥
निम्नमध्यस्तु कर्तव्यो बडिश[3]स्य (शःस) तु धीमता ।
स्थूल रज्जुं[4] स्थूल यष्टौ न बध्नीयात्तनुं तनौ ॥ २३ ॥
नीरमीनप्रमाणेन स्थौल्यं दैर्घ्यं च कल्पयेत् ।
रज्जुप्रमाण(णं)बडिशं रज्जोरग्रे निबन्धयेत् ॥ २४ ॥
मयूरपिच्छकाण्डं तु रज्जुमध्ये निवेशयेत् ।
यष्टि[5]मूले तथा चान्यां रज्जुं दीर्घां च योजयेत् ॥ २५ ॥
पुच्छवत्कल्पयेत्तज्ज्ञैर्यष्टि(ज्ञो यष्टिं)मोहनहेतवे ।
यस्य यद्रोचते पक्षे पिष्टमामिषमेव वा ॥ २६ ॥
बडिशाग्रे तदासज्जं[6] चारस्थाने विनिक्षिपेत् ।
विक्षेप[7](वीक्षेत)पिच्छकाण्डं तदेकाग्रमनसा नृपः ॥ २७ ॥
यदा स्पृशति तन्मीनो बाडिशं भक्षयेच्च तम्(त्) ।
यदा चलति य(त)द्भेदं तदाऽऽर्या[8](घा)तं प्रयोजयेत् ॥ २८ ॥
मांसा[9]शिनां तथा[10] मग्रे(भग्रो) चलने[11] पिष्टभोजिनां[12] ।
गोल[13]प्रोतो यदा मत्स्यो भवेच्च[14] प्रबलायते ॥ २९ ॥
बलहीनं तु[15](त) मार्क[16]र्ष ब(र्षेद्ध)लिष्ठो यष्टि[17]मुत्सृजेत् ।
शनैः शनैस्तमाकर्षेद्रज्जु[18]स्त्रुटति नो यथा ॥ १४३० ॥
यष्टिमोक्षे समाकर्षेत्पुच्छरज्जुं प्रगृह्य वा ।
एवं मत्स्यविनोदोऽयं नामरूपादि[19]भेदतः ॥ ३१ ॥
भूलोकमल्लदेवेन वर्णितः[20] पृथिवीभुजा ।
प्रमोदाय विनोदोऽयं नाम मत्स्यसमाश्रयः ॥ ३२ ॥
कथितः[21] सोमभूपेन वक्ष्यते[22] मृगयाश्रयः[23] ।

इति मत्स्याविनोदः ॥ १४ ॥

---

१ D तः । २ A वक्कृ । ३ A डी । ४ A ज्जू । ५ A त्तु । ६ A श्रृ । ७ D ज्ञा । ८ A ज्ञेय । ९ A पाः । १० D यान्तं । ११ A मत्स्या । १२ D यामग्रे । १३ A त । १४ D नां । १५ A गतप्रोतो । १६ A च । १७ A नु । १८ D र्षेद् । १९ A यदि । २० A ज्जुः स्फुट । २१ A णि भे. न । २२ A तं । २३ A तं । २४ A चक्ष । २५ A याः F या ।

पर्वतैरुन्नतैर्युक्ता गह्वरै[1]: कन्दरैर्युतां ॥ ३३ ॥

गुल्मै[2]: कण्टकिभिः कीर्णा बहुपाषाणदुर्गमाः ( मा )।
दुःसञ्चाराऽतिनिबिडा ऋक्षव्याघ्रनिषेविता ॥ ३४ ॥

मातङ्गसर्पबहुला वर्जनीयाटवी नृपैः।
अकण्टकैद्रुमै[3]र्युक्तां समभूभागभूषिताँ ॥ ३५ ॥

कुल्यातटाकसंयुक्ता वृक्षै[4]र्भक्ष्यफलै[5]र्युतां।
वीरुद्भिश्च समाकीर्णा नयनानन्ददायिनी ॥ ३६ ॥

सुरक्षां नातिविस्तीर्णा दुष्टप्राणिविवर्जिता।
सारङ्गै[6]र्हरिणैः शावैः कुरङ्गै[7]रम्भ(ल्ल)कैः शुभा ॥ ३७ ॥

रुरुभिः शम्बरैः कोलै[8]र्गोधने[9]: कारणै(वै)र्युता।
मयूरैः कुक्कुटैर्लावैः कुक्कु[10]टै(रै)श्च कपिञ्जलैः ॥ ३८ ।

वर्तकै[11]: करवा[12]णैश्च तथा तित्ति[13]रमयूरकैः।
हारितै[14]र्काङ्गवरकैः कपोतैश्चित्रपिच्छकैः ॥ ३९ ॥

खगैर्बहुविधै[15]रन्यैर्मृगैर्नानाविधै[16]र्युता।
एवंविधाटवी[17] रम्या निर्[18]पाया सुखोचिता ॥ १४४० ॥

नृपाणां शस्यते नित्यं मृगयाकेलिकर्मणि।
सा रक्ष्या रक्षकै[19]रार्[20]रेवं(क)योजनविस्तृता ॥ ४१ ॥

जनसञ्चा[21]ररहिता वृक्षच्छेदविवर्जिता।
निवारितमृगाघाता प्रत्यन्ते[22] छिन्नभूरुहा ॥ ४२ ॥

---

१ A रै। २ A ताः। ३ A ल्म। ४ A सञ्चारेणा। ५ A रू। ६ A क्ताः। ७ A ताः। ८ A ताः। A क्ष्यानाति F क्ष्यानति। १० A लैगो। ११ A नै। १२ A क्कुकै F कु। १३ A सपिण्ड। १४ D तौं। १५ D बा। १६ A त्र। १७ D तको। १८ A तटि। १९ A द्र। २० A एवं। २१ A च्च। २२ D न्त।

उपान्तवनविन्यस्तसमागममृगैर्युता।
अनेनैव प्रकारेण रक्षणीयाऽटवी सदा ॥ ४३ ॥

स्वपुरस्य समीपस्था विनोदाय महीभुजाम्।
लुब्धकैर्महिषारूढै (:) शोधनीया पुनः पुनः ॥ ४४ ॥

व्याघ्रादीन्पदसङ्घातैस्तां विलोक्य विधातयेत्।
तांस्तान् भेदान्प्रवक्ष्यामि राजयोग्यान्पृथक् पृथक् ॥ ४५ ॥

पानीयजा चारजा च क्षेत्रजा मार्गजा तथा।
उष्ट्र(ऊष)रा द्वीपमृगजा तथा च विटपाश्रया ॥ ४६ ॥

वभ्र(भ्र)जा काण्डपटजा मञ्चजा भूमिगेहजा।
बलिवर्दतिरोधाना महिषारोहणोद्भवा ॥ ४७ ॥

अश्वजा चित्रजा चैव शारीरी स्तम्भनी तथा।
वायुजा दमनोत्पन्ना गौरिजा कोपसम्भवा ॥ ४८ ॥

कामजात्विति(ध्वनि)जाता च तथा मदविकारजा।
नीहारजा पाशजाता जालजा यन्त्रसम्भवा ॥ ४९ ॥

व्याघ्रमोक्षणसम्भूता तथा कवलदानजा।
एकत्रिंशत्प्रकारेयं मृगया राजसम्मता ॥ १४५० ॥

निमज्जनाज्जलस्यान्त(:) प्रवेशाच्च बिलान्तरे।
गवयस्याच्छभल्लस्य व्याघ्रस्य महिषस्य च ॥ ५१ ॥

खड्गस्य मृगयात्यर्थं प्रसा(मा)दबहु(ला) यतेः।
तस्मादेषा विवर्ज्या स्यात् धीमतां पृथिवीभुजाम् ॥ ५२ ॥

शिवाजम्बुकमार्जारकोकमूषिकसम्भवा।
कुत्सिता मृगया भूपैर्वर्जनीया विनोदने ॥ ५३ ॥

नद्यां तटाके सरसि कृत्रिमे च जलाश्रये।
मृगाणामिदमावेक्ष्य यत्र विस्तीर्णमङ्गणम् ॥ ५४ ॥

---

१ A मि। २ A स्थ। ३ A सोप्यनी। ४ A न्य। ५ D मा। ६ D gives these three lines। ७ A द्धं। ८ A षो। ९ A म्भि। १० A ड। ११ D गो। १२ A जारि। १३ A म। १४ A म्भवा। १५ A ते। १६ द्दो। १७ D ह्वी। १८ A णां परमा वक्ष्ये।

पानतीर्थं प्रकुर्वीत मृगाणां सलिलार्थिनाम् ।
अन्यत्र रोधनं कुर्याल्लम्बन्ते जलकं[1] यथा ॥ ५५ ॥

नृ(तृ)त्या वा वंशजालैर्वा कटैर्वा क(व)ल्कलैः सितैः ।
निखार्यं[2] मेढ(र)कांस्तज्ज्ञः सुदृढं परिवेष्टयेत् ॥ ५६ ॥

संवीक्ष्य मारुतं यत्नादङ्गन्नं परिकल्पयेत् ।
यथा गन्धं न जानन्ति सम्प्राप्ता मृगजातयः ॥ ५७ ॥

मनुष्यगन्धमाघ्राय पलायन्ते मृगादयः ।
तस्माद्वायुगतिं ज्ञात्वा गतौ[3](तिं) तत्र प्रकल्पयेत् ॥ ५८ ॥

पार्श्वयोस्तीर्थपानस्यं[4] गर्त्तयुग्मं प्रकल्पयेत् ।
धनुर्द्वितयविस्तीर्णं वर्तुलं हस्तखातकम् ॥ ५९ ॥

गर्तस्योभयपार्श्वे[5] तु सार्द्धहस्तं[6]सुविस्तृतौ ।
हस्तद्वयायतौ[7] कुर्यादवटौ पूर्वखातकौ ॥ १४६० ॥

पश्चात्प्रधानगर्तस्य गर्तमन्यं प्रकल्पयेत् ।
हस्तद्वितयविस्तीर्णं हस्तत्रयसमाहितम् ॥ ६१ ॥

दिवा यामत्रयादर्वाग्गर्तं कुर्वीत बुद्धिमान् ।
मनुष्यपदसञ्चारगन्धं संरक्ष्य यत्नतः ॥ ६२ ॥

एवं सर्व(र्वं)विधायार्थं समागत्य नृपालयम् ।
गर्त्तनिर्वर्तनं राज्ञे लुब्धको विनिवेदयेत् ॥ ६३ ॥

विजयैः[8] क्रियतां देव कौतुकं ते भविष्यति ।
मृगवेधेन[9] पूर्यन्ते सायकाः शतसङ्ख्यया ॥ ६४ ॥

लुब्धकेनेति[10] विज्ञप्तः कौतुकोल्लासि[11]मानसः ।
समाहूय ततो वाहांस्तोयस्थानं मृगाश्रयम् ॥ ६५ ॥

मितैः[12] प्रेम(मो)दचित्तैश्च वृतो यायान्महीपतिः ।
सार्धं कतिपयैरासै[13]र्लुब्धकैः प्रेयसी[14]जनैः ॥ ६६ ॥

---

१ A जं । २ A यदका । ३ A त । ४ A श्च । ५ A श्वं । ६ A स्तेन । ७ A तो । ८ A स्तारं । ९ A न्व । १० A यक । ११ A धन पूर्वं । १२ A न, वि । १३ A समानसा । १४A म । १५ A मा । १६ A सि ।

हयानां हेषितं यावन्मनुष्याणां च भाषितम् ।
न शृण्वन्ति मृगस्तावत् दूरे वां सन्निवेशयेत् ॥ ६७ ॥

हरितांशुककूर्पासैः(सै)र्हरितांशुकशेखरैः ।
कङ्कुपारा(ङ्कूपत्र)पत्रुद्धाभिर्हेतुभा(र्हेतिभि)श्चापधारिभिः ॥ ६८ ॥

तीक्ष्णसाहसं(यक)हस्तैश्च कैश्चिद्दीपमृगान्वितैः ।
समागत्य पटस्थानं नीलाम्बरपरिच्छदम् ॥ ६९ ॥

तु(तू)लगर्भां तथा मृद्वीं गद्दिकां गर्तमात्रिकाम् ।
किञ्चिन्मध्यात्पुरोभागे शय्यां मध्यां(मध्ये)निवेशयेत् ॥ १४७० ॥

श्यामलान्युपधानानि हरिता द्विपदी स्तथा ।
गर्तस्य पश्चिमां भित्तिं छादयेन्नीलवाससा ॥ ७१ ॥

कीलिरुद्धेन न यथा निपतं(ते)न्मृत्तिका तथा ।
शय्यायाश्च पुरोभागे धनूंषि विनिवेशयेत् ॥ ७२ ॥

सायकान्तीक्ष्णफलकान्स्थूलकर्णान्क्षुरप्रकान् ।
पार्श्वगर्तद्वये ज्ञानां(नि)लुब्धकान्मृगधारकान् ॥ ७३ ॥

स्थापयेत्पृथिवीपालो दशपञ्चाष्ट सप्त वा
पृष्ठभागस्थिते गर्ते भटानाप्तान्निवेशयेत् ॥ ७४ ॥

ततः सायन्तनीं सन्ध्यां निर्वर्त्य पृथिवीपतिः ।
प्रधानगर्त्तं प्रविशेत्प्रेयसीभिः समन्वितः ॥ ७५ ॥

शय्यायां तु स्वयं तिष्ठेत्पश्चाद्विस्त्वै(स्त्यै)व योषितः ।
उपविष्टास्ततस्ताश्च द्विपदीः परिधाय च ॥ ७६ ॥

नियतास्तत्र तिष्ठेयुर्हासचापलवर्जिताः ।
कियन्तः(तः)प्रसादविनतानार्यं(स) नादिदौ) निवेशयेत् ॥ ७७ ॥

ताम्बूलधारकं चैव तथा करकधारकम् ।
ततश्चास्तं गते भानौ ये स्थिता गर्त्तके बहिः ॥ ७८ ॥

---

१ A नी। २ A वान्ति न शये र। ३ A रा...भिहे। ४ A तु। ५ D क। ६ A श्चिद्वि D श्चिद्वी। ७ A ने। ८ A र्भाय...गर्त्तिकां। ९ A र्त्ति। १० A राज्यान्तस्यान्ति। ११ A दि। १२ A गतस्य पश्चमनमिति। १३ A किलरुद्धेन। १४ A तमृति। १५ Dणा। १६ A यज्ञानान्। १७ A च। १८ A पश्चाद्। १९ A स्याच। २० A सज्यायां। २१ A द्विवोतुवीताम्। २२ D चिन्ता। २३ A य (स ?) D यनादीन्नि। २४ A नाव।

मृगाणां दृष्टिमार्गाच्च तत्स्थानादपसारयेत् ।
निर्मनुष्ये तु सञ्जाते सारङ्गैः रज्जुचालितैः ॥ ७९ ॥

ततोऽरण्यमृगाः सर्वे समायान्ति पिपासवः ।
चणकान्विकिरेत्तत्र द्वि (दी) पानां चौरहेतवे ॥ १४८० ॥

चरन्ति च ततस्ते तु दोरधारकचेदिताः ।
दूरस्थानपि पश्यन्ति सूचयन्ति च वीक्षणात् ॥ ८१ ॥

नीचदृष्ट्या नीचमृगानुच्चावचमृगांस्तथा ।
आघ्राणसहितान्लोकान् सूचयन्ति स्वजातिकान् ॥ ८२ ॥

पुच्छोत्क्षेपात्खुराघाताद् व्याघ्रादीन्मनुजानपि ।
आसनं मृगयावेधं कृत्वा स्वस्तिकदुरम् ॥ ८३ ॥

तिर्यक् चापं विधृत्याथ तिर्यक् सन्धाय सायकम् ।
आगता जलपानार्थं मृगा दीपिमृगान्तिके ॥ ८४ ॥

गर्तं दृढं नवं दृष्ट्वा सम्भ्रमाक्षिप्तमानसाः ।
उद्ग्रीवा स्तब्धकर्णाश्च वीक्षमाणाश्च सम्मुखम् ॥ ८५ ॥

गर्तान्तर्दत्तनेत्राश्च सुविष्टब्धशरीरकम् ।
वञ्चयेद्वीक्षणं तेषां हस्तपादाद्यकम्पनैः ॥ ८६ ॥

स्थाणुवन्निश्चलो भूत्वा गर्तमध्ये स्थितो जनैः ।
चौरार्थं विनतग्रीवः पानार्थं चलिते तया(वलितस्तथा) ॥ ८७ ॥

युद्धार्थं कुपितेना(तोवा)पि तिर्यग्ग्रीवे(वो)ऽथवा मृगे(गः) ।
विनिगुह्य निजं कायं गर्तकण्ठसमाननम् ॥ ८८ ॥

तोयस्थितमिषुं (वेश्वा)सं समकोटिद्वयं दधन् ।
वञ्चितप्रेक्षणं भूभृदन्यचित्तं मृगं हठात् ॥ ८९ ॥

बाणेनाकर्णकृष्टेन विध्येत्कक्षान्तरं दृढम् ।
अङ्गणे पतितं कर्णे मृगं क(म)र्माणि पीडितम् ॥ १४९० ॥

---

१ A हस्तान्ता । २ D न्तस्था । ३ A क । ४ A वा । ५ D विचरन्तिततस्ते । ६ D वादिनः । ७ A विचक्षणान् । ८ D adds this line । ९ A ता लो । १० A का सू । ११ A दिम । १२ A ध । १३ A ददु । १४ A ह । १५ स्क । १६ A दि । १७ A सूविष्टं च D सुविस्तब्धशरीरकान् । १८ A ता । १९ A नाः । २० A वा । २१ A ता । २२ A प्स । २३ D ग्रू । २४ A श्वा? । २५ A तंकै ।

उपानद्गूढपादैस्तु बद्ध(न्ध)कैरन्यतो दृढम् ।
सायकान्पतितांस्तद्वैदङ्गणादपकर्षयेत् ॥ ९१ ॥

कीलालं पांशुना छाद्यं यथा गन्धो न जायते ।
एवं पानीयजा प्रोक्ता मृगया मृगयोत्तमा ॥ ९२ ॥

सुखावहा नरेन्द्राणां सर्वभोगसमन्विता ।
यतोऽस्यां शीतला ज्योत्ना शय्या मृद्वी सुखावहा ॥ ९३ ॥

मनोरमा[च]ख्यातां भू(खाता भूः)स्वाद्यं ताम्बूलमुत्तमम् ।
प्रसादचित्तकैर्गोष्ठी विद्यते सुखदायिनी ॥ ९४ ॥

अनायासेन लभ्यन्ते सम्प्राप्ता मृगजातयः ।
अन्यासु भ्राम्यते पादैर्घर्मक्लेशोऽनुभूयते ॥ ९५ ॥

न ताम्बूलं न पानीयं न कान्ता न सुहृज्जना(ः) ।
प्रमादो व्याघ्रसर्पादेर्दुःखमायाससम्भवम् ॥ ९६ ॥

नृपाणामपि जायेत तस्मादेतां न संश्रयेत् ।
दावाग्निना परिष्लुष्टे तृणपल्लववर्जिते ॥ ९७ ॥

वने बुभूक्षिताः सर्वे मृगाश्चातपपीडिताः ।
निष्पावैवल्लरी (रीं) मृद्वीं फलपुष्पसमन्विताम् ॥ ९८ ॥

कोमलांन् पल्लवान् भक्ष्यानश्वत्थविद्रुमोद्भवान् ।
मधुकस्य फलं पुष्पं पक्वं चिञ्चाफलं तथा ॥ ९९ ॥

मदनस्याहिमारस्य बकुलोदुम्बरस्य च ।
धान्याः पिण्डीकृतस्यापि कामं स्म(काश्म)र्याश्चूतकस्य च ॥ १५०० ॥

---

१ Aदैस्तु । २ A न दृढं । ३ A द्वे । ४ A ये । ५ A ति । ६ D वा । ७ A तोग मन्वि । ८ A वि । ९ A यी । १० D नभ्या । ११ A तुल्य । १२ A तृ । १३ A र्घमैक्लेशोलनुभूये । १४ A म्बु । १५ A नि । १६ A न्ता सुहृजना । १७ A क्र । १८ A खः मासाय । १९ A व । २० Aजा यंते । २१A तान् न Dताः न तत्समाः । २२ A पा । २३A श्ल । २४ A वने बुलूक्षिता । २५ A श्वतिय । २६ A पिडीता । २७ A ष्प । २८ A द्वि । २९ D तान् । ३० A लाप । ३१ A वा । ३२ A तक्षा अश्वछादिदुमुद्रवा । ३३ D धू । ३४ A विवा । ३५ D मेद । ३६ A पीठीक्र । ३७ D अम्म ।

हरितं हरी(रि)मन्थश्च फलपुष्पसमन्वितम् ।
कणिशं यावनालस्य क्रमेणशश्चारयेन्मृगान् ॥ १ ॥

तटाके वा तथोद्याने मृगसञ्चारभूमिषु ।
चारसक्ता मृगाः सर्वे परं विश्वासमागताः ॥ २ ॥

आरु(मनु)ष्येभ्यो भयं त्यक्त्वा चरन्ति चैव बुभुक्षिताः ।
गर्ते वा पूर्ववत् स्थित्वा विटपं वा समाश्रिताः ( तः ) ॥ ३ ॥

पुरो दीपमृगान्कृत्वा सारङ्ग[न्]हरिणांत (णांस्त) था ।
अपराह्णे ऽथवा रात्रौ मृगागमनकालवित् ॥ ४ ॥

दिवा चेद्भूग्र(ग्)हे स्थित्वा यत्र स्थाने त्वलाक्षिताः(तः) ।
विटपं वा समाश्रित्य तलच्छायं वै मु(यमनु)त्तमम् ॥ ५ ॥

रजन्यां गर्तमध्यांस्य मृगान्विध्येन्महीपतिः(तिः) ।
सारङ्गन्हरिणानेणान्रुरुसम्बरकानपि ॥ ६ ॥

कथितेन प्रकारेण पापध्यां मारयेत्स्वयम् ।
वरा(सा)न च मार्गस्तु विस्तारेण प्रवक्ष्य(क्ष्य)ते ॥ ७ ॥

पुष्टा एवं हि मार्यन्ते ततः पौष्टांस्तु(पुष्टांस्तु) सूचका(कः) ।
क्रोडानां पदवीं वीक्ष्य तिर्यक् शक्त्या न्यसेत् क्रमात् ॥ ८ ॥

शुष्कपत्रेषु चणकान्पुञ्जितान्मुष्टिसम्मितान् ।
व्याममात्रान्तरे पुञ्जान्पङ्क्तिस्थान्दण्डवत्क्षयसेत् ॥ ९ ॥

दण्डो नाम स विख्यातः कोलानां चरकर्मणि ।
एवं विन्यस्य तं दण्डमास्वादय (द्य च) वने निशि ॥ १५१० ॥

---

१ D हरिमन्यस्य वृक्षस्य । २ A निसंयवेनाश्वि । ३ A मश्चारयेन्मृगा । ४ D य । ५ A सं वा । ६ A तू । ७ A रे । ८ A ता । ९ A व्यत्पोत्तर्यं त्यक्ता । १० A व । ११ A ता । १२ A वस्थि । १३ D चा । १४ A ता । १५ A राद्वि । १६ A गाक्ष । १७ A णांसूषा । १८ D तथा । १९ A त्रिश । २० A वेद् । २१ D छत्रे । २२ D ते । २३ A पे । २४ D सा । २५ A छा । २६ D च । २७ A ध्य । २८ A क्षाहा । २९ A त्वेणा । ३० A नह । ३१ D संव । ३२ A फा । ३३ A ध्यां । ३४ A सयं । ३५ A वा । ३६ A सु । ३७ D च । ३८ A ग । ३९ A त । ४० A छासु । ४१ A कोजन । ४२ A वि । ४३ A क्ष्ये । ४४ A मेक । ४५ A पुज्यायेत्की D पूजां पङ्क्तिदण्डं च विन्य । ४६ A त । ४७ A नी । ४८ A स्यं ।

पोत्रिणां[1] लुब्धकः[2] संज्ञा दिवा वि(वी)क्षेत[3] दण्डकं (के)[4] ।
सूकरैर्दंड[5] (ण्ड) पङ्क्तिस्था(स्थां)श्चणकाम(न्भ)क्षिता अ(न)पि ॥ ११ ॥

वर्ध[6] (र्ध) येत तदा दण्डमभी[7][ष्ट]स्थानकं प्रेति[8] ।
पल्वलं वा तडागं वा विविक्तं[9] वा प्रदेशकम् ॥ १२ ॥

दण्डपङ्क्तिं[10] नयेत्तत्र क्रोडांस्तदनुयायिनः[11] ।
दण्डमार्गे[12] तु[13] संलग्नाः[14] सूकरा[15]श्चणकोत्सवाः[16] ॥ १३ ॥

अ (आ) यान्त्यभिमतं[17] स्थानं बहवो दण्डकान्तरे ।
विकिरेच्चणकांस्तत्र बहु(हू)नां चारकारणात्[18] ॥ १४ ॥

चरन्ति सूकरास्तत्र स(सु) लुब्धाः[19] प्रत्यहं निशि ।
वायोरधस्ततोदे(नोदे)शे महिषं दूरतस्तरौ[20] ॥ १५ ॥

बध्नीयान्मृगयाज्ञो[21][22] विश्वासार्थं निशात्रयम् ।
ततः[23] क्रमात्समीपस्थं[24] कुर्वीत[25] महिषं सुधीः[26] ॥ १६ ॥

महिषान्क्षुत्त्रये(त्तु भये)त्यक्ते पोत्रिभिस्तु[27] निशाष्टके ।
ताणीं(णीं) नराकृतिं[28] कृत्वा महिषस्योपरि न्यसेत् ॥ १७ ॥

निशाद्वये[29] व्यतीते तमारोहेन्मृगयुः स्वयम्[30] ।
सञ्चार्यो महिषस्तेन यत्नाद्[31]न्धवहादधः ॥ १८ ॥

पाणिपादस्य[32] चलनं दर्शयेच्च शनैः शनैः ।
चलनाश्च[33] भये त्यक्ते क्षिपेच्चणकमेककम् ॥ १९ ॥

तस्य[34] गन्धं समाघ्राय किञ्चित्क्षुभितमानसः[35] ।
घर्घरं[36] निस्वनं कृत्वा केशान्[37]त्क्षिप्य सर्वतः[38] ॥ १५२० ॥

---

१ A पत्रिणी । २ A छध । ३ D दहे । ४ A ति । ५ A प । ६ A वक्त । ७ A क्ति । ८ A त । ९ D डां । १० D शा । ११ A न । १२ D ने । १३ A नु । १४ A ग्ना । १५ A कश्च । १६ A सवः । १७ A तांति । १८ A क । १९ A स्मां । २० A छाः । २१ A रे । २२ A या सू । २३ D स्त । २४ A त्र । २५ A त्रा । २६ A श । २७ A रकं । २८ A र्वि । २९ A धिः । ३० D न्नुभ । ३१ A तिसृ । ३२ A क्ति D कृतीं । ३३ A विन्य । ३४ A य । ३५ A ल । ३६ A र्यो । ३७ A हिस्ते । ३८ A ग्रा । ३९ A प । ४० A या । ४१ A त । ४२ A ल । ४३ A त्त । ४४ A च । ४५ A सा । ४६ A क्षु । ४७ A सा । ४८ A र्षं । ४९ A को । ५० A न् तिमा । ५१ D शः ।

श्रवसी[1] सम्मुखीकृत्य[2] पुच्छं[3] प्रोन्नम्य[4] सम्भ्रमात्[5] ।
ग्रासलुब्धास्ततः क्रोडाश्चरन्ति चणकान्पुनः[6] ॥ २१ ॥

एकद्वित्रिक्रमात्तेषां[7] चणकान्निक्षिपेद्[8] बहून्[9] ।
ततो गन्धं[10] सहन्ते[11] ते सु(सू)करा ग्रासलालसाः[12] ॥ २२ ॥

प्रसृत्या सम्मितांस्तांश्च[13] चणकान्निक्षिपेत्[14] पुरः[15] ।
चणकक्षेपसमये शब्दं कुर्याच्छनैः[16](:) शनैः[17](:) ॥ २३ ॥

एवं शब्दसहान्[18]कुर्याद्वराहान्मृगयुश्चरान्[19] ।
ततो यष्टिं समादाय पृष्ठकण्डूयकं चरेत्[20] ॥ २४ ॥

ततोऽवतीर्य[21] महिषीं[22]कि ( त्कि ) यद्भिर्दिवसैः[23] सुधीः[24] ।
हस्तेन चणकान्दद्यात्पिष्टपिण्डांश्च लुब्धकः ॥ २५ ॥

ततः कण्ठे निबन्धीयाद् घण्टां[25](ण्टां) नादवतीं[26] शुभाम्[27] ।
एवं विश्वासमानीयं[28] नाम कुर्यात्पृथक्[29] पृथक्[30] ॥ २६ ॥

बहवो महिषारूढाः स्वीकुर्वन्त्यथ सूकरान्[31] ।
एवं संयोजितान्कोलान्पृथक्स्थानस्थितांस्तान्बहून्[32] ॥ २७ ॥

एकत्र मेलने तज्ज्ञो विपिने सुखधामनि[33] ।
निर्जनं तृणभूयिष्ठं लताविटपिसङ्कुलम् ॥ २८ ॥

वासार्थं कल्पयेत्[34] स्थानं सोदकं पोत्रिणां[35] सुखम् ।
विरलोरुद्रुमस्थाने वेदीं[36] कुर्याद्विचक्षणः[37] ॥ २९ ॥

हस्तमात्रसमुत्सेधां[38] मध्यभागसमुन्नताम्[39] ।
तस्याः पार्श्वे कटैर्भित्तिं[40] कल्पयेदेपचारिणाम्[41] ॥ १५३० ॥

---

१ A सी। २ A समुखि। ३ D त्वा। ४ A छ। ५ A त्त। ६ A संत्र। ७ A ष्वा। ८ A न। ९ A के। १० A तेषा। ११ A निक्षये। १२ A ध। १३ A त। १४ A सा। १५ D तं। १६ A च। १७ A नि। १८ A र। १९ A छ। २० D नः। २१ A हं। २२ A श्व। २३ A प्र। २४ A ति। २५ D षं। २६ A दि। २७ A धि। २८ A द। २९ A ती। ३० A ताम्। ३१ A भा। ३२ A या। ३३ A प्र। ३४ A प्र। ३५ A स्रो। ३६ A रा। ३७ A ताव। ३८ ∀ हु। ३९ A नै। ४० A ध। ४१ A ति। ४२ A तू। ४३ A ये स्था। ४४ A णा। ४५ A ल्खां। ४६ A रु। ४७ A दि। ४८ A ण। ४९ A शेर्षा। ५० A र्श्व। ५१ A र्तिंत्ति। ५२ A दं। ५३ A णि।

यथा विद्धं[1] न पश्यन्ति[2] सूकरास्तत्र[3] संस्थिताः[4] ।
अपरस्मिं[5] (स्मिं)स्ततो वेद्याः[6] पार्श्व(श्वें)स्थानं प्रकल्पयेत् ॥ ३१ ॥

ऊरुदन्ध[7] (ध्नं) कटच्छन्नं[8] विद्धसूकरवारणम् ।
वेदिकायां[9] प्रकुर्वीत[10] नृपस्थानसमाश्रयम्[11] ॥ ३२ ॥

हस्तमात्रान्तरं मौ[12](स्था)नं महिषागमकारणम् ।
वेदिमारोहयेत्कोलान्प्रेत्यहं[13] चणकान्किरेन्[14] ॥ ३३ ॥

लोभयेत्पायसै[15] (सैः) पिष्टैर्ग्रासकैश्च[16] सुपिण्डितैः[17] ।
एवं सुशिक्षितान्कुर्याद्वेदिकारोहणे किरी[18][न्] ॥ ३४ ॥

दिवा यामत्रयादूर्ध्वं[19] चारयेत्सु(त्सू) करान्[20] क्रमात् ।
ज्येष्ठमासात्समारभ्य[21] हेमन्तावधि[22] पोषयेत् ॥ ३५ ॥

ततः पुष्टा[23] भवन्त्येते घृतपिण्डोपमा(मां)गताः[24] ।
नृपस्य पश्चात्कुर्वीत[25] किञ्चिदूने[26] निवर्तते(ने) ॥ ३६ ॥

मण्डपं सुविशालं[27] च तृणभित्तिसमन्वितम् ।
तस्य पार्श्वद्वये कुर्याद्भित्ति(तिं)[28] कण्टकनिर्मिताम्[29] ॥ ३७ ॥

प्रकुर्वीत[30] तथा[रम्यां] जनदर्शनरु(रू)पिणीम् ।
पटं नाम तदाख्यातं[31] राजयोग्यं सकौतुकम् ॥ ३८ ॥

फुंडु(फड)मेवंविधं कुर्यान्मृगयुमृगमाह्वयेत्[32] ।
ततश्चान्तःपुरैः[33] पुत्रैः सामन्तैर्मण्डलेश्वरैः[34] ॥ ३९ ॥

प्रसादपात्रैरन्यैश्च[35] परमण्डलकैरपि[36] ।
वृतो[37] राजा विनोदार्थमागत्य कियदन्ततः[38] ॥ १५४० ॥

---

१ A र्धं । २ A स्य । ३ A त । ४ A ता । ५ A स्मिश । ६ A द्या । ७ A कु । ८ A छनं । ९ A सु । १० D द्याः । ११ D र्वन्ते । १२ A याम् । १३ A भा । १४ त्का । १५ A त्र । १६ A रे । १७ A त्त । १८ A र्द्धा । १९ A डि । २० सूक्षिता । २१ A किं D किरेत् । २२ A दुर्ध्वं । २३ A रा क । २४ D ष ष्ठ । २५ A स । २६ A न्तो । २७ A पृ । २८ A तवेत्थे । २९ A घ्र । ३० A ता । ३१ A कुर्वि । ३२ A किवि । ३३ A सू । ३४ A वश्योतिति । ३५ A ट्ट । ३६ A त्तिकंकं । ३७ A तम् । ३८ D omits this line । ३९ A खा । ४० D फ । ४१ A र्यांट्ट । ४२ A र्श्यमा । ४३द्ध । ४४A त । ४५ A रै । ४६ A त्रै । ४७ A संयते । ४८ A न्यें । ४९ D लि । ५० A त्ते । ५१ A ज । ५२ A त ।

विनिवार्येतरं लोकं[1] पटं यायान्महीपतिः[2]
पूर्वाख्यात्प्र(तान्म)वेश्याथ स्वयं च प्रविशेन्नृपः[3] ॥ ४१ ॥

मण्डपे च महादेवी प्रेयसीजनसंवृताम्[4] ।
यथायोग्यासने सर्वान्[5] प्रवेश्य च महीपतिः[6] ॥ ४२ ॥

मृगयोचितनेपथ्य(:) कल्पद्रुम इवापरः[7] ।
म(ग)त्वा पूर्वदिनं(ने)स्थानमात्मार्थं[8] परिकल्पितम् ॥ ४३ ॥

दृढकोदण्डमादाय काण्डान्निशितभल्लकान्[9] ।
आहूतान्नामभिः[10] कोलान्महिषारूढलुब्धकैः ॥ ४४ ॥

वेद्यामारोपितान्विध्येदाकर्णाकृष्टसायकैः[11] ।
एकैकं क्रमशो विध्येत्कक्षामर्माणि भूपतिः[12] ॥ ४५ ॥

पतितानानयेच्छीघ्रं महादेव्याः पुरो न्यसेत्[13] ।
एवं तु चारजा प्रोक्ता मृगाणां पोत्रिणामपि ॥ ४६ ॥

भूलोकमल्लदेवेन मृगयानन्ददायिनी ।
आढकीतिलनिष्पावगोधूमचणकादिभिः ॥ ४७ ॥

पुष्पितैः फलितैः पूर्व(र्ण)[14] क्षेत्रमायान्ति खादितुम् ।
मृगाः सुबहवस्तस्मिन्कुर्यात्तोयवदङ्गणम् ॥ ४८ ॥

गर्ते वा भूगृहे स्थित्वा मृगान्विध्येन्नराधिपः ।
मृगया क्षेत्रजा प्रोक्ता बहुसस्यप्रभेदतः ॥ ४९ ॥

साम्प्रतं कथ्यते सम्यङ् मृगया मार्गसम्भवा ।
पानार्थं वा(खा)दनार्थं वा येनायान्ति पथा मृगाः ॥ १५५० ॥

---

१ A छोकें। २ D वा। १ D ति। ४ A प। ५ A वीं। ६ A सं। ७ A तम्। ८ A घा। ९ A गा। १० A नुवस्या। ११ A हि। १२ A वि। १३ A ला। १४ A नू। १५ A र। १६ A पु। १७ D नं। १८ A र्थं। १९ A निसि। २० A त। २१ A श। २२ A हु। २३ A न्मा। २४ A तिः। २५ A लाम। २६ A स्वान्छुलुक्ष। २७ A क्विध्य। २८ A कै। २९ A शतसो। ३० A क्क। ३१ A तू। ३२ A ति। ३३ A यदि। ३४ A छी। ३५ A पु न्य। ३६ A नु। ३७ A वा। ३८ AF कादिति...। ३९ D adds this stanza। ४० A तै। ४१ A तै। ४२ A पुर्वते। ४३ A भायस्वादिनु। ४४ A गा। ४५ A तूम। ४६ A न। ४७ A यो। ४८ A हस। ४९ A ति द्र ५० A न्तया। ५१ A र्थं।

पन्थानं तं समाश्रित्य गर्ते वा विटपेऽथवा ।
धृत्वा दीपमृगान्राजा हरितांशुककञ्चुकः ॥ ५१ ॥

पञ्चकैर्लुब्धकैर्युक्तो विध्येद्रात्रौ दिवाऽपि वा ।
दिवा चेत्प्रेयसीस्थानं किञ्चिद्दूरे प्रकल्पयेत् ॥ ५२ ॥

गुल्मवद्विटपैश्छन्नं कुर्यात्स्थानमलक्षितम् ।
मार्गजैर्वं समाख्याता कर्थ्यते(त) ऊषरोद्भवा ॥ ५३ ॥

ऊषरं स्थानमागत्य ने(ले) हनाज्जातगर्तके ।
पर्वतस्य तटे कूले सरितः पल्वलस्य वा ॥ ५४ ॥

मुखं प्रवेश्य खादन्ती(न्ति) मृत्तिकां लवणान्वितां म् ।
तत्र वायुगतिं ज्ञात्वा तिष्ठेच्चं विटपान्तरे ॥ ५५ ॥

मृत्तिकां लेलिहानांस्तान्निम्नदेशे व्यवस्थितान् ।
पृष्ठवंशे दृढं विध्येद्यथा वृक्षो विभिद्यते ॥ ५६ ॥

उ(ऊ)षजा मृगया प्रोक्ता वक्ष्मि दीपमृगोद्भवा ।
सारङ्गहरिणादीनां दीपानां वक्ष्मि लक्षणम् ॥ ५७ ॥

रूपतो गुणतश्चैव वयसश्च विभागतः ।
वर्णोक्षि(क्षि)ता महाकायाः सारङ्गास्तरुणाः शु(शु)भाः ॥ ५८ ॥

अभीखाः(वः) स्थिरा धीरास्तथा पांसुसहिष्णवः ।
लोहं कुटिलपर्यन्तं मुखरज्वा समायुतम् ॥ ५९ ॥

प्रान्तयोर्वक्रयो रज्वा दीर्घया सुत(सुनि)योजितम् ।
अन्तरे ककचाकारं विभ्रमः कट(मत्कट)कं गले ॥ १५६० ॥

---

१ A यथा । २ A त्ये । ३ A ये च प्रैलु छबुकैर्युक्तो । ४ A शे । ५ A सि । ६ A किंचिदु । ७ A व । ८ A गृपैं । ९ A स्था १० A त्रन । ११ A व । १२ A थयान्मू । १३ A वं । १४ A जात् । १५ A कु । १६ A र । १७ लवस्य । १८ A ङ्ग । १९ A क । २० A ता । २१ A ति । २२ A च । २३ A का । २४ A तास्तानिन्म । २५ A ता । ३६ A इप्रष्ठ । २७ A ध्योद्य याष्य । २८ D व । २९ A ति । ३० A ति । ३१ A सीदीय । ३२ D वाम् । ३३ A दि । ३४ A प्सल । ३५ A रूप । ३६ A द्यैवं । ३७ येवेसद्य । ३८ A ता । ३९ A ष्णताः । ४० A या । ४१ A ङ्ग । ४२ A णा । ४३ A ता । ४४ A अति D आभी । ४५ A वा । ४६ A पाससहीष्णुव । ४७ A त । ४८ D न्त । ४९ A द्वा । ५० A व । ५१ A चा । ५२ A दि । ५३ D सुनिश्चितम् । ५४ A वा । ५५ A तूतः । ५६ A कंट ।

सव्यापसव्ययोः[1][2] कर्षे[3] ग(द्र)मैनागमयोरपि ।
शिक्षितास्ते[4][5] वराः[6] प्रोक्ताः सारङ्ग[7] दीपसंज्ञिताः[8][9] ॥ ६१ ॥

मुक्ताश्चाभीरवः[10][11] शस्ता(:) पोषकस्यानुयायिनः[12] ।
चरकग्रासलोभेन[13] ये न मुञ्चन्ति पोषकम् ॥ ६२ ॥

वन्यैर्मृगैर्मिलित्वापि[14] ये न गच्छन्ति ते न(व)राः[15] ।
हरिणी[16] तरुणी रम्या शूरा[17] धीरा[18] सुशिक्षिता ॥ ६३ ॥

मुखरी रज्जुसन्धारकोविदा सा प्रशस्यते[19] ।
दलिताण्डं[20] शत(न्न)शृङ्गं तमेणं[21] भण्डकं[22] विदुः[23] ॥ ६४ ॥

हरिणीरूपसङ्काशं[24] गौरवर्णं[25] शुभं[26] वदेत्[27] ।
युवानमटवीमध्ये विधृतं पाशैरज्जुभिः[28] ॥ ६५ ॥

भण्डुकत्वंसमायातमेषाम्[29](णमा)टविकं[30] (का)विदुः[31] ।
अयं स्वभावतो भीरुर्नैव[32] काप्युपयुज्यते[33] ॥ ६६ ॥

लावण्यमुपयोगोस्य[34] लुब्धकैरवधारितः[35] ।
भण्डुको[36] हरिणी वापि हरिणान्न[37] बिभेति चेत् ॥ ६७ ॥

विटपादिविनोदेषु विनियोगस्तयोर्भवेत् ।
निर्मांसस्तु[38] समुद्देशः[39] पीनौ[40] च मदकोशकौ ॥ ६८ ॥

स्कन्धादधस्तथा स्थूलत(स्त) नुशृङ्गे[41] मनोहरे ।
अङ्गानि च विभक्तानि[42] रागस्योत्कटता तथा ॥ ६९ ॥

क्रोधो महांश्च यस्यास्तिर्ह(ह)रिणं तं प्रशस्य( चक्ष )ते ।
रागवान् कोपयुक्तो यो दृशद्भूमौ[43] च वर्तते ॥ १५७० ॥

---

१ A व्यास। २ A योक। ३ A र्षं। ४ A भा। ५ A सि। ६ A स्त। ७ A रामो। ८ A क्तासा। ९ A दि। १० A ता। ११ A स्तास्वाती। १२ A न। १३ A ल। १४ A रा। १५ A णि। १६ A सु। १७ A धि। १८ A सश्य। १९ A दंड। २० D णी। २१ A तड। २२ A दु। २३ A णिरु। २४ A सं। २५ A र्णं। २६ A तं। २७ A हे। २८ A वि। २९ A यसंतीड। ३० A तं। ३१ A च। ३२ A वै। ३३ A दु। ३४ A ता। ३५ A ति। ३६ A नैव। ३७ A ष्क। ३८ A सा। ३९ A वा। ४० A त। ४१ A ते। ४२ A रणि। ४३ A विते। ४४ A स्रतोत। ४५ A मस्तु। ४६ A दे। ४७ A नोमर्द। ४८ D नू। ४९ A ०मानि। ५० A त। ५१ A ति। ५२A हा। ५३ D न्यो। ५४ A श्यौ।

लावयित्वा तु[1] तं शृङ्गे[2] दीपार्थं[3] धारयेत्[4]सुधीः।
धृतस्तु[5] बध्यते शृङ्गे रज्वाँसो[6](सौ) मेढके दृढम् ॥ ७१ ॥

भ्रामयः प्रातश्च सौंयं[7] च धृतशृङ्गो जनान्तिके।
पञ्चाशै(श्चषै)र्दिवसैर्यातै[8]र्मुखे[9] रज्जुं[10] निवेशयेत्[11] ॥ ७२ ॥

धृतशृङ्गं प्रमुञ्चेतं[12] धृत्वा दोरं मुखे स्थितम्।
तेनैव भ्रामयेन्नित्यं[13] हरिणं जनसंसदि ॥ ७३ ॥

दशरात्रे व्यतीते तु भण्डुकं[14] पुरतः[15] क्षिपेत्।
तत्पुच्छदेशमाघ्राय पातयित्वा[16] तु कर्णकौ[17] ॥ ७४ ॥

रोमाञ्चिताङ्गे रागान्धः[18] पुच्छं[19]मुन्नम्य[20] कामुकः[21]।
आरुरुक्षुस्तदा[22] पृष्ठं[23] वारंवारं मुदान्वितः[24] ॥ ७५ ॥

धावत्यनुसरन्वेगाद्[25] भण्डुकं हरिणस्ततः[26]।
ईदृग्विधो वरः[27] प्रोक्तः[28] कृष्णसारस्तु[29] लुब्धकैः ॥ ७६ ॥

कोपाधिकश्चेद्युद्धार्थं[30] योज्यते मृगयाबुधैः[31]।
करतो हरिणा मुक्तां[32] मुक्तसारङ्गवद्वरा(:) ॥ ७७ ॥

दीपलक्षणमित्येवं[40] कथितं[41] सोमभूभुजा।
वर्षाकाले तु सम्प्राप्ते हरिच्छाड्डलकानने[42] ॥ ७८ ॥

पश्चिमे मारुते[43] वाति निदाघे निर्गते नृपैः[44]।
पार्थिवैः[45] प्रातरुत्थाय पापर्धिकजनैर्वृतः[46] ॥ ७९ ॥

पापर्धिं(र्धिं)[47] दीपमृगजां[48] सेवते पृथिवीपतिः[49]।
सारङ्गान्वीक्षयेद्यत्नाद्[50]दृष्टव्यां[51] स्वेच्छया[52] स्थितान् ॥ १५८० ॥

---

१ A तु। २ A द्वि। ३ A र्थं। ४ D यन्। ५ A धी। ६ A ते सु। ७ A ज्ञा। ८ A ट। ९ A त्वाम्यषा। १० A सीर्य व। ११ A र्वि। १२ A ख। १३ A ति। १४ A चैत्य। १५ A ल। १६ A नितां। १७ A ति। १८ A तेड्ड। १९ A न। २० A पतई त्यासु। २१ A कै। २२ A र्मी। २३ A छं। २४ A कम्। २५ A क्ष। २६ A था। २७ A प्र। २८ A तम्। २९ A गातेड्ड। ३० A त। ३१ A द्र। ३२ A र। ३३ A क्त। ३४ A वलुत्वंच। ३५ A तेड्डहार्थं। ३६ A धै। ३७ D क्ताः। ३८ A क्त शा D क्तां सा। ३९ A द्धरा। ४० A द्वि। ४१ A त्वां। ४२A तूलडा। ४३ A छाड। ४४ A भार। ४५ A प। ४६ A पाप। ४७ A दि। ४८ A नां। ४९ A प्रथपि। ५० A ति। ५१ A नी। ५२ D बाना। ५३ A दृढ। ५४ A छ। ५५ A ता।

न पश्यन्ति यथा ते च वीक्षेरंल्लुब्धकास्तथा ।
समीराभिमुखं यत्र शाखाछन्नाङ्गयष्टयः ॥ ८१ ॥

अथवीक्षासि(ति)रोधानां(नाः)पश्येयुः पृश(ष)तां छं(ताञ्श)नैः ।
आसीवा(ना)न्नदंतो वापि प्रष्ठे(ष्ठै)क्रमुपवेशयेत् ॥ ८२ ॥

अत्र स्थित्वा निरीक्षस्वं चलितांनुगच्छतान् ।
यथा त्वां ते न पश्यन्ति तथा गच्छं शनैः शनैः ॥ ८३ ॥

पत्राणि विकिरेद(रन्न)ग्रे बुद्धिमान्त(भ)व लुब्धकं ।
त्वं(त)मेकं च समादिश्य सं(त)दन्यावपसृत्य च ॥ ८४ ॥

दृष्टिमात्रान्तरे त्वेकं तं पश्येतति(श्यन्तन्नि)वेशयेत् ।
ततश्चैकं(कः) समागच्छेद्विटपान्विकिरन्य(न्न)पि ॥ ८५ ॥

नृपान्तिकं समागत्य दृष्टास्तिष्ठन्ति भूमिप ।
इति विज्ञापितो राजा निवार्य सहवर्तिनाम्(नः) ॥ ८६ ॥

द्वित्रैश्च लुब्धकैर्युक्तो दीपसारङ्गहस्तकैः ।
विकीर्णमृगमार्गे वै हयारूढो महीपतिः ॥ ८७ ॥

आगत्य च कियद्दूरं तेन ख्यातां (तो) नरेश्वरः ।
वाहादवतरेत्तत्र छं(स्थ)लं पश्यन्मृगोचितम् ॥ ८८ ॥

कृत्वा तु जङ्घयोस्त्राणं कीटकण्टकवारणम् ।
चापमादाय हस्तेन काण्डपञ्चकसंयुतम् ॥ ८९ ॥

दीपमन्येन हस्तेन शिक्षितं पृष्ठतां(तं) वरम् ।
विज्ञौ विश्वाससंयुक्तौ दीपसारङ्गहस्तकौ ॥ १५९० ॥

---

१ A स्य । २ A विक्षरं । ३ D तः । ४ A मि । ५ A ति । ६ A शोषा । ७ A वाक्षि । ८ A नां । ९ A प्राशे । १० A छनौ । ११ A सि । १२ A ढ । १३ A ना । १४ A प्रष्टेकम् । १५ A स्थः तां च । १६ D क्षेत । १७ A लीनिता । १८ D न्न । १९ A चां । २० A यस्य । २१ A छ । २२ A नै । २३ A मन्त्रा । २४ A करान्य । २५ D म्नि । २६ A द्धी । २७ D कः । २८ A मेकं । २९ D शवत्या । ३० D य । ३१ A ष्ठम । ३२ A न । ३३ A पाविकरन्य । ३४ A क । ३५ A स्व । ३६ A तूपप भूमिपम् । ३७ A वतिनां D वर्तिना । ३८ A त्रिष्व । ३९ D र्युक्ते र्दी । ४० A कै । ४१ A क । ४२ A ढ । ४३ A हि । ४४ A द्व । ४५ D ताना । ४६ D तान् । ४७ A र । ४८ D तत्र । ४९ A पश्य । ५० A गान्विते । ५१ A कत्रा । ५२ A नु । ५३ A स्तापा । ५४ A दि । ५५ A नो । ५६ A सिक्षते । ५७ A प्रवर्ते । ५८ A ज्ञो । ५९ A दि ।

लुब्धकावनुगच्छेतां सावधानौ[1] नृपेरितौ[2]।[3]
अन्तरस्थान्तिकं(निको)[4] गत्वा पुरस्थमनुबोधयेत् ॥ ९१ ॥
तेनाहूतास्ते गच्छेयुर्युवभिर्वृ(यवसैर्वृ)तमूर्तयः[5]।[6]
सारङ्ग दर्शितास्तेन स्वेच्छासञ्चारवर्तिनः[7] ॥ ९२ ॥
विघ्नन्तो[8] विटपान्केचित्केचिल्लीलादृतावहा(हवाः)[9]।[10]
शयानाः कुत्रचित्केचित्केचिद्रोमंथ ( मन्थ ) कारिणः[11] ॥ ९३ ॥
तृणग्रासरताः[12] केचित्केचित्कण्डूयनोद्यताः[13]।[14]
एवंविधान्मृगान्दृष्ट्वा विविच्य[15] विटपावलीम्[16] ॥ ९४ ॥
विशेयुर्मृगसार्थस्य[17] दृष्टिं हित्वा[18] शनैः[19] शनैः[20]।[21]
वीक्ष्यमाणेषु तिष्ठेयुः[22] प्रविशेयुश्चरत्सु[23] च ॥ ९५ ॥
पुरो[24] दीपमृगान्कृत्वा व्रजेयुर्जानुभिः[25] शनैः[26]।[27]
स्तब्धाङ्गाः[28] स्तब्धकर्णाश्च[29] प्रसारितशिरोधराः[30] ॥ ९६ ॥
वीक्ष्यन्ते[31] भे(चे) दविश्वस्ता विश्वस्ताः[32] शिथिलाङ्गकाः[33]।[34]
चरन्तो विलिहन्तोङ्गमासीना मिलितेक्षणाः[35] ॥ ९७ ॥
विश्वस्तास्ते मृगा ज्ञेया मृगचेष्टाविशारदैः[36]।[37]
विश्वस्तांते समायान्ति मृगा दीपमृगान्तिकम्[38] ॥ ९८ ॥
संयोगार्थं[39] रतौ (ता)र्थं वा युद्धार्थं वा रुषान्वितः(ताः)[40]।[41]
स्वल्पं विटपमासाद्य तिष्ठेत्स्वस्तिकदुर्दुरे[42] ॥ ९९ ॥
मध्ये विटपके तिष्ठेदालीढस्थानके[43] नृपः[44]।[45]
उन्नतं[46] तरुमाश्रित्य वैशाखं[47] स्थानमाश्रयेत्[48] ॥ १६०० ॥

---

१ A छे। २ A धातौ। ३ D र। ४ A तिगं। ५ D तत्पुच्छ । ६ A स्तेनाहूति व्रजस्तेयुवनै-संमुवर्त्तपूर्त्तय । ७ A शि। ८ A मं। ९ A न। १० A विर्यदपाक्तेकेपिलिलादृता। ११ A विक्तेविकेविद्रोमंच। १२ A णा। १३ A ता। १४ A वित्कं । १५ A ण्डु । १६ A तां। १७ A धामृ। १८ A चि। १९ A लिम्। २० A मृ। २१ A र्द्ध। २२ A नै। २३ A नै। २४ A वि। २५ A यु। २६ A खुव। २७ A रादि। २८ A गा। २९ A वृ। ३० A जांनुति। ३१ A नौ । ३२ A त्वां । ३३ A क्षु। ३४ A र्ण। ३५ A शा। ३६ A रा । ३७ A वितांते ते। ३८ A स्था। ३९ A सि । ४० A क। ४१ A व। ४२ A न्ता। ४३ A मिता। ४४ A णा। ४५ A वे। ४६ A सारदे । ४७ A दि । ४८ A र्थं। ४९ D अपाना। ५० A धा । ५१ A ष्टेस्व । ५२ D दुरे । ५३ A ट। ५४ A प। ५५ A त। ५६ A र्षं। ५७ D चरे।

समपादेन वा तिष्ठेत्सन्धाय निशितं शरम् ।
गोपयित्वा तरौ गात्रं वञ्चयित्वा मृगेक्षणम् ॥ १ ॥

सारङ्गमागतं विध्येत् कर्णान्ताकृष्टसायकः ।
बद्धैर्दीपमृगैरेवं निहन्यात्पृषतान्बहून् ॥ २ ॥

मुक्तसारङ्गवेल(ध)स्य विधिं वक्ष्यामि साम्प्रतम् ।
अनेनैव प्रकारेण मुक्तसारङ्गदीपकैः ॥ ३ ॥

प्रविश्याश्रित्य विटपं तिष्ठेत्स्वयमकम्पितः ।
ततस्ते मुक्तसारङ्गा गच्छन्ति पृषतान्तिकम् ॥ ४ ॥

मिलित्वा वन्ययूथेन क्रीडन्ति क्षालिताङ्गकाः ।
अन्योन्यमुखमाघ्राय धौतगन्धमलक्षितम् ॥ ५ ॥

परं विश्वासमागत्य विहरन्ति यथासुखम् ।
विकीर्य चणकानग्रे छोटिकादानसंज्ञया ॥ ६ ॥

ततः स्वपोषकाहूतैः समायान्ति तदन्तिकम् ।
दीपैः सार्धं समायान्ति वन्यैः सारङ्गकाद्रु(द्रु)तम् ॥ ७ ॥

अयमेकप्रकारोऽथ द्वितीयोथ (पि) निगद्यते ।
बलीवर्दं तिरोधाय परिभ्रम्यातिदूरतः ॥ ८ ॥

गच्छन्तमनुगच्छन्तो मुक्ता सारङ्गदीपकाः ।
सहसासन(न्न)मार्गेण पोषके दत्तचक्षुषः ॥ ९ ॥

वन्यैर्मृगैर्मिलन्त्येते मुक्तसारङ्गदीपकाः ।
पोषकैः पवनस्यार्धैः समागत्य मृगान्तिके ॥ १६१० ॥

---

१ A ष्ठ । २ A त । ३ A श्ये । ४ A ष्ण मायकं । ५ A व । ६ A दीय । ७ A हु । ८ A वामुक्त । ९ A लेष । १० A त्पकै । ११ A प । १२ A छेत्व । १३ A ता । १४ A न्त । १५ A मी । १६ A त्रि । १७ A तागका । १८ A षां । १९ A व । २० A कि । २१ A ता । २२ A तं । २३ A षै । २४ A र्धं । २५ A न्या । २६ A ङ्गु । २७ A रेण । २८ A र्दं । २९ A तृणात्-वुस्त । ३० A छंतु । ३१ D त्वा । ३२ A दिपका । ३३ A स्थान । ३४ A वहु । ३५ A अ । ३६ A लि । ३७ A सू । ३८ A दिपकं । ३९ A क । ४० A च । ४१ A न्तकौ ।

निविष्टो लक्षितो[1] भूत्वा तिष्ठेद्दीपस्य[2] पोषकः[3] ।
बलीवर्दतिरोधानं[4](नाः)वेष्टयन्ति[5] समन्ततः[6] ॥ ११ ॥

ततो नृपं समाहूय[7] कृत्वा शाखिनमाश्रयम् ।
निखाय विटपानग्रे पृष्ठे पार्श्वे समन्ततः ॥ १२ ॥

देवीनामाश्रयैः[8] स स्यान्नृपपाश्चात्यभागतः[9] ।
लुब्धकानां पुरोभागे विटपान्तरितस्तथा[10] ॥ १३ ॥

पूर्वं[11] प्रकल्पयेत्स्थानमानयेत्पोषकं[12] ततः ।
पोषकस्य समायान्ति संज्ञया[13] दीपका मृगाः[14] ॥ १४ ॥

वन्यास्तान्[15]ननुगच्छन्ति बलीवर्दतिरोहिताः[16] ।
ततः[17] समीपमायातान्सारङ्गांश्चलनोद्यतान्[18] ॥ १५ ॥

विध्येत्कर्णान्तकृष्टेन बाणेन निशितेन च[19] ।
रुरुमनेन[20] मार्गेण शम्बरान्हरिणानपि ॥ १६ ॥

मुक्तद्वी(दी)पमृगैर्युक्तान्विध्येद्विश्वम्भरापतिः[21] ।
पोतः[22] षण्मासिकः प्रोक्तो वर्कडो[23] हरिणो भवेत् ॥ १७ ॥

अत ऊर्ध्वं[24] तु वाघेरो वर्षमेकं[25] निगद्यते ।
.... लेको नामत्वत ऊर्ध्वं तत्रु ....
मांसषङ्के[26] ततो[27] याते[28] मसुलः[29] परिकीर्त्यते ॥ १८ ॥

तत (तः) संवत्सरादूर्ध्वं[30] कृष्णसारो भवेन्मृगः[31] ।
गुल्ममार्गदरीगुल्मां[32] कृत्वा सीमां समन्ततः[33] ॥ १९ ॥

स्वीकुर्वन्त्यटवीं[34] तत्र सहते नान्यमेणकम्[35] ।
..... छया[36] स्थितम्
आदाय हरिणीदीपं[37] गच्छेत्तस्यान्तिकं नृपः ॥ १६२० ॥

---

१ A ते तू चा । २ A दी । ३ A क । ४ A दा । ५ A याति । ६ A त । ७ A हु । ८ A धाव । ९ A ष्ट । १० A वि । ११ A य । १२ A त्तागत । १३ A त्वा । १४ D एवं । १५ A कल्पय । १६ A कसूत । १७ A स । १८ A दि । १९ A गा । २० A स्तानग । २१ A तः । २२ A त । २३ A पयाता । २४ A य । २५ A द्ये । २६ A ता । २७ A त । २८ A ति । २९ A यो । ३० D क्रडा । ३१ A उर्द्धं वु वाद्यै । ३२ A मै । ३३ D omits this line । ३४ A समास । ३५ A ड्ड । ३६ A ता । ३७ A ते । ३८ A कि । ३९ A स । ४० A दु । ४१ A वे । ४२ A ग । ४३ A रि । ४४ A ल्मा । ४५ A त । ४६ A न्यटवी । ४७ A क । ४८ D omits this line । ४९ A णिदि ।

आश्रित्य विटपं राजा चालयन्हरिणीं पुरः[२]।
दर्शयेद्वी(द्वी)पमेणस्य[३] निगूहितनिजाङ्गकम् ॥ २१ ॥

हरिणं भण्डुकासक्तमारोहन्तं स्मरावरम्[६]।
आत्मनः पश्चिमे भागे दर्शयेदूर्ध्वदेशतः[७] ॥ २२ ॥

कामासक्ता मृगीः[१०] प्रोक्ताः[११] सवर्णा यान्ति[१२] सत्वरम्।
तत्र वेध्यो मृगः[१४] शीघ्रं सम्मुखोऽपि[१५] महीभुजा ॥ २३ ॥

आगत्य[१६] दूरतो स्थित्वा यदि नायाति कातरः।
पार्श्वात्यमानयेदेणं[१८] तथा भण्डुकसंयुतम्[१९] ॥ २४ ॥

हरिणं भण्डुकासक्तं[२०] धृत्वैव[२१] पुरतो व्रजेत्[२२]।
हरिणो(णं)[२३] भण्डुको(कं) वापि धृत्वान्यस्तमनुव्रजेत् ॥ २५ ॥

अन्यो[२४] धृत्वा बलीवर्दं[२५] तिष्ठन् गन्धवहादधः।
वायोरधस्तमायान्तं[२६] प्रयत्नेन निवारयेत् ॥ २६ ॥

कृष्णसारं तिरस्कृत्य जानुभ्यां[२७] ते शनैः शनैः।
गच्छेयुर्हरिणाभ्यांशं[२८] प्रेरयन्तो मृगीं[३०] पुरः[३१] ॥ २७ ॥

ततस्त्वरण्यहरिणं(णः) कुण्डलीकृतपुच्छकम्[३३] (कः)।
श्रवसी संश्रवयितुं[३६] सम्मुखं[३७] परिधावति ॥ २८ ॥

ग्रीवां प्रसार्य सारेण यदा वोढुं[३९] स गच्छति।
मृगीं तदा समाकर्षेत्किञ्चित्किञ्चित्पुनः पुनः ॥ २९ ॥

कामासक्तं भृशं[४४] ज्ञात्वा निजरूपं प्रदर्शयेत्।
शब्दं च श्रावयेदेनं रोषमुत्पाद्य लुब्धकः[४५] ॥ १६३० ॥

---

१ A रणि। २ A रा। ३ A णणस्य। ४ A ही। ५ A ते। ६ D मरारु। ७ A दु। ८ A कम्। ९ A मशक्त्या। १० A गा। ११ A क्ता। १२ A ति। १३ A श्यो। १४ A गं। १५ A रे। १६ A तां दुं। १७ A पश्चाताग्रामाणे। १८ A तेडु। १९ A तै। २० A ते। २१ A मृगैकं। २२ A वृजो। २३D omits this line। २४A न्यो मृ D न्यं। २५A लिवृदै। २६ A पायातां। २७A त्यां। २८ A छे। २९ A भास। ३० A गी। ३१ A र। ३२ A स्व। ३३ A लि क्क। ३४ A श। ३५ A सि। ३६ A श्र। ३७ A नु। ३८ A ख। ३९ A ढं। ४० A छ। ४१ A गो। ४२ A वर्षे। ४३ A कि वि किंवित्। ४४ A तृ। ४५ A क।

बलीवर्दकरं पश्चादानयेत निजान्तिकम् ।
बलीवर्दैतिरोधानानुत्थाय(प्या)भ्रांम्य तस्त्व(त्त्व)तः ॥ ३१ ॥

ततस्त्वरण्यहरिण इतश्चेतश्च धावति ।
वायोरूर्ध्वमधो गत्वा ज्ञात्वा गन्धं तु मार्गजम् ॥ ३२ ॥

रूपमङ्गं तथा गन्धमनुभूय स्मरातुरः ।
आयात्यासन्नमं (म) त्रस्तो रिरंसुह(हे)रिणो यदा ॥ ३३ ॥

तदा क्षीवपदं गत्वा ज्ञात्वा वायुमधो वसन् ।
पूर्ववत्प्रेरयेदेणीमेणं निकटमानयेत् ॥ ३४ ॥

पापर्धिकाः समुत्थाय वेणी(णीं) कृत्वा तमेणकम् ।
मुष(ख)मुष्टिसमायोगाद्वेवाशब्दं प्रकुर्वते ॥ ३५ ॥

शृङ्गं धृत्वा विमुञ्चन्ति वटं बध्नन्ति शृङ्गयोः ।
एवं गतिकं ज्ञात्वा विज्ञपेयुर्महीभुजम् ॥ ३६ ॥

ततो राजा प्रमोदेन प्रमदाजनसंयुतः ।
प्रसादचिन्तकैः सार्धं बलीवर्दतिरोहितः ॥ ३७ ॥

आगत्य हरिणस्थानं पाणावादाय कार्मुकम् ।
अर्धचन्द्रं शरं मौर्व्यां सन्धाय निशितं नृपः ॥ ३८ ॥

विध्येत्तु कन्धरां तस्य यथा राहोः शिरो हरिः ।
तेनोत्कर्षमवाप्नोति चापकर्मणि पार्थिवः ॥ ३९ ॥

दीपजैवं समाख्याता मृगया चित्तहारिणी ।
भूलोकमल्लदेवेन भुवनख्यातकीर्तिना ॥ १६४० ॥

---

१ A दा । २ A छा । ३ A त्वस्थतसून । ४ A स्वराणा । ५ A र । ६ A ते । ७ A रुधं । ८ A न्धनु । ९ A जैकं । १० A रु । ११ A तू । १२ A पु । १३ A त्याय । १४ A चं ह । १५ A सेत् । १६ A यंने । १७ A ति । १८ A छायन् । १९ A न्वेणी । २० A क्र । २१ A मू । २२ D दैवाच्छ । २३ A ये । २४ D लग । २५ A जये । २६ A हिभू । २७ A ता । २८ A गतकै । २९ A तः । ३० A णां । ३१ A न्द्र । ३२ A व्या । ३३ A संजा । ३४ A पं । ३५ A धातु । ३६ A त्वा । ३७ A रि । ३८ A वा । ३९ A प्र । ४० A तू । ४१ A ल । ४२ A तू । ४३ A कि । ४४ A ता ।

विधृत्य विटपं पाणौ पत्रान्तरितविग्रहः[1]।
प्रभञ्जनगतेश्चाधः[2] स्थित्वा गत्वा मृगान्तिकम्[3] ॥ ४१ ॥

पश्चिमे मारुते वाति नानाविटपसञ्चये[4]।
कोमलैः[5] पदसञ्चारैर्वने[6] हरितशाद्वले[7] ॥ ४२ ॥

अलक्ष्यो वृक्षवद्भूत्वा शनैर्गत्वा मृगान्तिकम्[8]।
विध्येन्निशितभल्लेन[9] मृगान्मर्मणि[10] पार्थिवः[11] ॥ ४३ ॥

एवं विटपजा प्रोक्ता वध्रीजा[12] कथ्यतेऽधुना।
मृगकुत्तिकृता[13] दीर्घा तत्तन्नूरोमसंयुता[14] ॥ ४४ ॥

मृगयूथं समावेक्ष्य तत्र वध्रीः[15] प्रसारयेत्[16]।
उयर्युपरिपङ्क्तिस्थास्तिर्यग्वाति[17] समीरणे ॥ ४५ ॥

वध्रीपान्तप्रदेशे[18] तु विटपे निवसेन्नृपः[19]।
अन्यतो लुब्धकाः[20] सर्वे बलीवर्दकरा अपि ॥ ४६ ॥

एकतो मृगयूथस्य शब्दैः[21] कुर्वन्ति तर्जनम्[22]।
मृगाः[23] पलायनपरा लङ्घयन्ति न वध्रिकाः[24] ॥ ४७ ॥

वध्रिकाभ्यांशमार्गेण[25] समायान्ति[26] नृपान्तिकम्[27]।
तत्र विध्येच्छरैस्तीक्ष्णैर्लाघवं[28] दर्शयन्नृपः[29] ४८ ॥

एवं तु वध्रीजा[30] प्रोक्ता मृगया कौतुकाश्रया।
कथ्यते काण्डपटजा मृगयाः[31] राजसम्मता ॥ ४९ ॥

विदित्वा मृगसञ्चारं[32] गहनं वीक्ष्य[33] काननम्[34]।
सावकाशे प्रदेशे च[35] कुर्वीत विटपाश्रयम्[36] ॥ १६५० ॥

---

१ A हा। २ A तेड। ३ A साधः। ४ A कां। ५ A कंपिते तस्सेवयेत्। ६ A लैप। ७ A रैव। ८ A नि। ९ A त। १० A गाम। ११ A णी। १२ A व। १३ A ध। १४ A क। १५ A दिर्प्पो। १६ A लनु। १७ A ध्रीः। १८ A ल्रियांवा। १९ A घो। २० A ति। २१ A नृ। २२ A कास। २३ A ब्दै कु। २४ A गाप। २५ A वं। २६ A ध्री। २७ A त्या। २८ A यांति। २९ A मृ। ३० A छरे। ३१ A छै। ३२ A प्प। ३३ A य। ३४ A ध। ३५ A व्या। ३६ A रग। ३७ A विक्ष। ३८ A तु।

उन्नतं च[1] विशालं च परिकल्प्यं[2] महीरुहम्[3] ।
शाखां छिन्द्यँ[4](च्चा) तरोस्तस्यँ[5] वायव्यासङ्गकारिणीमँ[6] ॥ ५१ ॥

पार्श्वयोश्च पुरो भित्तिँ[7] कुर्याद्धँस्तद्वयान्तरम्[8](रे) ।
पञ्चहस्तप्रमाणेन पश्चादीर्घं[9](र्घाँ) प्रकल्पयेत् ॥ ५२ ॥

छिन्नशाखद्रुमस्याधः पार्श्वयो[10][विँ]टपान्न्यसेत् ।
हरितैः[11] पल्लवैर्युक्तांस्तत्र संवर्धितानि[12][13] च (नपि) ॥ ५३ ॥

नाभिदँ[14]भ्रा(ग्रां)न्तु तां भित्तिं छादयेद्विटपत्रजैः[15] ।
तृणैरलक्षितांँ[16] कुर्याद्[17] व्याघ्रसूकरवारिणीम्[18] ॥ ५४ ॥

दशहस्तान्तरे भित्तेः[19] पार्श्वयोरुभयोरपि[20] ।
आरभ्य काण्डपटंकासा[21](न्सा)रयेद्विस्तृँता[22] पु(न्पु)नैः[23] ॥ ५५ ॥

लुब्धकाँ[24]ः शतसङ्ख्याकाँ[25] गच्छँन्ति[26] नृपशासनात् ।
बहिः[27] काण्डपटेभ्यँस्ते यावत्काण्डँपटावधि[28][29] (धिम्) ॥ ५६ ॥

कोशमात्रावधिस्तँत्र[30] पटानामँन्तयोर्भवेत्[31] ।
पूरँयेयुरिति ज्ञात्वा भटाँ[32] पक्षद्वयस्थिताँः[33] ॥ ५७ ॥

राजा महीरुहं पृष्ठे कृत्वा पृच्छे(पश्ये)दतन्द्रितः ।
पश्चाद्भागे प्रियाः कान्ताः कान्तियुक्ता निवेशयेत् ॥ ५८ ॥

प्रसादँचित[34] (त्त) कांस्तज्ञाँ[35](ज्ञा)ञ्शितशस्त्रधराञ्जँयेत् ।
योषितां पृष्ठभाँगे[36][37] तां(तान्)भित्तिमध्ये निवेशयेत् ॥ ५९ ॥

ततँः[38] पङ्क्तिस्थिताँः[39] सर्वे लुँब्धकास्त्राँसहेतवे[40][41] ।
ध्वनिमुचैः[42] प्रकुर्वन्ति प्र (प) लायन्ते यथा मृगाँः[43] ॥ १६६० ॥

---

१ A व। २ A ल्या। ३ A हि। ४ A द्यस्त। ५ A स्यसाबापव्या। ६ A णि। ७ A तिति। ८ A द्व। ९ A दिर्घा। १० A विटपान्य। ११ A तै। १२ A तत्र। १३ A धि। १४ A तिदभ्रातुतातित्ति। १५ A जै। १६ A व्व। १७ A ता। १८ A र्याव्याद्। १९ A णि। २० A त्तित्ते। २१ A यारुत्तरयो। २२ A ड। २३ A गु। २४ A युत। २५ A का। २६ A सा। २७ A छ। २८ A हिं। २९ A त्य। ३० A ड। ३१ D धिः। ३२ A धीत। ३३ A यन्तयोर्ते। ३४ A पुरुयेशमि। ३५ A त। ३६ A ता। ३७ A वितका। ३८ A ज्ञशि। ३९ A न। ४० A तागेता। ४१ A तिति। ४२ A तत्पक्ति। ४३ A ता। ४४ A तुश्च। ४५ A शास्त्रहेतवो। ४६ A धनीमुचै। ४७ A गा।

पृष्ठतश्चानुगच्छन्ति पङ्क्तिस्थास्तु[1] शनैः[2] शनैः[3] ।
ततो नृपान्तिकं यान्ति मृगाः[4] सर्वे भयातुराः[5] ॥ ६१ ॥

वीथिद्वयेन[6] धावन्ति रुरुसारङ्ग[7]संवराः[8] ।
हरिणाः[9] सूकरा व्याघ्रा वृका[10] ऋक्षाश्च जम्बुकाः[11] ॥ ६२ ॥

विध्येत्तांश्च[12] महीपालो नाना[13]मुखशिली[14]मुखैः[15] ।
धावतो वीथियुग्मेन[16] लक्ष्यलाघव(व)संयुतः[17] ॥ ६३ ॥

प्रकारमन्यं वक्ष्यामि[18] तथा काण्डपटाश्रयम् ।
बली[19]वर्द[20]करैः[21] पुम्भिर्बहुभिर्मृग[22]सञ्चयान् ॥ ६४ ॥

कृतानेकत्र मिलितान् विश्वस्तान्[23] स्वेच्छया[24] स्थितान् ।
वायोरधस्तनाद्देशात्[25] शकटद्व्यर्ह[26](टाद्यह)तैः पदैः[27] ॥ ६५ ॥

वेष्टयेयुः[28] समन्तात्ते बली[29]वर्द[30]तिरोहिताः[31] ।
दूरतो दृष्टि[32]पात(:)स्या मा(न्मा)रुतस्य यथाप्यधः[33] ॥ ६६ ॥

वायोरधस्तथा पार्श्वे वेष्टयित्वा पदैः[34] सितैः[35] ।
वेष्टयेयुर्द्रुतं[36] पश्चाद्[37]ऊर्ध्वभागं[38] न(गम)शेषितम्[39] ॥६७॥

ब(प)टानाक्रम्य[40] तिष्ठन्ति समन्ता[41]ल्लुब्धका दृढम् ।
यथा समीरण[42]स्यापि निष्क्रासो दुर्लभो भवेत् ॥ ६८ ॥

एवं कृत्वा ज(न)येयुस्ते[43] नृपः[44](पं)[45] प्रियजनैर्वृतः[46](तम्) ।
ततः[47] प्रविश्य भूपालः पूर्ववद्विटपाश्रितः[48] ॥ ६९ ॥

बली[49]वर्द[50]करैस्तज्ज्ञैर्विधृतान्मृ[51](मृ)गयूथकान्(काः) ।
समन्तात्परिधावन्त[52] आयान्ति नृपसम्मुखम्[53] ॥ १६७० ॥

---

१ A पङ्क्तीस्थास्तु । २ A नै । ३ A नै । ४ A गा । ५ A तयातुर । ६ A वी । ७ A रंससंवरा । ८ A णा । ९ A करु । १० A का । ११ A ता । १२ A हि । १३ A सु । १४ A सीलि । १५ A खे । १६ A विन्वि । १७ A क्ष । १८ A क्षा । १९ A लिवर्द । २० A रै पुं । २१ A बहु । २२ A मृ । २३ A श्वास्ता । २४ A या...। २५ A स्योष । २६ A देशा । २७ D व्याहतै । २८ A दै । २९ A ष्ट । ३० A ते । ३१ A लिवर्द । ३२ A ता । ३३ A दु । ३४ A या । ३५ A थद । ३६ A दै । ३७ A शितै । ३८ A द्रु । ३९ A त्तुर्व । ४० A गां । ४१ A ते । ४२ A म । ४३ A ल्ल । ४४ A मि । ४५ A थे । ४६ A प । ४७ A भृ । ४८ A त । ४९ A श्रीत । ५० A लि । ५१ A रि । ५२ A वि । ५३ A मृगयुथकम् । ५४ A प । ५५ A अयोति ।

तत्र श्रान्तांस्तृषाक्रान्ताञ्श्वसन्तः(तः) परिधावतः ।
शरैर्नानाविधैर्विध्येद्धरिणान् धरणीश्वरः ॥ ७१ ॥

एवं काण्डपटोद्भूता मृगया परिकीर्तिता ।
सोमेश्वरनरेन्द्रेण वाहजा कथ्यतेऽधुना ॥ ७२ ॥

जात्यमश्वं समारुह्य शिक्षितं जविनं नृपः ।
सितैः सेल्लैस्तथाप्रासैर्हन्यात्तु हरिणादिकान् ॥ ७३ ॥

अश्वजा मृगया प्रोक्ता ताडिका कथ्यतेऽधुना ।
एकरूपेति(नि)ले याति पश्चिमाशासमुद्भवे ॥ ७४ ॥

कोमले शाद्वले स्थाने समे मत्त(पत्र)विवर्जिते ।
रुरुं हरिणमेकं वा निरीक्ष्याक्ष(क्ष्य श)रवर्जितम् ॥ ७५ ॥

निर्वार्य सेवकान्सर्वांस्ताडकेन समन्वितः ।
सशरञ्चापमादाय वसुधाधिपतिर्व्रजेत् ॥ ७६ ॥

वायोरधस्तने स्थित्वा ताडके (कं) प्रेरयेत्ततः ।
दूरतस्ताडको गत्वा भ्रमिता ममवर्त्तगं (काभ्रमवर्तनः) ॥ ७७ ॥

विकीर्य मूर्द्धजान पश्चात्कुर्वाणः करतालिकाः ।
विकृतान्निनदान् कुर्याद्यथा पश्येदसौ मृगः ॥ ७८ ॥

मृगो भ्रान्तमनाः पश्चात्ताडके दत्तलोचनः ।
निश्चलीकृतसर्वाङ्गो वीक्षते नान्यतः क्वचित् ॥ ७९ ॥

ततो राजा समुत्थाय कोमलैश्चरणक्रमैः ।
प्रधावेतु तमायातु मृग(गं)पृष्ठप्रदेशतः ॥ १६८० ॥

---

१ A ता। २ A न्त। ३ A ना। ४ A विच्चैव। ५ A रिणिश्वराः। ६ A ष्ट। ७ A भू। ८ A खेद्रे। ९ A चा। १० A तामश्व। ११ A प। १२ A शितेशैले। १३ A प्रोशेहन्या तु। १४ A नाडी। १५ A ऐ। १६ A रु। १७ A वापिति। १८ A सा। १९ A वेत्। २० A त। २१ A रुरुहं हरिणे। २२ A क्षा। २३ A र्तिनम्। २४ A र्यें। २५ A सर्वा। २६ A ता। २७ A धी। २८ A कृ। २९ A ट। ३० A त। ३१ A तृ। ३२ A ग। ३३ A कि। ३४ A मुर्द्धनान्यश्वा। ३५ A ण। ३६ A का। ३७ A क्रि। ३८ A निन। ३९ A दाकु। ४० A वश्ये दृशो मृग। ४१ A श्रा। ४२ A ना। ४३ A गो। ४४ A वि। ४५ A थ। ४६ A क्ता। ४७ A मौ। ४८ A ङ्ग।

पुच्छदेशं[1] समुद्वीक्ष्य[2] विकृष्य सशरं धनुः[3]।
अनुचित्तं[4] मृगं विध्येद्यथा वक्षसि भज्यते ॥ ८१ ॥

ताडिता(का) मृगया प्रोक्ता वायुजा मन्यतेऽधुना[5]।
प्रचण्डमारुते वाति मिलिते मृगयूथके ॥ ८२ ॥

वायोरूर्ध्वं नृपो गच्छेल्लुब्धकैश्च[6] दशाष्टकैः[7]।
यत्र गन्धवहो याति मृगाणां सम्मुखं ततः ॥ ८३ ॥

आश्रयेच्छाखिनं[8] तत्र विटपं वार्थवा[9] दरीम्[10]।
पाणावाधाय कोदण्डं विविधांश्च[11] शिलीमुखान्[12] ॥ ८४ ॥

गात्रं[13] निगूह्य बाढं च मृगाणां सम्मुखं[14] नृपः।
सन्धाय सायकं तिष्ठेन्मृगयाकेलिकौतुकी[15] ॥ ८५ ॥

गच्छन्ति लुब्धकाः[16] पश्चाज्जल्पन्तो मार्गणा[17] इव।
मृगयूथपरिभ्रान्त्या(न्त्यै) कुर्युस्ते नादमुच्चकैः[18] ॥ ८६ ॥

ततो मृगाः[19] परिभ्रष्टा वायोः[20] सम्मुखगामिनः[21]।
त्वरया परिधावन्ति यत्र राजा व्यवस्थितः[22] ॥ ८७ ॥

पुरोगामिनमुत्सृज्य शेषान्विध्येन्मृगान्नृपः।
एवं तु वायुजा प्रोक्ता दामिनी कथ्यतेऽधुना[23] ॥ ८८ ॥

विधृत्य बलिवर्दं[24] यद् दिवात[प]विवर्जितः।
मृगाननुसरेद्दूरात्प्रत्यहं मृगयुर्वने[25] ॥ ८९ ॥

न लभन्ते[26] मृगा घासं पानीयं[27] नाप्नुवन्ति च।
क्षुत्पिपासासमाक्रान्ताः श्रान्ता मृष्यन्ति लुब्धकम् ॥ १६९० ॥

---

१ A छ। २ A शे। ३ A द्वे। ४ A नु। ५ A चिन्त्य। ६ A न्थे। ७ A मता। ८ A च्छे मृगो। ९ A छे लु। १० A के। ११ A छा। १२ A थदर्शी। १३ A दां। १४ A शिमुख। १५ A त्रातिगुल्हाबाटं। १६ A खो। १७ A कि। १८ A छ। १९ A का। २० A णो। २१ A न्ना। २२ A पुछकै। २३ A गा। २४ A तृ। २५ A यो। २६ A नं। २७ A ता। २८ A प। २९ A म। ३० A ता। ३१ A दैयदि। ३२ A हू। ३३ A पूर्वत। ३४ A तं ते। ३५ A श्वा। ३६ A नि। ३७ A क्षपिप्रासासमांक्रीता मृष्यन्नि लुब्धकं।

ततः[1] क्रमेण निकटं समागच्छति[2] लुब्धकः ।
घासव्यग्राः क्षुधाक्रान्ताः[3] सहन्ते[4] लुब्धकध्वनिम् ॥ ९१ ॥

एवं[5] दमनजा प्रोक्ता कोपजा कथ्यतेऽधुना ।
भूलोकमल्लदेवेन मृगयातत्त्ववेदिना ॥ ९२ ॥

भूम्यर्थं स्त्रीनिमित्तं वा युध्यमानावमर्षिता[11] (तम्) ।
वृक्षान्तरितगात्रस्तु[12] विध्येत्तत्र[13] मृगं नृपः[14] ॥ ९३ ॥

कोपजा मृगया प्रोक्ता साम्प्रतं कामजोच्यते[15] ।
रममाणौ मृगौ कामाद्धन्याद्यत्र नराधिपः[16] ॥ ९४ ॥

कामजा सा मृगव्या स्यादिदानीं[17] ध्वनिजोच्यते ।
आश्रित्य भूरुहं राजा मृगभक्ष्यैः[19] फलैर्युतम्[22] ॥ ९५ ॥

[23]दीपसारङ्गकानग्रे विधार्य[24] धरणीपतिः[25] ।
सारङ्गवदभिज्ञात्वा[26](य) मृगयुः[27] कारयेद् ध्वनिम् ॥ ९६ ॥

ध्वनिं[28] श्रुत्वा समायान्ति[29] सारङ्गा ध्वनिसाम्यतः[30] ।
सायंकाले तथा रात्रौ प्रातर्वा पृथिवीपतिः[31] ॥ ९७ ॥

निशितैर्विशिखैर्विध्येदधिज्याकृष्टकार्मुकैः[34][35] ।
ध्वनिजैवं समाख्याता वर्ण्या मदविकारजा[36] ॥ ९८ ॥

तगरस्य फलं दद्यात्सारङ्गाय विचक्षणः[37] ।
पलाशपुष्पं रुरवे[38] मीनानामिङ्गुदीत्वचः[40] ॥ ९९ ॥

ततः[42] प्रमत्तान्[43] सारङ्गांस्ततो विध्येन्नराधिपः ।
मत्स्यांश्च मलिनोत्तानान्मत्तान्विध्येच्छिलीमुखैः[45](खैः) ॥ १७०० ॥

---

१ A त्र। २ A छ। ३ A न्ता। ४ A देते लुब्धरध्वनि। ५ A ये। ६ A मदनजा। ७ A तृ। ८ A न। ९ A तृ। १० D द्ध। ११ A वंवर्षितौ। १२ A सु। १३ A त। १४ A प। १५ A व्य। १६ A मांब्द। १७ A प। १८ A सा। १९ A नि। २० A तृ। २१ A क्यै। २२ A लैयु। २३ A दि। २४ A र्यं। २५ A ति। २६ A ति। २७ A युक्त्वारयेध्वनि। २८ A नि। २९ A ति। ३० A त। ३१ A ति। ३२ A ते। ३३ A विशिष्यै। ३४ A वृ। ३५ A क। ३६ D र्ण्यै दानीं। ३७ A णे। ३८ A ष। ३९ A मि। ४० A सिगुदीत्वच। ४१ A त। ४२ A त्ता। ४३ A गाः नृपुविध्यै। ४४ A श्याश्च। ४५ A टावि। ४६ A छि।

एवं मदविकारोत्थौ मृगया परिकीर्तिता ।
तुषारजा मृगव्या तु साम्प्रतं कथ्यते मया ॥ १ ॥

प्रावृट्काले वसाने (सन्ते) तु शरदागमने तथा ।
तुषारमलिनस्प(स्य)न्दच्छन्नासु मृगभूमिषु ॥ २ ॥

तुषारसीकरत्रस्ताँ गुल्मान्तां(न्ते) निवसन्ति ते ।
प्रत्यूषात्पूर्वमुत्थाय कृत्वा देवार्चनादिकम् ॥ ३ ॥

आरुह्य तुरगं शीघ्रं शिक्षितं बलसंयुतम् ।
गच्छेदनुदिते भानौ राजा श्यामलकश्चुकैः ॥ ४ ॥

ततः पुरः प्रधावन्ति महिषारूढलुब्धकाः ।
बलीवर्दादिरूढाश्च पश्यन्तो गुल्मकान्तरम् ॥ ५ ॥

सङ्कोचितसमस्ताङ्गान् शीतार्तान् मीलितेक्षणात् (न) ।
सारङ्गादीन् मृगान्दृष्ट्वा कथयेयुर्महीभुजे ॥ ६ ॥

ततश्चापं समादाय ह्रस्वं शृङ्गविनिर्मितम् ।
वैणवं दारुजं वापि तद्योगैः(ग्यैः) सायकैर्युतम् ७ ॥

मृगयोर्महिषस्थस्य पाश्चात्यं भागमाश्रिताः(तः) ।
तावत्तुषारजा प्रोक्ता मृगया शीघ्रकारिणी ॥ ८ ॥

ये (ए) वं तुषारजा प्रोक्ता मृगया शीघ्रकारिणी ।
पाशजा कथ्यते सम्यङ् मृगया तत्क्षयावहा ॥ ९ ॥

स्थूलान्दीर्घान्कृशान् कुब्जान्मृगान् जात्यनुरु(रू)पतः ।
शङ्कुसंयोजितान्पाशान्नानासूत्रविनिर्मितान् ॥ १७१० ॥

---

१ A छा । २ A थी । ३ A स्थानासु । ४ A सु । ५ A खा । ६ A षेर । ७ A स्था । ८ A ल्मता । ९ A षुषापु । १० A विरं । ११ A छे । १२ A स्या । १३ A का । १४ A लि । १५ A यस्यतो । १६ A क्षासीतार्थामि । १७ A दिमृगादृष्ट्वा । १८ A हि । १९ A सु । २० A रिणं । २१ A गै । २२ A यु । २३ A योगर्म । २४ A प । २५ A श्रीत । २६ A तु । २७ A सेव्या । २८ A बहुकौतुकं । २९ A शि । ३० A व्य । ३१ A व्यातङ्क । ३२ A द्दि । ३३ A गजा । ३४ A संकुसां । ३५ A जी । ३६ A शान् कुरुपायुर्विनिमितान् ।

मृदुले [1]भूप्रदेशे तु तृणमध्ये त्वलक्षितान्[2]।
पाशयुक्तान्बहून्[3] शङ्कून् रोपयेत्पाङ्क्तिभित्तिभिः ॥ ११ ॥

प्रसार्य वभ्रमेकत्र[4] परतोऽनुव्रजेन्नृपः।
शिक्षितं जवहीनंश्च[5] सारमेयं विमोचयेत् ॥ १२ ॥

ततो जाल्पा(ला)त्पलायन्ते विहायोत्प्लविकां ततः।
पश्चात्पाशैर्निबध्यन्ते[6] मृगा व्याकुलचेतसः[7] ॥ १३ ॥

ताड्यन्ते लगुडैः[8] पश्चान्मोच्यन्ते कण्ठदेशतः[9]।
एवं[10] तु पाशजा प्रोक्ता[11] जालजाप्येवमेव हि ॥ १४ ॥

जालैर्बद्धांस्तथा[12] व्यालान् रज्जुभ्यां पक्षयोर्द्वयोः[13]।
यन्त्रितान्[14] कण्ठदेशे तु भ्रामयेत्पुरमध्यतः[15] ॥ १५ ॥

दशरात्रे[16] गते पश्चाद्रज्जुमेकां[17] विमोचयेत्।
हरिणं भग्नपादन्तु कृत्वा[18] तस्य पुरोन्यसेत् ॥ १६ ॥

तदु(द्रू)रुस्थितमांसेन चित्रकं द(त)र्पयेत्[19]सुधीः।
मुखं प्रमृज्याद्वैस्तेन[20] सर्वाङ्गं लोडयेदपि ॥ १७ ॥

आभग्नपादं हरिणं दीर्घरजु(ज्जु)नियन्त्रितम्।
[21]मोचयेत्पुरतस्तस्य विचित्रमनुधावति ॥ १८ ॥

व्याघ्रोऽपि रजु (ज्जु) संयुक्तो जवेन हरिणं बली[22]।
आक्रम्य[23] पातयन्नूर्व्यां[24] चर्व्य[25] ग्रीवां[26] पिबत्यसृक्[27] ॥ १९ ॥

ततो रजुः (ज्जुः) प्रमोक्तव्या व्याघ्रकण्ठनिवेशितां[28]।
पश्चाद्विनत्रयेऽतीते[29] मृगं मुञ्चेदरज्जुकम्[30] ॥ १७२० ॥

---

१ A तू। २ A ता। ३ A हुक्तान् रोपयेपंक्तिति। ४ A श्यरतो। ५ A तृ। ६ A हि। ७ A शो। ८ A जजा। ९ A त्प्लवीकायवि। १० A त्पाशेविबध्येते। ११ A स। १२ A ढै। १३ A त। १४ A ये। १५ A क्तालजा। १६ A धाव्याघ्रान् रज्जुत्यां। १७ A यो। १८ A यांत्रिता। १९ A त्वा। २० A पु। २१ A त। २२ A दे। २३ A त्र। २४ A कृतस्य। २५A सुं। २६ A मूर्षं। २७ A द्रू। २८ A गोवयेपु। २९ A लि। ३० A म। ३१ A पुर्व्यां। ३२ A वैं। ३३ A वा। ३४ A त्यसिसृक्। ३५ A त्रो। ३६ A दी। ३७ A ति। ३८ A चे। ३९ A ज।

शिक्षितव्यं ( व्यो ) क्रमेणैव(वं) कृष्णसारवधं प्रति ।
चित्रको व्याघ्रजातीयस्तमरण्यमृगे क्षिपेत् ॥ २१ ॥

आरोप्यँ शकटे व्याघ्रमश्वपृष्ठेऽथवा पुनः ।
मोचयेद्धरिणान् हन्तुं गत्वाऽरण्यं नरेश्वरः ॥ २२ ॥

सावकाशे वनोद्देशे मोचयेदेणवृन्दके ।
अनुसृत्य ततो वेगाद् मृगाँद्विगुणवेगवान् ॥ २३ ॥

विहाय हरिणीवृन्दं कृष्णसारं जिघांसति ।
एवं तु व्याघ्रजा प्रोक्ता मृगया विस्मयावहा ॥ २४ ॥

एकविंशतिभेदोऽयं विनोदो मृगयोद्भवः ।
मृगेन्द्रावधिकः प्रा(कप्रा)णैः कथितैः सोमभूभुजा ॥

इति प्रोक्तः प्रकर्षेण विनोदो मृगयोद्भवः ॥२५॥ ॥१७२५॥

॥ इति चतुर्थविंशतेः पञ्चदशोऽध्यायः ॥

द्वितीयो भागः समाप्तः ।

---

१ A छश । २ A ति । ३ A णा । ४ A धस । ५ A णांहंतु । ६ A त्वाचार । ७ A र । ८ A नादे । ९ A गामृ । १० A गाद्वि । ११ A णि । १२ A त । १३ A घ्रपो । १४ A ण । १५ A त । १६ A क्त । १७ A कारे । १८ A gives the following two lines in addition :—

मृगेन्द्रावधिकः प्राणं कथिता सोमभूभुजा ॥
इति प्रोक्तप्रकारेण विनोदो मृगयोद्भवः ॥